MARY 1-87

Sri. Ravi Varma Sanskrit Series No. 17.

# SUBODHINI

A COMMENTARY OF BHASHAPARICHEDA, MUKTAVALI, DINAKAREEYA & RAMARUDREEYA

*By*

DARSANA KALANIDHI
HIS HIGHNESS
**Rama Varma Pareekshith Thampuran**

*With Tippani by*

PANDITHARAJA - NYAYATILAKA
MANTHITTA KUNJU NAMBUDIRI

**The Sanskrit College Committee**

**Sree Rama Varma Govt. Sanskrit College, Tripunithura**

**Kerala - S. India**

16-8-1987

Price Rs. 30/-

# PREFACE

Mukthavali, the commentary on Bhasha Parichedam, is commented upon by Dinakarabhatta in Mukthavaliprakasa, which, in its turn, has a comentary, the Tharangini. In the texts came down and later printed, numerous mistakes had crept in, which used to give headache to the teachers to give eogent explanations. With the publication of Subodhini, this difficulty has been got over. Deep research into old records and what His Highness had learnt from his Gurus formed the basis for the arguments contained in this work of His Highness. Not only vivid explanations have been given where ever the subject matter dealt with in the earlier works remained abstruse, but new light has been thrown and new ideas incorporated. In South India, Gadadhari alone used to be taught in the higher branches of Nyaya. To the large mojority of Naiyayikas, Jagadesi and Mathuranatheeyam are unfamiliar, as also Soothra, Bhashyam, Kusumanjali, Kiranavali, Kandali etc. It was left to His Highness to study the intricate dispuations contained in these works, codify them and to include the relevant portions at the appropriate places in his work. Hence this work represents the sum-total of all the existing works. Arguments advanced in Dinakareeyam have been refuted with a vengeance in the treatise, Prabha. It has been the endeavour of His Highness to rebut the latter and successfully uphold the views of Dinakara.

Tharangini, the commentary on Dinakareeyam stops short with the Sabda Khanda, the rest being not available anywhere. Want of commentary on Gunakhanda was a great handicap to the treatise. With the Publication of Subodhini, this lacuna has been filled up. The author was aware of this gap and it was perhaps for this reason that the Gunakhanda is more elaborately dealt with. Subodhini is a proud addition to the treasurehouse of Nyayasastra texts.

Subodhini was first published by the private secretary to H H. pareekshith Maharaja in 1956. Only a few copies of it were circulated. The loose printed sheets of the rest were entrusted with the Sanskrit College committee. Now this is included as the 17th title in the Ravivarma Sanskrit series.

We are glad to inform the learned Pulbic that efforts are on to bring out more volumes in these series.

Tripunithura, Prof. K. G. Paulose

20-7-87 Principal and secretary to the

## H. H. RAMA VARMA PAREEKSHIT THAMPURAN

### — OUR PATRON

Darknes precedes dawn. The birth of our Patron was preceded by great anxiety in Tripunithura. Everyone despaired for the lives of the child and the mother. By the mere exhibition of a herbal paste in front of the uterine mouth by an Ayurvedic physician, the mother was delivered of a male child. This trial gave the appellation "Pareekshit" to the new born Prince and the name stuck. Being the first born male, he is Rama Varma, and the pet name given was Kunhunny. Thus H. H. Rama Varma Pareekshit Kunhunny Thampuran was born on the 1st of Chingom 1052 M. E. (15th August 1876). Three brothers and five sisters were born subsequently. His father was Ottur Sri Raman Namboodiripad, an unassuming student of Rig Veda, and mother, Manku Thampuran.

According to customary practice, after attaining his fourth year, the prince started his education under his mother herself at first and later under Sri. E. Kunhan Warier, in the Sanskrit Patasala specially run for the benefit of the members of the Cochin Ruling Family. Kavyas and rudiments of Nyaya were taught in this institution. Within a couple of years, however, this Patasala was converted into a regular English High School. The conditions in this new type of institution were not conducive to the learning of Sanskrit. One day the Prince went, with his father, to the Palace of his grandunlce, the then Maharaja, who casually asked him whether he wanted to stndy English or Sanskrit. The boy, without any hesitation, blurted out "Sanskrit". The Maharaja seemed to be very pleased and said that he would ask his cousin, the Elaya Raja (the Heir Apparent) to teach him. Thus it was that Sir Sri Rama Varma, the Abdicated Maharaja who was the then

Elaya Raja and who was himself a very reputed scholar and is now popularly known as the Rajarshi took the young boy as his protege and student, and taught him the higher treatises in Nyaya Sastra. This association between these two continued till the demise of the Rajarshi in January 1932. Even now it is spoken with wonder how the young Prince used to participate in the VakyarthaSadas, even before he attained the 14th year, with necklaces round his neck and bangles adorning the hands! Higher studies then continued under Sri. Sathakopachari, the court Pundit and one of the greatest Nyaya scholars in India.

In 1893 His Highness made the Prince commence the study of English. Within five years he passed his Matriculation Examination and three years hence the F. A. examination from the Maharaja's College, Ernakulam topping the list of successful candidates and receiving the Sealy Memorial Medal. He joined the Presidency College, Madras for his graduate course and in 1905 took his B. A. degree from the Madras University. For two years during his college course he had to discontinue his studies, one year due to illness and the other when he accompanied the Abdicated Maharaja on a North Indian Tour. Thus, within a period of nine years of actual study, the Thampuran took his degree !

After his studies in Madras, the Prince settled down at Tripunithura and turned his attention to the study of Vedanta and Meemamsa, especially the former, although Nyaya continued to be his first love. It was in this period that the Sanskrit Patasala was started by the Abdicated Maharaja. The Founder, like all fathers, supervised the growth of this child with care, but it was left to the younger Prince to nurse it like a mother from the time of its birth till it flowered and reached maturity. Either in one capacity or another, this institution has been well Served by Pareckshit Maharaja and but for His Highness' selfless services this institution would have ceased to exist years back.

In 1907 the Prince married Smt. Ittianath Madhavi Amma, (Ammukutty) who on her own, is well-versed in Sanskrit and music. A cultured and very pious lady, her aim in life is to lead an unassuming life which would redound to the credit of her illustrious husband. Nay, she goes one step further. The welfare of those in whom her husband. is interested, is her concern. The training which she received from the Abdicated Maharaja evidently stood her in good stead to acclimatise herself to the changed conditions.

In 1915 the Prince accompanied the Abdicated Maharaja to Trichur and after his demise in 1932 shifted his headquarters to Tripunithura again.

In 1947, the Thampuran was installed as the Maharaja of Cochin by Sri. C. Rajagopalachari, the Governor General of India. On this auspicious occasion His Highness donated a sum of one lakh of rupees for the efficient working of the Sanskrit College, Tripunithura. Times had changed. Democracy was working in full swing. It stands to the credit of His Highness that His Highness was equally at home in the new set-up and found no dffiiculty to act as a constitutional monarch with his popularly elected ministers. When he laid down his office in 1949, encomium was showered for his magnanimity by no less a person than the one who negotiated for the integration on behalf of the Government of India.

The impression outside India and even among some in India is that the life of the Rulers of Native States is one of lavish waste on material comforts and ostentation. The simple life led by the Maharaja of Cochin will be an eye-opener to these critics. Nine hours of meditation and worship, two simple meals at 10 a. m. and 8 p. m. with a cup of milk at 2 p. m., Sastraic discussions with Pundits and reading of newspapers and books from the daily routine of His Highness.

Endowed by nature with a brilliant brain, brought up in an atmosphere where Sanskrit learning is considered as a ***sine qua non***, taught by eminent scholars, the Abdicated Maharaja and Sri. Sathakopachari, along with a set of erudite scholars as the former's youngest brother Kochammaman Thampuran and nephew in law, Etamana Krishnan Namboodiripad, Sri. Ayya Sastrigal and Sri. Subrahmania Sastrigal as class mates and in company with the great Vidwans like Sarvasree Bhattan Thampuran of Cranganore, Killimangalam Narayanan Namboodiripad, Manthitta Kunchu Namboodiri and Sethumadhava Deekshitachariar, it is no wonder that His Highness is deeply interested in this ancient language and literature. Even as a student, His Highness started teaching students, a Profession of love which was continued even after he ascended the Musnad.

Among his students can be seen expert Vaidikas, Artists, Ayurvedic physicians, Professors in Sastras etc., People who have earned name and fame in their walks of life. It is no secret that for explaining the abstruse Philosophical treatises, none has been able to outshine His Highness.

This love of the subject is the reason for his Participation—nay, guidance—in the conduct of the annual Sastra Sadas in this institution. The Pundits who come from outside for the Sadas are treated as guests of His Highness.

Our Patron's knowledge is not confined to purely Sanskrit literature. He is an authority on rituals too. Consultation with him is a regular feature when elaborate religious ceremonies are Performed. In fact when the late Maharaja, the Dharmika Chakravarthi, Performed the Mahadana, the Tilaparvata Dana, it was our Patron who supervised over the entire proceedings. Our Patron himself has twice performed the Maha Rudram which continued for elevan days with Vasordhara at the end.

The financial help being rendered by His Highness to deserving people is never Publicised. A student, in difficulties, never goes empty-handed. A scholar, if sick, receives a contribution unasked. Monthly stipends go out to scholars in need whether they reside in Benares, Calcutta, Madras, or nearer home. Instances are not wanting where scholars are given free food and lodging. Even dependents of deceased Vidwans, in necessity, are being financed.

One should not take it that our Patron's munificence is confined to the Sanskrit language and Pundits. A few years back a maternity ward to accommodate twelve beds was constructed by His Highness in the Tripunithura Hospital from his Personal funds, a standing monument of His Highness' interest in the welfare of poor suffering mothers.

His Highness is an enthusiastic patron of and an authority on Chakiar Koothu, Kathakali and other Kerala Fine Arts. Of course, orthodox methods are preferred. Innovations to suit the audience generally bring down the level of proficiency and do not find favour with His Highness.

His Highness is equally at home with religious leaders, scholars, poets, musicians, lowly placed persons and children. The facility with which he can ascend or descend to the level of the visitor is a remarkable and rare trait.

Our Patron had the good fortune to accompany his most loved and respected Guru, His Highness the Rajarshi mentioned above on his tours to North India in connection with the famous Durbars held in Delhi in 1902 and 1911. In 1904 in the same august company he had occasion to visit most of the holy shrines and important towns in the South. Twice more he was at Varnasi, Allahabad and Gaya when he went to the North to perform Gaya Sraddha for his parents, for his Guru, for his grandmother etc. On an earlier, occasion, he took his mother and two other princesses on pilgrimage to the famous temples in south India. It goes without saying that these extensive tours have widened his outlook on matters both religious and temporal.

Apart from Subodhini His highness has written the following works.

**1. Bhava Deepika.** This is a commentary on Kalidasa's Sakuntala, a product of the combined work of the Prince and his friend, Pandita Raja Sahridaya Tilaka K. Rama Pisharoti. This work is really a guiding star to all subsequent commentators as exhaustive explanations have been given to every word, Rasa and Bhava.

**2. Jalavadhradanischayatwavicharah.** This is a small pamphlet on a particular portion of Nyaya which has been found very useful to those participating in the Sadas.

**3-6. Champus.** His Highness is the author of four short Champus, Prahladacharitham, Ambareeshacharitham, Sukanya Charitham and Radhamadhavam. They are sweet and deeply religious. They touch the heart.

**7. Uttara Naishadheeya Vyakhyanam.** The latter portion of Sri. Harsha's Naishadheeyam was completed by a Malayalee Brahmin, Aroor Atithri. Commentary on three Sargas has been written and published in Ravi Varma Granthavali of this College,

**8. Stothrani.** Here His Highness shines as a poet. This is a collection of Stothras on the Family Diety and other Ishta Devatas. One can see in these compositions the outpouring of his religious fervour.

**9. Bhagavannamakoumudi.** This is the Malayalam translation of a great and beautiful work of the same name by Sri. Lakshmidharacharya dealing with the divine power of the Lord's name.

**10. Dalangal.** This is a collection of some songs and a few critical articles, in Malayalam, wherein His Highness has opposed some of the views expressed by a couple of authors on the works of Sri. Harsha and Bhavabhuti. while even apologising for differing from their views, when it comes to the subject matter, His Highness is seen to be very firm and has rebutted their arguments with incontrovertible facts.

Thus in every field, literature, drama, poetry and Sastra, His Highness has shown keen interest and to whatever he has touched, he has been able to throw added lustre.

His Highness left this temperal abode in 1964

---

# SUBODHINI

A COMMENTARY OF BHASHAPARICHHEDA, MUKTAVALI, DINAKAREEYA & RAMARUDREEYA

*By*

DARSANA KALANIDHI
HIS HIGHNESS
**Rama Varma Parikshit Thampuran**
MAHARAJA OF COCHIN

*With Tippani by*

PANDITARAJA-NYAYATILAKA
MANDHITTA KUNCHU NAMBOODIRI

PUBLISHED BY
THE PRIVATE SECRETARY
TO
H. H. THE MAHARAJA
HILL PALACE
TRIPUNITHURA

1956

*First Edition* ] [ *Copies 500*



Raja Press. Tripunithura



# सुबोधिनी

भाषापरिच्छेदः–मुक्तावली–दिनकरीय–रामरुद्रीयव्याख्या ।

महामहिम

श्रीदर्शनकलानिधिरामवर्मपरीक्षिद्धोश्रीमहाराजविरचिता

पण्डितराज-न्यायतिलक 'मान्तिट्ट' कुञ्ञुनम्पूतिरिमहाशयैर्विरचितया
टिप्पण्या समन्विता


राजा प्रस्, पूर्णवेदपुरी

१९५६



DARSANA KALANIDHI

HIS HIGHNESS

**Rama Varma Parikshit Thampuran**

MAHARAJA OF COCHIN

॥ श्रीः ॥

# सु बो धि नी

टिप्पण्या समन्विता ।

## प्रथमपरिच्छेदः

नत्वा पूर्णत्रयीनाथं देवदेवं श्रियः पतिम् ।
गुरूंश्च करुणासिन्धून् परिभाव्य च तद्गिरः ॥

भाषापरिच्छेदमुखग्रन्थरत्नेषु टिप्पणी ।
परीक्षिदपराख्येन रच्यते रामवर्मणा ॥

त—**सफलोक्तीति**। 'विमलोक्तिवाराम्' इति पाठः। **निखिलाण्डभाण्डेति**। निखिलाण्डभाण्डं कीर्तिप्रभाजालविभूषितं येषामित्यर्थः। अग्न्याहितादिवद्विशेषणस्य परनिपातः। **तातनमस्कारेति**। अत्र तातपदं मातुरप्युपलक्षकम्। पितृनमस्कारेति वा पाठः ॥

दि—**लक्ष्मीति**। 'मातृदेवो भव, पितृदेवो भव' इति श्रुतिशिरसि तयोर्दैवत्वप्रतिपादनात्तन्नमस्कारस्य मङ्गलत्वं बोध्यम्। अनया श्रुत्या 'न मातुः परदैवतम्' इति स्मृत्या च मातुरभ्यर्हिततरत्वस्य बोधितत्वान्मातृनमस्कार एव प्रथममनुष्ठितः। लक्ष्मीः पादयुगे यस्य तमित्यर्थकं पितृविशेषणं लक्ष्मीपादयुगमिति पदम्, इत्थञ्च तातस्यैवात्र नमस्कारः कण्ठत उक्त इति केचित्। तदसुन्दरं क्लिष्टत्वात्। **श्रीगौरवेति**।

---

इति पाठ इति। अत्र 'तरसा विदे च' इत्यत्र, तु रसात्सुधेव इति, 'अण्डभाण्ड' इत्यत्र, अर्धभाजामिति च क्वचित्पाठो दृश्यते। क्वचिच्च, परसंविदेचेति अण्डभाण्डेति च ॥

गुरोः, गुरूणां वा इदं गौरवम्, अम्बुजमिवास्यम् आस्याम्बुजम्, श्रीयुतं गौरवास्याम्बुजं श्रीगौरवास्याम्बुजमिति विग्रहः । उपमया शिष्यवात्सल्यादिकृतो मुखे विकासो व्यज्यते । श्रीशब्दस्तु स्तुतिपरः । तेनाचार्यदेवत्वं द्योतितम् । स्वज्ञानस्य प्रमात्वमपि श्रीगौरवेति विशेषणेनासूचितम् । तेन च स्वग्रन्थस्य स्वाज्ञानप्रयोज्यदोषशङ्का परिहृता । **मितेन वचसेति** । ग्रन्थबाहुल्याशङ्काकृता अप्रवृत्तिरनेन वारिता । **परेषां कृत इति** । श्रोतॄणां **यथामतीति** । आलस्यादिकृतविचाराभावसम्भावनाऽपाकृता । निश्रेयसायेत्यर्थः । अनेन ग्रन्थस्य परमप्रयोजनवत्त्वमावेदितम् ॥

**मु—चूडेति** । चूडेति वलयीकृतेति विशेषणाभ्यां देवताविशेषयोर्विधुवासुक्योरपि रूपान्तरीकरणपाटवं बोधयद्भ्यां भवस्य निरतिशयमैश्वर्यमासूचितम् । योगरूढेन भवपदेन च जगन्निर्मातृत्वोपस्थापनद्वारा ईश्वरे प्रमाणमपि सूचितम् । **भव्यायेति** । प्रारिप्सितग्रन्थस्याविघ्नपरिसमाप्तिरूपायेत्यर्थः । **लीलेति** । लीलात्र निरतिशयानन्दानुभवः, 'प्रमोदात्ताण्डवप्रियः' इति वचनात् । दृश्यते हि लोके सुतजन्मादिहर्षपरवशो नृत्यन् जनः । अनायासो लीलापदार्थ इति परे । 'जगद्रक्षायै त्वं नटसि' इत्यादिवचनेन भगवताण्डवफलं जगद्रक्षैवेति लीलेति विशेषणेन सूच्यते, भव्यप्रार्थनाया औचित्यञ्च । पण्डितपदेन च ताण्डवस्य दोषराहित्यं पुष्कलगुणत्वं चावेदितम् ॥

**दि—**ननु चूडेत्यादिपद्येन भगवन्नमस्काराद्यकरणात् कथमस्य मङ्गलत्वमित्याशङ्कामपनुदति—**ईश्वरनिर्देशरूपेति** । निर्देशो नामग्रहणम् । तस्य च मङ्गलत्वम् 'अवशेनापि यन्नाम्नि कीर्तितेपि स्मृतेपि वा । वियुक्तः पातकैः सर्वैः परमं पदमश्नुते' ॥ 'वैकुण्ठनामग्रहणमशेषाघविनाशनम्' । इत्यादिबहुपुराणवचनसिद्धम् । ननु भगवन्नामग्रहणेनैव विघ्नध्वंसादिसम्भवे भव्याय भवत्विति मङ्गलभवनप्रार्थना व्यर्थेति चेन्न, सञ्चितविघ्नानामेव मङ्गलेन नाशात् ग्रन्थारम्भानन्तरं विघ्नानुत्पादाय प्रार्थनायाः कृतत्वात् । **अचूडेति** । सम्पद्यत इतीत्यन्तं च्विप्रत्ययान्तार्थकथनम् । **वलयीकृतेतीति** । एतदनन्तरम् 'एवं वलयीकृतवासुकिरित्यत्रापि बोध्यम्' इति पाठः । **अति अत्यन्तमिति** । 'सविशेषणानां वृत्तिर्न, वृत्तस्य वा न विशेषणयोगः' इत्यनुशासनात् संक्षिप्तपदार्थैकदेशे संक्षेपे अतिपदार्थान्वयो न सम्भवतीति बहुव्रीह्यादरणम् । यद्वा, संक्षेपकर्मत्वमत्र परम्परया आश्रयत्व

... । वस्तुतस्तु संक्षेपेति पाठानुसारेणेयं व्याख्येति ।



**निमित्तमाहेति** । स्वेनैव स्वग्रन्थव्याख्यानस्य प्रायेणादर्शनान्निमित्ताकाङ्क्षासङ्गतिः ।

**श्रोतृप्रवृत्तय इति** । पूर्वप्रतिज्ञया कारिकावल्यर्थजिज्ञासूनां शिष्याणामेव प्रवृत्तिः सम्भवति, नतु श्रोतृसामान्यस्येति हृदयम् । अत एव 'उक्ति' पदस्य उक्तिप्रतिपाद्ययुक्तिपरत्वस्य पूर्वमुक्तत्वेपि, ननु युक्तीनामत्रासत्त्वादित्यादिवक्ष्यमाणाक्षेपसङ्गतिः । **सतामुत्क्षेपणादीनामिति** । सतामित्यस्य वैशेषिकशास्त्रे प्रतिपाद्यतया वर्तमानानामित्यर्थः । तेन उत्क्षेपणादिलाभः । पुण्यजनकेत्यर्थस्वीकारे पुण्याजनककर्मासङ्ग्रहान्न्यूनता स्यादिति भावः । **विशेषत इति** । भक्तिश्रद्धादिसहितमित्यर्थः । साध्यतया द्रव्यविशिष्टे सद्रव्येति प्रयोगादर्शनात्, क्रीतेतरविशिष्टमुक्तावलीसाधारण्याय वा आह— **नानाविधेति** । **उत्पत्तिमदभावपरतयेति** । हन्नशादिधात्वर्थध्वंसघटकोत्पत्तावेव लडाद्यर्थवर्तमानत्वादेरन्वयावश्यकताया व्युत्पत्तिवादे भट्टाचार्यैर्दर्शितत्वात् 'स्यादेतत्' इत्यादिना मञ्जूषोक्तशङ्काया अनुत्थितिर्द्रष्टव्या । **विशिष्टवाचकानां पदानामिति** । न्यायोऽयमप्रामाणिक इति विस्तरेण प्रतिपादितं पट्टाभिरामैः । परन्तु हेषाबृंहितादौ जातिविशेषः प्रत्यक्षसिद्धः, नतु कीचककरीरादौ । करीरकलभादौ जातिविशेषस्वीकारे मानुषबालादावपि तदापत्तेरिति तदुक्तं न समञ्जसम् । मारुतपूर्णरन्ध्रत्वोपलक्षितेत्यनुक्त्वा विशिष्टेत्युक्तवता महादेवभट्टेनावस्थाविशेषविशिष्टवेणावेव कीचकपदप्रयोगः स्वारसिकः, नतु जातिविशेषविशिष्ट इत्यपि स्फुटीकृतम् । **घातपदमिति** । घञन्तसमुदायशक्तिपक्षानुसारेणेदम् । अन्यथा हन्धातोरित्येव ब्रूयात् । अत एव 'वि' इत्यस्यापि नोपसर्गत्वम्, धातुयोग एवोपसर्गसंज्ञाविधानात् । क्वचित् वेः पदत्वादेव व्यधिकरणं, विधर्मा इत्यादि बहुव्रीहेरप्युपपत्तिः । इत्थञ्च 'इदं चोपसर्गाणाम्' इत्यादितरङ्गिणीग्रन्थः, परैरत्र कृताक्षेपश्च चिन्त्यः ॥

**अयुक्तमिति** । बलवदनिष्टाननुबन्धीत्यर्थः । 'न कुर्यान्निष्फलं कर्म' इति वचनेन निष्फलकर्मणः पापहेतुत्वबोधनादिति भावः । यदि च न कुर्यादित्यत्रेष्टसाधनत्वाभाव एव बोध्यते, तदा अयुक्तमित्यस्य भ्रमजन्यमित्यर्थः । **इत्यभिप्रायेणेति** । इत्याकाराक्षेपबुबोधयिषयेत्यर्थः ॥

---

मथुरानाथव्याख्यानमनुरुध्याह—**यदिचेति** । इष्टसाधनत्वाभावः इष्टतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नजनकत्वाभावः । निष्फलमित्यस्य चैतत्पक्षे फलसामान्यशून्यमित्यर्थ इति न पौनरुक्त्यमिति बोध्यम् ॥

त—इत्युक्तिरसङ्गतेति । इदमुपलक्षणम्, सफलत्वे विवादाभावात्तत्साधनस्यानुपयुक्तत्वात्तत्परसमाधानग्रन्थोप्यसङ्गतः स्यादिति ॥

दि—विघ्नध्वंसपूर्वकसमाप्तीत्यर्थ इति । निर्गतो विघ्नो यस्याः सा निर्विघ्ना इति बहुव्रीह्युत्तरकर्मधारयाभिप्रायेणेदम् । यद्यपि विघ्नानामभावो निर्विघ्नमित्यव्ययीभावोत्तरद्वन्द्वः स्वरसतरः, तथापि विघ्नाभावस्य प्रत्यक्षाविषयत्वाद्दर्शनपदार्थेनान्वययोग्यत्वाभावाद्बहुव्रीह्यादरणं युक्तम् । नास्तिकग्रन्थे प्रत्यक्षसिद्धया समाप्त्या तत्कारणविघ्नध्वंसानुमानसम्भवात्तदधिकरणवृत्त्यभावप्रतियोगित्वरूपहेतुरपि मङ्गळे सुग्रह एवेति ध्येयम् । व्यभिचारसन्देहस्येति । स्वेतरनिखिलकारणसत्त्वसन्देहाधीनोऽन्वयव्यभिचारस्यापि सन्देह एवेति भावः । अन्वयव्यभिचारसन्देहेनान्यथासिद्धत्वसन्देहात्तस्यापि ग्राह्यसन्देहपर्यवसायिता बोध्या ॥

त—इत्यभिप्रायकतयेति । मङ्गळत्वेनापूर्वत्वेन कार्यकारणभावाद्विघ्नध्वंसस्थलेप्यपूर्वेणावश्यंभाव्यमिति तत्रापि स्वजन्यापूर्वसम्बन्धेन हेतुसत्त्वं सुवचमिति सूचयितुम् 'इत्यभिप्रायकतया' इत्युक्तिः । न चानन्तापूर्वकल्पनागौरवान्न तथा कार्यकारणभाव इति वाच्यम्, तस्य फलमुखत्वेनादोषत्वात् । महादेवभट्टाशयस्तु फलमुखगौरवस्यापि दोषत्वमप्रामाण्यग्रहसम्पादकत्वरूपमस्तीत्येकक्षणावच्छिन्नैकात्मवृत्तित्वसम्बन्धेन विघ्नाविशिष्टमङ्गळत्वेनैवापूर्वं प्रति हेतुत्वमिति विघ्नस्थले स्वजन्यविघ्नध्वंससम्बन्धेनैव समाप्तिं प्रति हेतुतेति ॥

दि—प्रवृत्त्युपयुक्तबलवदिति । अथ बलवदनिष्टाननुबन्धित्वस्य साध्यकोटौ घटने तस्य सन्दिग्धत्वमेव पक्षे सम्भवति, हेतुकोटिघटकस्य च निश्चितत्वमावश्यकमिति बलवदनिष्टाननुबन्धित्वस्य कथं हेतुघटकत्वमिति चेन्न, पक्षे विशेषणनिश्चयेऽपि विशेष्यसन्देहाधीनविशिष्टसन्देहसम्भवादेव पक्षतानिर्वाहात् । यद्वा, 'न कुर्यान्निष्फलं कर्म' इति निषेधाबोध्यपापाजनकत्वमेव हेतुघटकं पापसामान्याजनकत्वञ्च साध्यघटकमिति भेदादनुपपत्त्यभावात् । एतेन निष्फलत्वरूपहेतुना बलवदनिष्टानुबन्धित्वं साधितवतः पूर्वपक्षिणोपि हेतुनिश्चये न बाधकमिति बोध्यम् । न व्यभिचार इति । न च शत्रुवधकामानां श्येने प्रवृत्तिदर्शनात्तदुपयुक्तबलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वरूपसाध्यस्य सत्त्वात् कथं व्यभिचारप्रसक्तिरिति वाच्यम्, प्रवृत्तिपदेनात्र पापाजनकप्रवृत्तेरेव विवक्षितत्वात् ।



तथाच साध्यघटकबलवदनिष्टाननुबन्धित्वं पापाजनकत्वरूपं बोध्यम् । कथं तर्हीति । 'तर्हि कथम्' इति पाठः । उत्तरत्रापि तर्हीत्यत्र 'तथापि' इति च पाठो बोध्यः ॥

श्रु—सम्भवति दृष्टफलकत्व इति । मङ्गळं अदृष्टाफलकं सम्भवदृदृष्टफलकत्वात् भोजनवदित्यनुमानाकारः । सम्भवद्दृष्टफलकत्वञ्च दृष्टफलकत्वाभावसाधकप्रमाणाविषयत्वम् । ततश्च मङ्गळं समाप्त्यन्याफलकं समाप्तीतरदृष्टफलकत्वाभाववत्त्वे सति अदृष्टाफलकत्वादित्यनुमानेन सामान्यमुखव्याप्तिप्रयुक्तेन परिशेषानुमाने विशेषणासिद्धिनिरासो बोध्यः । मङ्गळे समाप्तीतरधनादिदृष्टफलकत्वाभावश्च प्रत्यक्षसिद्धः । नच गङ्गास्नानादेः पङ्कापनयनादिरूपदृष्टफलकत्वात् कथं स्वर्गादिरूपादृष्टफलकत्वमिति वाच्यम्, पङ्कापनयनादिकं प्रति स्नानत्वादिनैव हेतुत्वं गङ्गास्नानत्वादिना च स्वर्गादिफलकत्वमिति वैलक्षण्यात् । इत्थञ्च मङ्गळत्वं पक्षः, अदृष्टफलजनकतानवच्छेदकत्वं साध्यं, हेतुश्च सम्भवद्दृष्टफलजनकतावच्छेदकत्वपर्याप्त्यधिकरणत्वं बोध्यम् । तेन रूपभेदे नैकव्यक्तावुभयफलकत्वसम्भवेपि न क्षतिः ॥

दि—अथ सम्भवद्दृष्टफलकत्वमाक्षिपन् 'उपस्थितत्वात्' इति ग्रन्थमवतारयति—ननु तथापीति । विश्वजिन्न्यायादिति । मङ्गळं स्वर्गफलकं सर्वेच्छाविषयफलकत्वात् विश्वजिद्यागवदिति पूर्वदर्शितादृष्टफलकत्वानुमाने सत्प्रतिपक्षोत्थापनं, सम्भवद्दृष्टफलकत्वरूपहेतोरसिद्धिप्रदर्शनं वा ॥

त—शिष्टपदसार्थक्यमेवेति । अनया च वाचोभङ्ग्या शिष्टत्वं वेदप्रामाण्याभ्युपगन्तृत्वं फलसाधनतांशे भ्रान्तिरहितत्वं वेत्यत्रानिर्भरः सूचितः, अन्यतरेणापि पशुव्यावृत्तेः । नच नरत्वादिविशेषणादेवैतद्व्याद्वृत्तिर्भवतीति वाच्यम्, आदिपदग्राह्यबालकान्त्यजादिकृतवृथाचेष्टायां व्यभिचारावारणात्, तेषां यथेष्टचेष्टाहारत्वस्य स्मृत्यादावुक्तत्वात् । इत्थञ्च शिष्टत्वमपि न वेदप्रामाण्याभ्युपगन्तृत्वरूपमिति बोध्यम् । अत्र हेतौ न कुर्यान्निष्फलं कर्मेति निषेधाविषयपापाजनकत्वस्यैव पूर्वोक्तयुक्त्या निवेशनीयतया जलताडनादावपि व्यभिचारो भवत्येवेति 'यद्यपि जलताडनादिः' इत्यादिशङ्कासमाधाने चिन्त्ये ॥

दि—आरब्धं कर्मेति । तथाच मङ्गळस्य सर्वेच्छाविषयफलकत्वाभावान्नात्र विश्वजिन्न्यायप्रवृत्तिरिति भावः । अनेन समाप्त्यन्याफलकत्वसाधने समाप्ती

तरकामनाजन्यप्रवृत्त्यविषयत्वरूपं हेत्वन्तरमपि सूचितम् । समाप्तिकामनाजन्यश्रमाजन्य प्रवृत्तिविषयत्वं हेतुरिति केचित् । तन्न, व्याप्तेस्सामान्यमुखतया अन्यतोभयकामना विषये कीर्तिधनाद्युभयफलकस्थले व्यभिचारात् । पूर्वहेतौ समाप्त्यन्यत्वोपलक्षितविष यककामनात्वावच्छिन्नजनकताप्रवेशाच्च न समूहालम्बनेच्छामादाय भागासिद्धिः । वस्तुतस्तु, मुक्तावल्याम् 'उपस्थितत्वात्' इत्यनेन बोधितः समाप्तिकामनाजन्यश्रमाजन्यप्रवृत्तिविषयत्व रूपो यो हेतुस्तेनैव समाप्तिफलकत्वं साक्षात्साधयितुं शक्यत इति नात्र कल्पे परिशे षानुमानक्लेश इति विभावनीयम् । अत एव न्यायचिन्तामणिस्थं क्रमं परित्यज्य 'उपस्थि तत्वात्' इत्यस्य चरममुपादानम् । **तस्या अबोधकत्वादिति** । अत्र प्रभाकरैर नुमितश्रुतेरपि प्रमाणत्वसम्भवो दर्शितः । परन्तु, पूर्वपूर्वाध्यापकोच्चरितस्य यथा प्रत्यक्ष श्रुतित्वं तद्वद्ध्याप्यकारोच्चरितानुपूर्वीमतोपीति न केवलानुमितत्वं तस्याः श्रुतेरिति बोध्यम् । ननु मास्त्वानुपूर्वीनिर्णयः, तथापि चेष्टादिस्थल इव यत्किञ्चिदानुपूर्वीज्ञाने जाते ततः शाब्द बोधोऽनिवार्य इति चेन्न, तादृशवाक्ये श्रुतित्वानिर्णयेन तज्जन्यबोधे प्रामाण्यसंशयसम्भ वादिति हृदयम् ॥

**त—अन्यथेति** । 'अन्यथा विघ्नप्राचुर्येऽपि यत्किञ्चिद्विघ्नवृत्तिसंख्यामादाय, मङ्गळान्यवृत्तिसंख्यामादाय वा, अन्यस्थलीयमङ्गलस्य तामादाय वा समसंख्याकत्वोप पादनसम्भवात्' इति पाठः । यत्किञ्चिद्विघ्नवृत्तिसंख्यामादायेत्यनेन सकलविघ्नवृत्ति त्वनिवेशनप्रयोजनमभिहितम् । मङ्गळान्यवृत्तीत्यादिना मङ्गळेतरावृत्तित्वनिवेशनस्य, अन्य स्थलीयेत्यादिना मङ्गळे तत्स्थलीयत्वनिवेशनस्य च प्रयोजनमभिहितम् । एषामेव प्रयोजनाभिधानम् 'इदमापाततः' इत्यादिना वक्ष्यमाणकल्पे अन्यांशनिवेशनस्य प्रयोजना भावसूचनायेति वेदितव्यम् । कल्पे त्वस्मिन् इतरस्थलीयविघ्नवृत्तिसंख्यामादाय, यत्कि ञ्चिन्मङ्गळवृत्तिसंख्यामादाय च अधिकसंख्याकमङ्गळस्थलेऽपि समसंख्याकत्ववारणाय तयो र्निवेशावश्यकता बोध्या । **निरुक्तविघ्ननिष्ठेति** । निरुक्तेति विघ्नविशेषणम्, तथा च तत्स्थलीयसकलविघ्ननिष्ठेत्यर्थः । **वस्तुतस्त्विति** । इदन्तु चिन्त्यम्, मङ्गळेनैक विघ्ननाशे विनिगमनाविरहात्सर्वविघ्नन्नाशावश्यकतया प्रतिबन्धकाभावासत्त्वं दुर्निरूपमिति

---

अन्यांशेति । तत्स्थलीयविघ्नेतरावृत्तित्वस्य विघ्नवृत्तिसंख्यायाम्, मङ्गळवृत्तिसंख्यायाञ्च



कस्मिंश्चिद्विघ्ने बलवत्तरत्वरूपजातिकल्पनां विना नान्वयव्यभिचारपरिहारः । अत एव विघ्नभूयस्त्वादित्यनन्तरं 'तन्मङ्गळानन्तरोत्पन्नाद्विघ्नाद्वा' इत्यग्रे पक्षान्तरमवलम्बितं महा देवभट्टेनेति । ननूपदर्शितविघ्नान्यूनसंख्याकमङ्गळत्वेन हेतुत्वे दोषाभावात् वाकारस्या नास्थासूचकत्वं किमर्थं स्वीक्रियत इति चेन्न, अतीन्द्रियानेकधर्मिकल्पनापेक्षया तादृशै कधर्मिणि वैजात्यकल्पनाया लघुत्वात् । बलवत्तरविघ्नध्वंसं प्रति बहुत्वविशिष्टमङ्गळ त्वेनैव हेतुत्वं न तूक्तरूपेणेति बोध्यम् । तन्मङ्गळानन्तरोत्पन्नविघ्नान्न समाप्तिरिति पक्षे तु मङ्गळत्वेन सामान्यरूपेणैव विघ्नध्वंसहेतुता बोध्या ॥

**दि—नास्तिकग्रन्थसमाप्तौ व्यभिचारादिति** । समाप्तौ सत्यां नास्ति कात्मनि व्यभिचारादित्यर्थः ॥

**त—गुरुभूतस्याचरणमिति** । 'गुरुभूतस्यादरणम्' इति पाठः । **वैयर्थ्यापत्ते रिति** । उत्पत्तिघटने नास्तिकशरीरे अन्वयव्यभिचारस्याप्युपलक्षणमेतत् । नच प्रथमकल्पे यत्र विघ्नध्वंसोत्पत्तिकाले पूर्वशरीरनाशस्तत्र व्यभिचार इति वाच्यम्, अवच्छेदकतासम्बन्धे नेत्यस्य स्वावच्छेदकजातीयतासम्बन्धेनेत्यर्थकत्वात् । **शक्यतयेति** । सत्यं व्यक्तिस्सम्भविनी, तथापि भाविजन्मनि नास्तिकत्वसंशयसम्भवादेतज्जन्मन्येव मङ्गळकरणं युक्तमिति श्वेतच्छ लदृष्टान्तस्य वैषम्यं स्फुटमिति तरङ्गिणीग्रन्थोऽयं चिन्त्यः । **तत्रत्यपूर्वसमाप्ताविति** । नच स्वोत्पत्त्यवच्छेदकजातीयतासम्बन्धेन मङ्गळमपि तत्र वर्तत इति न व्यभिचार इति वाच्यम्, तेन सम्बन्धेनापि मङ्गळस्य तत्समाप्तिपूर्वक्षणवृत्तित्वाभावाद्व्यभिचारस्य दुष्परिहरत्वात् ॥

**दि—शिष्टाचारानुमितश्रुत्येति** । अनुमितश्रुतेरपि बोधकत्वपक्षमवलम्ब्येदम् । तृतीयार्थो बोध्यत्वम् । श्रुत्यनुमानाकारश्चेत्थम्, मङ्गळं वेदबोधितैहिकसमाप्ति साधनतावत् ऐहिकसमाप्त्युद्देश्यकशिष्टाचारविषयत्वात् । यत् यदुद्देश्यकशिष्टाचारविषय त्ववत् तत् वेदबोधिततत्साधनतावदिति । सामान्यमुखव्याप्तौ भोजनादौ व्यभिचारवारणाय लोकावगतेष्टसाधनतावदन्यत्वरूपमलौकिकत्वमपि हेतुकोटौ देयम् । लोकश्च वेदतदुपजी विप्रमाणातिरिक्तः । शिष्टाचारेत्यत्र शिष्टपदात्पूर्वं 'विशिष्ट' इति प्रक्षिप्तम् । इदन्तु चिन्त्यम्, मङ्गळस्य स्वोत्पत्त्यवच्छेदकजातीयतासम्बन्धेन हेतुतायामपि प्रथमग्रन्थारम्भकृत मङ्गळस्य तज्जन्मीयसकलसमाप्त्युद्देश्यकत्वापत्तिः । न चेष्टापत्तिः, शिष्टानां प्रतिग्रन्थं मङ्गळाकरणापत्तेः । नच पूर्वमङ्गळानन्तरोत्पन्नविघ्नशङ्कया तदाचरणमिति वाच्यम्,

तुल्ययुक्त्या मङ्गलस्य जन्मान्तरीयसमाप्तिफलकत्वेप्यदोषात् । अतो वक्ष्यमाणकार्यता वच्छेदकसम्बन्धघटकमव्यवहितत्वं न केवलं स्वोत्तरचरमशरीरानुत्तरत्वम्, किन्तु स्वोत्तरसमाप्त्यनुत्तरत्वमपि । इत्थञ्च तत्र स्वावच्छेदकावच्छिन्नप्रतियोगिकत्वस्थाने स्वोत्पत्त्यवच्छेदकजातीयावच्छिन्नप्रतियोगिकत्वनिवेशेपि दर्शितयुक्त्या स्वोत्तरसमाप्त्यनुत्तरत्वरूपाव्यवधाननिवेशावश्यकतया 'तद्वैयर्थ्यस्य दुरुद्धरत्वात्' इति तरङ्गिणीग्रन्थस्य न सामञ्जस्यमिति । नन्वेवं व्यभिचारवारणेपि नास्तिकग्रन्थसमाप्तौ मङ्गलस्य कारणत्वानापत्तिरिति चेन्न, इष्टत्वात्, भोगनाश्यविघ्नध्वंसविशिष्टसमाप्तौ मङ्गलस्य कारणत्वासम्भवात्। **निर्वाहार्थमपूर्वमिति ।** अपूर्वनिष्ठकारणत्वमित्यर्थः। वस्तुतस्तु, व्यापारस्य कारणत्वमित्यत्र 'व्यापारः' इत्येव साधुः पाठः। **नान्यथासिद्धिरिति ।** नन्वेवं कपालव्याप्तिज्ञानादीनां कथं घटानुमित्यादिहेतुत्वं, कपालसंयोगपरामर्शादिभिरन्यथासिद्धत्वादिति चेन्न, अदृष्टस्य यत्र व्यापारत्वं तत्रैवैतन्नियमात्, दृष्टस्थले तु प्रामाणिकानां व्यवहारस्यैवान्यथासिद्धिप्रयोजकत्वेन सर्वैरङ्गीकारात् ॥

**त—आशयेन समाधत्त इति ।** वस्तुतस्त्वलापूर्वसम्बन्धेन जन्मान्तरीय मङ्गलसत्त्वादेव समाप्तिरिति नान्यथासिद्धिरिति वक्तुं शक्यमिति सूचयितुमाशयेनेत्युक्तम्। इदमत्रावधेयम्, मङ्गलस्यापूर्वद्वारा फलजनकत्वं न सम्भवति, 'अलौकिकं लौकिके नाङ्गम्' इति तक्षसूत्रविरोधात् । अलौकिकं वेदबोधितेष्टसाधनताकं अपूर्वद्वारा फलजनकं कर्म, लौकिके मानसेतरसाक्षात्कारविषये नाङ्गं न जनकमिति तत्सूत्रार्थः! इत्थञ्च कारीर्यादेरप्यवग्रहनिवृत्तिरेव द्वारं बोध्यम्। उक्तञ्च मणिकृता 'विघ्नध्वंसद्वारा चेदमङ्गम्, नत्वङ्गयागवददृष्टद्वारा' इति ॥

**मु—समाप्तिस्त्विति ।** समाप्तिस्तु बुद्धेरित्युक्त्यैवाकस्मिकत्वशङ्कावारणे प्रतिभादीति व्यर्थमिति न शङ्क्यम्, यतस्तदनुक्तौ बुद्धिमात्रेण समाप्त्यदर्शनादन्वयव्यभिचारज्ञानेन बुद्धेरपि कारणत्वं न सिध्येत् । एवञ्चाकस्मिकत्वशङ्काया अप्यनिवृत्तिरेवेति ॥

**विघ्नध्वंसं प्रति जनकत्वे इति ।** सावधारणमिदम्, समाप्तिं प्रत्यजनकत्वे इत्यर्थः। **प्रवर्तकमिति भाव इति ।** बहुवित्तव्ययायासादिसाध्ये प्रायश्चित्तविशेषे अनिष्टनिश्चयस्यैव प्रवर्तकत्वेऽपि अनिष्टनिवर्तकप्रवृत्तिं प्रत्यनिष्टज्ञानत्वेनैव सामान्यतो



हेतुहेतुमद्भाव इति भावः । अथ बहुवित्तव्ययायासादौ द्वेषसत्त्वादेव प्रवृत्त्यभावनिर्वाहे किमुक्तनिश्चयस्य प्रवृत्तिविशेषहेतुताकल्पनेनेति चेन्न, वित्तव्ययाद्यपेक्षया शिष्टानां पाप एव बलवद्द्वेषः, अथापि पापानिश्चये बहुवित्तव्ययादिसाध्ये कर्मणि तेषां प्रवृत्तिर्नानुभाविकीति दर्शितहेतुहेतुमद्भावावश्यकत्वात् । **अङ्गीकर्तुर्मत इति ।** अनुमितश्रुतेरबोधकत्वस्यैव स्वयं सिद्धान्तितत्वादेवमुक्तिः ॥

**त—मूलाशय इति ।** अथैवं स्वरूपयोग्यतारूपकारणत्वस्यैव वेदबोधितत्वे वेदाप्रामाण्यापत्तिशङ्कैव प्रथमं कथमुदितेति चेन्न, स्वेतरनिखिलकारणसत्त्वे स्वरूपयोग्यसत्त्वे नियमेन कार्योत्पादः, अत्र च विघ्नध्वंसकामनादिस्वेतरकारणकलापसत्त्वात् कार्योत्पादरूपव्यापकाभावः स्वस्य स्वरूपयोग्यत्वाभावनियत इति वेदेन बोधितस्वरूपयोग्यत्वाभावस्य मङ्गले लाभाद्वेदाप्रामाण्योपपत्तेः। सति विघ्ने इत्यादिना च पूर्वोक्तव्यापकाभावः स्वेतरयावत्कारणाभावप्रयुक्त इति वेदाप्रामाण्यस्य नावकाश इति दर्शितम् । परे तु, यत्र ध्वंसकामनाया अधिकारत्वं तत्र तत्प्रतियोगिज्ञानमप्यधिकारिविशेषणमर्थात्सिद्धम्, अतः कार्यतावच्छेदककोटावपि तत्स्थलीयत्वं घटकम्, एवञ्चाकृते विघ्नस्थलीयसमाप्तिसाधनत्वमेव वेदेन बोध्यत इति न कोपि दोष इति वदन्ति । अन्ये तु, भगवत्पूजादीनां मङ्गलानां साङ्गत्व एव विघ्ननाशकत्वम्, विघ्नोपि मङ्गलस्याङ्गम्, सति विघ्न इत्यनेन च एतदेव बोधितम्। इत्थञ्च न वेदाप्रामाण्यमिति मन्यन्ते ॥

**मु—क्वचिच्चेति ।** चकारः स्वतस्सिद्धविघ्नविरहवत्त्वरूपविशेषद्योतकः । विघ्नात्यन्ताभाव एवेत्येवकारेण विघ्नध्वंसे मङ्गले च समाप्तिं प्रत्यवश्यक्लृप्तनियतपूर्ववर्तिभिन्नत्वरूपमन्यथासिद्धत्वमाविष्कृतम् । नन्वेवं तथाचेति महादेवभट्टकृतभाववर्णनं व्यर्थमिति चेन्न, स्पष्टप्रतीतिफलकत्वात् । **प्रतिबन्धकसंसर्गाभावस्येति ।** ध्वंसप्रागभावाधिकरणे अत्यन्ताभावसत्त्वासत्त्वमतद्द्वयसाधारण्येनेयमुक्तिः ॥

**दि—क्वचिदितीति ।** एतदनन्तरं 'नन्वेवमननुगमः, अतोऽनुगतेन रूपेण कारणत्वे बीजमाह' इत्यवतारिका प्रक्षिप्ता ॥

---

वदन्तीति । कार्यतावच्छेदकगौरवरूपोऽस्वरसोऽनेन सूचितः । एवमन्ये त्विति मते विघ्नस्याङ्गत्वकल्पनाप्रयुक्तं गौरवं च मन्यन्त इत्यनेन ॥

**त—ध्वंसप्रागभावयोरपीति** । एतदनन्तरं 'विशेषधर्मावच्छिन्न' इति पाठः ॥

**दि—तन्मङ्गलानन्तरोत्पन्नादिति** । इदञ्च नतिनुत्यादिसाधारणं मङ्गलत्वमनुगतं कारणतावच्छेदकमित्यभिप्रेत्य । नतित्वादिना विजातीयविघ्नध्वंसत्वादिना च नानाकार्यकारणभावपक्षे एकमङ्गलसत्त्वेपि तदनाश्यस्यैकस्य विघ्नस्य पूर्वं सत्त्वे व्यभिचारवारणादनन्तरोत्पन्नेति पक्षान्तरानुसरणं व्यर्थमापद्येतेति ध्येयम् । वस्तुतस्त्वत्रत्यवाकारो व्यवस्थितविकल्पबोधकः, नानाविधमङ्गलनाश्यनानाजातीयविघ्नस्थलानुरोधेन विघ्नभूयस्त्वोक्तिः । यत्र सकलविधानि मङ्गलानि कृतानि, समासिश्च न जाता तत्राह—**मङ्गलानन्तरेति** । स्पष्टश्चेदम्, 'समाप्त्यभावश्च कचित् प्राचीनविघ्नभूयस्त्वात्, कचिन्मङ्गलानन्तरोत्पन्नविघ्नात्, कचिल्लोकावगतकारणाभावात्' इति मणिपङ्क्तौ । **तत्तत्संसर्गावच्छिन्नेति** । प्रतिबन्धकसंसर्गाभावस्येति पदस्य प्रतिबन्धकस्य संसर्गे तादात्म्यानवच्छिन्नप्रतियोगिताणाभाव इति विग्रह इति भावः । प्राचीनमते त्वगत्या तादात्म्यानवच्छिन्नप्रतियोगिताकाभावे संसर्गाभावपदं पारिभाषिकम् । प्रतिबन्धकसंसर्गाभावत्वेनेत्यस्य च तत्तत्प्रतिबन्धकतानवच्छेदकसंसर्गानवच्छिन्नप्रतियोगिताकाभावत्वेनेत्यर्थः । **दुरितध्वंससामग्रीप्रयुक्त इति** । विघ्नात्यन्ताभाव इति शेषः ॥

**मूले नूतनेत्यादीति** । एतदारभ्य सूचितमित्यन्तं, गोपानामित्यारभ्य चोरायेत्यर्थ इत्यन्तं च प्रक्षिप्तं बोध्यम् । **नमस्कार्यस्येति** । इदञ्च विशेषणं भगवतः सन्तुष्टतासूचनस्य प्रकृते आवश्यकतां बोधयितुम् । **आहेति** । 'सन्तुष्टं प्रभुमाश्रयेत्' इति हि न्यायः ॥

**भा**—नूतनेत्यादिविशेषणेन लोकोत्तरसुषमाभाजनताप्रतिपादकेन भक्तानां ध्यानौत्सुक्यसम्पादनम्, तेन कारुण्यञ्च व्यज्यते । तापहरत्वकामदातृत्वे अप्यनेनैव सूचिते । स्वभक्तिपुष्टये विटवृत्तिमप्यवलम्बत इति कारुण्यातिशयो गोपेति विशेषणेन बोध्यते । कर्षति विदारयति दुरिताटवीमिति कृष्णपदयोगशक्त्या विघ्ननिवारणसामर्थ्यं प्रकाशितम् । संसारेत्यनेन निरतिशयमैश्वर्यञ्च । संसारः कार्यजातम् । महीरुहरूपेण विचित्रतरपदार्थसार्थपूरितत्वं संसारे व्यज्यते ॥

---

तापहरत्वेति । 'धर्मयोरेकतरोपादाने धर्मान्तरसंवित् साहचर्यात्' इति न्यायादिति भावः॥



**मु—ऐतेनेश्वर इति** । तथाच नात्र समाप्तपुनरात्तत्वरूपदोष इति भावः ॥

**दि—सामान्यत इति** । प्रायश इत्यर्थः । तेन भगवतश्चार्वाकाद्यप्रसिद्धत्वेपि न बाधः । नमस्कार्यत्वकृष्णपदप्रतिपाद्यत्वादिधर्मेणेति वा तदर्थः । **अनेनेति** । 'कृष्णाय नम इत्यनेन' इति पाठः ॥

**त—यद्यपि बीजमिति** । बीजादङ्कुर उत्पद्यत इति व्यवहारानुरोधेन बीजपदस्य समवायिकारणबोधकत्वमप्यस्तीति महादेवभट्टाशय इति भाति । वस्तुतस्तु, 'हेतुर्ना कारणं बीजम्' इति कोशाद्बीजपदं कारणसामान्यपरमेव । वेदान्तिनो जगदुपादानत्वमपीश्वरस्याभ्युपगच्छन्ति । तन्मतनिराकरणायैव निमित्तकारणायेति व्याख्यानमिति ध्येयम् ॥

**मु—घटादि कार्यमिति** । कार्यमिति भिन्नं पदम्, तेन हेतुलाभः । कर्तृजन्यमित्यन्तेन कार्यत्वकर्तृजन्यत्वयोस्साहचर्यस्य भूयोदर्शनेन कार्यत्वे कर्तृजन्यत्वव्याप्तिर्दर्शिता । **तथा क्षित्यङ्कुरादिकमपीति** । क्षित्यङ्कुरादिकमपि कार्यम्, अत एव कर्तृजन्यमित्यर्थः । क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवदिति न्यायप्रयोगोऽनेन सूचितः ॥

**दि—अंशतस्सिद्धसाधनमिति** । अंशे, पक्षतावच्छेदकविशिष्टे कस्मिंश्चित् । घटादौ सिद्धत्वोपपादकं दृष्टान्त इति विशेषणम् । **स्वरूपसम्बन्धविशेषरूपेति** । यद्यप्येवं वर्णद्वे 'तथा जन्यमपि' इत्येव मुक्तावल्यां वक्तुं युक्तम्, तथापि सिद्धसाधनशङ्काव्युदासो यादृशजन्यमादाय भवति तादृशजन्यं दर्शयितुमित्थमुक्तमिति बोध्यम् ॥

**त—इति दूषणाभिधानादिति** । इदमत्रावधेयम्, अयं हेतुरसाधको दुष्टत्वादित्याद्यसाधकतानुमानस्थले व्याप्तेरुभयवादिसिद्धतया यथा नोदाहरणप्रयोगापेक्षा, तथा पक्षतावच्छेदकस्य हेतुतायां नोपनयप्रयोग इति नास्य दोषस्यात्र प्रसक्तिः । अतोऽवच्छेदकावच्छेदेनानुमितौ विधेय एव पक्षतावच्छेदकव्यापकत्वं प्रकारतया भासत इति मते सिद्धसाधनमेवोपपादनीयमिति । **अन्यतमत्वेनानुगतीकृतानामिति** । एतदपेक्षया निखिलजन्यव्यक्तिवृत्त्यन्यतमत्वस्यैव पक्षतावच्छेदकत्वं युक्तम् । एतत्स्फोरणायैव निखिलजन्यमित्यनुक्त्वा क्षित्यङ्कुरादिकमित्युक्तम् । अन्यतमत्वञ्चात्र न तद्भेदविशिष्टेतरादिरीत्या विशिष्टभेदावच्छिन्नभेदः, प्रतिवादिभिरजन्यवस्तुनोऽनङ्गीकारात् प्रतियोग्यप्रसिद्धेः ।

किन्तु तावद्वृतसमुदायत्वमेव । नचैवमसर्वज्ञदुर्ज्ञेयत्वापत्तिः, यदा यावतामुपस्थितिर्यस्य, तदा तस्य तावदन्यतमत्वस्यैव पक्षतावच्छेदकत्वाद्धेतुत्वाच्च । स्पष्टमिदं कारणतावादे जागदीश्याम् । अत्र प्रभाकृद्रामरुद्रयोर्व्याख्यानं कार्यसामान्यवाचिसंसारपदघटितमूलाननुसारितया नातिसमञ्जसं वेदितव्यम् । **यदि सर्गाद्यघटस्येति** । 'यदि च सर्गादेः' इति पाठः । **अस्तु खण्डघट इति** । इदमत्रालोचनीयम्, खण्डघटवृत्तिघटत्वं महाघटवृत्तिघटत्वञ्च नैका जातिः । एकं दण्डचक्रभ्रमणाद्यप्रयोज्यं ध्वंसप्रयोज्यञ्च । इतरच्च विपरीतम् । सामग्रीवैलक्षण्यनियतो हि कार्यतावच्छेदकभेदः । घटत्वजातीनां नानात्वञ्च न सिद्धान्तविरुद्धम्, साङ्कर्यभिया मृत्सुवर्णादिघटनिष्ठघटत्वानां भेदस्य दीधितिकारैः कण्ठत एवोक्तत्वात् । एवञ्च कुलालकृतित्वेन घटत्वेन कार्यकारणभावेपि तादृशघटत्वस्य खण्डघटवृत्तित्वे मानाभावेन न तत्पक्षकानुमित्या ईश्वरसिद्धिः । यदि च महाघटे खण्डघटे चैकैव घटत्वजातिः कपालादिसाधारणकारणनियम्या, दण्डादिकार्यतावच्छेदकञ्च ध्वंसाजन्यत्वविशिष्टघटत्वमित्युच्यते, तदा तस्यैव कुलालकृतिकार्यतावच्छेदकत्वमपि सुवचमिति । इत्थञ्च 'कारणाभावात् कार्याभावः' इति कणादवचनात् कार्याभावं प्रति कारणाभावस्यैव प्रयोजकत्वमित्यभ्युपगम्यैवात्रेश्वरसिद्धिर्मूलकृता दर्शितेति द्रष्टव्यम् ॥

दि—**जनकतानवच्छेदकत्वाच्चेति** । तादृशकृतिनिष्ठजनकताया एव साध्यघटकत्वे ज्ञानेच्छयोरन्यथासिद्धेस्त्वाभिमतताया अलाभ इत्यनुपदमेव तरङ्गिण्यां स्पष्टीभविष्यति । अथास्तु कृतित्वावच्छिन्नत्वमपि जनकताविशेषणमिति चेन्न, वक्ष्यमाणरीत्या विशेष्यतासम्बन्धावच्छिन्नत्वस्य जनकतायामवश्यं निवेशनीयतया कृतावुपादानगोचरत्वनिवेशे प्रयोजनविरहात् । यद्यपि वक्ष्यमाणसिद्धसाधनवारणं उपादानगोचरत्वस्य कृतौ विशेषणत्वेनापि भवति, तथापि सिद्धान्ते लाघवमनपवादम् । परमार्थतस्तु, उपादानत्वस्यानुगतस्य हविरादावपि सत्त्वादुपादानगोचरत्वविशेषणेन न सिद्धसाधनवारणमिति तद्वैयर्थ्यं स्फुटम् । **विशेष्यतासम्बन्धावच्छिन्नेति** । उपादानताख्यविषयतासम्बन्धावच्छिन्नेत्यर्थः ॥

त—**तन्त्वादौ घटापत्तिवारकस्येति** । नच घटादिकं प्रति कपालत्वादिना हेतुत्वादेव नेयमापत्तिः सम्भवतीति वाच्यम्, तादात्म्येन कपालत्वादिना विशेष्यतया कृतित्वेन वा कारणत्वमित्यत्र विनिगमकाभावादुभयसिद्धेः । नच कपालस्य



समवायिकारणत्वान्यथानुपपत्तिरेव विनिगमिकेति वाच्यम्, कार्यत्वेन द्रव्यत्वेन हेतुत्वादेव तदुपपत्तेः । **स्वमतमभिप्रेत्येति** । स्वमते आप्तोच्चरितत्वेनैव वेदप्रामाण्यं निश्चेतुं शक्यते । आप्तत्वञ्च यथार्थज्ञानवत्त्वघटितम् । तथाचेश्वरस्य ज्ञानासिद्धौ न तदुच्चरितवेदप्रामाण्यसिद्धिरिति चिन्त्यमेतदिति केचित् । भ्रमविप्रलिप्सादिशून्यपुरुषकृतिप्रयोज्यत्वमेवाप्तोच्चरितत्वमिति न दोष इति परे ॥

दि—**बाध इतीति** । इदञ्च स्वरूपसम्बन्धरूपकार्यत्वस्य कार्यतात्वरूपाखण्डोपाधिनैव पक्षतावच्छेदकत्वमित्यभिप्रायेण, अन्यथा तदनुगमकान्यतमत्वशरीरे ध्वंसनिष्ठकार्यताभेदाप्रवेशेनैव बाधाप्रसक्तेः ॥

त—**कालनिष्ठप्रत्यासत्त्येति** । नन्वेवमस्मदीयकृत्या सिद्धसाधनम्, सर्गाद्यकालीनघटादावपि ब्रह्माण्डान्तरवर्तिपुरुषकृतिमादायोपपत्तिरिति चेन्न, महाप्रलयोपपत्तये तत्प्रतियोगिचरमपरमाणुक्रियोपपत्तये च नित्यकृतेरेवावश्यकत्वात् । इदमत्रावसेयम्, एकघटहेतुकुलालकृतिसत्त्वे स्थलान्तरे दण्डादिसत्त्वे घटोत्पादवारणाय विशेष्यतासम्बन्धेन कुलालकृतित्वेन कारणताया आवश्यकतया यद्विशेषयोरिति न्यायेनापि तेन सम्बन्धेनैव सामान्यकारणतासिद्धिरिति कालनिष्ठप्रत्यासत्त्या कारणत्वं निर्युक्तिकम् । एवञ्च भावस्थले समवायविशेष्यताभ्यामेकः कार्यकारणभावः, ध्वंसस्थले च विशेषणताविषयताभ्यामपरः । द्विविधमपि जन्यत्वमन्यतरत्वेन कृतित्वावच्छिन्नजनकताकजन्यतात्वेन वा साध्यमिति । अत्र द्वितीयकल्पे सिद्धसाधनवारणमदृष्टाद्वारकत्वविशेषणदानेन हविरादिगोचरास्मदीयकृतेः स्वर्गादिकार्यं प्रत्यन्यथासिद्धत्वाङ्गीकारेण वा करणीयमिति च बोध्यम् । रामरुद्रभट्टाशयस्तु कृतिविशेषाणां कार्यविशेषान् प्रति कालिकेनाप्यन्वयव्यतिरेकग्रहसम्भवात् तेन सम्बन्धेन सामान्यकार्यकारणभावग्रहोपि सम्भवत्येवेत्येकविधजनकतैव लाघवात् साध्यकोटौ घटनीयेति ॥

दि—**नित्यैकत्वसिद्धिरिति** । ननु कृतौ नित्यैकत्वयोरप्यनुमित्या विषयीकरणे तादृशकृतिजन्यत्वस्य पूर्वमसिद्ध्या कथं पूर्वदर्शितसिद्धसाधनशङ्कावकाश इति चेन्न, तद्धर्मावच्छिन्नप्रकारकसिद्धेस्तद्धर्मावच्छिन्नविधेयताकानुमितिं प्रति प्रतिबन्धकत्वात्, अनुमितिविधेयतावच्छेदकतायाञ्च परामर्शीयव्यापकतावच्छेदकत्वनिष्ठप्रकारतानिरूपितविशेष्यतायाः

प्रयोजकत्वात् प्रकृतानुमितेः कृतिजन्यतात्वावच्छिन्नविधेयताकत्वात् सिद्धसाधनोपपत्तेः । **वस्तुतस्त्विति ।** नन्वेतावतापीश्वरनानात्वं न प्रतिषिद्धं भवेत् । इत्थञ्चैकैकस्मिन्नीश्वरे एकैकनित्यज्ञानाङ्गीकारसम्भवान्नित्यज्ञानानामपि नानात्वमप्रतिषिद्धं स्यादिति चेन्न, पूर्वोक्तद्वित्वासमानाधिकरणत्वरूपैकत्वस्यापि साध्यान्तर्भावात् । वस्तुतस्तु, 'एवञ्च' इत्यादि वक्ष्यमाणरीत्या ईश्वरोच्चरितत्वेन वेदप्रामाण्यसिद्धौ 'देव एकः' इत्यादिश्रुत्यैव ईश्वर नानात्वव्यवच्छेदस्सम्भवतीत्येकत्वद्वयस्य न साध्यान्तर्भावः । एवञ्च न 'एकैकत्वम्' इत्येवकारस्वारस्यभङ्गोऽपि । श्रुतिबोधितमेकत्वन्तु नित्यज्ञानवन्निष्ठभेदप्रतियोगितानवच्छेद कैकत्ववत्त्वरूपं स्वसजातीयद्वितीयरहितत्वं बोध्यम् । **साध्यसम्बन्धितावच्छेदकरूपस्या प्तेरिति ।** अवच्छेदकत्वञ्चात्र स्वरूपसम्बन्धरूपं बोध्यम् । धूमवान् वह्नेरित्यादौ वह्नित्वं न धूमसामानाधिकरण्यावच्छेदकं धूमासम्बन्धिन्ययोगोळकवह्नौ वृत्तित्वात्, 'नह्यतिप्रस क्तमवच्छेदकम्' इत्युक्तेरिति नातिव्याप्तिः ॥

**त—इत्यपि वदन्तीति ।** ससम्बन्धिकोत्तरपदस्थलेऽपि मध्यनिपतितस्य नञः पूर्वपदार्थान्वितसम्बन्ध्यन्वितस्वार्थबोधकत्वमेव व्युत्पत्तिसिद्धम्, नतु तत्सम्बन्धिघटितार्थान्तरान्वितस्वार्थबोधकत्वमपि, घटानधिकरणपटसमानकालीनेत्यादौ समानकालीनादिभेदप्रत्ययापत्तेः, अतः प्रकृतेऽपि स्वाधिकरणवृत्तिभिन्नत्वमेव नञा प्रत्याययितुं शक्यते, न तूक्तभिन्नत्वमित्यस्वरसोऽनेन सूचितः । इदन्तु चिन्तनीयम्, स्वाधिकरणवृत्तिस्वभिन्नज्ञानकभिन्नत्वस्य प्रतियोगित्वस्वाश्रयज्ञानसामानाधिकरण्योभयसम्बन्धेन भेदविशिष्टान्यत्वरूपस्य ज्ञाने भानोपगमेनैवोद्देश्यसिद्धेर्व्यापकत्वादिघटितत्वेन गुरुभूतस्यैकत्वस्य भानाङ्गीकारोऽनुचित इति । **इदं पुनरिहावधेयमिति ।** एतदनन्तरं 'सम्भवदवच्छेदकताकलघुधर्मसत्त्व एव गुरुधर्मे' इति पाठः । **हेतुता युक्तेति ।** समनियतलघुधर्मस्यावच्छेदकत्वसम्भवे तदव

---

प्रयोजकत्वादिति । अत एव यत्र काञ्चनमयत्वस्य व्यापकतावच्छेदकतया भानं तत्र तस्यानुमितौ विधेयतावच्छेदकत्वाद्वह्निनिष्ठकाञ्चनमयत्वाभावः साध्याप्रसिद्धिः, यत्र तु न तथात्वं, किन्तु लाघवज्ञानादिना तस्यानुमितौ प्रकारतया भानमेव, तत्र विधेयतावच्छेदकत्वाभावात् स बाध इति सिद्धान्तितमिति भावः ॥

**स्वरूपसम्बन्धरूपं बोध्यमिति ।** नन्वेवं धूमवान् वह्नेरित्यत्रातिव्याप्तिः, वह्नित्वस्यागुरुतया साध्यसम्बन्धितावच्छेदकत्वादित्याशङ्क्य तस्य प्रकारान्तरेणानवच्छेदकत्वान्न दोष इत्याह— धूमवान् वह्नेरिति ॥



टितस्यापि गुरुधर्मस्य न हेतुतावच्छेदकत्वमित्याशयः । युक्तेत्येतदनन्तरम् 'इत्थञ्च नैयायिकमते कृत्यजन्यजन्यपदार्थानभ्युपगमेन तादृशाभावे जन्यत्वत्वावच्छिन्नप्रतियोगिताकत्वस्यैव तैरभ्युपगमसम्भवादिति दूषणं सारमिति' इति पाठः । ननु तेनैव रूपेणास्तु हेतुत्वमित्याक्षेपं नैयायिकमते तदसम्भवीति प्रदर्शयन् परिहरति — **इत्थञ्चेति । इति दूषणं सारमितीति ।** सर्वमिदं नवीनमतानुसारेणोक्तं वेदितव्यम् । प्राचीनमते तु व्यभिचारावारकविशेषणवटितत्वमेव व्याप्यतानवच्छेदकत्वे व्यर्थविशेषणत्वे च तन्त्रम्, नतु लघुधर्मसमनैयत्यम्, अपिवा व्याप्यतावच्छेदकधर्मान्तरे स्वसामानाधिकरण्यम्, अत एव महादेवभट्टेन 'गुरुधर्मस्यानवच्छेदकतया' इत्येतावन्मात्रमुक्तम् । धूमप्रागभावादित्यादौ व्यभिचारावारकविशेषणघटितत्वाभावादेव न व्याप्यत्वासिद्धिर्व्यर्थविशेषणत्वयोरापत्तिः । महादेवग्रन्थस्थगुरुपदस्यापि व्यभिचारावारकविशेषणघटितेत्येवार्थः, अन्यथा पृथिवी घ्राणग्राह्यगुणवत्त्वादित्यादावपि व्याप्यत्वासिद्ध्यापत्तेः । वस्तुतस्तु, मणिस्थैतल्लक्षणविचारावसरे कम्बुग्रीवादिमत्त्वमपि न साध्यसामानाधिकरण्यावच्छेदकमिति मिश्रोक्त्या उक्तापत्तेरिष्टत्वात् गुरुपदं यथाश्रुतपरमेव । अभिहितञ्च कण्ठत एव विश्वसत्यत्वानुमानभङ्गे ब्रह्मानन्दीये स्वसामानाधिकरण्यप्रवेशस्य तान्त्रिकसम्प्रदायासिद्धत्वात् स्वकपोलकल्पितत्वं निर्युक्तिकत्वञ्चेति । न्यायकुसुमाञ्जल्यां पञ्चमस्तबके एकामसिद्धिमित्याद्यात्मविवेकस्थपङ्क्तिसमानयोगक्षेमाया 'अन्वये तु विशेषणासामर्थ्यात्' इति पङ्क्तेर्व्याख्यानावसरे 'यद्वा यन्निरूपित' इत्याद्युपाध्यायपङ्क्तिरप्युक्तार्थोपष्टम्भिका । असिद्धिग्रन्थे व्यर्थविशेषणत्वाद्व्याप्तिविशिष्टपक्षधर्मत्वाभावस्यासिद्धित्वं निराकृतवतां मणिकाराणामपि व्याप्यतावच्छेदकधर्मान्तरे स्वसामानाधिकरण्यं नापेक्षितमित्येवाशय इत्यवगम्यते । 'इदमसाधकं व्याप्तिविशिष्टपक्षधर्मत्वाभावात्' इत्यसाधकतानुमाने पक्षधर्मत्वाभावादित्यस्यैव सम्यक्त्वे व्यर्थविशेषणत्वादिति व्याख्यातं मथुरानाथभट्टाचार्यैः । यदि च विशिष्टाभावो न प्रत्येकाभावादतिरिक्त इति स्वसामानाधिकरण्यमपि पक्षधर्मत्वाभावत्वे सम्भवतीति मन्यते, तदा सामान्याभावस्यापि विशेषाभावादभिन्नतया जन्यत्वाभावत्वेऽपि शरीरजन्यत्वाभावत्वसामानाधिकरण्यमनिवार्यम् । 'एकामसिद्धिम्' इत्याचार्यपङ्क्तिं व्याख्याय 'एतच्च प्राचीनमतानुसारेण' इति स्पष्टमभिहितमसिद्धिग्रन्थे मथुरानाथभट्टाचार्यैरपीति सुधियो विदाङ्कुर्वन्तु । ब्रह्मानन्दस्वामिनस्तु धूमप्रागभावादित्यादावपि व्याप्यत्वासिद्धिः प्राचीनानामिष्टैवेत्यभिप्रयन्तीति च वेदितव्यम् । अत्राचार्यवाक्यघटकद्वितीयापदस्य निग्रहस्थानरूपाधिकोक्तिपरत्ववर्णनं प्रभाकृतामसमञ्जसम्, यतो द्वितीयपदस्य स्वसमभि

व्याहृतैकपदार्थान्वयितावच्छेदकावच्छिन्नबोधकत्वं व्युत्पत्तिसिद्धम् , अन्यथा एको विप्रोऽतास्ति, द्वितीयमानयेत्यादौ क्षत्रियानयनाद्यापत्तेः, 'तथाच स्वरूपासिद्धिः तद्वारणाय विशेषणाभिधाने च व्याप्यत्वासिद्धिः' इतीश्वरानुमानचिन्तामणिविरोधश्च । **कारणतावच्छेदकधर्मावच्छिन्नाभावस्यैवेति** । ननु व्यापकधर्मावच्छिन्नजनकसामग्र्यभावादीनां कार्याभावप्रयोजकत्वस्य तत्र तत्रोपवर्णितत्वादवधारणासङ्गतिरिति चेन्न, प्रमाणसिद्धप्रयोजकान्तरसमवधाने कार्याभावप्रयोजकताया एवात्र विवक्षितत्वात् । **नियमादिति** । 'कारणाभावात् कार्याभावः' इति कणादमुनिवचनादिति भावः । **दीधितिकृतस्त्विर्तीति** । एतदनन्तरं 'नित्यशरीरमपीति । चेष्टावदन्त्यावयवित्वरूपशरीरत्वस्य नित्येष्वसम्भवात् , अवयविमात्रस्य स्वमते विनाशित्वान्नात्रेष्टापत्तिः सम्भवतीति भावः' इति क्वाचित्कोऽपपाठः ॥

द्वि—**चेष्टात्वेन हेतुत्व इति** । हिताहितप्राप्तिपरिहारानुकूलक्रियात्वरूपस्य चेष्टात्वस्य गुरुतया कारणतानवच्छेदकत्वादिति भावः । **अस्तु चेष्टात्वेनेति** । तस्यापि जातिविशेषत्वान्न गौरवमिति भावः । **दूरस्थकार्योत्पादकतानुपपत्तेरिति** । परममहत्त्वे च क्रियाया असम्भवात् शरीरत्वव्याहतेरिति शेषः । **आहुरिति** । अनेनास्वरसस्सूचितः , तरङ्गिण्यां दर्शयिष्यमाणयुक्त्या चेष्टात्वस्य शरीरक्रियाभिन्नक्रियायामपि सत्त्वाच्चेष्टात्वेन कारणत्वेपि शरीरसिद्ध्यभावात् । यदि च 'चेष्टात्वं जातिविशेषः' इत्यग्रिमसुक्तावलीस्वरसात्तस्य शरीरक्रियामात्रवृत्तिजातित्वमिति विभाव्यते, तदापि सकलासु शरीरक्रियासु चेष्टात्वं न कश्चिदभ्युपैति, स्रोतोनुद्यमानमृतशरीरक्रियायाः प्रबलवाय्वाद्यभिघातजन्यजीवच्छरीरक्रियायाश्च तत्त्वापत्तेः, किन्तु, वस्तुतो यस्यां क्रियायां हिताहितप्राप्तिपरिहारानुकूलत्वं तस्यामेव । हितत्वाहितत्वे च स्वावच्छिन्नेच्छाद्वेषविषयत्वरूपे इत्यग्रे तरङ्गिण्यां स्पष्टम् । एवञ्चेश्वरेच्छाया निरवच्छिन्नत्वेन परमाणुक्रियायां चेष्टात्वासम्भवान्नेश्वरस्य शरीरसिद्धिः । एतेन क्रियात्वेनैव हेतुत्वेपि द्व्यणुकोत्पत्त्यनुकूलपरमाणुक्रियायामीश्वरहितप्राप्त्यनुकूलत्वसत्त्वाच्चेष्टात्वं दुरपह्नवमिति परास्तमिति । **अलं पल्लवैरिति** । ननु चेष्टात्वेन क्रियात्वेन वा कारणता न सम्भवति, सर्गादावाद्यक्रियाया अपि कार्यत्वात् तत्पूर्वं क्रियाभावादिति चेन्न, कार्यद्रव्यसामान्यध्वंसस्यैवावान्तरप्रलयतया सर्गात् पूर्वमपि परमाणुक्रियाया अबाधात् , अन्यथा अदृष्टस्याप्युक्तयुक्त्या कार्यसामान्यहेतुत्वभङ्गप्रसङ्गादित्ययमर्थः अलमित्यादिना सूचितः । **पक्षेतरत्वं सन्दिग्धोपाधिरिति** । ननूपाधिग्रन्थे 'पक्षेतरत्वं सन्दिग्धोपाधिरपि नोद्भावनीयः' इत्युक्तेः कथमस्य दूषकत्वमिति चेन्न, कथकसम्प्रदायविरोधेपि वादिविजिगीषया यत्र स उद्भावितस्तत्र तस्य दूषकत्वे विवादाभावात् । **साध्याव्यापकत्वनिश्चयादिति** । शरीरजन्यत्वं कर्तृजन्यत्वाव्यापकं कर्तृजन्यत्वव्याप्यकार्यत्वाव्यापकत्वात् , यत् यद्व्याप्याव्यापकं तत् तदव्यापकं, यथा सत्ताव्याप्यद्रव्यत्वाव्यापकं सत्ताऽव्यापकं पृथिवीत्वमिति सामान्यतो व्याप्तिरिति साध्याव्यापकत्वानुमानादित्यर्थः । ईश्वरस्य ज्ञानेच्छावत्त्वबोधकश्रुती अप्युदाहरति — **यस्सर्वज्ञ इत्यादिना** । **कार्यानुमानमिति** । कार्यपदं भावप्रधानम् , कार्यपक्षकेति व्याख्याने 'श्रुतेः वाक्यात्' इत्यनुमानद्वयालाभात् । उभयत्र वेदस्यैव पक्षत्वात् । वेदत्वानुमानं व्यतिरेकसहचारग्रहाधीनम् , वाक्यत्वानुमानञ्चान्वयसहचारग्रहाधीनमिति वेदपक्षकानुमानद्वयप्रदर्शनोपपत्तिः । **सर्गाद्यकालीनेति** । सामानाधिकरण्येनानुमितौ कर्मणि चेष्टारूपे सिद्धसाधनमिति सर्गादीति कर्मविशेषणम् । पक्षतावच्छेदकावच्छेदेनानुमितौ तु न तद्विवक्षणमावश्यकमित्यवधेयम् । एवमीश्वरानुमानान्तरेष्वपि । एतदभिप्रायेणैव कार्यानुमानेपि 'क्षित्यङ्कुरादिकम्' इति मुक्तावल्यां पक्षोपादानम् । **इति संक्षेप इति** । कार्यायोजनेत्यादिकारिकास्थं कार्यपदं प्रवृत्तिनिवृत्तिपरम् । तथा च वैदिकानि प्रशंसावाक्यानि प्रवृत्त्यभिप्रायपूर्वकाणि तादृशवाक्यत्वात् परिणतिसुरसमाम्रफलमिति लौकिकप्रशंसावाक्यवत् । एवं निन्दावाक्यपक्षकमनुमानमूह्यम् । वेदे चास्मदाद्यभिप्रायबाधादीश्वरसिद्धिः । आयोजनं, व्याख्यानम् । वेदव्याख्यानञ्च सर्ववेदार्थविदैव कर्तुं शक्यते । एवञ्च वेदाः सर्ववेदविद्व्याख्याताः निश्चलार्थानुष्ठानकत्वात् । यदेवं तत्सर्वं तदर्थविद्व्याख्यातम् , यथा मन्वादिस्मृतिरित्यनुमानं बोध्यम् । अन्यत् न्यायकुसुमाञ्जलित एवावगन्तव्यम् । एतत्सूचयितुमेव संक्षेप इत्युक्तम् ॥

मूले प्रतिज्ञाऽकरणप्रयुक्तन्यूनतापरिहारायाह—**मूलइति । इति शेष इति** । कृते पूरणे द्रव्यादयः सप्तपदार्था निरूप्यन्त इति मूलान्वयो बोध्यः । सप्त, सप्तविभाजकधर्मान्यतमवन्तः ॥

भा—**सविशेषकमिति** । सोपकरणं गृहं क्रीतमित्यादौ यथा विशेषणेपि क्रयकर्मतालाभः तद्वद्बाधाभावादत्र विशेष्येपि विशेषणभूते पदार्थत्वलाभोऽवगन्तव्यः । अत्र 'अथवा' इति प्रभोक्तकल्पो नादर्तव्यः, अग्रे विशेषे प्रमाणोपन्यासस्य पुनरुक्तितापत्तेः ॥

**दि—संयोगापेक्षयेति ।** जनकत्व,स्वसमानकालीनत्वैतदुभयसम्बन्धेन विभागविशिष्टनोदनाभिघातान्यतररूपसंयोगापेक्षयेत्यर्थः , तेन न विभागाजनके घटभूतलसंयोगे, तस्मिन् वा विभागपूर्वकाले चलतीत्यप्रत्ययेपि दोषः । विभागात्मकं कर्मेति भूषणमतमिति प्रभाकृतः । भूषणग्रन्थालाभात्तत्त्वं न विद्मः । **यद्यपि विभागवाक्यस्येति ।** विभागवाक्यजन्यशाब्दबोधे उद्देश्यतावच्छेदकस्य स्वव्यापकतावच्छेदकं यद्विधेयतावच्छेदकान्यतमत्वं तद्वत्त्वसम्बन्धेन विधेयतावच्छेदकेषु, तादृशान्यतमत्वाश्रयधर्मवत्त्वसम्बन्धेन विधेयेषु वा भानम्। एवं विधेयतावच्छेदकानां विधेयानां वा व्यापकतासम्बन्धेनोद्देश्यतावच्छेदके भानञ्च नियतम्। एवञ्च प्रकृते पदार्थत्वव्यापकतावच्छेदकत्वस्य द्रव्यत्वाद्यन्यतमत्वे बोधनादधिकसंख्यायाः, पदार्थत्वे द्रव्यत्वादिव्यापकत्वबोधनान्न्यूनसंख्यायाश्च व्यवच्छेद इति बोध्यम् । **स्पष्टार्थमिति ।** सत घटानान्येत्यादौ न्यूनाधिकसंख्याव्यवच्छेदबोधस्यानुभवसिद्धत्वादिति भावः । **कुतो न निरूपितमिति ।** तथा अनिरूपणेन द्रव्यादिषु भावत्वाबोधनान्न्यूनतेति भावः ॥

**त—अनुमानात्प्राप्तमिति ।** इदञ्च विभागवाक्ये विधेयतावच्छेदकेषु प्रत्येकं स्वेतरयावद्विधेयतावच्छेदकानामसामानाधिकरण्यसम्बन्धेनान्वय इति कृत्वा । यदि तु विधेयेष्वेव तेषां स्वाभाववत्त्वसम्बन्धेन, विधेयानां स्वेतरविधेयांशे वा स्वभिन्नत्वसम्बन्धेनान्वयो लाघवात्, तदा अर्थादित्यस्य तात्पर्यादित्येवार्थो वर्णनीयः ॥

**मु—वैशेषिकप्रसिद्धा इति ।** इदञ्च मूलस्थकीर्तितपदव्याख्यानम् ॥

**दि—इति प्रतिपादितमिति ।** मुद्रितप्रशस्तपादभाष्ये इदमेतदर्थकं वा वाक्यं नोपलभ्यत इति भाष्यपदेन तदन्यत् किमपि वेदितव्यम् ॥

---

किञ्चिद्रूपेणानुपस्थिते पदार्थाऽन्वयायोगादाह — **तादृशान्यतमत्वाश्रयेति** ॥

**असामानाधिकरण्यसम्बन्धेनान्वय इति ।** नच पूर्वोक्तोद्देश्यतावच्छेदकसम्बन्धघटकान्यतमत्वे स्ववृत्तित्वस्वसमानाधिकरणस्वभिन्नवृत्तित्वोभयसम्बन्धेन वस्तुविशिष्टान्यत्वोपादानेनैव परस्परासामानाधिकरण्यलाभे किमर्थं प्रत्येकमन्वयः स्वीक्रियत इति वाच्यम् , तावता असामानाधिकरण्यस्य शब्दतोऽलाभेन तदर्थमेवान्वयस्य स्वीकारात् ॥ तदन्यत्, प्रशस्तपादीयादन्यत् किमपि भाष्यम् ॥



**त—चरमत्वं चेति ।** 'चरमत्वं च स्वाश्रयसजातीय' इति पाठः । **यन्न दुःखेनेति ।** 'यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतञ्च तत् सुखं स्वःपदास्पदम्' ॥ इति सम्पूर्णा श्रुतिः । अत्र दुःखावच्छेदकावृत्तिजातिमदवच्छिन्नमिति प्रथमपादार्थः । सा च जातिः स्वर्गशरीरीयदेवत्वादिः । स्वर्गिणां पातभयजन्यदुःखश्रवणं संसारनिन्दामात्रतात्पर्यकम् , दुःखपदं वा तदितरदुःखपरम् । स्वपूर्वक्षणावच्छेदेन दुःखविशिष्टसुखावच्छेदकावृत्तिजातिमदवच्छिन्नमिति द्वितीयपादार्थः । अनेन स्वर्गपूर्वक्षणेपि न दुःखावच्छेदिका शरीरव्यक्तिरिति दर्शितम् । स्वाश्रयवृत्तित्वप्रकारकस्वावच्छेदकावच्छिन्नसुखविशेष्यकेच्छात्वव्यापकयथार्थत्वकमिति च तृतीयपादार्थः । स्वर्गिणां, मयि तत्सुखं स्यादिति निखिलेच्छानामपि यथार्थत्वमेवेति तत्त्वं स्वर्गसुखेऽनपायम् । अत्रोक्तधर्मत्रयान्यतमविशिष्टसुखत्वस्य स्वर्गसुखमात्रवृत्तित्वेपि तादृशधर्मत्रयविशिष्टसुखत्वमेव शक्यतावच्छेदकम् , स्वःपदात्तथैव बोधात् , विनिगमकाभावाच्च । सर्वमिदं गदाधरभट्टाचार्यकृतमुक्तिवादात्संगृहीतम् , विस्तरस्तत एवावगन्तव्यः । न ग्रस्तं, न सुखान्तरापेक्षया अपकृष्टम् , अनन्तरं सुषुप्त्याद्यभावाद्व्यवधानरहितमिति तर्कवागीशाः ॥

**दि—प्रमाणस्येति ।** 'प्रमाणस्य' इन्द्रियस्य इति साधुः पाठः । 'इन्द्रियादेः' इति पाठः प्रामादिकः, आदिपदग्राह्याभावात् । **स्वर्गादिसुखस्यापीति ।** अत्र आदिपदरहितपाठः ऋजुः । यदि तद्घटितपाठप्रामाण्येप्याग्रहः, तदा आदिपदात्स्वर्गीयशरीरादिपरिग्रहः । एवञ्च सुखपदं सुखतत्संम्बन्ध्यन्यतरपरं बोध्यम् । यद्वा, स्वर्गपदं लोकविशेषपरम् । आदिना ब्रह्मादिपरिग्रहः । अत एव तरङ्गिण्यां स्वर्गीयसुखस्येत्युक्तिः । **मिथ्याज्ञानजन्यवासनानाश इति ।** मिथ्याज्ञानजन्यवासनाया नाश इत्यर्थः । प्रमाया भ्रमाहितसंस्कारनाशकत्वस्यानुभवसिद्धत्वादिति भावः । **प्रारब्धकर्माधीनेति ।** कर्मपदमत्र तज्जन्यादृष्टपरम् । ननु तत्त्वज्ञानस्यादृष्टनाशकत्वमङ्गीक्रियते, न वा । आद्ये प्रारब्धस्यापि नाशात्तत्त्वज्ञानाव्यवहितोत्तरमेव मुक्त्यापत्तिः । द्वितीये प्राक्तनादृष्टेन तत्त्वज्ञानानन्तरं देहान्तरादीनामप्युत्पत्त्यापत्तिरित्यत आह — **भोगेति ।** तथा च मिथ्याज्ञान

---

**स्वपूर्वक्षणावच्छेदेनेति ।** इदञ्च सामानाधिकरण्यरूपे दुःखवैशिष्ट्ये अन्वेति । अनेनेति । पूर्वविशेषणेन सुखावच्छेदकशरीरस्य दुःखावच्छेदकत्वमेव प्रतिक्षिप्तम्, स्वर्गपूर्वक्षणे दुःखावच्छेदकं शरीरान्तरं नेति न लब्धम्, तदनेन बोध्यत इत्यर्थः ॥

वासनानाशसमकालमेव सञ्चितसकलादृष्टनाशाद्भोगेनैव प्रारब्धनाशाच्च नोक्तापत्ती इति भावः । अथ तत्त्वज्ञानस्य सञ्चितादृष्टनाशकत्वोक्तिरसङ्गता, ज्ञानिनः सुकृतदुष्कृतयोस्सुहृद्द्विषत्प्राप्तेः श्रुत्यैवावेदितत्वात् तयोस्तत्कृतभोगेनैव नाशात्। नच 'ज्ञानाग्निस्सर्वकर्माणि' इत्यस्यासङ्गतिरिति वाच्यम्, ज्ञान्यात्मनि भोगाजनकत्वस्यैव तेन विवक्षणादिति चेन्न, अन्यप्रातिवचनस्य विद्यास्तुत्यर्थत्वेन स्वार्थे तात्पर्याभावात्। स्पष्टञ्चेदं श्रीमद्भाष्ये हान्यधिकरणे। **जन्मादिषु मध्य इति**। दुःखादिषु मध्य इत्युक्तौ जन्मनि उत्तरत्वलाभाज्जन्मानन्तरदुःखाभावादपवर्ग इत्यर्थो लभ्येत। स चानुपपन्नः, अपवर्गस्य दुःखाभावरूपस्य दुःखाभावप्रयोज्यत्वासम्भवात्। जन्मादिष्वित्युक्तौ तु उत्तरत्वस्य प्रवृत्त्यादावेव सम्भवाज्जन्माभावप्रयोज्यत्वमेवापवर्गे लभ्यत इति नानुपपत्तिः ॥

त—**पुरीतद्भिन्नदेशेति**। देशः शरीररूपो बोध्यः। सूत्रपठित इत्यनन्तरं प्रवृत्त्यभावे जन्माभावस्येति पठनीयम्। **नच पापस्येति**। अतेष्टापत्तिसम्भवोक्तिरापाततः, कालान्तरे दुःखानुत्पत्तिप्रसङ्गेन तदसम्भवात्। नच पापस्य स्वध्वंसद्वारा हेतुत्वाङ्गीकारेण नोक्तप्रसङ्ग इति वाच्यम्, दुःखधाराया अनिवृत्तिप्रसङ्गात्। नचोभयवादिसिद्धया कालविशेषसहकारितयैव तत्प्रसङ्गवारणमिति वाच्यम्, तर्हि दुरितजनकत्वेनाभिमतस्य कर्मण एव ध्वंसद्वारा जनकत्वसम्भवाद्दुरितस्यैवासिद्धेः। यदि च नाश्यत्वे इष्टापत्तीत्यस्य नाश्यत्वाङ्गीकारप्रयुक्तायां पापासिद्धाविष्टापत्तीत्यर्थकत्वम्, तदा नासामञ्जस्यम्। **नव्यानां कुकल्पनमेवेति**। सञ्चितदुरितनाशं प्रति तत्त्वज्ञानत्वेन हेतुता मतद्वयसिद्धेति तत्त्वज्ञानत्वावच्छिन्नकारणताककार्यता मुक्तौ नव्यमते सूपपादा, न प्राचीनमत इति लक्षणाकल्पनस्य कुकल्पनत्वोक्तिर्न घटत इत्यभिप्रायेणाशङ्कते— **अथेति**। मतद्वयेप्यात्यन्तिकत्वविशिष्टध्वंसविशेषस्यैव मुक्तित्वम्। श्रुत्या च तदवच्छिन्नं प्रत्येव तत्त्वज्ञानसाध्यत्वं बोध्यते। नव्यमतेपि प्रारब्धदुरितस्यैवान्ते नाशात् तस्य च भोगमात्रसाध्यत्वाद्विशेषणांश एव तत्त्वज्ञानोपयोगिताया वक्तव्यत्वादविशेषादित्यभिप्रायेण समाधत्ते—**इहापीति। किञ्च कर्ममात्रेति**। वस्तुतः, पुण्यध्वंसस्यापुरुषार्थत्वादेव मुक्तित्वासम्भवादुक्तेरस्याः सामञ्जस्यं चिन्त्यम्। अथ सञ्चितदुरितानामपि प्रारब्धकर्मनाशक्षण एव नाशः चरमतत्त्वज्ञान एव सञ्चितदुरितनाशकतावच्छेदकजातिविशेषकल्पनात्, अतो नव्यमते विशेष्यांशस्यापि तत्त्वज्ञानत्वव्याप्यधर्मावच्छिन्नजन्यत्वमबाधितमिति चेन्न, सुखदुःखाभावान्यतरस्यैव मुख्यपुरुषार्थत्वान्मुक्तेस्तत्त्वाभावापत्तिरेव नव्यमते प्रधानं दूषणम्,



अत एव तत्त्वज्ञानेन साक्षाज्जन्येपि मिथ्याज्ञानजन्यवासनानाशे न मुक्तित्वमित्यवसेयम्। एतदेव सूचयति — **अलं पल्लवितेनेति ॥**

दि—**अभिप्रायान्तरेणेति**। नूतनकम्बळतात्पर्येण नवकम्बळवानयमित्युक्ते नवशब्दस्य संख्याविशेषार्थकत्वं परिकल्प्य नायं नवकम्बळवान्, किन्तु, एककम्बळवानित्याद्युक्तिरित्यर्थः। **असदुत्तरेति**। जातिश्चतुर्विंशतिविधा न्यायसूत्रे उक्ता; तत्स्वरूपं तदुदाहरणानि च भाष्यादवगन्तव्यानि। विस्तरभयादेकमेवात्र प्रदर्श्यते, यथा शब्दोऽनित्यः ऐन्द्रियिकत्वात् घटवदित्यकेनोक्ते, शब्दो नित्यः निष्क्रियत्वादात्मवदिति परेण सदोषोत्तरकथनम्। **अवाचकवाक्येति**। अत्र 'परिषत्प्रतिवादिबोधानुकूलोपस्थित्यजनकवाचकवाक्यप्रयोगरूप' इति ग्रन्थान्तरे पाठः। वाचकवाक्येतीति च तरङ्गिण्यां प्रतीकधारणम्। **पूर्वोक्तलक्षणानामिति**। एतदनन्तरं 'यथायथम्' इत्यपि पाठः। निग्रहस्थानानामप्युदाहरणानि न्यायभाष्ये द्रष्टव्यानि॥

म—**शक्तिसादृश्यादीनामिति**। 'शक्तिसादृश्ययोः' इति क्वचित् पाठः। स एव साधीयान्, आदिपदग्राह्यस्य कस्यापि ग्रन्थेऽस्मिन् विचारादर्शनात्। यदि क्लृप्तपदार्थानां सत्ताधिकत्वं वैशेषिकाणामनुमतं स्यात्, तदा शक्त्यादेरपि तदन्तर्भावसम्भवादतिरिक्तत्वशङ्कैव न जायेतेति तच्छङ्कैव ज्ञापयति क्लृप्तपदार्थानां सत्तत्वमितीत्यत एवेत्यादेराशयः। **ननु कथमिति**। विशेष्यसङ्गतैवकारार्थस्य तदन्ययोगव्यवच्छेदात्मकविशेष्यतावच्छेदकव्याप्यत्वस्य विधेयतावच्छेदके विधेये वा भानं सिद्धम्, तस्य बाधादुक्तिरियमप्रमाणमित्यर्थः। शक्तिसादृश्ययोरपीत्यत्रापिशब्दो दृष्टान्तार्थः; यथा द्रव्यादिकं गुणादितोऽतिरिक्तं तथेत्यर्थः॥

दि—**शक्तिरूपकारणविघटकतयैवेति**। दाहकारणवह्नीन्धनादिविघटनस्यादर्शनाच्छक्तिरूपकारणतावच्छेदकविघटकतयैवेत्यर्थः। **अन्यथानुपपत्त्या सिद्धायाश्शक्तेरिति**। प्राभाकरमतेऽर्थापत्तेः प्रमाणान्तरत्वादेवमुक्तिः। न्यायमते तु, मणिः वह्निनिष्ठदाहानुकूलधर्मविघटकः वह्न्यादिसत्त्वेऽपि दाहानुत्पत्तिप्रयोजकत्वात्, यन्नैवं तन्नैवं यथा घट इत्यनुमानेन तत्सिद्धिरित्याशयः॥

त—**पाठः प्रामादिक इति**। 'मण्यादिसमवधान' इत्याद्यवतारिकायाः

प्राभाकरानुसारेणैव कृतत्वात्तैरभावानङ्गीकाराच्च पाठोऽयं साधुरेव । ननु तथापि 'पदार्थास्सप्त कीर्तिता इति मूलमयुक्तम्' इति कथं घटत इति चेन्न, तादृशमूलेनोक्तयुक्त्या द्रव्यादिषु षट्स्वेव भावत्वं ज्ञापितमिति तदंशस्यायुक्तत्वान्मूलासङ्गतिरित्यभिप्रायात् ॥

दि—**ननु वह्नाविति ।** अथ शक्तिनाशकत्वस्य मणौ पूर्वोपदर्शितानुमानेनैव सिद्धतया कथमियमवतारिका घटत इति चेन्न, 'तथाहि' इत्यादिमुक्तावलीग्रन्थेन वह्निः दाहानुकूलकादाचित्कधर्मवान् कदाचिद्दाहाव्यवहितपूर्ववृत्तित्वात्, यन्नैवं तन्नैवं यथा घट इत्यनुमानेन, कदाचिदेव दाहजनकत्वान्यथानुपपत्त्या वा शक्तिसिद्धेस्सूचितत्वात्तदुपरि शङ्कासङ्गतेः । 'पूर्वोक्तयुक्त्या शक्तिसिद्धौ' इत्यत्र प्रतिपादिता युक्तिरियमेव । यद्वा, 'तथाहि' इत्यादिग्रन्थः, वह्नेः कारणत्वेपि न सा कारणता वह्नित्वादिधर्मावच्छिन्ना व्यभिचारात्, अतो वह्निनिष्ठदाहकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानमेव शक्तौ प्रमाणतया दर्शयति । शेषं पूर्ववत् । यदि च पूर्वोक्तयुक्तिर्मणिपक्षकानुमानम्, तदा तत्र साध्यभूतं विघटकत्वमनुत्पादकत्वमेवेति मत्वा शङ्का कृतेति ध्येयम् । तत्पक्षे शक्तिसिद्धाविल्यत्र सप्तम्या अभेदोऽर्थः । तस्य च धात्वर्थे कल्पनेऽन्वयः । तथा च विघटकत्वं नाशकत्वमपीति भावः । वस्तुतस्तु, 'मण्यादिसमवहितेन वह्निना' इत्यादिवाक्यद्वयेन मणेः प्रतिबन्धकत्वसाधकं स्वसत्त्वे कार्यानुत्पादः, स्वासत्त्वे च कार्यमित्यन्वयव्यतिरेकावेव दर्शितौ, ततश्चानन्यथासिद्धदाहानुत्पत्तिप्रयोजको मणिरिति लभ्यते, तेन चानुत्पत्तिप्रयोजकत्वरूपलिङ्गेन मणौ दाहानुकूलशक्तिनाशकत्वरूपं प्रतिबन्धकत्वं कल्प्यत इत्येव मुक्तावल्यास्स्वरसोऽर्थ इति बोध्यम् । तत्रेत्यस्य मणिसमवहिते इत्येवार्थः । वह्निविशेषणश्चैतत् । **उत्पत्तिमत्त्वे सति विनाशित्वादिति ।** साध्यकोटावभावमप्यन्तर्भाव्यैवमुक्तिः । अभावानङ्गीकारे तु उत्पत्तिमत्त्वं विनाशित्वञ्च प्रत्येकं हेतुरिति ध्येयम् । अत्र मुक्तावल्यां वह्निपदस्य कारणमात्रोपलक्षणतया गुणादावपि शक्तेस्सिद्ध्या गुणादिवृत्तित्वरूपहेतुज्ञापितः । उत्पादविनाशशालित्वरूपश्च कण्ठत एवोक्त इति वेदितव्यम्, अत एवातिरिक्तपदार्थतामेव व्यवस्थापयतीत्यवतारिकाया 'एवं सादृश्यमपि' इति मुक्तावल्युक्तेश्च सङ्गतिः । **क्लृप्तपदार्थातिरिक्त इत्यर्थ इति ।** तथाच 'पदार्थः' इत्युक्तिरतिरिक्तत्वप्रतियोगिता

---

कदाचिद्दाहाव्यवहितपूर्ववृत्तित्वादिति । रासभादौ व्यभिचारोऽनन्यथासिद्धत्वदलेनैव वारणीयः ॥



भायैव, अतिरिक्तादिपदानां समभिव्याहृतपदार्थतावच्छेदकाश्रयप्रसिद्ध्यावद्व्यक्तिप्रतियोगिकभेदवद्बोधकत्वव्युत्पत्तेः, चित्रमतिरिक्तं रूपमित्यादौ तथैव दर्शनादिति भावः । स्पष्टमिदं मञ्जूषायाम् । **पूरणीय इति ।** न्यायप्रयोगे पञ्चम्यन्ततयैव हेतुप्रयोग इति सूचनाय, हेतुद्वयप्रदर्शनशङ्कापनोदनाय वा पूरणमित्यवधेयम् ॥

त—**षड्भावान्तर्भावेति ।** 'षड्भावानन्तर्भावाभावानन्तर्भाव' इति पाठः । उक्तहेतावित्यत्र 'उक्तसाध्ये' इति उक्तहेतुहेत्वेत्यत्र 'उक्तसाध्यहेत्व' इति च साधुः पाठः । **प्रतियोगित्वरूपतयेति ।** 'प्रतियोगित्वरूपम् । तथाच' इति पठः । **सामान्यत्वप्रकारकेति ।** 'सामान्यविषयक' इति पाठः । **व्यभिचारतादवस्थ्यादिति ।** सामान्येतरवृत्तित्वं स्वरूपसम्बन्धावच्छिन्नं ग्राह्यमिति न व्यभिचार इत्यत आह—**व्यभिचारवारणेति । स्वीकरणीयत्वादिति ।** एवमपि घटत्वादिनिष्ठे तद्व्यक्तित्वे व्यभिचारो दुर्वार इति सामान्येतरवृत्तित्वमावश्यकमेव । प्रमेयत्वञ्च प्रमारूपं सर्वानुगतमेकमिति पक्षमवलम्ब्य व्यतिरेकित्वप्रवेशश्च महादेवभट्टेन कृत इति न तद्ग्रन्थासङ्गतिरिति बोध्यम् । अत्रेदमवसेयम्, सादृश्यातिरिक्ततावादिमते साधारणधर्मप्रयोज्यं तद्धर्मवत्सु सर्वत्र सादृश्यमेकम्, अतोत्र गोत्वप्रतियोगिकाश्वत्वगगनादिवृत्तिसादृश्यं पक्षः । अनन्तरञ्च सादृश्यत्वरूपाखण्डोपाधिना तदितरनिखिलसादृश्येष्वतिरिक्तत्वसिद्धिरिति । यद्यप्यत्र दर्शितपक्षस्य न्यायमते अभावात्मकनित्यत्वस्वरूपत्वात्सिद्धसाधनमिति शङ्का स्यात्, तथाप्यत्र नित्यपदस्य नित्यत्वप्रकारकज्ञानविषयत्वोपलक्षकत्वादुपपत्तिर्बोध्या । सामान्येतरवृत्तित्वे सतीत्यस्य सामानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन सामान्येतरवृत्तित्वविशिष्टेत्यर्थः, तेन सामान्यत्वस्य सामान्यस्वरूपतया घटादिवृत्तित्वेपि न तत्र व्यभिचारः । सामान्यस्य स्वरूपसम्बन्धेन घटादाववृत्तित्वात् । यद्यपि वृत्तितावच्छेदकधर्मैक्यविवक्षयाप्ययं दोषश्शक्यवारणः, तथापि सामान्यत्वस्य सामान्यत्वत्वादिनैव कालिकेन घटादिवृत्तित्वाद्व्यभिचारतादवस्थ्यमिति सम्बन्धैक्यस्यावश्यकतया धर्मैक्यमनादरणीयं ध्येयम् । 'तत्रापि न व्यभिचारः' इत्यनन्तरम् 'अथवा प्रमेयत्वे व्यभिचारवारणाय सामान्येतरवृत्तित्वमपि हेतौ विशेषणम् । एतत्प्रभायैवापिकारोपि सार्थकः । सामान्यं द्रव्यवदभावभिन्नमिति प्रतीत्या सादृश्ये सामान्यतदितरवृत्तित्वेन साधनसम्भवात्' इति क्वचित्तालीपत्रग्रन्थेषु पाठः । स एव साधुः । सामान्यभिन्नत्वस्य हेतुशरीरे निवेशे तद्भेदस्य साध्यकोटौ घटने प्रयो

जनाभावः, सामान्यभिन्नत्वसाधकहेतुनैव द्रव्यादिभेदस्यापि साधयितुं शक्यत्वात् हेत्वन्तर प्रदर्शनवैफल्यञ्च, अतो मुद्रितपाठो न मूलानुसारीति स त्याज्य एव ॥

दि—**अबाधितप्रतीतिर्नस्यादित्यर्थ इति** । तथाचैतादृशतर्कस्य सत्त्वान्नात्राप्रयोजकत्वशङ्कावसर इति भावः । तर्काकारश्च यदि साध्यं न स्यात्तर्हि हेतुरपि सामान्यवृत्तित्वं न स्यादिति । तन्मास्त्वितीष्टापत्तावाह—**अबाधितप्रतीतिर्न स्यादिति** । नन्वभावभेदसाधकहेतुघटकं सत्त्वं न सत्ताजातिः, न वा कालसम्बन्धित्वम्, आद्ये स्वरूपासिद्धिः, द्वितीये अभावे व्यभिचार इत्यत आह—**सत्त्वेन भावत्वेनेति** । अत्र भावत्वं नञुल्लिखितप्रतीत्यविषयत्वरूपमिति मञ्जूषाकृतः । गोत्व इवाश्वत्वेपि ध्वंसप्रागभावप्रतियोगित्वं नास्तीति प्रतीतिबलान्नित्यत्वरूपसादृश्ये न्यायमते भागासिद्धिवारणं कथमिति तु चिन्तनीयम् ॥

त—**न क्षतिरित्यस्वरसादिति** । इदमुपलक्षणम् । मणिसमवधानेन वह्नौ शक्तिनाशेपि शक्त्युपलक्षितस्य तस्य तत्र सत्त्वेन दाहापत्त्या प्रभाकरेणापि कारणतावच्छेदकविशिष्टस्यैव कार्योत्पत्तिप्रयोजकत्वमवश्यमङ्गीकरणीयमिति ॥

दि—ननु मणेः प्रतिबन्धकत्वान्यथानुपपत्तिरेव शक्तौ प्रमाणतया दर्शिता, तद्दूषयित्वा हेतुत्वविशेषकल्पनया किं भवेदित्याक्षेपं परिहर्तुं भावमाह—**तथाच प्रतिबन्धकत्वं नेति** ॥

त—**यत्र परामर्शानन्तरमिति** । यत्र परामर्शपूर्वं बाधज्ञानम्, तत्र तस्य परामर्शे शक्त्यनुत्पादकत्वरूपप्रतिबन्धकत्वमनुमितिकारणान्तरात्ममनस्संयोगादौ शक्तिनाशकत्वरूपं वा तत् सूपपादमिति परामर्शानन्तरमित्युक्तिः । अथ परामर्शानन्तरं लौकिकप्रत्यक्षरूपोपि बाधनिश्चयो न सम्भवति भिन्नविषयकानुमितिसामग्र्याः प्रतिबन्धकत्वादिति

---

ननु कारणतावच्छेदकोपलक्षितस्य कारणत्वे तरङ्गिणीकारैर्न कोपि दोष उद्घाटितः, किन्तु विशिष्टस्य कारणतापक्षोपि संङ्गत इत्येव, अतो दूषणमपि प्रदर्शयितुमाह—इदमुपलक्षणमिति । एतेन लिङ्गादीनां कारणतावादिभिः प्राचीननैयायिकैरतीतानागतस्थले कारणस्य यथा पूर्ववर्तित्वं नाभ्युपगम्यते तथा कारणतावच्छेदकविशिष्टस्यापि, इत्थञ्च लाघवाद्विषयितासम्बन्धेन विशेषणोपलक्षितस्यैव विशिष्टबुद्धिहेतुत्वम्, न तु विशेषणविषयिताकत्वविशिष्टस्येति तरङ्गिण्युक्तावतारिकायाः प्रकृतानुपयोगेपि न क्षतिरिति सूचितम् ॥



चेन्न, यत्र सिद्धिरूपं बाधज्ञानरूपं वा अनुमितिप्रतिबन्धकं परामर्शोत्पत्तिक्षणेऽस्ति, तत्र तत्क्षणे अनुमितिसामग्र्यभावात् प्रत्यक्षोत्पादसम्भवात् । इदमत्रावधेयम्—पूर्वोपदर्शितरीत्या बाधद्वितीयक्षणे आत्ममनस्संयोगनिष्ठशक्तिनाशसम्भवात् असमवायिकारणस्य च कार्यकालवृत्तित्वावश्यकत्वान्नानुमितिसम्भव इति बाधज्ञानस्यानुमितिप्रतिबन्धकत्वं प्राभाकरमतेपि निराबाधम् । नचात्ममनस्संयोगे शक्तिनाशे बाधद्वितीयक्षणे अनुव्यवसायादिकमपि न स्यादिति वाच्यम्, कार्यभेदेन शक्तिभेदाङ्गीकारात् । अत एवैकेनैव वह्निना एकदैव मण्याद्यसमवहितस्य दाहः, तत्समवहितस्यादाहश्चोपपद्यते, अतो दाहानुत्पत्तेरन्यथाप्युपपत्त्या शक्तेरप्रामाणिकत्वेनासिद्धौ प्रतिबन्धकत्वमपि न प्राभाकरोक्तरूपमित्येव विश्वनाथपञ्चाननाभिप्राय इति । **किन्त्वन्योन्याभावभिन्नत्वे सतीति** । तद्धर्मान्यवृत्तिविषयतासम्बन्धेन ज्ञानं प्रति तद्धर्मभेदस्य कारणत्वमादाय तद्धर्मेऽतिव्याप्तिवारणायेदम् । नारकीयशरीरकारणसाळग्रामध्वंसप्रतियोगिनि साळग्रामे, खण्डपटकारणध्वंसप्रतियोगिमहापटे चातिव्याप्तिवारणाय ध्वंसान्यत्वम् । सप्रतियोगित्वमिति तु स्वरूपकथनमात्रम् । अथान्योन्याभावभिन्नत्वनिवेशे तादात्म्येन प्रत्यक्षप्रतिबन्धकगुरुत्वादावव्याप्तिरिति चेन्न, प्रत्यक्षं प्रति लौकिकविषयत्वोपलक्षितस्य कारणत्वाङ्गीकारादेव गुरुत्वप्रत्यक्षवारणे तस्य प्रतिबन्धकत्वानङ्गीकारात् । तस्य प्रतिबन्धकत्वमते तु, निरुक्तसम्बन्धेन ज्ञानं प्रति तद्धर्मस्यापि तत्त्वमिष्टमित्यन्योन्याभावभिन्नत्वं नोपादेयम् । 'नोपादेयमिति लाघवमिति वाच्यम्' इति पाठः । **चक्षुरिति** । 'चक्षुरादेस्संयुक्तविशेषणतादिना भावानामपि वा' इति पाठः । भूतलादौ घटाभावादिप्रत्यक्षं प्रतीत्यादिः । ननु शुद्धविशेषणतासम्बन्धावच्छिन्नत्वनिवेशान्नोक्तातिव्याप्तिरित्यत आह—**भावानामपि वेति** । ननु संयोगत्वस्य सम्बन्धतावच्छेदकत्वे लाघवान्न विशेषणतया वह्न्यादेः कारणत्वमित्यत आह—**इदमिहेति** । नियामकान्तं

---

साळग्रामध्वंसस्य न कारणत्वम्, किन्तु तदनुकूलकृतेरेवेत्युक्त्वावाह—**खण्डपटेति** । **प्रत्यक्षं प्रतीति** । अत्र लौकिकविषयत्वं कार्यतावच्छेदकसम्बन्धः, तादात्म्यं कारणतावच्छेदकसम्बन्ध इति बोध्यम् । विशिष्टस्य कारणत्वं न सम्भवति, क्वचित् प्रत्यक्षात् पूर्वं तदीयलौकिकविषयताविशिष्टस्यासम्भवादित्यत—**उपलक्षितेति** । **गुरुत्वप्रत्यक्षवारण इति** । गुरुत्वे कदापि लौकिकविषयत्वासम्भवेन कारणतावच्छेदकाभावादिति भावः । **प्रतिबन्धकत्वानङ्गीकारादिति** । लौकिकविषयत्वोपलक्षितत्वाभावे किञ्चित् प्रयोजकं वक्तव्यम्, तच्च तेषां तादात्म्येन प्रतिबन्धकत्वं विना न सम्भवतीति वाच्यम्, अदृष्टस्यैव प्रयोजकत्वमित्याशयात् । अदृष्टस्य प्रतिबन्धकत्वकल्पनमनुचितम्, गौरवात्, कारणमात्रविलोपप्रसङ्गाच्चेति मन्वानानाम्मते त्वाह—**तस्य प्रतिबन्धकत्वमते त्विति** ॥

विशेषणताया भावसम्बन्धत्वे प्रमाणप्रदर्शनाय। **तस्य** सम्बन्धस्य। **लघुत्वादिति।** अख ण्डोपाधिरूपस्य विशेषणतात्वस्य संयोगत्वापेक्षया न गुरुत्वमिति भावः। अत्र लाघवात् कारणतावच्छेदकीभूताभावत्वनिरूपकत्वं तादृशाभावत्वावच्छिन्ननिरूपितप्रतियोगित्वं वा प्रतिबन्धकत्वम्, तेनैव महादेवभट्टोक्तसकलदोषवारणसम्भवादिति केचित्। तच्चिन्त्यम्, अवच्छेदककोटिप्रविष्टानामप्यवच्छेदकत्वपक्षे उत्तेजकाभावत्वमादाय उत्तेजकातिव्याप्तेर वारणात्। कारणत्वस्य पदार्थान्तरत्वखण्डनावसरे तरङ्गिण्यां दर्शयिष्यमाणरीत्या प्रतिबन्धकाभावानां तद्व्यक्तित्वेन कारणत्वपक्षे असम्भवापाताच्च ॥

सु—**अनन्तशक्तीति।** शक्त्यानन्त्यं मञ्जूषायां सम्यगाविष्कृतमिति नेह प्रतन्यते। 'उत्तेजकाभावविशिष्टमण्याद्यभावस्य' इति पाठः ॥

दि—**उद्देश्यतादैशिकविशेषणतान्यतरेति।** मन्त्ररूपोत्तेजकस्य उद्देश्यता सम्बन्धावच्छिन्नप्रतियोगिताकः, ओषधिरूपस्य दैशिकविशेषणतासम्बन्धावच्छिन्नप्रतियो गिताक इति भिन्नभिन्नरूपेणोत्तेजकाभावानां निवेशः, न त्वन्यतरत्वेन सम्बन्धता विवक्षितेति बोध्यम्। **सामानाधिकरण्यरूपं यद्वैशिष्ट्यमिति।** उत्तेजकाभावाना मभावीयविशेषणतासम्बन्धेन यदधिकरणम्, तत्र मणेर्दैशिकविशेषणतेत्यादिरूपमित्यर्थः। उत्तेजकसत्त्वेपि कालिकेन तदभावाधिकरणे मणिसत्त्वे अभावीयविशेषणतया उत्तेजका भावाधिकरणकाले कालिकेन वृत्तिमणेः दैशिकविशेषणतया सत्त्वे च दाहानुत्पादापत्ते र्वारणाय सामानाधिकरण्यघटकतया सम्बन्धविशेषनिवेशः ॥

त—**वह्निद्व्यणुकवृत्तिपरिमाणव्यक्तिमित्यर्थ इति।** इदञ्च वह्निद्व्यणुक त्वमिति पाठमनुसृत्य। वस्तुतस्तु, वह्निद्व्यणुकैकत्वमित्येव पाठः। दृश्यते च तथैव बहुषु पुस्तकेषु। स एव च युक्तः, संख्यां विहाय परिमाणपर्यन्तानुधावने प्रयोजना भावात्। **अदृष्टस्य हेतुतयेति।** एतदुत्तरं 'समवायेन तत्सम्बन्धस्यापि' इति पाठः ॥

दि—**केचित्त्विति। अतिरिक्तशक्तिसिद्धिरिति।** वह्नित्वावच्छिन्नकार्यता

---

**न गुरुत्वमिति भाव इति।** तथा च विनिगमनाविरहेण दैशिकविशेषणत यापि भावानां हेतुत्वसिद्धिरिति भावः। **अभावत्वनिरूपकत्वमिति।** अत्र प्रतियोगिता रूपनिरूपकत्वे सावच्छिन्नत्वं देयम्, तेन महापटध्वंसप्रतियोगिनि नातिव्याप्तिः। एवमुत्तरत्रापि। अभावत्वं नानुयोगिताविशेषः, किन्त्वखण्डोपाधिरिति पक्षे त्वाह—तादृशाभावत्वावच्छिन्नेति।



निरूपितकारणता किञ्चिद्धर्मावच्छिन्नेत्यनुमितौ प्रसिद्धधर्मबाधाच्छक्तिसिद्धिरिति भावः। वह्नित्वावच्छिन्नकार्यताया अप्रामाणिकतया तद्घटितपक्षाप्रसिद्ध्या न शक्तिसिद्धिरित्याह—**नचेति।** 'तृणफूत्कारसंयोगारणिनिर्मथनसंयोगमणितरणिकिरणसंयोगानाम्' इति ताळी ग्रन्थपाठः। **जातेरेवाभ्युपगमादिति।** जातेः स्वरूपतोऽवच्छेदकत्वसम्भवात् तदसम्भ वाच्च शक्तेरिति भावः। **भेदावच्छिन्नप्रतियोगिताकभेदत्वादिनेति।** अवच्छिन्नप्र तियोगिताकत्वसम्बन्धेन तृतीयभेदः, स्वरूपसम्बन्धेन भेदत्वञ्च कारणतावच्छेदकताया मवच्छेदके। तृतीयभेदनिष्ठावच्छेदकतावच्छेदकतायां द्वितीयभेदोऽवच्छेदकः, तन्निष्ठा वच्छेदकतायां प्रथम इति रीत्या विशेषणविशेष्यभावव्यत्यये कारणतावच्छेदकतावच्छे दकभेदो बोध्यः। अत्र तद्व्यक्तित्वेनोक्तभेदस्य कारणतावच्छेदकत्वसम्भवान्न क्षतिरिति तरङ्गिण्यां यदुक्तम्, तच्चिन्त्यम्, प्रतिबन्धकाभावस्य तद्व्यक्तित्वेन कारणत्वस्येव तद्व्य क्तित्वेन भेदस्य कारणतावच्छेदकतायाः प्रामाणिकैरनङ्गीकारात्। स्पष्टमिदं पक्षताकुक्षौ प्रत्य क्षसामग्रीघटनप्रतिक्षेपप्रकरणघटक 'अन्यतरत्वघटकान्योन्याभावयोः' इत्यादिदीधितिपङ्क्ति व्याख्यानावसरे गदाधरीये। 'प्रतियोग्यविशेषितरूपेणाखण्डाभावानां जनकतायामिव जन कतावच्छेदकतायामप्यन्यथासिद्धत्वात्' इति च तर्कालङ्काराः। **अतिरिक्तैवाया वेति।** कारणत्वमखण्डोपाधिरित्याशयेनेदम् ॥

त—**धर्मघटितत्वेनेति।** तादृशधर्मावच्छिन्नपर्याप्तिकावच्छेदकतानिरूपक स्यैव कारणतारूपत्वादिति भावः। **तथाप्येतदस्वरसेनैवेति।** इदमुपलक्षणम्, उक्तरीत्या कारणताभेदाभावेपि कारणतावच्छेदकता विभिन्नधर्मावच्छिन्ना नाना इति गौरवमपरि हार्यमिति ॥

दि—**विनिगमनाविरहादिति।** स्वमते तु, अन्यत्र क्लृप्तनियतपूर्ववर्तिना तृणसंयोगादिनैव वह्न्युत्पत्तौ तद्भिन्नवायुसंयोगादीनामन्यथासिद्धत्वमेवेति भावः। **आहु रिति।** वायुसंयोगादौ शक्त्यङ्गीकारे वह्निकामस्य वायुसंयोगसम्पादने प्रवृत्तिः, तृण संयोगादिसम्पादनौदासीन्यञ्च स्यादिति तर्क एव विनिगमक इत्यस्वरसोऽनेन सूचितः। इत्थञ्च शक्त्यानन्त्यरूपमहागौरवमेव दूषणं सारमिति ध्येयम्।

---

**अवच्छेदकतानिरूपकस्यैवेति।** तच्च निरूपकं दण्डादिनिष्ठदण्डत्वाद्यवच्छिन्नघटादि नियतपूर्ववृत्तित्वमिति बोध्यम् ॥

**अनुयोगितासम्बन्धविवक्षणे** त्विति । अलास्वरसं सप्तमी द्योतयतीति मञ्जूषाकृतः । तद्बीजं तत्रैव द्रष्टव्यम् ॥

त—**इति भाव इति** । नच चन्द्रगतभूयोधर्मस्येत्यादिध्येयमित्यन्तो ग्रन्थ एतदुत्तरं योज्यः । 'सादृश्यं ग्रन्थकृतैवोक्तमिति' इति पाठः ॥

दि—**तद्वृत्तिधर्ममात्रस्येति** । तथा च पद्यस्यास्यालक्ष्यत्वादिष्टापत्तिरिति भावः । लक्ष्यत्वमभ्युपेत्याह—**युगभेदेति** । विशेष्यैक्येपि विशेषणभेदे विशिष्टयोर्भेद इति पक्षमवलम्ब्य तरङ्गिण्यां पङ्क्तिरियं व्याख्याता । तथा व्याख्याने क्षणभेदेत्युपेक्ष्य युगभेदेत्युक्तिर्निरर्था स्यात्, अतो युगपदमत्र कल्पपरम् । प्रतिकल्पञ्च गगनादिसृष्टिं रामावतारादिकञ्चामनन्ति पौराणिकादयः, तन्मतमनुसृत्यैवेदमुक्तम् । प्रथिता च काव्यस्य तत्र तत्र तत्तन्मतानुसारितेति ध्येयम् ॥

त—**भेदसत्त्वाद्वेति** । 'गगने गगनभेदसत्त्वाद्वेत्यर्थः' इति पाठः । एवम् 'अन्यथा विशिष्टयोर्भेदानङ्गीकारे' इति च पाठः ॥

दि—एकत्रैवालक्ष्यत्वलक्ष्यत्वयोः क्रमेणाभिधाने उन्मत्तप्रलपितत्वशङ्कां परिहर्तुं सम्मतिमाह—**अत इति । यथा गोत्वमिति** । यथेत्युदाहरणे, तथेत्युपमायाम् । नित्यत्वादिरिति शेषः । एवं पूर्वत्रापि द्रव्यत्वादिरिति शेषः । प्रसिद्धलक्ष्ये सादृश्यघटकधर्मं उपाधिरूप इति दर्शयति—**यथा वेति** । 'आह्लादकत्वादिः' इति विसर्गान्तः पाठः । ननु नैते सादृश्यघटका धर्माः, किन्तु, अतिरिक्तसादृश्यप्रयोजका एवेत्याक्षेपं परिहरति—**अतिरिक्तेति** ।

त—**लक्षणसत्त्वं सूचयितुमाहेति** । तरङ्गिणीकारपाठे मुक्तावल्यां यथा 'चन्द्रभिन्नत्वे सति' इत्यादिपङ्क्तिः, दिनकरीये 'यथा' इत्युत्तरं 'वा'कारः, 'आदि' पदोत्तरं विसर्गः, अग्रिमा 'लक्ष्ये लक्षणं योजयति—यथेति' इति पङ्क्तिश्च नास्तीत्यवसेयम् । दर्शयतीत्यनुक्त्वा सूचयितुमाहेत्युक्तिः तद्भिन्नत्वांशस्यात्राप्रदर्शनात् । **यद्यपि चन्द्रेति** । अपरमहादेवभट्टकृतन्यायकौस्तुभे शङ्कामिमामुत्थाप्य यत्र सादृश्यं सखण्डं तत्र चन्द्रादिवृत्तितावच्छेदकधर्मावच्छिन्नवत्त्वमेव तत्, आह्लादजनकत्वञ्चाखण्डोपाधिः,



अथवा, चन्द्रगताह्लादकरत्वस्य मुखादौ भासमानं वैशिष्ट्यं तत्प्रकारकज्ञानविषयत्वरूपमिति सा समाहितेत्यपि बोध्यम् ॥

**द्रव्यादिपदार्थज्ञानस्येति** । अत्र द्रव्यादीत्यस्य स्थाने सर्वत्र पृथिव्यादीति पठनीयम् । द्रव्यभेदव्याप्यत्वस्य ज्ञानादिहेतावसम्भवेन यथास्थितपाठस्यासङ्गतत्वात् । **तत्तद्व्यक्तित्वेनापीति** । नचैवं पृथिव्यादिज्ञानस्य कथमुपयोग इति वाच्यम्, पृथिव्यादिभेदत्वेन ज्ञाने जात एव तद्व्यक्तित्वेन तेषां ज्ञानस्यानुभाविकत्वात् । अपिशब्देन पृथिव्यादिभेदत्वेन यत्र परामर्शे भानं तत्र पृथिव्यादिज्ञानस्य साक्षादुपयोगोपि भवतीति सूचितम् । **तद्भेदो नानुमितिविषय इति** । सादृश्याधिकरणत्वादीनां केवलान्वयित्वेनात्मनि तद्भेदस्य सिद्धत्वादिति भावः ॥

मु—'कालः समयः, दिगाशा' इति प्रक्षिप्तम् । तदनुरोधेन दिनकरीयेपि तदवतारिके प्रक्षिप्ते बोध्ये ॥

त—**एवमपीश्वरप्रयत्नेति** । तथाचावेशपदार्थः स्ववृत्तिकृतिजन्यचेष्टावत्त्वमिति भावः । आवेशपदस्यार्थान्तरं मञ्जूषायां द्रष्टव्यम् । संसार्यदृष्टवशाच्छरीरमिति मते ब्रह्मादिशरीरमीश्वरीयमेव तत्कृतिमात्रजन्यचेष्टावत्त्वात्, तदभावाच्च न जीवीयमिति भेदोऽवसेयः ॥

दि—**तन्मतं निराकर्तुमिति** । नवत्वन्यूनसंख्याया द्रव्येष्वप्रसक्तत्वात्तन्निषेधाय नवत्वोत्कीर्तनं व्यर्थमित्याक्षेपोऽनेन परिहृतः । अधिकसंख्याप्रसक्तिर्मुक्तावल्यामेव 'ननु दशमं द्रव्यं तमः' इत्यादिना दर्शयिष्यते ॥

मु—'किं प्रमाणम्' इति ताळीग्रन्थपाठः । दिनकरीये प्रतीकेपि तथा ॥

दि—ननु घटत्वस्य पटादावग्रहणेपि यथा तत्र प्रत्यक्षं प्रमाणं तथा द्रव्यत्वेपीति 'न हि तत्र प्रत्यक्षं प्रमाणम्' इत्यसङ्गतमिति पराक्षेपं निरसितुं भावमाह—**तथाचेति** ॥

त—'ननु नव द्रव्याणि' इति पाठः । 'अनुगतप्रतीतौ बीजाभावसूचनाय' इति पाठः साधुः ॥

दि—द्रव्यकार्यतावच्छेदककार्यत्वस्य दुर्निरूपत्वान्न द्रव्यत्वसिद्धिरित्यत आह —**कार्यत्वं प्रागभावप्रतियोगित्वमिति ।** नन्वेवमपि समवायेन कार्यं प्रति कालिक समवायादिना द्रव्यस्याव्यापकत्वेन कारणत्वासम्भवात् पक्षाप्रसिद्धिरित्यत आह—**अत्र चेति ।** कालिकसम्बन्धावच्छिन्नां कार्यत्वावच्छिन्नां, समवायसम्बन्धावच्छिन्नां घटत्वावच्छिन्नाञ्च कार्यतामादाय सिद्धसाधनवारणाय कार्यतायां समवायावच्छिन्नत्वकार्यत्वावच्छिन्नत्वे, कृत्यादिनिष्ठकारणतामादाय सिद्धसाधनवारणाय कारणतायां तादात्म्यावच्छिन्नत्वमित्यवसेयम् ॥

त—सिद्धं नः समीहितमित्यनन्तरम्, 'इति चेन्न, तावतापि द्रव्यत्वस्य सकलद्रव्यसाधारण्यासिद्धेः । नन्वेवं रक्तादिनिरूपितनानाकारणतावच्छेदकसंसर्गेषु द्रव्यत्व प्रवेशापेक्षया अतिरिक्तकार्यकारणभावो लाघवात्सिद्ध्यतीत्यत आह' इति पाठः ॥

दि—**कार्यत्वस्य कार्यतावच्छेदकत्व इति ।** कालिकेन घटत्वापेक्षयेत्यादिः । **कालिकसम्बन्धेनेति ।** महाकालान्यानुयोगिककालिकसम्बन्धेनेत्यर्थः, अतो न नित्यसाधारण्यम् । यद्यप्यत्र ध्वंससाधारण्याय सत्तायाः कार्यतावच्छेदकत्वावश्यकतया तस्या एव कालिकसमवायोभयसम्बन्धेन तत्त्वेन न विनिगमनाविरहः, वक्ष्यते च तस्य तथात्वं स्वयमेव, तथाप्यवतारिकादानायेदानीं तदनुसन्धानं न कृतम् । तदनुसन्धाने च लघुभूतपक्षप्रदर्शनायैव मुक्तावल्यामनुमानान्तरारम्भ इति वेदितव्यम् । **संयोगस्येतीति ।** अत्र संयोगसमवायिकारणतारूपपक्षकोटौ कार्यतायां समवायसम्बन्धावच्छिन्नत्वनिवेशन प्रयोजनं मृग्यम् । उत्तरसंयोगत्वावच्छिन्नं प्रति कर्मणस्समवायसम्बन्धेन पूर्वसंयोगध्वंसस्य विशेषणतासम्बन्धेन च हेतुत्वात्सिद्धसाधनवारणाय कारणतायां तादात्म्यसम्बन्धावच्छिन्नत्वं निवेशनीयम् । विभागत्वावच्छिन्ननिरूपितकारणतायाः संयोगेप्याचार्यैरङ्गीकृतत्वात्सिद्धसाधनवारणाय उत्तरानुमानेपि तादात्म्यसम्बन्धावच्छिन्नत्वं कारणतायां देयमिति बोध्यम् । परमार्थतस्तु, संयोगजसंयोगे कर्मणः पूर्वसंयोगध्वंसस्य चाकारणत्वात्तन्निरूपितकार्यतावच्छेदकं न संयोगत्वम्, किन्तु, तद्व्याप्यं वैजात्यमेव । स्पष्टञ्चेदं गुणग्रन्थे संयोगनिरूपणे 'आद्योऽन्यतरकर्मजः' इति कारिकाव्याख्याने । इत्थञ्च

---

**संयोगेपीति ।** विवेचयिष्यते चेदं गुणनिरूपणे सुबोधिन्याम् ॥



संयोगसमवायिकारणतारूपपक्षकोटौ तादात्म्यसम्बन्धावच्छिन्नत्वनिवेशोपि नावश्यक इति विभावनीयम् । **समवायिकारणत्वस्यावश्यकतयेति ।** संयोगे कर्मणोऽसमवायिकारणत्वावश्यकतयेति कुतो नोक्तमिति न शङ्क्यम्, तावतापि गुणे संयोगजसंयोगस्य, श्येन कर्मणा श्येनशैलसंयोगवत् श्येनशैलरूपयोस्संयोगस्य चापत्तेः ॥

त—**उत्पत्तिमत्त्वलाभादिति ।** यद्यप्युत्पत्तिमत्त्वापेक्षया कालिकेन घटत्वस्य लघुतया तस्य च पटत्वादिना विनिगमनाविरहान्नैतादृशकार्यकारणभावसम्भवः, तथापि कालिकानुयोगित्वमेवात्र सत्पदेन विवक्षितमित्यभिप्रायः । **नित्यगुणादिव्यावृत्तिरिति ।** एतद्ग्रन्थानन्तरं, 'यद्यप्यभावः' इत्यादिः 'ध्येयम्' इत्यन्तः, तदनन्तरं च 'वस्तु तस्तु' इत्यादिः 'भावः' इत्यन्तो ग्रन्थ इति बोध्यम् । **एकत्र समवेतस्येति ।** नन्वापादकाभावादेव नायं प्रसङ्ग इति चेन्न, एकत्र समवेतस्य तत्रैवोत्पादो नान्यत्रेति नियमाभावप्रसङ्गस्यानेन विवक्षितत्वात् ॥

दि—**कार्यमात्रवृत्तिजातेरिति ।** संयोगत्वं कार्यतावच्छेदकं कार्यमात्रवृत्ति जातित्वात् घटत्ववदित्यनुमानानन्तरं संयोगत्वावच्छिन्नकार्यतानिरूपितकारणतां पक्षीकृत्य द्रव्यत्वजातिसिद्धिरिति भावः । ननु पृथिवीग्रन्थे दर्शयिष्यमाणरीत्या कार्यमात्रवृत्तिजातेः समवायिकारणकार्यतावच्छेदकत्वनियमोऽप्रामाणिक इति द्रव्यत्वेन संयोगत्वेन विभागत्वेन वा कार्यकारणभावे मानाभाव इत्यत आह—**इदमुपलक्षणमिति । चतुष्टयमात्रवृत्तिभूतत्वमिति ।** अयमत्राभिसन्धिः, साङ्कर्यस्य जातिबाधकत्वानङ्गीकर्तृमते प्रसिद्धभूतत्वमूर्तत्वयोर्यथा जातित्वं तथा द्रव्यवति द्रव्यान्तरानुत्पत्त्या कल्प्यमानप्रतिबध्यतावच्छेदकजन्यपृथिव्यादिचतुष्टयमात्रवृत्तिधर्मान्तरस्यापि जात्यन्तरत्वमेव लाघवात् । तदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकतया च द्रव्यत्वजातिसिद्धिः । नच द्रव्यत्वादस्या जातेः पृथग्ग्रहणं कुत इति शङ्क्यम्, जलत्वजन्यजलत्वयोरिव तदुपपत्तेः ।

---

**विभावनीयमिति ।** अथ संयोगत्वावच्छिन्नत्वमघटयित्वा समवायसम्बन्धावच्छिन्नसंयोगनिष्ठकार्यतानिरूपिततादात्म्यावच्छिन्नकारणतैव पक्षः । तथाच कालनिष्ठां कर्मादिनिष्ठाञ्च कारणतामादाय सिद्धसाधनवारणाय सम्बन्धावच्छिन्नत्वद्वयघटनमावश्यकमिति न शङ्कनीयम्, तद्व्यक्तिनिष्ठतद्व्यक्तिसमवेतनिरूपितकारणतामादाय सिद्धसाधनवारणाय संयोगत्वावच्छिन्नत्वनिवेशस्यापरित्याज्यत्वात् ॥

तयोरपि कथमिति चेत्, तुल्यवहिरिन्द्रिययोग्यव्यक्तिवृत्तित्वरूपाद्दोषात् । नच प्रतिबध्यतावच्छेदकं भूतत्वमेव लाघवात् प्रतिबन्धकतावच्छेदकमप्यस्त्विति वाच्यम्, कारणस्य कार्यतावच्छेदकत्ववत् प्रतिबध्यतावच्छेदकस्यैव तदवच्छिन्नप्रतिबन्धकतावच्छेदकत्वस्यायुक्तत्वादिति । भूतत्वस्य प्रतिबन्धकतावच्छेदकत्व इत्यत्र मूतत्वं गगनसाधारणम्, भूतत्वेन तुल्येत्यत्र तु प्रतिबध्यतावच्छेदकजातिरिति विवेको बोध्यः । **तुल्यव्यक्तीति** । स्थलत्रयेपि 'तुल्यव्यक्तिवृत्तित्व' इति पाठः । **तथा सति मूर्तत्वजात्येति** । नच द्रव्यत्वस्य नित्यपृथिव्याद्यवृत्तित्वात् कथं मूर्तत्वेन तुल्यव्यक्तिवृत्तित्वमिति वाच्यम्, तेनैव सह साङ्कर्यवारणाय तद्वृत्तित्वस्याप्यावश्यकत्वात् ॥

मु—**तद्धि गन्धेति** । 'तच्च गन्ध' इति पाठः । प्रकाशे प्रतीकेपि तथा । **भ्रान्तिरेवेति** । एवकारः प्रक्षिप्तः ॥

दि—**नन्विति** । 'ननु तमसि मानाभावादेव तमः' इति पाठः । **प्रमाणमितीति** । इतीति प्रक्षिप्तम् । **परत्वाद्येति** । 'परत्वापरत्व' इति ताळीग्रन्थपाठः । **स्नेहेति** । 'स्नेहभास्वररूपाभावादीनाम्' इति पाठः ॥

त—**न तथेति** । 'न तथात्व' इति समञ्जसः पाठः । **गाढेति** । 'गाढान्धतमसेपि' इति ताळीग्रन्थपाठः । **तमःप्रतीतेरिति** । एतदुत्तरं 'रूपे अनभिभूतत्व' इति पाठः ॥

दि—**ननु तमसो द्रव्यत्व इति** । तमो न द्रव्यम्, आलोकनिरपेक्षचक्षुर्ग्राह्यत्वात् आलोकाभाववदिति सत्प्रतिपक्षानुमानेऽनुकूलतर्कोऽनेन दर्शितः । तत्रापादके आपाद्यव्याप्यत्वग्रहोपयोगिनं तर्कं दर्शयति—**द्रव्यग्रहे हीति** । अयन्तु तर्को नावतरति, दर्शितकार्यकारणभावाभावादिति बोधयितुमाह—**मुक्तावल्यां तत्प्रत्यक्षे चेति** । चकारः यथा तेजःप्रत्यक्षे इति दृष्टान्तबोधकः । तथाचालोककार्यतावच्छेदककोटौ तेजोभिन्नत्वमिव तमोभिन्नत्वमपि दीयते, अन्यथा व्यभिचारादिति भावः । **तेजोभावत्व इति** 'तेजोभावरूपत्व' इति पाठः । **प्रत्ययेति** । 'प्रत्यक्ष' इति ताळीग्रन्थपाठः । 'कर्मवत्त्वहेतुना तमसि द्रव्यत्वम्' इति पाठः । नन्वस्त्वालोकापसरणमुपाधिः तमसः कर्मवत्ताप्रतीतौ, तथापि तस्या द्रव्यत्वसाधकत्वमनपवादमित्यतो भावमाह—



**नहि द्रव्य इति** । द्रव्ये द्रव्यत्वे । कर्मवत्ताप्रतीतिरित्यस्य साधिकेति शेषः । यद्वा, पूर्वं तरङ्गिण्यां दर्शितदिशा समीपवर्तिपदार्थक्रियाया भ्रमजनकदोषत्वं न कुत्रापि क्लृप्तमित्यालोकापसरणोपाधिकत्वोक्तिरसङ्गतेत्याक्षेपं निरस्यति—**नहि द्रव्य इति** । 'नहि द्रव्ये नान्यौपाधिकी कर्मवत्ताप्रतीतिः' इति पाठः । मेघसञ्चारेण चन्द्रसञ्चारभ्रमदर्शनात् समीपवर्तिनिष्ठक्रियाया दोषत्वं क्लृप्तमिति भावः । वस्तुतस्तु, नन्वस्त्वालोकक्रियायास्तमःक्रियानैयत्यम्, तथापि तमसि क्रियाप्रतीतेरालोकक्रियारूपदोषजन्यत्वे प्रमाणाभाव इत्यत आह—**नहि द्रव्य इति** । हिरवधारणे । द्रव्ये कर्मवत्ताप्रतीतिरन्यौपाधिक्येवेति नेत्यर्थः । तथाच द्रव्ये कर्मवत्ताप्रतीतेः क्वचिदौपाधिकत्वेपि उपाधिविरहेपि स्वाभाविककर्मप्रतीतिरस्ति, तमसि तु आलोकक्रियान्वयव्यतिरेकानुविधायिन्येव कर्मप्रतीतिरिति तस्या दोषजन्यत्वान्न सा द्रव्यत्वसाधिकेति भावः । 'द्रव्येऽन्यौपाधिकी' इत्येव च पाठः । नचैवमपि कथमभावे भावधर्मारोपः, कुत्राप्यदृष्टत्वादिति चेन्न, दुःखाभावे सुखत्वारोपस्य दृष्टत्वात्, भारापगमे सुखी संवृत्तोऽहमिति प्रत्ययात् ॥

त—**नचेति** । 'नच महानसीयवह्न्यारम्भक' इति पाठः ॥

दि—**इहेति** । 'महान्' इति प्रक्षिप्तम् । एवं 'अपि' इति च । **भ्रमत्वापत्तेरिति** । ननु ममेदमिष्टमित्यत आह—**तमो नीलमिति** । **सुवर्णस्यातिरिक्तद्रव्यस्येति** । एतानि नव द्रव्याणीत्यनेन दशमद्रव्यनिषेधः कृत इति वक्तुं न युज्यते, प्रतियोग्यप्रसिद्धेः । अतो यन्नवाधिकं तन्न द्रव्यम्, यद्द्रव्यं तन्नवान्तर्भूतमिति विवेकोऽभिप्रेतः । तत्र क्रमेणोदाहरणतया तमस्सुवर्णे दर्शिते इति बोध्यम् ॥

भा—**अदृष्टं शब्द एव चेति** । अत्रादृष्टपदादृष्टपदवाच्यत्वेन धर्माधर्मयोरुपस्थितिः, न तु प्रत्येकरूपेण । अत एव गुणग्रन्थे 'धर्माधर्मावदृष्टं स्यात्' इति वक्ष्यते । मुक्तावल्यान्तु, तदनुसारेण चतुर्विंशतित्वोक्तिः ॥

दि—'शब्दाः सप्त समुच्चिताः' इति पाठः ॥

---

उपस्थितिरिति । एवञ्चादृष्टपदवाच्यत्वं विभाजकधर्म इति भावः । इत्थञ्च मूलानुसारेण त्रयोविंशतिसंख्याका गुणा इति बोध्यम् । तदनुसारेणेति । तादृशविभागं हृदि निधाय ग्रन्थान्तरोक्तरीत्या धर्मत्वाधर्मत्वयोः स्वयं विभाजकत्वमङ्गीकृत्येत्यर्थः ॥

**त—गुणानां कारणताया इति** । द्रव्यत्वविधेयकानुमितिनिष्ठकार्यतानिरूपित गुणरूपलिङ्गनिष्ठकारणताया अवच्छेदकतया गुणत्वजातिसिद्धिरिति भावः । सैव कारणता 'द्रव्यकर्मभिन्न' इत्यादिमुक्तावल्यां प्रदर्शिता । इदन्तु चिन्त्यम्, एतदनुमितिलिङ्गतायाः कर्मादिषु सम्भवात्तद्व्यावृत्तगुणत्वजातिरेतावतापि न सिद्ध्येदिति । प्रभाकारैर्गुणग्रन्थे वस्तुत स्त्वित्यादिना वक्ष्यमाणयुक्तिरप्यनेन परास्ता । **घट इति** । 'घट उत्क्षिपति' इति पाठः । **इति मन्तव्यमिति** । भाष्ये कर्मग्रन्थे उत्क्षेपणादेश्शरीरावयवेष्विव तत्सम्बद्धमुसलादावपि सत्त्वं प्रतिपादितमिति चिन्त्यमेतत् । **उत्क्षेपणादिभिन्नत्वे सत्युत्तरेति** । अत्रोत्तरदेशसं योगानुकूलेति स्वरूपकथनम्, व्यावर्त्याभावात् । इदमत्रावधेयम्, गमनत्वस्य कर्मत्वापरप र्यायत्वेपि उत्क्षेपणत्वादिना विभागे भ्रमणत्वादिरूपेणाविभागे च मुनेराशयः स्पष्टीकृतो भाष्ये । तद्यथा, 'नाळिकायां वंशपत्रादौ पतति बहूनां पश्यतां युगपद्भ्रमणपतनप्रवेश नप्रत्यया दृष्टा इति जातिसङ्करप्रसङ्गः । नचैवमुत्क्षेपणादिषु प्रत्ययसङ्करो दृष्टः । अथवा, अस्त्वपरं सामान्यम् । गमनत्वमनियतदिग्देशसंयोगविभागकारणेषु भ्रमणादिष्वेव वर्तते । गमनशब्दश्चोत्क्षेपणादिषु भाक्तो द्रष्टव्यः, स्वाश्रयसंयोगविभागकर्तृत्वसामान्यात्' इति । विस्तरस्तु भाष्यादित एवावसेयः ॥

**मु**—द्रव्यत्वादिवत्सामान्यत्वमप्यखण्डमेव सामान्यानां लक्षणं भवेदिति भ्रमं निराकर्तुमाह—**तल्लक्षणन्त्विति** । समानानाम्, एकधर्मवतां नानावस्तूनां भावः सामा न्यमिति सामान्यपदयोगार्थ एव परिष्कृतो लक्षणमवसेयम् । **नित्यत्वे सतीतीति** । एतदुत्तरम् अनेकेतीत्यन्तं प्रक्षिप्तम् ॥

**दि—व्यवहारस्य वा सिद्धिरिति** । यद्यपि व्यवहारे व्यवहर्तव्यताव च्छेदकज्ञानविधया लक्षणज्ञानस्योपयोगात् सामान्यमिति व्यवहार एवात्र लक्षणप्रयोजनं सम्भवतीति तत्सिद्धिपर्यन्तानुधावनं विफलम्, तथापि गन्धवत्त्वादेः पृथिव्यादिलक्ष णत्वोपपत्तये तदावश्यकता बोध्या । **अनेकेति** । 'अनेकत्वमेकभिन्नत्वम्' इति पाठः । अत्र मञ्जूषा द्रष्टव्या । सामान्यलक्षणे वृत्तित्वस्यैवाघटनात् 'नित्यत्वे सत्यनेकवृत्तित्वमत्यन्ता भावेप्यस्ति' इति दूषणोक्तिः प्रकृतानुपयोगिनीत्याक्षेपं निरसितुमाह—**समवेतत्वघटकेति** ॥

---

नाळिकायां गर्ते ॥



**त—विवक्षणीयत्वान्नातिव्याप्तिरिति** । 'नातिव्याप्तिः' इति प्रक्षिप्तम् । **समवेतत्वान्वेति** । 'समवेतत्वरूपत्वान्न' इति साधुः पाठः । **द्वित्वाद्येति** । 'द्वित्वा द्यवच्छिन्ने जातेर्वृत्तित्वम्' इति पाठः । **नित्येष्विति** । 'विभुषु' इति ताळीग्रन्थपाठः ॥

**दि**—ननु पूर्वोपदर्शितयुक्त्या द्रव्यत्वेन संयोगत्वेन कार्यकारणभाव एव मानाभाव इत्यतो दूषणान्तरमाह—**तुल्ययुक्त्येति** । **निस्सामान्यत्वे सतीति** । निस्सा मान्यत्वमत्र समवेतशून्यत्वं, समवायानुयोगित्वशून्यत्वं, सत्ताशून्यत्वं वा बोध्यम्, तेन नात्माश्रयप्रसङ्गः । **सम्मतिमाहेति** । तथाच व्यक्त्यभेदो यदि जातिबाधको न स्यात्, तर्ह्याचार्यवचनमप्रमाणं स्यादिति तर्कोऽस्तीति भावः । ननु निर्युक्तिकत्वादिष्टमिदमित्यत आह —**बह्विति** । यद्येकव्यक्तिवृत्तिर्जातिः स्यात्, तर्हि सामान्यपदबोध्यस्स्यादिति तर्कान्तरम नेन सूचितम् । तत्रापीष्टापत्तिशङ्कां वारयति—**सर्वसिद्धत्वादिति** । अत्रानेकवृत्तीति विहाय बहुवृत्तीत्युक्त्या नित्यसंयोगाङ्गीकारेपि न तत्र सामान्यलक्षणातिव्याप्तिप्रसक्तिरिति सूचितम् । यत्किञ्चिद्बहुत्वाधिकरणयावद्वृत्तित्वं व्यापकतासम्बन्धेन बहुत्वविशिष्टत्वरूपं जातिलक्षणघटकम् । इत्थञ्च संयोगादावतिव्याप्त्यसम्भवेपि त्वित्वादिसंख्यादावतिव्याप्ति वारणाय नित्यत्वदळमिति बोध्यम् ॥

**त—स्वाश्रयनिष्ठस्वाश्रयेति** । तद्घटभेदस्य तद्घटेतरस्मिन् सर्वत्र विद्यमानत्वात् तद्घटे च घटान्तरभेदसत्त्वात् घटत्वाश्रयप्रतियोगिकभेदः केवलान्वयीति तदभावाप्रसिद्ध्या स्वपदेन घटत्वादीनां ग्रहणं न सम्भवतीति तेषां जातित्वोपपत्तिः । इत्थञ्च स्वाश्रयनिष्ठत्वांशस्य प्रयोजनाभावात् व्यक्तेरभेद इत्यत्र षष्ठ्यन्तस्य पञ्चम्यन्तस्य वा स्वाश्रयप्रतियोगिकत्वमर्थः, तस्य च भेदेऽन्वय इति विवक्षितार्थलाभात् 'भेदपदेन स्वाश्रयप्रतियोगिकभेदस्य विवक्षितत्वात्' इति तरङ्गिण्युक्तिरपि चिन्त्या ॥

**दि**—ननु व्यक्त्यभेदस्याकाशनिष्ठस्य कथमाकाशत्वे जातित्वाभावसाधकत्वम्, पक्षधर्मत्वाभावादित्यत आह—**एकव्यक्तिकत्वमिति** । तथाच स्वाश्रयप्रतियोगिकभेदा भावसामानाधिकरण्यं, सामानाधिकरण्येन तादृशभेदाभावो वा हेतुरभिमत इति भावः ॥

---

**पूर्वोपदर्शितयुक्त्येति** । द्रव्यत्वजातिसिद्धौ 'इदमुपलक्षणम्' इति दिनकरीय ग्रन्थावतारिकायां स्वेनोपदर्शितयुक्त्येत्यर्थः ॥

**त—स्वाश्रयनिष्ठभेदाप्रतियोगीति** । एकपदस्य स्वसमभिव्याहृतपदार्थनिष्ठ भेदाप्रतियोगिबोधकत्वादिति भावः । स्वसमभिव्याहृतपदार्थप्रतियोगिकभेदाभाववद्बोधकत्वाङ्गीकारे सुगमतया दर्शितहेतुलाभ इति ध्येयम् ॥

**दि—स्वभिन्नजातीति** । स्वभिन्नघटाद्यन्यतमत्वसमनियतत्वाद्घटत्वादीनां जातित्वं न स्यादिति स्वभिन्नस्य जातित्वेन निवेशः । 'तत्त्व जातित्वे' इति पाठः । व्यक्त्यभेदादीनां विस्तरेण विचारो मञ्जूषायां वर्तत इति नात्र प्रतन्यते । **सङ्करश्चेति** । 'समानाधिकरणधर्मयोः' इति पाठः । सङ्करस्य जातिबाधकत्वसाधकव्याप्तौ घटपटसंयोगमादाय घटत्वे, घटत्वमादाय घटपटसंयोगे च व्याप्तिभङ्गवारणाय धर्मविशिष्टधर्मत्वमुपेक्ष्य जातिविशिष्टजातित्वमुक्तम् ॥

**त—एतच्चापातत इति** । पद्यस्थाथशब्दश्च पादपूरणमात्रार्थक इत्यभिप्रायः । वस्तुतस्तु, वक्ष्यमाणानां जातिमत्त्वबाधकत्वमिति वैलक्षण्यज्ञापनायैवाथशब्दः । जातिबाधकसङ्ग्रहपदस्य चावृत्तिरेवाभिप्रेतेति ज्ञेयम् ॥

**दि—यद्वा रूपस्येति** । 'यद्वा' इति प्रक्षिप्तम्, ज्याय इत्युपसंहारात् । तदनुरोधेन तरङ्गिण्यामपि रूपस्येतीति प्रतीकधारणं बोध्यम् । 'व्यावर्तकत्वमिति नियमात्' इति तरङ्गिण्यनुसारी पाठः । **सामान्यरूपेणैवेति** । एवकारेण तद्व्यक्तित्वव्यवच्छेदः । एवञ्च न मञ्जूषादर्शितदोषप्रसक्तिः । नियमे चास्मिन् प्रमाणमनुभव एव । तथाहि, घटपटादिगतनीलशुक्लादीनां तारतम्याभावे तत्तन्नीलेन घटानां तत्तच्छुक्लेन पटानाञ्च परस्परं भेदग्रहो नास्ति, अस्ति च नीलत्वादिरूपेण नीलादीनां तद्वदितरभेदसाधकत्वम् । एवमप्यप्रयोजकत्वमाशङ्कमानान् प्रति स्वाभिमतासिद्धिरूपं व्याघातं दर्शयति—**तादृशनियमानङ्गीकार इति** ॥

**त—व्यावर्तकत्वमिति** । 'व्यावर्तकत्वस्य भेदानुमापकत्वस्य' इति पाठः । **सामान्यरूपेणैवेतीति** । एतदुत्तरं 'सामान्यावच्छिन्नमेवेत्यर्थः' इति पाठः । **कम्बुग्रीवादिमत्त्वादिति** । 'कम्बुग्रीवादिमतः' इति पाठः । **सत्तावद्भिन्नोभय**

---

**दर्शितहेतुलाभ इति** । स्वाश्रयप्रतियोगिकभेदाभावसामानाधिकरण्यरूपस्योक्तहेतुलाभ इत्यर्थः ॥



**वादिसिद्धमिति** । अत्र सत्तावदितिस्थाने द्रव्येति पठनीयम्, अन्यथा प्रतियोगितायास्सम्बन्धघटकत्वमनतिप्रयोजनकं स्यात् ॥

**भा—द्रव्यादित्रिकेति** । इदञ्च वस्तुस्थितिबोधनम् । द्रव्यगुणवृत्तित्वं, द्रव्यकर्मवृत्तित्वं, गुणकर्मवृत्तित्वं वा लक्षणमवसेयम् । **सैवेति** । अत्रैवकारः कार्त्स्न्यार्थकः, तस्य तदर्थकत्वं गादाधर्यां 'जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुः' इति मणिपङ्क्तिव्याख्यानावसरे स्पष्टम् । अथापरजातिविशेषं दर्शयति—**द्रव्यत्वादीति** । तथाचापरजातिर्द्विविधा परापरा केवलापरा चेति भावः । परापरव्यवहारं द्रव्यत्वादौ सङ्गमयति—**व्यापकत्वादिति** ॥

**मु—यदि** व्यापकत्वादिरूपं परत्वादि, तर्हि स्वस्मिन्नपि स्वपरत्वादिव्यवहारापत्तिरित्यतस्तदर्थं विशदयति—**अधिकदेशवृत्तित्वमित्यादि** । नन्वत्राधिक्यं सर्वापेक्षया यत्किञ्चिदपेक्षया वा, आद्ये भावत्वादिकमादायासम्भवः, द्वितीये द्रव्यत्वादावतिव्याप्तिरित्यत आह—**सकलेति** । एवमग्रेपि । **सकलजातीति** । स्वभिन्नयावज्जातीत्यर्थः, ईश्वरः सर्वस्मात् पर इत्यादौ सर्वादिपदानामेतादृशार्थकत्वदर्शनात् । स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वरूपन्यूनवृत्तित्वसम्बन्धेन जातिविशिष्टान्यत्वं सत्तायाः लक्षणम् । तादृशसम्बन्धेन जातिविशिष्टत्वमपरजातिलक्षणम् । जातिविशिष्टत्वे सति जातिविशिष्टत्वं परापरजातिलक्षणम् । प्रथमवैशिष्ट्यं न्यूनवृत्तित्वसम्बन्धेन । द्वितीयञ्च स्वसामानाधिकरण्य,स्वाभावसामानाधिकरण्योभयसम्बन्धेन । प्रथमदलेन सत्तायाः, द्वितीयेन केवलापरजातीनाञ्च निरासः । प्रथमदलस्थाने सत्ताभिन्नत्वं वा देयम् । घटजलसंयोगादावतिव्याप्तिवारणाय जातित्वमपि घटनीयम् । पूर्वयोर्लक्षणयोर्वक्ष्यमाणेप्यस्यावश्यकता बोध्या । केवलापरजातिलक्षणन्तु स्वभिन्नजातित्वव्यापकस्वाभाववद्वृत्तित्वकत्वम् । अस्यचायमनुगमः, भेदविशिष्टाभावप्रतियोगित्वम् । वैशिष्ट्यञ्चाभावे स्वप्रतियोगियावत्प्रतियोगिकत्व,स्वाश्रयजातिवृत्तिभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वैतदुभयसम्बन्धेन । प्रतियोगितावच्छेदकता सामानाधिकरण्यसम्बन्धावच्छिन्नेति । अत्र, पृथिवीवृत्तिर्नेति प्रतीतिसाक्षिकभेदमादाय तदाश्रयजातित्वव्यापकत्वस्य सामानाधिकरण्यसम्बन्धेन पृथिवीत्वाभावे सत्त्वात् पृथिवीत्वेऽतिव्याप्तिरिति स्वप्रतियोगियावत्प्रतियोगिकत्वोपादानम् । नचैवमपि पृथिवीवृत्तित्वविशि

ष्टाभावमादाय पुनरपि पृथिवीत्वेऽतिव्याप्तिरिति वाच्यम्, उभयवृत्तिधर्मानवच्छिन्नत्व स्यान्त्यप्रतियोगितायां निवेशात्। यद्वा, स्वप्रतियोगियावत्प्रतियोगिकत्वस्थाने स्वप्रतियोगि निष्ठोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वं सम्बन्धः । इत्थञ्च पृथिवीवृत्तिभेदादीनां प्रतियोगितावच्छेदकस्योभयवृत्तित्वान्न तानादाय दोषः । **जातीनामपरत्वमिति** । एत दनन्तरं 'व्यापकत्वादिति। पृथिवीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवृत्तित्वाद्द्रव्यत्वादेः परत्वम्। सत्तापेक्षया व्याप्यत्वादल्पदेशवृत्तित्वाद्द्रव्यत्वादेरपरत्वम्' इति ताळीग्रन्थपाठः॥

दि—**द्रव्यादित्रिकेति** । 'द्रव्यादित्रिकवृत्तिः' इति पाठः। एवं 'परमपर श्चेति द्विविधम्' इति पाठः । **नीलोत्पत्तीति** । 'नीलाद्युत्पत्ति' इति पाठः॥

त—**गगनादीनामिति** । 'गुणानां तदनापत्तिः' इति समीचीनः पाठः। **घटकसम्बन्धत्व इति**। एतदनन्तरं 'गौरवात्' इति प्रक्षिप्तम् ॥

मु—अन्तशब्दस्य नाशसीमनिकटादिनानार्थकत्वात् प्रकृतोपयोगिसीमार्थकत्वं दर्शयति—**अवसान इति** । मूले विशेष इत्यस्यावृत्त्या अन्त्यो विशेषो विशेषः परि कीर्तित इति योजना । प्रथमविशेषशब्दस्य व्यावर्तक इति, द्वितीयस्य विशेषपदबोध्य इति चार्थः। यद्वा, द्वितीयविशेषशब्दोत्तरमितीत्यस्याध्याहारः। विशेष इति शब्दे नेति फलति। परिकीर्तितः व्यवहृतः। अस्मिन् तन्त्र इत्यादिः। अन्त्यपदसमभि व्याहृतपदार्थपरम्परया अन्त इति चानादितात्पर्यवशात्सिद्ध्यति। तथाच विशेषसमुदाय निष्ठं यद्विशेषान्तरशून्यविशेषघटितत्वं तत्प्रयोजक इत्यन्त्य इत्यस्यार्थ इति मञ्जूषायां स्पष्टम्। अन्त्यपदफलितार्थमाह—**यदपेक्षयेति** । यदपेक्षया यन्निष्ठविशेषान्तरभेदसाधने विशेषः विशेषान्तरम्। तथाचान्त्यो विशेष इत्यस्य विशेषान्तरशून्यविशेष इत्यर्थः पर्यवसितः। पञ्चमपदार्थस्य व्यावर्तकत्वरूपं विशेषत्वमुपपादयति—**घटादीनामित्या दिना विशेष एवेत्यन्तेन** । यदि च तद्घटे स्वेतरनिखिलघटापेक्षया भेदसाधनमभिमतम्, तदा अवयवभेदादित्यस्य अवयवसंयोगभेदादित्यर्थो वक्तव्यः। तेनाभिन्नावयवकयोर्द्व्य

---

अनादितात्पर्यवशादिति। अयमाशयः, लोके चरमान्त्यादिशब्दास्सजातीयसापे क्षमेव चरमत्वादिकं स्वभावतोऽभिदधते। यथा ब्रह्मक्षत्रादिपरम्परासु चरमं ब्राह्मणं पश्ये त्युक्ते ब्राह्मणसमुदायावधिकमेव चरमत्वं स्वभावतः प्रतीयते। तदिहान्त्यो विशेष इत्युक्ते वि शेषसमुदायसापेक्षमेवान्त्यत्वं प्रतीयत इति॥

अभिन्नावयवकयोरिति । विनष्टद्व्यणुक, पटाद्यवयवैरेवारब्धत्वादिति भावः॥



णुकपटायोः परस्परभेदस्यावयवभेदाप्रयुक्तत्वेपि न क्षतिः । अत्र परमाणूनामिति नित्य द्रव्यान्तरोपलक्षकम्। एतेन विशेषसत्त्वे प्रमाणम्, कपालादिपरमाण्वन्तानां द्रव्याणां विशेषत्वेपि विशेषान्तरवत्त्वं च बोधितम्। 'परस्परं भेदसाधकः' इति पाठः । विशेषे विशेषान्तरशून्यत्वं प्रतिपादयति—**सत्त्विति** । यदपेक्षयेत्युक्तमुपसंहरति—**तेनेति** । 'नास्तीति भावः' इति पाठः ॥

दि—**स्वभिन्नलिङ्गकेति** । केषुचिन्मुद्रितपुस्तकेषु 'स्वभिन्नलिङ्गजन्य' इति पाठः। स तरङ्गिण्यननुसारी । अयं विशेषो विशेषान्तराद्भिद्यत इत्यनुमितेरपि विशेषभिन्नात्म,सिद्ध्यभावादिजन्यत्वादसम्भववारणाय—**लिङ्गेति** । स्वविशेष्यकेति तु केन चित् प्रक्षिप्तम्; न महादेवभट्टलिखितम्, तत्प्रयोजनस्य स्वयमनभिधानात्। इत्थञ्च लक्षणस्यानुयोगिस्वत्वघटितत्वान्न समवायेप्यतिव्याप्तिः । अस्य चायमनुगमः, भेदवि शिष्टत्वम्। वैशिष्ट्यञ्च स्वप्रतियोगित्व,स्वविशिष्टविधेयतानिरूपितविशेष्यतासम्बन्धावच्छि न्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वोभयसम्बन्धेन । विधेयतायां स्ववैशिष्ट्यञ्च स्वाश्रयलिङ्गजन्यतावच्छेदकत्व,स्वप्रतियोगिसजातीयेतरभेदनिष्ठत्वोभयसम्बन्धेनेति । इतरत्व निवेशात् समवायव्यावृत्तिः। विधेयतायां जन्यतावच्छेदकत्वस्य, विशेष्यतायां तादृश विधेयतानिरूपितत्वस्य च प्रवेशान्न समूहालम्बनमादाय दोषः। तरङ्गिण्याम् 'अतेदमवधे यम्' इत्यादिना दूषणत्रयमुद्घाटितम्। तत्र 'प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभु त्सन्ते तर्करसिकाः' इति चिन्तामणिकारोक्तिरेव तृतीयस्य समाधानम्। त्र्यणुका वयवः सावयव इति परमाणुसाधकानुमानादेव परमाण्वोर्भेदस्य ज्ञातत्वान्न तत्पक्ष कानुमानेन विशेषसिद्धेरनुपपत्तिः। परमाणूनां परस्परभेदसाधक इत्यस्य च परमाणु विशेष्यकपरमाण्वन्तरभेदविधेयकानुमितिजनक इत्यर्थकतया तादृशानुमितेश्च विशेषसिद्ध्यु त्तरकालीनतया न तद्ग्रन्थासङ्गतिरन्योन्याश्रयो वा। एवञ्च न द्वितीयदोषस्यापि प्रसक्तिः। एवं प्रथमदोषस्यापि न प्रसक्तिः। तथाहि, वक्ष्यमाणरीत्या स्वात्मकलिङ्गजन्यस्वसजा तीयेतरभेदानुमितिविशेष्यत्वरूपस्वतोव्यावृत्तत्वस्यापि परमाणुभेदपक्षकानुमितिसाध्यकोटौ

---

स्वप्रतियोगिसजातीयेतरभेदेति । स्वप्रतियोगिविशिष्टप्रतियोगिकभेदेत्यर्थः। वैशि ष्ट्यञ्च साजात्य,स्वभिन्नत्वोभयसम्बन्धेन। अत्र घटो विशेषाद्भिद्यते कपालसमवेतत्वादित्याद्यनुमिति विधेयतामादाय लक्षणसमन्वयः। सावयव इति। अनेकावयवसंयोगजन्य इत्यर्थः॥

भानात्त्वस्मिन् विशेषान्तरभेदव्याप्यत्वसिद्ध्या स्वस्मिन् स्वेनैव विशेषान्तरभेदानुमिति सामग्र्यास्सम्पत्त्या अवश्यमेतदनुपदमेव, अयं विशेषस्तद्विशेषाद्भिद्यते एतद्विशेषादित्य नुमितेस्सम्भवान्न कथमपि तत्रास्सिषाधयिषोत्तरत्वमिति तादृशानुमितिमादायासम्भववा रकतया स्वभिन्नलिङ्गजन्यत्वं सार्थकमिति। नच घटः पटात् घटान्तराद्वा भिद्यत इत्या द्यनुमितीनां प्रत्यक्षात्मकसिद्ध्युत्तरत्वात्सिषाधयिषोत्तरमेव सम्भव इति घटादावतिव्या प्तिरिति वाच्यम्, पृथिवीत्वावच्छेदेन गन्धवत्त्वहेतुना जलभेदसाध्यिकां सिषाधयिषा नुत्तरामनुमितिमादायातिव्याप्तेर्वारणात्। भाष्ये तु, परमाण्वात्मादीनां परस्परवैलक्षण्यविष यकं योगिनां प्रत्यक्षं प्रदर्श्य तत्प्रत्ययनिमित्तत्वेन विशेषसिद्धिः प्रतिपादिता। आलो कस्वभावत्वादेवालोकप्रत्यक्षे यथा नालोकान्तरापेक्षा तथा विशेषस्वभावत्वादेव विशेषाणां परस्परभेदप्रत्यये स्वान्यापेक्षा नास्तीति च तत्रैव दर्शितम्। मुक्तावल्यान्तु, योगि प्रत्यक्षमनवलम्ब्यापि विशेषसिद्धिर्दर्शिता। 'परमाणूनां परस्परं भेदकः' इति तरङ्गिणी कृतां मतः पाठः। तदनुसारेण तद्व्याख्याप्रकारश्चारुतर इति बोध्यम्। ययैव इत्यत्र 'यथैव' इति, तयैव इत्यत्र 'तथा' इति च पाठः॥

त—स्वत इति। 'स्वतः प्रमाणान्तरनिरपेक्षम्। व्यावृत्ततयैव' इति पाठः। **विशेषान्तराभिन्नेनेति**। विशेषान्तरभिन्नत्वेनाज्ञायमानेनेत्यर्थः। **पृथिवीसमवेतत्वेनेति**। 'पृथिवीत्वेन' इति पाठः॥

**मु—अवयवावयविनोरिति**। 'अवयवावयविनोर्गुणगुणिनोः क्रियाक्रियाव तोर्जातिव्यक्त्योर्विशेषनित्यद्रव्ययोश्च' इति पाठः। द्रव्येषु गुणकर्मणोस्सम्बन्धप्रतीतिं स्पष्टयितुं गुणिक्रियावत्पदाभ्यां द्रव्येष्वित्यस्य विवरणम्। एवं तेषु जातेरित्यत्र त च्छब्देन न द्रव्यमात्रग्रहणमिति बोधयितुमाश्रयवाचिव्यक्तिपदेन विवरणम्॥

**दि—घटपदेति**। 'पद' इति प्रक्षिप्तम्। 'विशेषनित्यद्रव्ययोरिति' इति पाठः। **समवायेति**। 'समवायस्य' इति पाठः॥

---

**स्वस्मिन् विशेषान्तरभेदव्याप्यत्वसिद्ध्येति**। स्वात्मकलिङ्गजन्यत्वं नाम व्याप्ति निष्ठप्रकारतानिरूपिता या पक्षनिष्ठविशेष्यतानिरूपितस्वनिष्ठप्रकारता तच्छालिज्ञानजन्यत्वमित्यर्थात्त त्सिद्धिर्बोध्या॥



त—'घटकपालपद इति' इति पाठः। **नित्येति**। 'विशेषनित्यद्रव्ययोः' इति पाठः॥

**दि—सम्बन्धिभिन्न इति**। सम्बन्धिनौ भिन्नौ यस्मादिति व्युत्पत्त्या स्वभिन्नप्रतियोग्यनुयोगिक इत्यर्थः, तेन समवायस्य द्रव्यादौ स्वात्मकस्वरूपसम्बन्धेनैव वृत्तित्वात् सम्बन्धप्रतियोगिभिन्नत्वाभावादसम्भवस्य नापत्तिः। प्रतियोगित्व,स्वाश्रयप्र तियोग्यनुयोगिकत्वोभयसम्बन्धेन भेदविशिष्ट इति पर्यवसितोऽर्थः॥

**मु—विशिष्टबुद्धित्यादिति**। प्रकारतानिरूपकत्वे सति बुद्धित्वादित्यर्थः। निर्विकल्पके विशेष्यतादिविषयतायाञ्च व्यभिचारवारणाय विशेषणविशेष्यभागौ॥

दि—'किं प्रमाणम्' इति पाठः। **इत्यपि द्रष्टव्यमिति**। नच यत्सम्बद्धो भाव उत्पद्यते इत्येव लक्षणमस्तु, तेनैव ध्वंसमादायापत्तिपरिहारादिति वाच्यम्, द्रव्यादिप ञ्चकान्यतमत्वरूपभावत्वस्यातिगुरोः कार्यतावच्छेदकत्वासम्भवेन भावत्वावच्छिन्नकार्यतानिरू पिततादात्म्यसम्बन्धावच्छिन्नकारणतायाः समवायिकारणतारूपत्वासम्भवात्, भावनिष्ठेत्युक्तौ कालिकविशेषणतादिरूपस्वरूपसम्बन्धेन भावघटादेः कालादावपि सत्त्वात् कालादेस्तत्समवा यिकारणत्वापत्तेश्च। कार्यतावच्छेदकीभूतस्वरूपसम्बन्धे कालिकाद्यन्यत्वनिवेशे च विशेषण विशेष्यभावे विनिगमकाभावात् कारणताबाहुल्यापत्तिरिति। एवमपि समवायस्य नित्यगुण जात्यादिप्रतियोगिकत्वसिद्धिर्न भवतीति तत्प्रकारश्चिन्त्यः। 'यथा क्षित्यङ्कुरादिजनकतया' इति ताळीग्रन्थपाठः। **रूपनिरूपितत्वविशिष्टसमवायनिरूपिताधिकरणताया इति**। अलाक्षेपसमाधाने मञ्जूषायां द्रष्टव्ये। इदं पुनरिहावधेयम्, हरिरामादिदर्शितदिशा वायू रूपवानिति प्रतीतेर्भ्रमत्वोपपादने सुशकेपि वायौ समवायेनोद्भूतरूपसत्त्वात् वायुप्रत्यक्षा पत्तिवारणमशक्यम्। अतो द्रव्यप्रत्यक्षकारणतावच्छेदकसम्बन्धतया विशिष्टसमवायाधिक रणतैवाङ्गीकर्तव्येति। **एवमन्यत्रापीति**। भाष्यकारैस्तु, सम्बन्धसत्त्व इत्यादिव्याप्तिरेव नाङ्गीकृता। उक्तं हि तत्र 'यथा कुण्डदध्नोः संयोगैकत्वे भवत्याश्रयाश्रयीभाव नियमः, तथा द्रव्यत्वादीनामपि समवायैकत्वेपि व्यङ्ग्यव्यञ्जकशक्तिभेदादाधाराधेयनियम इति' इति। 'द्रव्यत्वादिव्यञ्जिका शक्तिर्द्रव्याणामेव, तेन द्रव्येष्वेव द्रव्यत्वं समवैति नान्यत्र' इति चात्र न्यायकन्दळी। तथाचाधाराधेयभावो न केवलं सम्बन्धसत्त्वाधीनः, किन्त्वदृष्टविशेषाधीनोपीत्याशयः। एतदनुरोधेन मुक्तावलीग्रन्थस्स्वरसतया सङ्गमयितुं

शक्यत इति ध्येयम् । **सम्बन्धान्तरमिति** । 'सम्बन्धान्तरमिति' इति पाठः । **तत्र घटाभावाभावादिति** । सम्बन्धसत्त्वेपि लौकिकप्रत्यक्षे विषयस्य कारणत्वात् विषयाभावादेव न लौकिकप्रत्यक्षम् । उपनीतघटाभावबुद्धिश्चेष्टैव । तथा तस्याः प्रमात्वमपि । इदानीं घटाभाववदिति बुद्धेश्च घटाभावे एतत्कालावच्छिन्नत्वस्य बाधादेव न प्रमात्वापत्तिरिति भावः । वैशिष्ट्यस्य च तत्र सत्त्वादित्यत्र तच्छब्दस्य पूर्वनिर्दिष्टदेशान्तरपरताभ्रमं निराकरोति—**तत्र घटानयनेन घटवतीति** । अभावसम्बन्धविचारे समवायेन श्यामवत्ताबुद्धिप्रसङ्गवारणस्यानौचित्यं परिहरति—**ननु सिद्धान्तिन इति । यत्रेति** । 'यत्र यत्र' इति पाठः ॥

**मु—तत्तत्कालीनमिति** । ननु चैत्रस्य तद्भूतले घटाभावप्रमापूर्वकाले तत्प्रमाभावात्स्वरूपविशेषरूपचक्षुस्संयुक्तविशेषणताविरहात् कथमभावप्रमेति चेन्न, अन्यस्य मैत्रादेरन्ततो योगिनां वा तत्प्रमासम्भवात् । तत्तत्कालीनत्वविशिष्टमात्रस्य सम्बन्धत्वे तत्त्वस्य घटवद्भूतलेपि सत्त्वात् तत्रापि घटाभाववत्ताबुद्धिप्रसङ्ग इति तत्तत्कालीनत्वविशिष्टतत्तद्भूतलस्य सम्बन्धत्वोक्तिः । यद्ययमेव पटाभावादीनामपि सम्बन्धः, तदा पटवति घटशून्यभूतले पटाभावबुद्धिप्रसङ्ग इति—**तत्तदभावानामिति** ॥

**दि—किन्त्वीदृशस्स्वरूपविशेष इति** । यत्र यस्याभावस्य सम्बन्धस्सार्वदिकः, यथा जलादौ पृथिवीत्वाद्यभावस्य, तत्र तस्याभावस्य सम्बन्धस्तदभावस्वरूप एव, न तत्र कालस्य सम्बन्धघटकता, गौरवादिति ध्येयम् । नचैवं घटाभावजलत्वाभावविशिष्टबुद्ध्योस्संसर्गांशे वैलक्षण्यापत्तिरिति वाच्यम्, भूतलचत्वरादिषु घटाभावस्य प्रतीतीनामिव तयोरपि वैलक्षण्यस्येष्टत्वात् । अधिकं मञ्जूषातोऽवगन्तव्यम् । परन्तु, यत्तलोक्तं सम्बन्धघटककालस्य लघुना प्रतियोगिसमवधानानधिकरणत्वेन परिचायनं युक्तमिति । तच्चिन्त्यम्, वृक्षे कपिसंयोगसत्त्वदशायां जायमानायाः कपिसंयोगाभाववानिति बुद्धेरनुपपत्तेः, तत्कालस्य प्रतियोगिसमवधानानधिकरणत्वासम्भवात् । वस्तुतस्तु, भूतलादौ घटाभावादिबुद्धिनियामकसम्बन्धविचारे तादृशबुद्धेरेव सन्निहितोपस्थितिकतया तयैव कालपरिचायनं युज्यते, नतु व्यवहितोपस्थितिकेन धर्मान्तरेणेति । एतेन अव्याप्यवृत्त्यभावावगाहिनि वृक्षः कपिसंयोगाभाववानित्यादौ कालस्य सम्बन्धघटकत्वमेव नास्ति । अतो नोक्तानुपपत्तिरिति परास्तम् । अग्रे घटकालस्य सम्बन्धाघटकत्वादिति वचनञ्च



व्याप्यवृत्तिस्थले घटकालघटाभावप्रमाभावकालयोरभेदात् । **तावन्मात्रेति** । 'तन्मात्रविषयक' इति पाठः । तरङ्गिण्यामपि तदनुरोधेन 'तन्मात्रेति' इत्येव पाठः । तन्मात्रविशेष्यकेत्यर्थः, तेन घटाद्यभाववतो भूतलादेर्जात्यतिरिक्ततया स्वरूपतो भानाभावात्तादृशज्ञानस्य नाप्रसिद्धिः । अत एव तरङ्गिण्यां 'विशेष्यतया सत्त्वात्' इत्युक्तम्, न तु विषयतयेति । नच तद्व्यक्तिरिति ज्ञानं तन्मात्रविषयकं प्रसिद्ध्यति, तद्व्यक्तित्वस्य तद्व्यक्तितोऽनतिरेकात् तस्य च विषयतानवस्थाभिया स्वरूपतो भानाभ्युपगमादिति वाच्यम्, भूतलादौ घटाभावादिबुद्धिकाले नियमतस्तज्ज्ञानसत्त्वे प्रमाणाभावात् ॥

**त—तद्वृत्तीति** । तत्तद्भूतलवृत्तीत्यर्थः । **अनन्तभेदेति** । तद्भिन्नत्वप्रकारकप्रमास्तद्व्यक्तित्वेनादाय तत्तद्विशेष्यत्वावच्छिन्नभेदानामानन्त्यं स्फुटम् । एवं प्रमास्थाने संवादीच्छादीन् घटयित्वा, तद्भिन्नभेदः, तद्वृत्तिधर्मवद्भेदः इत्यादिकमादाय च नानात्वमवसेयम् । इदञ्च समनियतभेदानां परस्परं भेदाभिप्रायेण । अभेदपक्षे तु, तन्मात्रवृत्तिभेदस्य लाघवादधिकरणात्मकत्वमेवेति न विनिगमनाविरहप्रसङ्गः । 'एतेन' इत्यादिना अनुपदवक्ष्यमाणदूषणप्रसङ्गेन नोक्तभेदानामधिकरणात्मकत्वमिति भवत्येव विनिगमनाविरह इति न कल्पान्तरानुसरणावश्यकतेत्याक्षेपं हृदि निधाय प्रकारान्तरेणावतारयति—**वस्तुतस्त्वित्यादिना । अखण्डैकभेदः** घटाभावाधिकरणानि यावन्ति तावदन्यान्यत्वरूपो भेदः । **अन्योन्याभावस्यैव विलयप्रसङ्गादिति** । अत्रेदमवसेयम्, भेदाधिकरणकभेदस्येव तदधिकरणमात्रवृत्तिभेदस्यापि तदधिकरणस्वरूपत्वमेव युक्तम्, लाघवात् । नचैवमन्योन्याभावविलयप्रसङ्गः, घटभेदादीनां नानाधिकरणकानां तत्तत्स्वरूपत्वे गौरवेणातिरिक्तान्योन्याभावसिद्धेः । इत्थञ्च प्रथमावतारिका सङ्गतैवेति । **युक्तश्चैतदिति । एतत्** वैशिष्ट्यस्य सम्बन्धान्तरत्वं वदद्भिः स्वरूपज्ञानाद्योस्तत्त्वे विनिगमनाविरहस्य प्रदर्शनम् । **मत इति** । एतदनन्तरम् 'अन्यथा अतिरिक्त' इति पाठः । **असिद्धिप्रसङ्गादिति** । क्लृप्तानां विनिगमनाविरहे चातिरिक्तसमवायकल्पनमेव न्याय्यमिति भावः । नचाखण्डभेदमादाय विनिगमनाविरहासम्भवे तस्यैवास्तु सम्बन्धत्वम्, किं वैशिष्ट्यकल्पनयेति वाच्यम्, तस्य व्याप्यवृत्तित्वेन घटकालेपि सत्त्वात्तदानीमपि घटाभाववत्ताबुद्धेः प्रमात्वापत्तेः ॥

**षट्त्वाद्यवच्छिन्नभेद इति** । 'विषयतया षट्त्वावच्छिन्नभेदः' इति पाठः । **तथा बोध्यमितीति** । एतदुत्तरं 'प्रतियोगितावच्छेदकं बोध्यमित्यर्थः' इति पाठः ।

**द्रव्यादीनां षण्णामिति ।** सिद्धान्तरीत्यनुसारेण द्रव्यादिज्ञानमन्तरापि तद्भेदादीनां स्वरूपतो भानसम्भवात्, गौरवरूपमेव दूषणं सारमिति बोध्यम् । **संसर्गेति ।** 'संसर्गानुयोगिता' इति पाठः ॥

**दि—अभावत्वस्याखण्डोपाधित्व इति ।** क्लृप्तपदार्थातिरिक्ताखण्डोपाधित्व इत्यर्थः, तेन सत्ताभावस्यापि निरवच्छिन्नप्रकारताश्रयत्वे सति स्वरूपसम्बन्धेनानेकवृत्तित्वरूपाखण्डोपाधित्वेपि न क्षतिः । **तच्च पूर्वानुपस्थितमपीति ।** घटो नास्तीतिवत् घटाभावो नास्तीत्यपि प्रत्ययात् भावाभावसाधारणमेवाभावत्वं तत्र प्रकारतया भासते, तच्चाखण्डोपाधिरनुयोगिताविशेषो वा भवितुमर्हति, ननु दर्शितसत्तात्यन्ताभाव इति तस्याभावबुद्धौ प्रकारत्ववचनमनुचितम् । अखण्डोपाधिर्विश्वनाथसम्मतः । तस्य च सामान्येऽन्तर्भाव इति मञ्जूषाकृतः । तत्रेदं विचारणीयम्, नञ्पदशक्यतावच्छेदकधर्मो भावाभावसाधारण इत्यविवादम्, प्रकृते तु योग्यानुपलब्धिरूपसहकारिविशेषाधीनमभावप्रत्यक्षमधिकृत्य विचारः, तत्र चाभावमात्रवृत्तिधर्मस्यैव प्रकारतया भानमुचितम् । एवमखण्डोपाधेस्सामान्यान्तर्गतत्वोक्तिरप्यसङ्गता, द्रव्यादिपञ्चकस्य प्रदर्शितं यत् समवायित्वरूपं साधर्म्यं तस्याव्याप्तिग्रस्ततापत्तेः । 'जात्यखण्डोपाध्यतिरिक्तस्य' इति पाठश्च न प्रामाणिकः, 'जात्यतिरिक्त' इति प्रतीकस्यैव प्रभायां दर्शनादिति । ननु प्रतियोगिधीकार्यतावच्छेदकं नाभावत्वप्रकारत्वघटितम्, गौरवादिति शङ्कामपनुदति—**अन्यथेति । इदं तम इतीति ।** इदन्त्वेन भासमानपदार्थबोधनाय तम इति, नत्वत्र इदन्त्वेन तमस्त्वेन च भानमभिप्रेतम्, प्रयोजनाभावादित्यस्मद्गुरुचरणाः ॥

**त—अन्योन्याभावगर्भतयेति ।** 'अन्योन्याभावत्वगर्भतया' इति पाठः । **अभावत्वोपगम इति ।** 'अभावत्वरूपत्वोपगमे' इति पाठः । **हेतुतायां व्यभिचार इति ।** एतदुत्तरम् अयंभाव इत्यतः पूर्वम् 'इत्याशङ्कते—नचेति । विशेषणभेदेनेति' इति साधुः पाठः । **अतो घटविशिष्टबुद्धिं प्रतीति ।** अथ प्रकारतासम्बन्धेन बुद्धिं प्रति विषयतासम्बन्धेन बुद्धेर्हेतुत्वम्, लाघवात् । तथाच व्यभिचारो दुष्परिहरः । नचैवं चैतस्य घटज्ञानान्मैत्रस्य तद्विशिष्टबुद्ध्यापत्तिरिति वाच्यम्, तत्पुरुषीयत्वस्य कार्यकारणतावच्छेदककोटौ निवेशादिति चेन्न, सुखादिविशिष्टप्रत्यक्षे व्यभिजारेण दर्शितसामान्यकार्यकारणभावासम्भवात्, सुखाद्युत्पत्तिद्वितीयक्षणे सुखादिनिर्विकल्पकसम्भवेपि तदुत्तरक्षणे सुखादिनाशाद्विषयाभावेन तद्विशिष्टप्रत्यक्षानुदयात् ॥



**भा—द्विधा संसर्गान्योन्याभावभेदत इति ।** ज्ञानज्ञाप्यत्वं पञ्चम्यर्थः । तथाच संसर्गान्योन्याभावयोर्यः परस्परं भेदस्तज्ज्ञानज्ञाप्यपरस्परासमानाधिकरणधर्मद्वयवान्नित्यर्थः ॥

**दि—अन्योन्याभाव इतीति ।** 'अन्योन्याख्य इति' इति पाठः ॥

**मु—एकविधत्वादिति ।** एका स्वसजातीयद्वितीयरहिता विधा बुबोधयिषितधर्मो यस्य तत्त्वादित्यर्थः, तेनान्योन्याभावे तद्व्यक्तित्वाभावत्वादिबहुधर्मसत्त्वेपि नासङ्गतिः । तेषु बुबोधयिषाभावे च निमित्तमनुक्तिवेद्यत्वमेव । **तद्विभागाभावादिति ।** अत्र प्रथमनिर्दिष्टसंसर्गाभावविभागात् प्राक् चरमनिर्दिष्टान्योन्याभावस्य विभागाभावकथनं सूचीकटाहन्यायमाश्रित्य कृतमित्यवसेयम् । प्रभादर्शिता वा गतिरवसेया । अथ कथमस्य संसर्गाभावविभागे प्रयोजकत्वमिति चेन्न, संसर्गाभावलक्षणस्यान्योन्याभावघटितत्वेन तत्रैव प्रथमं विभागजिज्ञासोदयात्तन्निवर्तनद्वारा प्रयोजकत्वसम्भवात् । ल्यब्लोपे वात्र पञ्चमी, तद्विभागाभावं मनसिकृत्येत्यर्थः । **अन्योन्याभावभिन्नाभावत्वमिति ।** अथ घटत्वात्यन्ताभावस्य स्वसमनियतघटभेदादभिन्नतया तत्राव्याप्तिरिति चेन्न, समनियतयोरप्यभावयोर्भेदाङ्गीकारेण लक्षणकथनात्, अन्यथा चतुर्धा विभागस्यैव व्याघातात् ॥

**त—संयोगितादात्म्यस्य संयोगरूपतयेति ।** तादात्म्यत्वघटकमसाधारणत्वं न द्वित्वानुयोगितानवच्छेदकत्वादिरूपमेकव्यक्तिमात्रवृत्तित्वम्, संयोगे तदभावात् । किन्तु, तदितरावृत्तिधर्मत्वमेव तत्तादात्म्यत्वम् । इत्थञ्च संयोगितादात्म्यत्वं संयोगेऽनपायम् । अस्य च द्रव्यत्व,तद्व्यक्तित्वादिसाधारण्येपि न क्षतिः । यद्वा, तत्तादात्म्यत्वं तद्विशेषणत्वमेव, संयोगिविशेषणत्वञ्च संयोग एव न द्रव्यत्वादौ । विशेषणत्वं तद्विशेष्यकज्ञानप्रकारत्वम् । लक्षणन्तु, वृत्तित्वावच्छिन्ना, विशेषणत्वावच्छिन्ना वा या संसर्गता तन्निरूपकप्रतियोगिताकाभावत्वमेव लघुभूतं बोध्यम् । तादात्म्यत्वं तद्व्यक्तित्वादिप्रत्येकवृत्ति

---

जिज्ञासोदयादिति । ननु संसर्गाभावलक्षणस्यान्योन्याभावघटितत्वे अन्योन्याभावः कोसावित्यन्योन्याभावस्य लक्षणजिज्ञासैवोदेतुमर्हति, न विभागजिज्ञासेति प्रयोजकत्वं दुर्घटमिति चेन्न, यतः प्रथमं लक्षणजिज्ञासाया एवोत्पादेपि लक्षणकथनेन निवर्तितायां तस्यां सामान्यधर्मस्य ज्ञाततया अनुपदं विभागजिज्ञासाया अवश्योत्पादात्तन्निवर्तनानन्तरमेव संसर्गाभावे लक्षणविभागयोर्जिज्ञासोदय इति ॥

धर्ममात्रसाधारणमिति गदाधरभट्टाचार्यमते तु, द्वित्वपर्याप्त्यनुयोगितावच्छेदकत्वाभाव निष्ठावच्छेदकताकसंसर्गनिष्ठावच्छेदकताकप्रतियोगिताकाभावत्वमेव तदिति बोध्यम् ॥

दि—**उत्पन्नस्य पुनरुत्पादभियेति** । एतदापत्तिवचनमपार्थकमिति मञ्जूषाकृतः । युक्तिस्तत्रैव द्रष्टव्या । परन्तु, सामग्र्यधिकरणक्षणत्वस्य कार्योत्पत्त्यव्यवहितपूर्वत्वव्याप्यत्वं सर्वसम्मतम्, अन्यथा सत्यामपि सामग्र्यां तदनन्तरं कदाचित् कार्यानुदयस्यापि प्रसङ्गात्। तादृशव्याप्तिभङ्ग एवात्राभिप्रेत इति नापार्थकत्वमत्रेत्यवधेयम्। **लोकानां प्रत्ययाभावादिति** । अथात्रोपदर्शितप्रत्यक्षाभावेपि घटोत्पत्तेः प्राक् इहेदानीं घटो नास्तीति लोकानामस्ति प्रत्यक्षम्। तत्र च ध्वंसप्रागभावाधिकरणे नात्यन्ताभाव इति वदतां प्राचीनानां प्रागभाव एव विषय इति चेत्, सत्यम्। तथाप्येतदुक्तेर्नवीनमतानुसारित्वान्न दोषः । तर्हि, प्राचीनैः प्रागभावे प्रत्यक्षमेव प्रमाणतया कुतो नोपन्यस्तमिति चेन्न, प्रागभावे विप्रतिपन्नं प्रति तदुपन्यासस्यानुपयोगात्। अत एव प्रत्यक्षविषयेप्यास्मन्यनुमानमेव प्रमाणतया दर्शयिष्यते। **जनकतया क्लृप्तस्येति** । अथैकोनसहस्रतन्तुकपटोत्पत्त्यनन्तरमन्तरैव तन्नाशं तन्त्वन्तरसंयोगेन सहस्रतन्तुकपटो जायते। तथाच तत्र व्यभिचार इति चेन्न, वेमाभिघातेन पूर्वपटनाशस्यैव तत्र स्वीकारात्, मूर्तयोस्समानदेशताविरहेण नानापटस्यैकदाऽनुपलम्भेन च तत्स्वीकारस्यावश्यकत्वात् ॥

त—**द्वन्द्वान्त इतीति** । 'द्वन्द्वात्परमिति' इति पाठः। पण्डितपामरसाधारणानां पण्डितपामरसाधारणधर्मावच्छिन्नानाम्। **ध्वंसाभावत्वस्येति**। तद्व्यक्तित्वानां लघुत्वेपि बहुष्वनुगतत्वाभावान्न तेषां कारणतावच्छेदकत्वसम्भव इति भावः। प्रसज्यत इत्यनन्तरम् 'एवं जन्यद्रव्यं प्रति द्रव्योत्पत्तिकालोत्पत्तिकध्वंसाभावस्य हेतुत्वे तद्घटनाशानन्तरं तदारम्भककपालाभ्यां घटान्तरोत्पत्तिरपि न स्यात्, तादृशध्वंसाभावरूपकारणाभावात्। अतस्तत्तद्द्रव्यम् प्रति' इत्यादिपाठः । **सूचितमिति** । आक्षेपमनुवदता सिद्धान्तिनेति शेषः। अत्र नचेत्यादिशङ्कासमाधाने आपाततः, शङ्कायामिष्टापत्तेस्सुवचत्वात्, प्राचीनमते तद्ध्वंसप्रागभावाधिकरणे तद्ध्वंसात्यन्ताभावस्यासम्भवात्तद्द्रव्यस्यैवानुत्पत्तिभिया तस्य कारणत्वायोगात्समाधानस्याप्यसमञ्जसत्वात्। 'तद्ग्रन्थाभिप्रायः' इत्यनन्तरं 'वस्तुतस्तु' इत्यतः पूर्वम् 'अत्रोक्तदोषाणां सत्त्वेपि तेषां स्पष्टत्वेन तानुपेक्ष्य दूषणान्तरमाह—प्रागभावेति' इति पाठः। **अभावादित्यत्रापीति** । 'विरहेण इत्यत्रापि'



इति पाठः। एवम् 'द्रव्यस्याभावादित्यर्थः' इत्यत्र 'द्रव्याभावस्य विरहेणेति चार्थः' इति च पाठः । **द्रव्यस्य प्रतिबन्धकत्वानुपगमेपीति** । अयमाशयः, सामान्यधर्मावच्छिन्ने जननीये विशेषधर्मावच्छिन्नसामग्रीष्वन्यतमसत्त्वं प्रयोजकम्, तथाच तदभावादेव न पूर्वोपदर्शितघटत्वावच्छिन्नापत्तिरिति । **पूर्वग्रन्थभाव इति** । 'पूर्वग्रन्थाभिप्रायः' इति पाठः। उत्पश्याम इत्यनन्तरम्, एवमित्यारभ्य प्रागभावेतीत्यन्तो ग्रन्थः प्रक्षिप्तः ॥

दि—**व्यभिचारापत्त्येति** । ननु कार्याधिकरणयावद्व्यक्तिवृत्त्यभावप्रतियोगित्वस्यैव व्यभिचाररूपताया वक्ष्यमाणतया कथमियमापत्तिरिति चेन्न, अन्यतरकर्मादेस्संयोगादिकारणतायाः सर्ववादिसिद्धत्वात्, तत्र चानन्यगतिकतया तादृशं गुरुभूतं व्यभिचारस्वरूपमङ्गीक्रियते, न तु सर्वत्र, कारणतायाश्च कार्यभेदभिन्नतया नाननुगमोपि दोषायेत्यभिप्रायात्। संयोगव्यक्तेस्समवायेन हेतुतायामपि तदनधिकरणप्रथमादितन्तुष्विव तत्पटानधिकरणतन्तुघटितसमुदायेपि तत्पटोत्पत्तेरवारणाच्च । यदत्र प्रथमादितन्तुविभागेन जनितसंयोगनाशात् पूर्वपटनाशानन्तरं तत्संयोगान्तरेण, जायमानपटान्तरे पूर्वपटगततद्व्यक्तित्वापत्तिवारणाय प्रागभावसिद्धिर्मञ्जूषायां दर्शिता। तत्रेदमालोचनीयम्, द्वितीयपटकारणचरमसंयोगः प्रथमपटकारणचरमसंयोगादन्यः। तस्य द्वितीयपटोत्पत्तिसमये सत्त्वेपि तत्र तस्यान्यथासिद्धत्वमेव । इत्थञ्च सामग्र्यन्तरप्रयोज्यपटान्तरे तत्सामग्र्यप्रयोज्यतद्व्यक्तित्वापादनं न सम्भवति, अन्यथा घटसामग्रीप्रयोज्यघटत्वस्य पटादावप्यापत्तेः । एवं विशेषपदार्थस्य जातिमत्त्वमिव एकमात्रवृत्तितास्वभावस्य तद्व्यक्तित्वस्याप्यन्यव्यक्तिसम्बन्धस्वरूपहानिभिया नापादयितुं शक्यत इति। प्रागभावकारणतया चान्यकारणतानां वैयर्थ्यशङ्कासमाधाने मञ्जूषातोऽवगन्तव्ये। **तथापि तस्येति** । प्रागभावस्य सप्रतियोगिकत्वाभावे एककालोत्पत्तिकनिखिलपदार्थान् प्रत्येकस्यैव पदार्थस्य हेतुतया तद्ध्वंसाभावादिकमादाय विनिगमनाविरहाप्रसक्त्या घटादिकं प्रत्यपि तस्य कारणता निराबाधेत्यप्यनेन सूचितम् । **प्रागभाव इति** । इदं

---

**तत्संयोगान्तरेण** । प्रथमादितन्तुसंयोगान्तरेण तस्य प्रथमपटकारणचरमसंयोगस्य सहस्रतन्तुकपटं प्रति हेतुतया सिद्धस्य प्रागभावस्य घटादिकं प्रत्यपि तथात्वं सम्पादयति— **प्रागभावस्येति** । **एकस्यैव पदार्थस्य हेतुतयेति** । लाघवात् कालिकसम्बन्धेन तत्क्षणोत्पत्तिकं प्रति कालिकसम्बन्धेन तद्व्यक्तित्वेन हेतुत्वस्य कल्पनीयत्वादिति भावः ॥

भेदात्यन्ताभावयोरुपलक्षणम् । अत्रेदमालोचनीयम्, जन्यत्वमत्र न तावत् प्रागभाव प्रतियोगित्वं प्रागभावस्य ध्वंसघटितत्वेनात्माश्रयापत्तेः । न वा आद्यक्षणसम्बन्धित्व रूपमुत्पत्तिमत्त्वं स्वाधिकरणक्षणध्वंसानधिकरणत्वरूपाद्यत्वस्य ध्वंसघटितत्वेनोक्तदोषा वारणात् । किन्तु, कालिकसम्बन्धानुयोगित्वं तत् । नचैवं कालग्रन्थे पूर्वसंयोग नाशावच्छिन्नोत्तरसंयोगप्रागभावस्य क्षणोपाधित्वेन वक्ष्यमाणतया प्रागभावेऽतिव्याप्तिरिति वाच्यम्, प्रागभावस्यानादितया क्षणोपाधित्वं न सर्वसम्मतमिति मत्वैव तत्र पूर्वसंयोग नाशावच्छिन्नविभागो वेति तृतीयक्षणे उपाध्यन्तराभिधानात् प्रागभावातिव्याप्त्यभावात् । अत एव ग्रन्थकारैः कालिकसम्बन्धमादायातिव्याप्तिर्ध्वंस एव प्रदर्श्यते, न तु प्रागभावे । प्रागभावस्यापि क्षणोपाधित्वमस्तीति मते तु तद्वारणाय क्रियानधिकरणकालवृत्तित्वमपि विशेषणं देयम् । तच्च न प्रागभावे महाप्रलयस्यैव तादृशकालत्वादिति । **ननु मास्त्विति ।** घटात्यन्ताभावबुद्धिरित्यस्य कपाल इत्यादिः, भूतलादौ तदत्यन्ताभावस्य तदानीमिष्टत्वात् । प्राक्काले तु स्यादित्यापत्तिश्च प्रतियोग्यनधिकरणत्वेन सम्बन्धघटककालस्य परिचय इति मत्वा । तदभावप्रमाकालत्वेन परिचये तु नेयमापत्तिः सम्भवतीति विवेको बोध्यः । ध्वंसप्रागभावयोरन्योन्याभावस्येव तत्तदधिकरणस्वरूपं, तत्तदभावस्वरूपं वा कालाघटित मेव सम्बन्ध इत्यपि ज्ञेयम् । प्रागभावकाले नष्ट इति बुद्धिप्रसङ्गश्च नष्टेपि श्यामरूपे श्याम इति बुद्धिप्रसङ्गवद्वारणीयः ॥

मु—**तयोर्विरोधादिति ।** अत्यन्ताभावेन सहेत्यत्रापि शेषः । ध्वंसाद्यधि करणं नात्यन्ताभाववत् अत्यन्ताभावप्रकारकप्रमाविषयत्वाभावादित्यनुमानं प्रमाणम् । तत्रा त्यन्ताभावसम्बन्धाकल्पनलाघवमत्र साध्यहेत्वभावाशङ्कावारकतर्कः । **तत्र विरोधे मानाभावादिति ।** नास्तीति प्रतीतिविषयत्वेन स्वरूपासिद्धेरिति भावः ॥

दि—अथ नव्यपक्षे नास्तीति धीविषयताया ध्वंसादावकल्पनलाघवम्, प्राचीनमते ध्वंसाद्यधिकरणे अत्यन्ताभावसम्बन्धाकल्पनलाघवम्, तत् कतरोऽत्र श्रेयानिति जिज्ञासां निवर्तयितुमाह—**युक्तञ्चैतदिति । पूर्वापररक्तिमेति ।** ननु पूर्वं दर्शिते

तदानीम् घटोत्पत्तेः प्राक्काले । **वारणीय इति ।** विषयाभावादिति भावः ॥

**कतर इति ।** कतरः पक्ष इत्यर्थः । ननु प्रथमरक्तोत्पत्तेः पूर्वम् अपररक्तनाशस्य चानन्तरं रूपान्तरदशायां रक्तं रूपं नास्तीति प्रतीत्यनुरोधेन तादृशप्रतीतौ ध्वंसप्रागभावयोरन्य-



मध्ये श्याम एव घटे रक्ततादशायामियमापत्तिः कुतो न कृतेति चेन्न, तत्र श्याम तादृशायां विनिगमकाभावात् पूर्वरक्तध्वंसापररक्तप्रागभावयोरुभयोरेव रक्तो नास्तीति धीविषयत्वम्, नत्वन्यतरस्येति नियमः, तथाच तदुभयविषयकत्वस्य रक्ततादशायामसम्भ वात्, रक्तप्रागभावद्वयस्य प्रथमरक्तप्रागभावस्यैव वा रक्तध्वंसद्वयस्य अन्तिमरक्तध्वंसस्यैव वा क्रमेण प्रथमरक्तोत्पत्तेः पूर्वमपररक्तनाशानन्तरञ्च जायमानायां तत्प्रतीतौ विषयत्वमिति पूर्वापररक्ततादशायां तदसम्भवाच्च रक्ततादशायां रक्तो नास्तीति प्रतीत्यापत्त्ययोगात् ॥

त—**तादृशरक्तध्वंसप्रागभावयोरिति ।** प्रथमरक्तध्वंसतृतीयरक्तप्रागभावयो रित्यर्थः । मध्यरक्तध्वंसप्रागभावयोरप्युपलक्षणमेतत् । नास्तीति प्रतीतौ सामान्यधर्मा वच्छिन्नप्रतियोगिताकत्वं भासते, तच्च तादृशरक्तध्वंसप्रागभावयोर्नाङ्गीक्रियत इति तयोर्न तत्प्रतीतिविषयतेति नातिप्रसङ्ग इति गदाधरभट्टाचार्याः । **उक्तस्थले त्विति ।** ननु पूर्वं रक्तस्ततः श्यामस्ततो रक्तस्ततो रक्त इति चतूरूपस्थलं किमुपेक्षितमिति न शङ्क्यम्, तत्र रक्तो नास्तीति प्रतीतेर्ध्वंसप्रागभावोभयविषयकत्वनियमस्वीकारेण दर्शितदिशा तृतीयरक्तप्रागभावस्य नास्तीति धीविषयत्वास्वीकारेण चापत्तिपरिहारात् । **अव्याप्यवृत्तित्वे नेतीति ।** 'अव्याप्यवृत्तीति । कालिकाव्याप्यवृत्तीत्यर्थः' इति पाठः । **वायुसंयोगा दिध्वंसेत्यर्थ इति ।** वायुपदमत्रारक्तद्रव्यपरम्, तेन रक्तान्तरसंयोगध्वंस एव व्याव र्त्यते । रक्तद्वयसंयोगध्वंसे रक्तत्वावच्छिन्नप्रतियोगिताकत्वाङ्गीकारे एकस्मिन् रक्तनाशे

तरविषयकत्वमभ्युपगन्तव्यम्, तत्र ध्वंसप्रागभावयोरुभयोरसत्त्वात् । एवञ्च पूर्वोपदर्शितस्थले रक्त तादशायामेवेयमापत्तिः कर्तुं शक्यत इत्याशङ्क्याह—**रक्तप्रागभावद्वयस्येति । विषयत्व मिति ।** विनिगमकाभावादित्यत्रापि सम्बध्यते । नच यत्र घटे एकमेव रक्तरूपं जातं तत्र रूपान्तरदशायां रक्तं रूपं नास्तीति प्रतीत्यनुरोधेन एकस्यैव प्रागभावस्य ध्वंसस्य वापि तद्विषयत्व मुपगन्तव्यम्, एवञ्च पूर्वोपदर्शितस्थल एव रक्ततादशायामेकत्र प्रागभावस्यापरत्र ध्वंसस्य च सत्त्वादा पत्तिः शक्यत एव कर्तुमिति वाच्यम्, यतो यत्र प्रागभावो ध्वंसश्च वर्तेते तत्र तदुभयस्य विषयत्वम्, यत्र तयोरन्यतर एव वर्तते तत्र यावन्ति रक्तरूपाणि तस्मिन् तावत्संख्याकानां प्रागभावानां ध्वंसानां वा विषयत्वमिति तत्स्थले रक्तरूपद्वयस्य सत्त्वात् प्रागभावद्वयस्य ध्वंसद्वयस्य वा विषयत्व मावश्यकमिति रक्ततादशायां तदभावान्नापत्तिः । द्वयस्येत्युक्तिः रूपान्तरान्तरितरक्तद्वयस्थलाभिप्रायेण । ननु द्वितीयरक्तप्रागभावमात्रस्य रक्तो नास्तीति प्रतीतिविषयत्वे प्रथमरक्ततादशायां रक्तो नास्ती ति प्रतीत्यापत्तिवारणासम्भव एव विनिगमक इत्यभिप्रायेणाह—**प्रथमरक्तप्रागभावस्यैवेति ।** एवमन्तिमरक्तध्वंसस्यैव वेत्यत्राप्यूह्यम् । **नास्तीति प्रतीत्ययोगादिति ।** रूपपञ्चकस्थले तु, मध्यरक्ततादशायां पूर्वरक्तध्वंसस्यापररक्तप्रागभावस्य च सत्त्वात् ध्वंसप्रागभावोभयस्य विषयत्वं सम्भवतीति शक्यत एव कर्तुमापत्तिरिति ॥

अपरत्रापि रक्तो नास्तीति प्रतीत्यापत्तिर्बोध्या । अत्रेदमवधेयम्—रक्तो नास्तीति प्रतीत्या खलु रक्तत्वावच्छिन्नप्रतियोगिताकत्वमभावे विषयीक्रियते । तयैव तत्र रक्तप्रतियोगिकत्वमपि । रक्तप्रतियोगिकत्वन्तु रक्तो नष्टः रक्तो भविष्यतीति प्रतीतिभ्यां रक्तध्वंसप्रागभावयोरुभयवादिसिद्धम्, न तु पदार्थान्तरध्वंसप्रागभावयोः, अन्यथा ऐक्यस्यैव युक्तत्वेन विनिगमनाविरहोक्त्यसङ्गतेः । अत एव न भट्टाचार्योक्त एकत्वादिकमादायापि विनिगमनाविरहप्रसङ्ग इति । एवं रक्तो नास्तीति प्रतीतिबलात् ध्वंसादौ सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं वा कल्प्यते, तादृशप्रतियोगिताकात्यन्ताभावो धर्मिणि वेति विनिगमनाविरहोऽपि न सम्भवति, समवायेन घटात्यन्ताभावातिरिक्तस्य घटध्वंसप्रागभावयोरत्यन्ताभावस्याकल्पनलाघवस्यैव विनिगमकत्वात्, प्राचीनमते समनैयत्येन तेषामैक्यात् । वस्तुतस्तु, रक्तो नास्तीति प्रतीतिः प्राचीनमते संसर्गाभावत्वेन रक्तसंसर्गाभावमवगाहते । तत्र च संसर्गमर्यादया रक्तत्वावच्छिन्नानधिकरणकालविशिष्टस्वरूपमेव भासते । यत्र तु ध्वंसत्वप्रागभावत्वाभ्यां भानं तत्र केवलस्वरूपमेव । अत एव मध्यरक्ततादशायामपि पूर्वरक्तो नष्टः पररक्तो भविष्यतीत्यादेर्नानुपपत्तिः । इत्थञ्च सकलदोषवारणे ध्वंसप्रागभावयोस्सामान्यावच्छिन्नप्रतियोगिताकत्वमपि न कल्पनीयम् । इयमेव सरणिः प्रभाकारैरङ्गीकृता । सर्वमिदं मनसि निधाय महादेवभट्टेनोक्तमन्यत्र विस्तर इति । यद्वा, प्रथमस्वलक्षणे भट्टाचार्यदर्शितविस्तरो बालामिमत इति ॥

मु—**अतिरिक्तकल्पनाया इति ।** भूतलं घटाभाववत्, रूपं घटाभाववदित्यादिप्रतीतीयप्रकारता किञ्चिन्निष्ठा प्रकारतात्वादित्यनुमाने साध्यभूताधेयतानिरूपकत्वे लाघवमिति ज्ञानात्तस्यैकत्वसिद्धिरिति भावः । **कालविशेषात्मकेति ।** आदिपदरहितः पाठः । **अप्रत्यक्षत्वापत्तेरिति ।** अचाक्षुषत्वापत्तेरित्यर्थः, तेन ज्ञानस्य मानसत्वेपि न क्षतिः । इदमुपलक्षणम्, अभावस्य ज्ञानविशेषरूपत्वे दुःखध्वंसात्मकमुक्तेरनित्यत्वापत्तिः । कालविशेषरूपत्वे इदानीं भूतले घटो नास्तीति प्रत्यये कालविशेषकालविशेषात्मकाभावावच्छेदकत्वं भासत इति वक्तव्यम् । तच्चानुपपन्नम्, स्वस्य स्वावच्छेदकत्वासम्भवादिति । एतेन ज्ञानरूपत्वपक्षे अभावप्रत्यक्षस्य मानसत्वाङ्गीकारेण कालविशेषरूपत्वपक्षेपि प्रत्यक्षोपाधेरेवाभावरूपत्वाङ्गीकारेण चाप्रत्यक्षत्वापत्त्यभावेपि न क्षतिः ॥

इति प्रथमः परिच्छेदः ॥

# द्वितीयपरिच्छेदः

## साधर्म्यनिरूपणम्

दि—साधर्म्यादिकथनप्रतिज्ञायां 'इदानीम्' इत्युक्तेः प्रयोजनं दर्शयति—**परस्परेति ।** पदार्थानां परस्परभेदानुमापकत्वोपयोगिपक्षधर्मता परस्परधर्मतापन्नानामिति विशेषणेन ज्ञापिता । **भेदकत्वमिति ।** व्यावहारिकत्वस्याप्युपलक्षणम्, तेन ज्ञेयत्वादेर्व्यावर्तकत्वाभावेपि न क्षतिः । **ज्ञापयितुमिति ।** पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानस्यैव शास्त्रप्रयोजनतया सूत्राद्यभिमतत्वात् प्रथममेव तन्निरूपणं कुतो न कृतमित्याक्षेपोप्यनेन परिहृतः ॥

मु—**वक्तुमुपक्रमत इति ।** वचनविषयकाद्यकृतिमानित्यर्थः । द्वितीयादिकृतीनां तत्तत्साधर्म्यादिमात्रविषयकत्वेपि आद्यकृतेस्सर्वविषयकत्वाङ्गीकारान्नानुपपत्तिः । **विरुद्ध इति ।** अभावप्रतियोगीत्यर्थः । येषामिति षष्ठ्यर्थ आधेयत्वम्, अभावे अन्वेति । भाष्यादौ तु, वैधर्म्यमित्यस्य इतरेभ्यो व्यावृत्तधर्म इत्यर्थः । अत एव पृथिव्यादीनां विशेषलक्षणप्रस्तावे तत्र 'इदानीमेकैकशो वैधर्म्यमुच्यते' इत्युक्तिस्सङ्गच्छते । **ज्ञानविषयतेति ।** विषयतामात्रस्य लक्षणत्वसम्भवेपि ज्ञानविषयत्वस्यापि ज्ञेयमिति व्यवहारप्रयोजकत्वाशयायान्नानुपपत्तिः । लक्ष्ये लक्षणं योजयति—**सा चेति ।** नन्वयं घट इत्यादिज्ञानविषयताया घटादिष्वेव सत्त्वादव्याप्तिशङ्कां व्युदस्यति—**ईश्वरेति ।** यथा द्रव्यत्वाभाव,गगनाभावादीनां स्वरूपसम्बन्धो लाघवात्तत्तदभावात्मकः, तथा ईश्वरज्ञानविषयतापीश्वरज्ञानात्मिकैव । अतोऽत्यन्ताभावाप्रतियोगित्वरूपमेव केवलान्वयित्वं सम्भवतीति बोध्यम् । अत एवेश्वरपदसार्थक्यमपि ॥

दि—'एवं वैधर्म्यमित्यत्रापीति भ्रमवारणाय' इति पाठः । **अस्तित्वेति ।** 'वस्तुत्व' इति ताळीग्रन्थपाठः । तदनुसारेण तरङ्गिण्यामपि अस्तित्वस्येत्यस्य स्थाने 'वस्तुत्वस्य' इति पाठः । **उद्देश्यपदमिति ।** 'उद्देश्यपरम्' इति पाठः । एवमुत्तरत्रापि

---

एकैकशः । एकैकधर्मावच्छिन्नस्य ॥

'विधेयपरम्' इति पाठः। **अत एव भाष्ये इति**। ननु भाष्ये भावत्वं विधेय कोटौ कुतो न दत्तमिति न शङ्कयम्, तत्र भावानामेव निरूपणादभावातिव्याप्ते विचारानर्हत्वात्। तत्राभावस्यानिरूपणञ्च न तस्यापदार्थत्वात्, किन्तु, भावपारतन्त्र्यादिति न्यायकन्दल्यां स्पष्टम्। **अत चानेकेति**। अनेकभावपदयोर्द्वन्द्वः, तदर्थयोश्च तदु त्तर'वृत्ति'पदार्थे प्रत्येकं सम्बन्धादनेकवृत्तित्व,भाववृत्तित्वयोर्लाभः। तत्र प्रथमवृत्तित्व परिष्कारः स्वेत्यादिः सतीत्यन्तो भागः। घटत्वमनेकवृत्तीत्यादावेकपदस्य घटत्व समानाधिकरणैकत्ववदर्थकत्वं व्युत्पत्तिसिद्धम्। तथाच घटत्वे यत्किञ्चित्तद्व्यक्तिभेदस्य प्रतियोगिवृत्तित्वं सामानाधिकरण्यञ्च लभ्यते। एवं प्रकृतेपि पदार्थविभाजकोपाधौ यत्किञ्चि त्तद्व्यक्तिभेदप्रतियोगिवृत्तित्व,सामानाधिकरण्ययोर्लाभः। तत्र च लक्षणघटकभेदे तद्व्यक्ति प्रतियोगिकत्वनिवेशे प्रयोजनाभावादुक्तम्—**उभयसम्बन्धेन भेदविशिष्टत्वे सतीति**। इत्थञ्चोदक्षरत्वदोषस्य प्रभोक्तस्य नावकाश इति बोध्यम्। युक्तञ्च मूले धर्मिणि दर्शि तस्यानेकत्वस्य भावत्वस्य च पदार्थविभाजकोपाधौ सामानाधिकरण्यनिवेशनम् ॥

**मु—द्रव्यादय इतीति**।'द्रव्यगुणकर्मसामान्यविशेषाणामनेकत्वं समवायित्वं च साधर्म्यम्। यद्यप्यनेकत्वमभावेप्यस्ति, तथाप्यनेकत्वे सति भावत्वम्' इति ताळी ग्रन्थपाठः। अस्मिन् पाठे साधर्म्यमित्यस्योत्तरवाक्येऽनुषङ्गः। **प्रत्येकं घटादाविति**। प्रत्येकमित्यस्य तत्तन्मात्रवृत्त्येकत्वविशिष्ट इत्यर्थः। इदञ्चैकभिन्नत्वरूपलक्षणस्याव्याप्ति स्फोरणाय। यद्व्यक्तित्वावच्छिन्नभेदवत्त्वं लक्षणमुच्यते, तत्तद्व्यक्तावव्याप्तिः स्यादिति भावः। अथात्र मूले लक्षणत्वेनोक्तमनेकत्वं किं रूपम्, एकत्वावच्छिन्नसामान्यभेदस्याप्र सिद्ध्या यत्किञ्चिदेकभिन्नत्वमेव तदिति चेत्, घटाभावादिभेदमादाय लक्षणसमन्वया दव्याप्त्यभिधानासङ्गतिः। द्रव्यत्वादिपञ्चकान्यतमसमानाधिकरणं यदेकत्वं तदवच्छि न्नभेदात्मकत्वे अव्याप्तिसम्भवेपि समवायेऽतिव्याप्तिः। नच समवायनिष्ठैकत्ववद्भेदो लक्षणमिति वाच्यम्, अव्याप्त्यभिधानासङ्गतितादवस्थ्यात्। अत केचित्, द्रव्यत्वा दिपञ्चकान्यतमसमानाधिकरणयत्किञ्चिदेकत्वावच्छिन्नभेदवत्त्वमेव लक्षणम्। प्रत्येकं घटा दावव्याप्त्यभिधानञ्च समवायातिव्याप्तेरप्युपलक्षणमित्याहुः। परेतु, तत्तत्पदार्थविभाजको पाधिसमानाधिकरणानि सप्त यत्किञ्चिदेकत्वानि तत्तदवच्छिन्नभेदसप्तकवत्त्वं लक्षणम्।

---

भेदसप्तकवत्त्वमिति। सप्त यत्सप्तसमुदायत्वावच्छिन्नवत्त्वमित्यर्थः, न त्वेकभेदवत्त्वे —



इत्थञ्च न समवायातिव्याप्तिः, न वा प्रत्येकं घटादावव्याप्त्यभिधानासङ्गतिः। आदिग्रहणादेकैकस्मिन् गुणादावप्यव्याप्तिरत्राभिमतेति ज्ञापितम्। कथमत्रैतादृशैकत्वसप्तक लाभ इति चेत्तात्पर्यविशेषाधीनया लक्षणयेति वदन्ति॥ एतदुत्तरम् 'आकाशादौ च' इति प्रक्षिप्तम् ॥

**दि—समवेतसमवेतेति**। कालिकेन कालवृत्तिपरमाणुसमवेतविशेषवृत्ति विशेषत्वमादायातिव्याप्तिवारणाय प्रथमसमवायप्रवेशः। एवं समवेतघटादौ कालिकेन वृत्ति विशेषवृत्तिविशेषत्वमादाय तद्दोषवारणाय द्वितीयसमवायप्रवेशः। वृत्तित्वमुपाधिमत्त्वञ्च सम वायस्वरूपान्यतरसम्बन्धेन। गगनाभावादिकमादायातिव्याप्तिवारणाय पदार्थविभाजकेति॥

**त—अत्र च नित्यसमवेतेति**। नित्यनिरूपितसमवायसम्बन्धावच्छिन्न वृत्तितावदित्यर्थः। वृत्तितायां नित्यनिरूपितत्वोक्त्या कर्मत्वस्य, समवायसम्बन्धावच्छिन्न त्वोक्त्या सामान्यत्वादीनाञ्च निरासः। सत्तामादाय कर्मण्यतिव्याप्तिवारणाय पदार्थ विभाजकेति। नित्यसमवेतत्वस्थाने नित्यानित्यभाववृत्तित्वं प्रभायां निविष्टम्। तत्र वृत्तित्वं कालिकातिरिक्तसम्बन्धेन बोध्यम्। **गुणक्रियान्योन्येति**।'अन्योन्य' इति प्रक्षिप्तम्॥

**मु—घटादावतिव्याप्तमिति**। इदञ्च ध्वंसाद्यधिकरणेप्यत्यन्ताभावानङ्गी कर्तृमतेन। मतान्तरे तु, गुणशून्यत्वमेव लक्षणमवसेयम् ॥

**दि—समवायस्वरूपान्यतरेति**। ननूभयत्र स्वरूपमेव निवेश्यतां गुणत्वादि प्रकारकप्रमाविषयत्वमादाय च लक्षणसमन्वयः क्रियतामिति चेत्, सत्यम्। परन्त्वस्या न्यतरसम्बन्धावच्छिन्नवृत्तित्वाभावरूपाखण्डाभावघटितत्वेन लक्षणान्तरत्वाददोषः। तथापि गुरुभूतलक्षणादरः किमर्थ इति चेत्, प्रसिद्धगुणत्वादिकमादाय लक्षणसम्पादनायेत्य वेहि। एवञ्च न प्रक्रमस्य 'किन्तु गुणत्वादिकं तथा' इति मुक्तावलीस्वारस्यस्य वा भङ्ग इति महादेवभट्टाशयः॥

**त—कथमियमापत्तिरिति**। ननु संयोगरूपसन्निकर्षसम्भवेपि चक्षुस्सं युक्तसमवायसत्त्वात् प्रत्यक्षोपपत्तिरित्यत आह—**चक्षुस्संयुक्तेति**। चक्षुस्संयुक्तसमवायस्य

---

सत्यपरभेदवत्त्वे सतीत्यादिरीत्या सप्तानां लक्षणघटकत्वम्, तेनाभावत्वस्य समवायत्वस्य वा समानाधि करणं यदेकत्वं, तदवच्छिन्नभेदघटनस्याव्याप्त्युपपादकत्वाभावात्तन्निवेशस्य प्रकृतानुपयोगेपि न क्षतिः॥

द्रव्यप्रत्यक्षं प्रत्यकारणत्वात्तमादाय घटोत्पत्तिद्वितीयक्षणेपि न तत्प्रत्यक्षसम्भव इति दर्शयितुमाह—**वस्तुतस्तु परमाणाविति** ॥

**मु—सामान्येतीति** । अत्र च नित्यवृत्तिसत्ताभिन्नजातिशून्यत्वं कर्मादीनां पञ्चानां साधर्म्यं बोध्यम् ॥

**त—वस्तुतस्तु समवायेति** । इदन्तु चिन्त्यम्, 'सत्तावन्तस्त्रयस्त्वाद्याः' इत्यनेनैव समवायेन सत्ताभावः सामान्यादावुक्तप्रायः, इतरसामान्यानां सर्वेषामपि सत्ताव्याप्यतया तेन सम्बन्धेन सामान्याभावोपि सूचित इत्याशयेनैव सामान्यनिरूपिताधिकरणत्वाभावः साधर्म्यतयात्र दर्शितः । अधिकरणता च कालिकातिरिक्तसम्बन्धेनेति । अधिकं मञ्जूषायां द्रष्टव्यम् ॥

**मु—कारणत्वमिति** । 'तद्भिन्नानां कारणत्वमित्यर्थः' इति पौर्वापर्यव्यत्ययेन ताळीग्रन्थपाठः । **न कस्यापीति** । भावस्येति शेषः । तथाच भावनिरूपितकारणत्वाभाव एव साध्यतयाऽभिमतः, तेन न ध्वंसकारणतामादाय द्व्यणुकपरिमाणे बाधः । हीति हेतौ, तस्याऽभेदेन सम्भवाभावेऽन्वयः । भवेदिति सम्भावनायां लिङ् । तया च 'आरम्भकम्' इत्युत्तरमध्याहृतैवकारसहकृतया तादृशपरिमाणारम्भकत्वातिरिक्तभावकारणत्वस्य सम्भावनाविषयत्वमपि नास्तीति बोधयन्त्या तादृशपरिमाणेतरभावकारणत्वाभाववत्त्वे सति तादृशपरिमाणकारणत्वाभाववत्त्वरूपानुमानेसत्यन्तस्य सर्ववादिसिद्धत्वं ज्ञापितम् । विशेष्यसत्त्वं पक्षे प्रतिपादयति—**तच्चेति** । तत्र पक्षे हेतुसाधकतर्कं दर्शयति—**अणुजन्यस्येति** । एतत्तर्कनिदानभूतं नियममाह—**परिमाणस्येति । परिमाणस्य** परिमाणजनकत्वविशिष्टपरिमाणस्य, तेन नान्त्यावयविपरिमाणादौ व्याप्तिभङ्गः । व्याप्तौ दृष्टान्तप्रदर्शनायाह—**महदारब्धस्येति** । तर्के साक्षादुपयोगिनियमाकारश्च, यत्र परिमाणजन्यपरिमाणत्वं तत्र स्वसमानजातीयस्वोत्कृष्टत्वमिति बोध्यम् । अथ सर्वमिदं तदा समीचीनं स्यात्, यदि नियमेऽस्मिन्नप्रयोजकत्वशङ्का न जायेत, तत्र च हेतुन्न पश्याम इति चेन्न, कपालादिपरिमाणतो जायमानस्य घटादिपरिमाणस्य महत्त्वत्वे उत्कर्षवत्त्वे च परिमाणजन्यत्वातिरिक्तस्य प्रयोजकस्य दुर्वचत्वात् ॥

---

**दुर्वचत्वादिति** । तथाच यदि तादृशनियमो न स्यात्, तदा घटादिपरिमाणनिष्ठ महत्त्व-



**त—ननु त्र्यणुकेति** । द्व्यणुकपरिमाणस्य कारणत्वेपीति योजना । **शेष इति** । 'भावः' इति पाठः ॥

**दि—परिमाणविभाजकेति** । 'परिमाणविभाजकोपाधिरूपेण' इति पाठः । **त्रुटेरचाक्षुषत्वप्रसङ्गादिति** । अथैतद्दोषवारणाय त्र्यणुकपरिमाणं प्रति त्रित्वसंख्यैव हेतुरस्तु, द्व्यणुकपरिमाणस्य परमाणुपरिमाणादुत्कर्षवत्त्वे बाधकाभाव इति चेन्न, अणुतरापेक्षया अणोरेव महदुत्पादस्य युक्तत्वाद्द्व्यणुकस्यैवासिद्धिप्रसङ्गात् ॥

**मु—इदमपीति** । 'वियुक्तानां पुनश्चतुष्टयसन्निकर्षायोगजधर्मानुग्रहसामर्थ्यात्सूक्ष्मव्यवहितविप्रकृष्टेषु प्रत्यक्षमुत्पद्यते' इत्यार्षज्ञानविचारभाष्यप्रामाण्यात्सम्बन्धिचतुष्टयान्तर्गतविषयजन्यत्वमपि योगिप्रत्यक्षे स्वीक्रियत इत्याशयः । 'चतुष्टयसन्निकर्षादित्यनेनेन्द्रियसन्निकर्षजत्वमुपलक्ष्यते' इति किरणावली । संयोगादिसन्निकर्षजन्यतायाश्च विषयजन्यताव्याप्यत्वाद्विषयस्यापि हेतुत्वसिद्धिः । चाक्षुषादौ महत्त्वोद्भूतरूपादिसहकारस्थाने योगजधर्मसहकार एवात्र विशेषः । एनमेवावलम्ब्य योगिप्रत्यक्षस्य प्राचाम्मतेऽलौकिकत्वव्यवहारः । भाष्याननुसारिणो नवीनास्तु योगजधर्ममेव सन्निकर्षमभिप्रयन्तो विषयेन्द्रियसंयोगादीनामन्यथासिद्धत्वमिच्छन्ति । अतस्तन्मते पारिमाण्डल्यादीनामकारणत्वमेवेति विवेको बोध्यः । परन्तु, प्राचाम्मते कालविप्रकृष्टेष्वतीतादिषु कथमिन्द्रियसन्निकर्षः, तेषां वा कथं कार्याव्यवहितपूर्ववृत्तित्वमिति तु चिन्त्यम् । **आत्मेति** । परमेति प्रक्षिप्तम् । **आकाशादेर्बोध्यमिति** । अत्रातद्गुणसंविज्ञानबहुव्रीह्यादरेण कालदिशोरेव ग्रहणमिति शब्दप्रत्यक्षे आकाशमहत्त्वस्य हेतुत्वेपि न क्षतिरिति प्रभाकृतः । आत्ममानसप्रत्यक्ष इत्यादिग्रन्थभाववर्णने विषयतया लौकिकप्रत्यक्ष इत्येतावन्मात्रमनुक्त्वा द्रव्यप्रत्यक्ष इत्युक्तवता महादेवभट्टेन तु द्रव्यसमवेतप्रत्यक्षे सामानाधिकरण्येन न महत्त्वस्य हेतुत्वम्, त्रुटिप्रत्यक्षे व्यभिचारात् । द्रव्यान्यत्वस्य द्रव्यसमवेते निवेशेपि परमाण्वादौ द्रव्यत्वादिप्रत्यक्षवारणाय वक्ष्यमाणरीत्या इन्द्रियसन्निकर्षनिष्ठकारणतावच्छेदककोटावेव महत्त्वप्रवेशस्यावश्यकतया महत्त्वे स्वतन्त्रतत्कारणत्वाङ्गीकारो नोचित इत्याकाशमहत्त्वस्यापि न कारणत्वमित्यासूचितम् ।* अधिकं मञ्जूषातोऽवगन्तव्यम् ॥

---

त्वमुत्कर्षवत्त्वं च निष्प्रयोजकं स्यादिति तर्कस्यात्राप्रयोजकत्वशङ्केति भावः ॥

**चतुष्टयसन्निकर्षात्** चतुष्टयस्य आत्ममनोविषयेन्द्रियाणां परस्परसन्निकर्षात् ॥

दि—अपीत्यर्थ इति 'अपीति भावः' इति पाठः। यद्यपि स्वप्रत्यक्ष इति। अतौचित्यमुपस्थितिकृतलाघवरूपं बोध्यम्। **आत्ममहदिति**। 'आत्मपरममहत्' इति पाठः। **अत्राचार्यैरित्यादि**। स्वमते यथा पाकनष्टपरमाणुरूपादेर्गगनगुरुत्वाद्यभावाना ञ्च'च'शब्देन समुच्चय आवश्यकः। तथा आचार्यग्रन्थेपि सुखदुःखादेस्तत्सम्भवादुक्त युक्त्या तत्पक्षत्यागो न युक्त इति चिन्त्यमेतत्। वस्तुतस्तु, भाष्यस्थकारणत्वपदस्य सामान्यपरत्वे सम्भवति 'ज्ञातृधर्मेतरकार्यापेक्षया' इति पूरणमनावश्यकम्। अन्य लाणुपरिमाणादिभ्य इत्यनुक्त्वा 'अन्यत्र पारिमाण्डल्यादिभ्यः' इत्युक्तवतो भाष्यकारस्याशयो ज्ञायते द्व्यणुकपरिमाणमपि लक्ष्यमेवेति। एतदभिप्रायेणैवाचार्यमतमननुसृतं मुक्तावलीकृतेत्य वधेयम्। अणुपरिमाणन्त्वित्यत्र पारिमाण्डल्यमेव पक्षत्वेनाभिमतम्, सामान्यवाचकशब्दाद्धि शेषप्रतिपत्तेस्सिद्धान्तसिद्धत्वात्। तथा पक्षनिर्देशश्च कारणत्वाभावसाधकतया दर्शितपरिमा णजनकत्वाभावरूपहेतोर्द्व्यणुकपरिमाणसाधारणत्वमप्यस्तीति बोधनाय। एवमेव नियमशरीरे सजातीयघटनस्यापि सार्थकतावसेयेति सर्वं समञ्जसम् ॥

भा—**अन्यथासिद्धिशून्यस्येति**। घटादिकं प्रति दण्डादेर्द्रव्यत्वादिना अन्यथासिद्धत्वादसम्भवापत्त्या अन्यथासिद्धभिन्नस्येत्यनुक्त्वा अन्यथासिद्धिशून्यस्येत्युक्तिः। दण्डत्वादिना अन्यथासिद्ध्यभावस्यापि तत्र सत्त्वाददोष इति भावः। **नियतेति**। सामा नाधिकरण्यसम्बन्धेन व्यापकत्वविशिष्टेत्यर्थः। भावक्तान्तनियतपदान्मत्वर्थीयाच्प्रत्ययान्ता देतदर्थसिद्धिः। व्यापकत्वप्रतियोगि चार्थात् कार्यमेव। **पूर्वेति**। पूर्वस्मिन् कार्या व्यवहितप्राक्काले वृत्तित्वमित्यर्थः। कार्याधिकरणे इति शेषः। अस्याःसप्तम्या अव च्छेदकत्वमर्थः। तच्च कारणतावच्छेदकत्वेनाभिमतसम्बन्धावच्छिन्नम्। व्याप्यव्यापक तावच्छेदकसम्बन्धः कालिकः। तथाच कार्यतावच्छेदकसम्बन्धेन कार्याधिकरणदेशाव च्छिन्ना या कार्याधिकरणकालाव्यवहितपूर्वकालवृत्तिता तदाश्रयाभावीयकालिकसम्बन्धा वच्छिन्नप्रतियोगितानवच्छेदकधर्मवत्त्वे सति तादृशकालवृत्तित्वं कारणत्वमिति पर्यव सन्नम्। तत्र च विशेष्यांशस्य विशेषणांशोपपादकतामात्रेणोपयोग इत्यन्यथासिद्धि शून्यत्वे सति तादृशधर्मवत्त्वं कारणत्वमित्येकः पक्षः। एतदनुसारेणैव 'घटाधिकरण देशावच्छेदेन नियतपूर्ववृत्तिताया इत्यर्थः' इति तरङ्गिण्युक्तिः। अध्याहृतकार्याधि करणपदोत्तरसप्तम्या निरूपितत्वमर्थः। तस्य च वृत्तितायामन्वयः। पूर्ववृत्तिताघटक पूर्वपदस्य कार्याव्यवहितप्राक्क्षणावच्छिन्नेत्यर्थः। तथाच कार्याव्यवहितप्राक्क्षणा



वच्छेदेन कार्याधिकरणवृत्त्यभावीयकारणतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदक धर्मवत्त्वे सति कार्याधिकरणवृत्तित्वं कारणत्वम्। शेषं पूर्ववदित्यपरः पक्षः। तत्र प्रथमपक्षे उक्ताभावप्रतियोगिताया दण्डादिनिष्ठकालनिरूपितवृत्तितायाश्च कालिकसम्ब न्धावच्छिन्नत्वमेव, न तु संयोगादिसम्बन्धावच्छिन्नत्वमिति संयोगादौ कारणताव च्छेदकसम्बन्धत्वव्यवहारस्य न सामञ्जस्यमिति द्वितीयपक्ष एवादृतो गदाधरभट्टाचार्यैरिति ज्ञेयम्। एकघटाधिकरणे घटान्तराव्यवहितप्राक्कालावच्छेदेन दण्डाभावसत्त्वादव्याप्ति वारणाय स्वाव्यवहितपूर्वक्षणावच्छिन्नस्वाधिकरणवृत्तित्वसम्बन्धेन कार्यविशिष्टत्वमभावे निवेशनीयम्। नचैवं कपालादेस्तादात्म्यसम्बन्धेन कारणत्वानुपपत्तिः, तादात्म्यसम्बन्धा वच्छिन्नप्रतियोगिताककुलालाद्यभावस्य भेदरूपस्य कार्याधिकरणकपाले वृत्तितायाः कालान वच्छिन्नत्वादिति वाच्यम्, कारणतावच्छेदकादिसम्बन्धभेदेन कारणताया भिन्नत्वस्य सर्ववादिसिद्धत्वात्तादात्म्येन कारणताशरीरे वृत्तितायां स्वाव्यवहितपूर्वक्षणावच्छिन्नत्वमनि वेश्य कार्याव्यवहितपूर्ववृत्तित्वस्य पृथगेव निवेशात्, स्वाव्यवहितपूर्वक्षणावच्छिन्नत्वस्थाने अवच्छिन्नत्वतादृशक्षणानवच्छिन्नत्वोभयाभावस्य वा निवेशात्। अथैवमपीच्छाधिकरणे तदव्यवहितपूर्वक्षणावच्छेदेन घटाद्यवच्छेदेन ज्ञानाभावसत्त्वात् ज्ञानस्येच्छाकारणत्वानुपप त्तिरिति चेन्न, वृत्तितायां स्वानवच्छेदकदेशानवच्छिन्नत्वस्यापि निवेशनीयत्वात्। स्व पदार्थः कार्यम्। अन्यतरकर्मजसंयोगं प्रति कर्मणः कारणत्वोपपत्तिरग्रे दिनकरभट्टेन दर्शयिष्यते। परे तु, पूर्वोपदर्शितसकलदोषवारणाय तद्धर्मावच्छिन्नस्य यावतः प्रत्येका धिकरणदेशावच्छेदेन तत्प्रत्येकाव्यवहितप्राक्कालवृत्तित्वविशिष्टप्रतियोगिकतत्सम्बन्धवत्ताक धर्मवत्त्वं तद्धर्मावच्छिन्नं प्रति तेन सम्बन्धेन कारणत्वमिति वदन्ति। एतन्मते स्वस्वप्रतियोगिव्यधिकरणयावदभावानुपस्थितिदशायामपि समुपस्थितयावदभावावगाहिव्याप्ति ग्रहेणानुमितिवत् समुपस्थितयावद्धटव्यक्त्यन्तर्भावेण कारणत्वग्रहेण घटार्थिप्रवृत्तेरुपपत्तिः। यद्वा, प्रमेयत्वसामान्यलक्षणया निखिलतद्व्यक्तित्वानामनुभवसम्भवात्तत्तद्व्यक्तित्वानां स्मृतिः। उद्बोधकविरहाच्च न प्रमेयत्वस्य तत्र भानमिति न घटकारणत्वग्रहानुपपत्तिरिति ज्ञेयम्। अधिकमन्यतोऽवगन्तव्यम् ॥

---

स्वानवच्छेदकेति। अवच्छेदकतासम्बन्धेन स्वाभाववदित्यर्थः, तेन न स्वपदेन घटा दिग्रहणे अवच्छेदकाप्रसिद्धिनिबन्धनो दोषः। **प्राक्कालवृत्तीति**। सम्बन्धवत्तायामन्वेति॥

**त—नानारूपतयेति ।** एतदुत्तरः 'अन्यथासिद्धत्वमेकमनुगतं न शक्यते वक्तुम्' इति ग्रन्थः 'भिन्नतया' इत्यस्यानन्तरं योजनीयः, यथास्थितपाठे भिन्न तयेति तृतीयान्तस्यानन्वयात् । अन्यदित्यस्येत्यादिः पर्यवसानादित्यन्तश्च पुनरुक्तप्रायत्वात् प्रक्षिप्तः । तत्सहभूतमित्यनेन लाघवाघटितं गौरवरूपमेवान्यथासिद्धत्वं प्रदर्शि तमित्युक्तावपि न निर्वाह इत्याह—**तद्विरोधीति । कारणत्वेनाव्यवह्रियमाणा इति ।** घटं प्रति कपालस्य कारणत्वेन व्यवह्रियमाणत्वादव्यवह्रियमाणभिन्नत्वात्तस्य द्रव्यत्वा दिनापि कारणत्वापत्त्या नियतपूर्ववृत्तितावच्छेदकयद्धर्मावच्छिन्नेषु न कारणत्वव्यवहारः, तत्तद्धर्मभिन्नत्वं नियतपूर्ववृत्तितावच्छेदकधर्मे निवेश्य तद्वत्त्वमेव तेन रूपेण कारणत्व मित्यभिप्रायः । तत्तद्धर्मभिन्नत्वञ्च तत्तद्धर्मानवच्छिन्नप्रकारतावच्छेदकत्वरूपं पारिभाषिकम्, न त्वन्योन्याभावरूपम्, तेन प्रमेयदण्डत्वाद्यन्यथासिद्धिनिरूपकधर्मभेदस्य शुद्धदण्डत्वादाव भावेपि न क्षतिः । अथ 'व्रीहिभिर्यजेत, यवैर्वा' इत्यादिश्रुतिसिद्धवैकल्पिकहेतुताव त्यव्याप्तिः परस्परं व्यभिचारादिति चेन्न, तत्र पुण्यविशेषं स्वर्गं प्रति च दर्शत्वात्मक सामान्यरूपेणैव हेतुत्वाद्व्यभिचाराभावात् । तादृशपुण्यविशेषत्वावान्तरतत्तद्वैजात्यावच्छिन्नं तादृशस्वर्गत्वावान्तरतत्तद्वैजात्यावच्छिन्नं प्रति च व्रीहिकरणकदर्शत्वादिना हेतुत्वम् । विकल्पस्थले उभयस्याशास्त्रार्थत्वेनोभयकरणकात् पुण्याद्युत्पत्तिवारणाय च व्रीहिप्रयोज्य वैजात्यावच्छिन्नं प्रति यवकरणकदर्शत्वेन, यवप्रयोज्यवैजात्यावच्छिन्नं प्रति व्रीहिकरण कदर्शत्वेन प्रतिबन्धकत्वं वक्तव्यमित्यन्यत्र विस्तरः । **तथा सतीति ।** 'तद्भेदकूटा भावो नातिरिक्त इति' इत्युत्तरग्रन्थः एतदनन्तरं योजनीयः । तत्र च चकारात् परं ध्येयमित्यतः प्राक् 'इति' इत्यपि । **शेषवैयर्थ्यादिति ।** ननूक्ताभावो न दण्डत्वादिरूपोऽधिकदेशवृत्तित्वात्, किन्त्वतिरिक्त एवेत्यत आह—**न्यूनवृत्तीति ॥**

**भा—यत्समवेतमिति ।** 'यत्समवेतं कार्यं भवति ज्ञेयं तदत्र समवायि' इति पाठः । कार्यं यत्समवेतं भवतीति योजना । यत्समवेतवृत्त्यसाधारणधर्माश्रयः कार्यमिति बोधः । तादृशधर्मश्च यत्समवेतत्वमेव । एवञ्चार्थात् कार्यनिष्ठसमवायसम्बन्धावच्छिन्नवृत्तिता निरूपकं यदिति लभ्यते । कार्यत्वमाद्यक्षणावच्छिन्नवृत्तित्वम् । तथाचाद्यक्षणाव च्छिन्ना या समवायसम्बन्धावच्छिन्ना वृत्तिता तन्निरूपकत्वं समुदितलक्षणार्थः, वृत्तिता द्वयघटने प्रयोजनाभावात् । एतदेव ज्ञापयितुं 'समवायसम्बन्धेनोत्पद्यते' इति व्याख्या कृता । यद्वा, कार्यमित्यस्य किञ्चिद्धर्मावच्छिन्नमित्येवार्थः । भवतीत्यस्य उत्पद्यत इति



व्याख्या । उत्पत्तिश्चाद्यक्षणावच्छिन्नवृत्तिता । तत्र वृत्तितायां समवेतपदार्थस्याधेयता सम्बन्धेनान्वयः । तथाच यद्धर्मावच्छिन्नं यद्धर्मावच्छिन्ननिरूपितसमवायसम्बन्धावच्छिन्न वृत्तितावद्वृत्त्याद्यक्षणावच्छिन्नवृत्तित्वाश्रय इति भवतीत्यन्तभागस्य शाब्दबोधः । तत्र वृत्तिता द्वयघटने प्रयोजनाभावं दर्शयति—**समवायसम्बन्धेनोत्पद्यत इति ।** तत्र कार्यमि त्यस्य विवरणं यदवच्छिन्नमिति, अत्रेत्यस्य विवरणं तद्धर्मावच्छिन्नं प्रतीति, समवायी त्यस्य विवरणं समवायिकारणमितीति बोध्यम् ॥

**दि—तन्तुत्वादावतिव्याप्तिवारणायेति ।** आदिना अनियतपवनादि संयोगपटयोः परिग्रहः । तेन जनकतायां नैयत्यपूर्ववृत्तित्वयोः प्रवेशसार्थक्यं बोध्यम् ॥

**मु—तुरीतन्तुसंयोग इति ।** षष्ठ्यन्ततया ताळीग्रन्थपाठः । एवं 'एवं वेगादीनाम्' इति च ॥

**त—कारणान्तरेतीति ।** कार्यकारणभावद्वयकल्पनां तत्राव्यवहितोत्तरत्व निवेशं चापेक्ष्य स्थलविशेषेष्वेकक्षणसम्बन्धकल्पनमेव लघीय इति भावः । ननु विशेषण ताया एव कार्यकारणतावच्छेदकसम्बन्धत्वसम्भवान्नात्र शङ्कावकाश इत्याक्षेपं परिहरति—**ननु दैशिकेति । इत्यभिप्रायेण शङ्कत इति ।** अन्यतरकर्मजस्थलवदत्रापि यत्कि ञ्चित्कार्याधिकरणयावद्व्यक्तिवृत्त्यभावप्रतियोगितावच्छेदकधर्मवत्त्वमेव व्यभिचार इति नैयमापत्तिरिति वक्तुं शक्यत इति द्योतयितुमभिप्रायेणेत्युक्तिः । वस्तुतस्तु, यत्र ययो स्तन्त्वोस्संयोगनाशसमकालं तत्तन्त्ववयवसंयोगस्यापि नाशः, तत्र तत्तन्तुनाशपटनाशयो स्समकालिकतया तत्तन्त्वोर्न विशेषणतासम्बन्धेन पटनाशः, किन्तु तन्त्वन्तरेष्वेवेति कार्याधिकरणे क्वाप्यसमवायिकारणनाशाभावाद्व्यभिचारो भवतीति शङ्कासङ्गतिरवसेया ॥

**दि—भाविनाशमादायेति ।** सम्बन्धसत्त्वे तेन सम्बन्धेन सम्बन्धि नोप्यवश्यं सत्त्वादिति भावः । **लाघवमपीति केचिदिति ।** अत्र स्वप्रतियोगि जन्यत्वघटकजनकतायां समवायसम्बन्धावच्छिन्नत्वनिवेशेनैव दण्डनाशादितो घटनाश वारणात्स्वप्रतियोगिसमवायिसमवेतत्वं न पृथक् सम्बन्धांशे निवेशनीयमिति बोध्यम् । **स्वप्रतियोगिनिष्ठासमवायिकारणतेति ।** एतत्सम्बन्धघटकासमवायिकारणतास्वरूप विचारो मञ्जूषायां द्रष्टव्यः । परन्तु, यत्तत्रान्ते 'द्रव्यनाशकारणतावच्छेदककोटौ

समवायसम्बन्धावच्छिन्नकार्यतानिरूपितत्वमपि देयमिति विभावनीयम् ॥

**त—लाभायैवेति ।** एतदुत्तरं 'प्रदर्शितम्' इति प्रक्षिप्तम् । **प्रकृत कार्येति ।** 'प्रकृतकार्येण सह' इति पाठः ॥ **जनकमिति मूलेनेति ।** अत्र 'मूलस्य' इति पाठः ॥

**दि—कार्यनाशेति ।** अत्र कार्यप्रतियोगिकत्वं लक्षणे न निविष्टम्, प्रयोजनाभावात् । अग्निसंयोगे सति पृथिव्यां रूपादिनाशं प्रति विजातीयद्रवद्रव्याभावस्य कारणत्वात्तत्र द्रव्येऽतिव्याप्तिवारणाय जनकाभावेत्युपेक्ष्य जनकनाशेत्युक्तिः । ननु कार्यपदस्य स्वनिरूपितकार्यताश्रयप्रतियोगिकार्थकतया पृथिवीरूपनाशप्रतियोगिनश्च प्रतिबन्धकद्रवद्रव्याजन्यतया नात्र तादृशद्रव्येऽतिव्याप्तिरिति नाशत्वावच्छिन्नत्वस्य जनकतायां निवेशो नावश्यकः । नच स्वत्वघटितत्वेनाननुगम इति वाच्यम्, नाशविशिष्टत्वस्यैवानुगतस्य लक्षणत्वात् । वैशिष्ट्यं च स्वप्रतियोगिजनकत्वस्वजनकनाशप्रतियोगित्वोभयसम्बन्धेनेति चेन्न, एवमपि सुवर्णरूपनाशे सुवर्णस्य तादात्म्येन प्रतिबन्धकत्ववादिनव्यमते सुवर्णेऽतिव्याप्तेः, एतदपेक्षया जनकतायां नाशत्वावच्छिन्नत्वनिवेशे लाघवाच्च । नच नाशनिष्ठत्वमेवास्त्विति वाच्यम्, कार्यत्वावच्छिन्नपटनाशनिष्ठजन्यतानिरूपितकालत्वावच्छिन्नजनकतावन्नाशप्रतियोगिनि घटादावतिव्याप्तेः । जन्यतायां नाशत्वावच्छिन्नत्वनिवेशेनैतद्द्वारेणापि दर्शितद्रवद्रव्यादेरतिव्याप्त्यवारणात् । प्रथमनाशपदोपादानञ्च वस्तुतो जन्यता नाशत्वावच्छिन्ना, नत्वभावत्वावच्छिन्ना अतिप्रसक्तत्वादिति सूचनाय ॥

**त—अव्याप्तिश्च द्रष्टव्येति ।** वस्तुतस्तु, तादृशप्रतियोगिवृत्तिसत्ताभिन्नजातिमत्त्वमिति परिष्कारे न तत्राव्याप्तिरिति बोध्यम् । इदन्तु तत्त्वम्—द्रव्याणामेव सासमवायिकारणकत्वमित्यभ्युपगच्छतां मतेनेदं लक्षणम् । इत्थञ्च न रूपादावलक्ष्यत्वाद्व्याप्तिप्रसक्तिः । कार्यपदं द्रव्यपरम् । एवं लक्षणकरणेनासमवायिकारणनाश एव द्रव्यनाशक इति सूचितमिति ॥

**त—पाकजरूपे चाग्नीति ।** पाकजरूपे किं तद्ध्वंसमवायिकारणमिति चिन्त्यम् । **समवायि** वस्तुतस्तु, अवयवरूपपाकान्यतरत्वादिकमेव रूपासमवायिकारणत्वं बोध्यम् । **समवायेन द्रव्यं कारणत्वमित्यादि ।** महाकालादावव्याप्तिवारणाय निरूपितत्वान्तम् । समवायेन द्रव्यं



प्रति कारणे द्रव्याभावेऽव्याप्तिवारणाय तादात्म्यप्रवेशः । एवं परमाणुद्वित्वाद्यसमवायिकारणतदेकत्वादौ जलपरमाणुरूपादौ चातिव्याप्तिवारणायासमवायिकारणतायामप्यन्यतरसम्बन्धप्रवेशः । नचैवमपि तुरीतन्तुसंयोगस्य न पटं प्रति निमित्तकारणत्वोपपत्तिः, तन्निष्ठपटकारणतायास्समवायसम्बन्धावच्छिन्नत्वेन निरुक्तासमवायिकारणताभिन्नत्वासम्भवादिति वाच्यम्, पटनिरूपितनिमित्तकारणतालक्षणघटकासमवायिकारणतायां तुरीतन्तुसंयोगभेदसामानाधिकरण्यस्यापि निवेशात् । इत्थञ्च तादृशासमवायिकारणता तन्तुद्वयसंयोगे एवेति तद्भिन्नत्वं तुरीतन्तुसंयोगनिष्ठनिमित्तकारणतायामक्षतमिति बोध्यम् । एवं ज्ञानादिनिष्ठनिमित्तकारणतालक्षणेऽप्यवसेयम् ॥

**मु—अन्यथासिद्धत्वमेवेति ।** एतदनन्तरम् 'केषां तदाह' इति पाठः । यत्कार्यं प्रति कारणस्येत्यद्ध्याहारं 'जनकं प्रति' इत्यतो 'गृह्यते' इत्यस्यानुकर्षं च कृत्वा मूलं विशदयति—**यत्कार्यं प्रतीति ।** तत्कार्यं प्रतीत्यादिकम् 'एते पञ्चान्यथासिद्धाः' इत्यनेन वक्ष्यमाणस्य भागानुवादः । 'येन सह' इति मूलेन यद्विषयकज्ञानसमानकालीनत्वं ग्रहणे लभ्यते, तच्च न लक्षणोपयोगीति सांहित्यत्यागः कृतः । इत्थञ्च येनेति तृतीयाया विशेष्यतावच्छेदकत्वात्मकप्रकारत्वमर्थः । तस्य च निरूपकतासम्बन्धेन ग्रहणे अन्वयान्न वाक्यार्थानुपपत्तिः । तृतीयायाः प्रकृते तदर्थकत्वद्योतनायैव रूपेणेत्युक्तिः ॥

**तं—इत्याशङ्कानिरासायेति ।** नच तद्व्यक्तित्वविषयकप्रत्यक्षे तद्व्यक्तित्वस्य स्वतन्त्रान्वयव्यतिरेकसत्त्वान्नान्यथासिद्धत्वापत्तिरिति वाच्यम्, तद्व्यक्तित्वे तद्व्यक्तिविषयकप्रत्यक्षत्वावच्छिन्नं प्रत्यन्यथासिद्धे अव्याप्तिभिया तद्व्यक्तिविषयकप्रत्यक्षत्वावच्छिन्ननिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यत्वमेव लक्षणे निवेशनीयम् । तथाच तद्व्यक्तित्वे कारणेऽतिव्याप्तेः सुस्थत्वात्, निरुक्तस्वतन्त्रान्वयव्यतिरेकशून्यत्वस्य तत्रानपायात् । अथ दर्शितविशेष्यतावच्छेदकत्वे सति तद्धर्मावच्छिन्ननिरूपितस्वतन्त्रान्वयव्यतिरेकशून्यत्वं तद्धर्मावच्छिन्नं प्रत्यन्यथासिद्धत्वमिति विवक्षणेनैव सर्वदोषवारणं सम्भवतीति

---

**द्रव्याभाव इति ।** विषयविधया प्रत्यक्षनिरूपितनिमित्तकारणतामादाय दण्डादौ लक्षणसमन्वयसम्भवात्तत्यागः । अयोग्यप्रतियोगिकत्वेन द्रव्याभावे न तद्रीत्या उपपत्तिरिति ध्येयम् । **तदेकत्वादाविति ।** इतरैकत्ववादीनां ध्वंसकारणत्वेन लक्ष्यत्वमेवेति परमाण्वेकत्वादीनामुपादानम् ॥

चेत्, एवमपि तद्व्यक्तिविषयकप्रत्यक्षत्वावच्छिन्नकारणतानवच्छेदकतया एतल्लक्षणलक्ष्यभिन्ने उद्भूतरूपत्वादावतिव्याप्तिः तत्प्रत्यक्षवृत्तिबहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वाद्यवच्छिन्ननिरूपित नियतपूर्ववृत्तित्वग्रहविशेष्यतावच्छेदकत्वात् स्वतन्त्रान्वयव्यतिरेकशून्यत्वाच्च तस्येति तद्वारणाय विशेषणभागे तद्धर्मावच्छिन्नत्वं निवेशनीयमिति द्रष्टव्यम् ॥ **विशेष्यतावच्छेदकत्वेपीति** । एतदनन्तरं 'न तद्व्यक्तित्व' इत्यादिपाठः । **विशेष्यतानवच्छेदकेति** । 'विशेष्यतावच्छेदकत्वमिति' इति पाठः ॥

दि—मुक्तावल्यां कारणस्येति स्वरूपकथनम्, षष्ठ्यर्थस्य विशेष्यत्वस्य धात्वर्थग्रहणान्वयिनो धर्मद्वारा तृतीयार्थावच्छेदकतायामपि निरूपितत्वसम्बन्धेनान्वयात्, विभक्त्यर्थे विभक्त्यर्थान्वयपक्षे षष्ठ्यर्थस्य विशेष्यतायास्तृतीयार्थावच्छेदकतायां साक्षादन्वयाद्वा यद्रूपे तादृशग्रहविशेष्यतावच्छेदकत्वलाभः, 'यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः' इत्यग्रिमभागस्यानुकर्षश्चेति मनसिकृत्य निष्कृष्टलक्षणमाह—**इत्थञ्चेति** । यद्यपि नियतपूर्ववृत्तितावच्छेदकत्वं लघुशरीरम्, तथापि दण्डत्वादेस्तादृशावच्छेदकत्वनिश्चयस्य दण्डो घटनियतपूर्ववृत्तीत्यादिग्रहविशेष्यतावच्छेदकत्वनिश्चयाधीनत्वात् लक्षणस्य लक्षणान्तरादूषकत्वाच्चात्र ग्रहघटितलक्षणाभिधानमिति बोध्यम् । ग्रहश्चात्र प्रमारूपो विवक्षितः, तेन दण्डरूपवान् घटनियतपूर्ववृत्तीति भ्रममादाय न द्वितीयान्यथासिद्धेऽतिव्याप्तिः । तस्य भ्रमत्वं च पूर्ववृत्तिताग्रहे प्रकारीभूतपूर्ववृत्तितायां विशेष्यतावच्छेदकधर्मनिष्ठस्वरूपसम्बन्धरूपावच्छेदकतानिरूपकत्वभाननियमात्, तादृशावच्छेदकत्वस्य च समनियतानां मध्ये लघुधर्म एव स्वीकारात् ॥

त—**स्वभिन्नप्रकृतकार्यकारणेति** । अत्र स्वभिन्नत्वमात्रोपादाने कपालभिन्नकपालसामग्रीनिष्ठयोः कपालनिरूपितान्वयव्यतिरेकयोर्घटनिरूपितान्वयव्यतिरेकौ कपालनिष्ठौ प्रति प्रयोजकत्वात् स्वभिन्नान्वयव्यतिरेकाप्रयुक्तान्वयव्यतिरेकशालित्वस्य कपालेऽभावात्तत्रातिव्याप्त्यापत्तिरिति प्रकृतकार्यकारणत्वनिवेशः । निवेशे च कपालसामग्र्यां घटनिरूपितान्वयव्यतिरेकाभावान्न तामादाय दोषः । तथाच स्वभिन्ननिष्ठतद्धर्मावच्छिन्ननिरूपितान्वयव्यतिरेकाप्रयुक्तत्वं स्वातन्त्र्यपदार्थः, नतु कारणत्वस्यापि तत्र घटना, आत्माश्रयादिति मन्तव्यम् । परे तु, दर्शितप्रयोज्यप्रयोजकभावे मानाभावाद्दण्डादिकारणमादायैव दण्डत्वादौ लक्षणसमन्वय इति स्फोरणायैव तदभिधानम् । अत एव प्रथमद्वितीयान्यथासिद्धसाधारणलक्षणे न तद्घटनमित्याहुः ॥

स्वीकारादिति । नन्वेवमपि पूर्वोपदर्शिताया उद्भूतरूपत्वातिव्याप्तेर्वारणं कथमिति चेत्, तद्व्यक्तिविषयकप्रत्यक्षत्वावच्छिन्ननिरूपितनियतपूर्ववृत्तितावच्छेदकत्वस्य उद्भूतरूपत्वेऽनङ्गीकारेण तदवगाहिन्या उद्भूतरूपं तद्व्यक्तिप्रत्यक्षनिरूपितनियतपूर्ववृत्तीति ग्रहस्य भ्रमत्वात् । उद्भूतरूपत्वावच्छिन्ननियतपूर्ववृत्तितानिरूपकतावच्छेदकन्तु बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वमेव, न तु तद्व्यक्तिविषयकप्रत्यक्षत्वमिति ॥



मु—'कारणमादाय वा' इति मूलस्थवाकारोऽवधारणार्थकः, तत्सूचितं व्यवच्छेद्यं स्वतन्त्रान्वयव्यतिरेकघटत्वमिति बोधयन् पूरणेन च मूलार्थं स्पष्टयति—**यस्य स्वातन्त्र्येणेति** । आदानमत्र ज्ञानम् । कारणविषयकज्ञानोत्तरकालीनत्वं कारणमादायेत्यस्यार्थः । विशिष्टबुद्धौ च विशेषणज्ञानस्य हेतुत्वाद्दण्डरूपं घटान्वयव्यतिरेकवदित्यादिग्रहस्य तत्त्वोपपत्तिः । पूर्वपादादनुषक्तस्य पूर्वभाव इत्यस्य व्याख्या—**अन्वयव्यतिरेकाविति** । नैयत्यांशस्यापि लक्षणे प्रवेशं सूचयितुं व्यतिरेकग्रहणमिति बोध्यम् ॥

दि—फलितं लघुलक्षणमाह—**स्वातन्त्र्येण तत्कार्येति** ॥

त—**दण्डादेरन्यथासिद्धत्वेति** । विशेषणदलापर्यालोचनेनेदमभिहितम् । अतो दण्डत्वं परम्परासम्बन्धेन घटान्वयव्यतिरेकविशिष्टमादाय प्रथमान्यथासिद्धदण्डत्वेऽतिव्याप्तेर्वारणमेव पृथक्पदप्रयोजनं बोध्यम् । दण्डादेरिति स्थाने 'दण्डत्वादेः' इति क्वचित् पाठः । स साधुः । **स्वभिन्नेति** । अत्र स्वपदमन्यथासिद्धपरम् । स्वभिन्नतद्धर्मावच्छिन्नेति स्थाने 'तदवच्छिन्न' इति क्वचित् पाठः । तत्र तच्छब्दः कार्यतावच्छेदकपरः ॥

दि—**अत्रेतरान्वयेति** । इतरान्वयव्यतिरेकाप्रयुक्तान्वयव्यतिरेकशून्यत्वमित्यर्थः, तेन कपालसंयोगादेः स्वसमवायितादात्म्येन यौ घटाद्यन्वयव्यतिरेकौ, तयोः कपालाद्यन्वयव्यतिरेकप्रयुक्तत्वेपि न तत्रातिव्याप्तिः । समवायिकारणतावच्छेदककपालत्वादौ कपालरूपादौ च समवायेन घटाद्यन्वयव्यतिरेकशालिन्यव्याप्तिपरिहारस्तेषामलक्ष्यत्वाङ्गीकारेण सम्पादनीयः । अलक्ष्यता च लक्ष्यतावच्छेदकदण्डत्वाद्यन्यतमत्वशरीरे

स्वभिन्ननिष्ठेति । प्रयुक्तत्वं यदि व्यापकत्वरूपम्, तदा स्वस्यापि स्वव्यापकत्वादप्रसिद्धिरिति स्वभिन्ननिष्ठत्वनिवेशः । तस्य स्वरूपसम्बन्धरूपत्वे न देयमेव ॥

तेषामप्रवेशेनेति बोध्यम् । तर्हि तेषु काऽन्यथासिद्धिरिति चेत्, पञ्चम्येव । अथावश्य क्लृप्तत्वं कपालस्यैव, नतु कपालत्वस्येत्यत्र विनिगमकाभाव इति चेन्न, भावकार्यस्य ससमवायिकारणकत्वनियमभङ्गापत्तेरेव विनिगमकत्वात् । नचैवमपि घटरूपकारणे कपाल रूपेऽतिव्याप्तिः, तदन्वयव्यतिरेकयोः कपालान्वयव्यतिरेकानुविधायित्वादिति वाच्यम्, अगत्या तद्भिन्नत्वस्यापि निवेशात् । अधिकमन्यतोऽवगन्तव्यम् । 'शालित्वं तत्त्वमित्युक्तौ' इति पाठः ॥

**भा—स्वं प्रति** पूर्ववृत्तित्वग्रहस्य स्वपूर्ववृत्तिग्रहाधीनत्वस्यात्माश्रयभयेना सम्भवं सूचयितुम् 'अन्यं प्रति' इत्युक्तिः, न त्वन्यत्वेन लक्षणे अन्यस्य प्रवेशोऽभिप्रेतः ॥

**दि—अन्यं प्रति पूर्ववृत्तित्वघटितरूपेणेति** । पर्याप्त्यनिवेशबोधनाय घटि तेति । नन्वेवं घटपूर्ववृत्तित्वविशिष्टबुद्धिं, तद्विशिष्टवैशिष्ट्यावगाहिबुद्धिं च प्रति क्रमाद्धेतु भूते घटपूर्ववृत्तित्वज्ञाने तत्प्रकारकज्ञाने चातिव्याप्तिः, तन्निष्ठयोस्तादृशबुद्धिपूर्ववृत्ति त्वयोर्घटात्मकमन्यं प्रति पूर्ववृत्तित्वघटितरूपावच्छिन्नत्वादिति चेन्न, पूर्ववृत्तित्वावच्छिन्न त्वस्य प्रकृते प्रवृत्तित्वविशिष्टत्वरूपत्वात् । वैशिष्ट्यञ्च स्वसामानाधिकरण्यस्वनिष्ठाव च्छेदकताकत्वोभयसम्बन्धेन । **अन्यं प्रति पूर्ववृत्तित्वानुपपादकमिति** । अन्यनिरू पितपूर्ववृत्तित्वाभावप्रयोजकीभूताभावाप्रतियोगिनमित्यर्थः । यमित्यस्य विशेषणमेतत् । अपूर्वाभावे यागस्य स्वर्गाव्यवहितपूर्ववृत्तित्वं न घटते, स्वजन्यापूर्वसम्बन्धेनैव तस्य तथात्वादिति तादृशाभावप्रतियोगित्वमेवापूर्वस्य, न त्वप्रतियोगित्वमिति ध्येयम् । गौरवमेवात्र कल्पेऽस्वरसबीजं स्पष्टम् ॥

**त—तस्य कृतिनिष्ठेति** । 'तस्य कृतिनिष्ठशब्दपूर्ववृत्तित्वोपपादकत्वात्' इति पाठः । कृतेः कण्ठताल्वभिघातरूपव्यापारद्वारैव शब्दजनकत्वादिति भावः ॥

**दि—अत्रापीति** । 'यद्यप्यत्रापीति' इति पाठः । संग्रहेपीत्यत्र 'अपिः' प्रक्षिप्तः ॥

**मु—तस्य हि कुलालपितृत्वेनेति** । नच कुलालरूपकारणावच्छिन्नपूर्व वृत्तित्वग्रहविशेष्यत्वात् कुलालपितुर्द्वितीयान्यथासिद्धत्वमेवेति वाच्यम्, तस्य कुलालत्वेन रूपेण स्वतन्त्रान्वयव्यतिरेकशालित्वाद्विशेषणदलाभावात् । अत एव नास्य प्रथमद्विती यान्यथासिद्धसाधारणलक्षणेनापि संग्रहः ॥



**दि—अवश्यक्लृप्तेति** । अवश्यक्लृप्तत्वांशस्य नियतत्वांशस्य च क्रमेण प्रयोजनं दर्शयति—**गन्धत्वावच्छिन्नं प्रतीति, एवमिति च** । 'गन्धं प्रति' इति ताळीग्रन्थपाठः ॥

**त—अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वेनेति** । प्रतियोग्यभावयोः प्रतियोग्यनुयोगिभावसम्बन्धसत्त्वादेकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकत्वादिति भावः । यद्वा, अभावज्ञाने गन्धप्रागभावत्वेन गन्धप्रागभावादिरूपाभावविशेषज्ञाने प्रतियोगि ज्ञानस्य गन्धादिज्ञानस्य इत्यर्थः । एतेन प्रतियोगिज्ञानं विनाप्यभावपदादिजन्याभाव ज्ञानसम्भवात्र तस्य तत्र कारणत्वसम्भव इति परास्तम् ॥

**दि—लघुनियतेति** । 'लघुत्वरूपम्' इति पाठः । एवम् अनेकद्रव्यसमवे तत्वेत्यत्र 'अनेकद्रव्यत्व' इति पाठः । **दण्डसंयोगादिघटितेति** । 'दण्डघटित' इति साधुः सम्प्रदायसिद्धश्च पाठः । **अनेकद्रव्यत्वादन्यत्वेति** । ल्यब्लोपे पञ्चमी । अनेक द्रव्यत्वं विहायान्यत्वेत्यर्थः, अनेकद्रव्यत्वशून्य इति यावत् । **समवेतसमवेतत्वमिति** । 'समवेतसमवेतद्रव्यत्वम्' इति पाठः । अनेकं द्रव्यमवयवावयवतया यस्मिन् तद नेकद्रव्यमिति विग्रहेण लब्धस्यार्थस्याप्यणुभिन्नद्रव्यरूपतया अजहत्स्वार्थलक्षणया फलित माह—**अणुभिन्नद्रव्यत्वमिति** । अनेकद्रव्यत्वस्य महत्त्वेनान्यथासिद्धिकथनं महत्त्व स्यात्मप्रत्यक्षं प्रति न कारणत्वमिति पक्षमाश्रित्य, अनेकेत्यत्र एकपदस्याणुलाक्षणि कत्वमाश्रित्य वा प्रतिपादनीयमिति मञ्जूषाकृतः । इदमत्रावधेयम्—अनेकद्रव्यवत्त्वमित्येव भाष्ये दृश्यते । 'अनेकं द्रव्यमारम्भकं येषामवयवानां ते अनेकद्रव्या अवयवास्त द्वत्त्वम्' इति किरणावल्यां तस्यार्थः स्पष्टीकृतः । परन्तु, 'द्रव्ये तावत्त्रिविधे महति' इत्यादिभाष्यात् पृथिव्यप्तेजसामेव प्रत्यक्षे अनेकद्रव्यवत्त्वस्य हेतुत्वमुक्तम् । तच्च महत्त्व सम्पादनद्वारेति न काप्यनुपपत्तिः प्राचां वचनस्य । अत्र मुक्तावलीग्रन्थयोजनायैव स पन्थाः परित्यक्त इति ॥

**मु—रासभादिरितीति** । 'यद्यपि यत्किञ्चिद्घटव्यक्तिं प्रति रासभस्य निय तपूर्ववृत्तित्वमस्ति, तथापि घटजातीयं प्रति' इति साम्प्रदायिकः पाठः । ननु घटत्वा वच्छिन्नं प्रति रासभादेर्नियतपूर्ववृत्तित्वाभावेनान्यथासिद्धत्वसम्भवेपि यत्किञ्चिद्घट व्यक्तिं प्रत्यन्यथासिद्धत्वं न सम्भवतीत्याक्षिप्य भेदप्रतियोगिकोटाववश्यक्लृप्तत्वस्यापि

निविष्टत्वात्तल लक्षणसङ्गतिरित्याह—यद्यपीत्यादि । अत्र 'यद्घटव्यक्तिं प्रति' इत्या दिमुद्रितपुस्तकपाठस्यापि नार्थभेदः, 'तत्रापि' इत्यत्र अपिशब्दस्य यथा घटत्वावच्छिन्ने इति दृष्टान्तद्योतकत्वात् । एवमिति । दण्डत्ववदित्यर्थः । अन्येषां दण्डरूपादीनाम् ॥

दि—तेनेति । अत्र 'अनेन' इति पाठः, व्यवहितस्यास्यैव व्यारुयेयत्वात्, तेनेत्यस्य परेषामित्यतः पूर्वत्वाच्च । इत्यभिप्रायादिति । भेदप्रतियोगिपरिचायककोटौ नियतपूर्ववृत्तित्वं घटयता ग्रन्थकारेण तदभिप्रायस्य सूचितत्वादिति भावः । व्यवहितपूर्ववर्तित्वव्युदास इति । अत्र 'त्व' इति प्रक्षिप्तम् । नन्वस्तु व्यवहितपूर्ववर्तिनामपि कारणत्वं, को दोष इत्यत आह—अत एवेति । अत्र चकारः प्रक्षिप्तः । 'अपूर्वकल्पनया अपूर्वसम्बन्धेन' इति पाठः । पूर्ववर्तितावच्छेदकधर्मवत्त्व इति । 'पूर्ववर्तितावच्छेदकधर्मवत्त्वरूपत्वे' इति साधुः पाठः ॥

त—तथाच कारणतावटकेति । तदितरनिखिलकारणसत्त्वसमानकालीनकार्याभावसामानाधिकरण्यरूपान्वयव्यभिचारज्ञानं तदसामानाधिकरण्यपर्यवसिततत्प्रयोजकीभूताभावप्रतियोगित्वरूपावश्यक्लृप्तत्वज्ञानप्रतिबन्धद्वारा कारणताघटकभेदप्रतियोगित्वज्ञानं जनयति, तदपि तदभावव्याप्यवत्ताज्ञानविधया भेदकूटवत्त्वरूपानन्यथासिद्धत्वज्ञानं प्रतिबध्नातीति भावः । अन्यथासिद्ध्यनिरूपकत्वेति । 'अन्यथासिद्ध्यनिरूपकत्वरूपत्व' इति पाठः । इष्टापत्तिरेव शरणमिति । इदमापाततः । नियतपूर्ववृत्तितावच्छेदकयद्धर्मावच्छिन्ने प्रामाणिकानां न कारणत्वव्यवहारः तदन्यधर्मस्यैव कारणतावच्छेदकत्वेन ग्रन्थकारमते तद्व्यक्तित्वे तदन्यत्वाभावान्न दोष इत्यवधेयम् । उक्तञ्चैवमेव गदाधरभट्टाचार्यैः कारणतावादे पक्षताग्रन्थे च ॥

दि—कारणव्यवहारविषयताया नैयत्यादिष्वनेकेष्वङ्गीकारे गौरवमभिसन्धायाह—अस्तु वा दण्डत्वादिकमिति । एवकारेण कारणताशरीरे नैयत्यादिप्रवेशनिरासः । एतत्कल्पे व्यभिचारग्रहस्य कारणताग्रहविघटकत्वं व्यञ्जकधर्मज्ञानविघटनद्वारेति

---

तदितरनिखिलेति । त,त्तद्व्याप्येतरनिखिलेत्यर्थः, तेन न दण्डादीतरकपालद्वयसं
योगादिरूपघटकारणसत्तासमानकालीनघटरूपकार्याभावस्याप्रसिद्ध्या दण्डादेरवश्यक्लृप्तत्वानुपप
त्तिः । असामानाधिकरण्यपर्यवसितस्येति । यद्व्यतिरेकादिति पञ्चम्या व्याप्यत्वरूपं प्रयोज्यत्व
मर्थः । तथाच यदभावाभाववदवृत्तित्वं यदसामानाधिकरण्यरूपं कार्याभावे लभ्यते । इत्थञ्च
तादृशकार्याभावासामानाधिकरण्यमेवावश्यक्लृप्तत्वमिति भावः ॥



केचित् । कारणत्वाभावव्याप्यवत्ताज्ञानविधयेति तु परे । इदमत्रावसेयम्—कारणताया दण्डत्वादिरूपत्वे दण्डत्वेन घटकारणमित्यादिव्यवहारानुपपत्तिः, अभेदे अवच्छेद्यावच्छेदकभावासम्भवात् । एवं कार्यतावच्छेदकाद्यज्ञानेपि, घटः कारणं, पारिमाण्डल्यं न कारणमित्याद्यनुभवसिद्धव्यवहारस्याप्यनुपपत्तिः । अतः पदार्थान्तरमेव कारणता । अत एवावच्छेदकधर्मसम्बन्धभेदभिन्ना च सेति दीधितिकृन्मतमेव साधीय इति ॥

मु—न तु गुणकर्मणोरिति । तथाच गुणकर्ममात्रवृत्तीति मूलस्य गुणकर्मेतरावृत्तित्वे सति गुणकर्मवृत्तीत्यर्थकस्य विवक्षावशाद्विशेषणांश एव तात्पर्यमिति भावः ॥

दि—इत्याशयादाहेति । द्रव्यादिषु गुणकर्मभेदानुमापकस्वाभावकत्वपर्यवसन्नं द्रव्यादिवैधर्म्यत्वमप्यस्य न सम्भवतीति दूषणस्याप्युपलक्षणमिदं बोध्यम् ॥

मु—असमवायिकारणवृत्तीति । अत्र समवायसम्बन्धावच्छिन्नकारणत्वघटितमेकं, स्वसमवायिसमवेतत्वसम्बन्धावच्छिन्नकारणत्वघटितं चापरं लक्षणम्, उभयोरेकत्र निवेशे प्रयोजनाभावादिति केचित् । तन्न, कर्मणः कुत्रापि स्वसमवायिसमवेतत्वसम्बन्धेनाकारणत्वात् । नचावयविकर्मजनकावयवकर्मणि तत्त्वम्, कर्मणः कर्माजनकत्वस्य भाष्ये कण्ठरवेणैवोक्तत्वात्, अवयव्यारम्भकसंयोगेन अवयव्युत्पादकाले तस्य नाशावश्यम्भावाच्च । तस्मात्समवायसम्बन्धावच्छिन्नकारणताघटितमेकमेवात्र लक्षणं तयाऽभिमतमिति वेदितव्यम् ॥

दि—अत्र नित्यद्रव्येति । जन्यपृथिव्याद्यन्यतमत्वस्य लक्ष्यतावच्छेदकत्वभ्रमोप्यनेन निरस्तः ॥

त—जन्यगुरुत्वस्येति । लाघवादाह—प्रकृष्टगुरुत्वस्य वेति । गुरुत्वव्याप्यप्रकर्षरूपजातिरेव पतनकारणतावच्छेदिकेति भावः । अन्यथा परमाणूनां पतनाङ्गीकारे । परमाणूनामधःपतनापत्तेरिति । अनिष्टापत्तौ बाधकमन्वेष्टव्यम् । किञ्च परमाणूनां पतनानङ्गीकारे पतनासमवायिकारणतया गुरुत्वसिद्धेर्वक्ष्यमाणाया अनुपपत्ति

---

अनन्यथासिद्धनियतपूर्ववृत्तितावच्छेदकधर्मवत्त्वरूपत्वे दोषमाह—एवमिति ॥
निर्युक्तिकत्वात् भाष्यवचनमश्रद्धेयमित्याशङ्क्याह—अवयव्यारम्भकेति ॥

प्रसङ्गः। अतः संयोगस्य वृत्तिनियामकत्वे न केवलं पतनप्रतिबन्धकत्वं तन्त्रम्, अपितु प्रकृष्टमहत्त्वसामानाधिकरण्यमपि। एवञ्च द्व्यणुकत्र्यणुकयोरपि संयोगो न वृत्तिनियामक इति बोध्यम्॥

**मु—विशिष्य साधर्म्यमिति**। द्रव्यत्वव्याप्यनानाद्रव्यविभाजकोपाधि समानाधिकरणधर्ममित्यर्थः। 'वक्तुमुपक्रमते' इति पाठः। स्पष्टमिति प्रक्षिप्तम्। **परत्वेति**। 'परत्वम् अपरत्वं मूर्तत्वम् कर्मवत्त्वं वेगवत्त्वं च साधर्म्यम्' इति पाठः॥

**दि—तत्रातिप्रसङ्ग इति**। तत्र धात्वर्थवत्त्वरूपलक्षणे। षष्ठीस्थाने सप्तमी। **अतिप्रसङ्गः** आकाशादौ सर्वत्रातिव्याप्तिः॥

**त—युक्तमुत्पश्याम इति**। एतत्पक्षे कालिकेन परत्वाधिकरणरूपादिनिष्ठगुण त्वादिकमादायातिव्याप्तिवारणाय समवायेनाधिकरणत्वं विवक्षणीयमिति विशेषोऽवसेयः॥

**मु—जातिमत्त्वस्य विवक्षितत्वादिति**। जातित्वमत्र नित्यत्वमात्रम्, इतरां शस्य वैयर्थ्यात्। घटाकाशादिद्वित्वादिकमादायातिव्याप्तिवारणाय तदावश्यकता बोध्या। एवमग्रेपि॥

दि—उत्कर्षापकर्षौ न साक्षात् परिमाणत्वव्याप्यौ, किन्तु तद्व्याप्यव्याप्या वेवेति सिद्धान्तमभ्युपगम्य व्याचष्टे—**अविभुवृत्तीति**। अविभुवृत्तित्वं चापकर्षाणुत्व त्वान्यतरवत्त्वस्य परिचायकम्। इत्थञ्च 'गगनादिपरिमाणस्य कुतोप्यपकृष्टत्वाभावात्' इति युक्तिप्रदर्शनमपि सङ्गतं वेदितव्यम्॥

**मु—सर्वगतत्वमिति**। द्विर्वचनं प्रक्षिप्तम्। कालादीनां परस्परं गुणादिना च संयोगाभावात् सर्वेत्यसङ्गतं स्यादिति पूरणेनार्थमाह—**सर्वमूर्तेति**। अत्र 'सर्वमूर्त संयोगित्वम्' इति प्राचीनताळीग्रन्थपाठः। **संयोगित्वमिति**। फलमात्रस्यात्र धातुना विवक्षितत्वादिति भावः। सर्वाणि गत इति विग्रहः। कर्तरि क्तः। यद्यपि गत इति कर्मणि क्तः, सर्वैर्गत इति च विग्रहः, एवञ्च सर्वमूर्तकर्तृकक्रियाजन्यसंयोगाश्रय इत्यर्थवर्णने न बाधः, तथापि लक्षणे क्रियादिघटने प्रयोजनाभाव इति मन्तव्यम्।

---

तरङ्गिण्यां 'परमाणुपरिमाणस्य कुतोप्यपकृष्टत्वाभावादित्युक्तम्, तत्र युक्तिं विशदयितु मवतारयति—उत्कर्षापकर्षाविति।



वस्तुतस्तु, यस्य मूर्तस्य स्वयमक्रियस्यावयवसंयोगादेवाकाशादिसंयोगो जातः तत्र बाध सम्भवोपि बोध्यः॥

**त—परिमाणविभाजकजात्या स्वसजातीयेति**। यथा रूपादिविभा जकजात्या स्वसजातीयरूपावधिकत्वमेव रूपादिनिष्ठोत्कर्षापकर्षयोः, शुक्लतरं, नीलतर मित्येव व्यवहारात्,तथेति भावः। परमाणुपरिमाणं घटपरिमाणादपकृष्टमिति व्यवहारश्च न प्रामाणिकानामित्याशयः। पूर्वपक्षे परिमाणत्वसाक्षाद्व्याप्ये उत्कर्षापकर्षाख्ये जात्य न्तरे अप्यभ्युपेये। तयोर्न तरबादिप्रत्ययवेद्यत्वम्, महत्तर इत्यादिवत् परिमाणवत्तर इति व्यवहाराभावात्। तरबाद्यबोध्योत्कर्षसत्त्वे मानाभाव इति महादेवभट्टाशयः। एतत्पक्षे 'परिमाणस्य स्वसमानजातीयस्वोत्कृष्टपरिमाणजनकत्वनियमात्' इत्यत्र नियम शरीरे स्वसमानजातीयत्वघटनं स्पष्टप्रतिपत्त्यर्थम्, प्रयोजनान्तराभावादिति वेदितव्यम्॥

**दि—अपकर्षानाश्रयमहत्परिमाणवत्त्वं बोध्यमिति**। साधर्म्यं बोध्य मित्यर्थः। क्वचित् 'तथा बोध्यम्' इति पाठः। अत्र च परिमाणत्वेन न निवेशः, प्रयोजनाभावात्। तथाच अपकर्षानाश्रयमहत्त्ववत्त्वं कालादीनां साधर्म्यम्। अत एव मूलेपि परमं परिमाणमित्यनुक्त्वा परमं महदित्युक्तिः। महत्पदञ्चात्र गुणवाचकमिति ध्येयम्॥

**त—प्रत्यक्षविषयजातिमदिति**। समवायेन प्रत्यक्षविषयविशिष्टमित्यर्थः। कालिकादिना तादृशप्रत्यक्षविषयघट,रूपत्वादिमज्ज्ञानादिकमादायातिव्याप्तिवारणाय सम वायेनेति। **अग्रे वक्ष्यमाणमिति**। वचनं नोपलभ्यते। वस्तुतस्तु, विशेष त्वमत्र लाघवाद्वायुवृत्तिवृत्तिस्पर्शावृत्तिधर्मसमवाय्यन्यत्वमेव। एवञ्च संस्कारत्वस्य बहि रिन्द्रियग्राह्यजातित्वेपि दर्शितधर्मत्वाद्भावनायां तत्समवाय्यन्यत्वाभावान्न तामादायात्म न्यतिव्याप्तिः। गुणत्वादिकमादायात्मन्यतिव्याप्तिवारणाय जातौ गुणत्वन्यूनवृत्तित्व मपि देयम्। नचैवं क्रियामादाय मनस्यतिव्याप्त्यभावात् गुणत्वं व्यर्थमिति चेत्, त्यज्यतां तदपि। दिनकरीये द्रव्यत्वमादायातिव्याप्त्यभिधानं जात्यघटितयथाश्रुतलक्षणाभिप्रा येण। **लक्षणघटकता उचितेति**। एवं लक्षणकरणे बहिरिन्द्रियग्राह्यसंस्कारत्ववतीं भावनामादायात्मन्यतिव्याप्तिर्दुष्परिहरेत्यपि ध्येयम्॥

**दि—समवायेन स्पर्शवत्त्वमिति**। मृदुकठिनस्पर्शवदारब्धावयविनो घटा देरपि न निस्स्पर्शत्वम्, त्वाचप्रत्यक्षानुरोधेन चित्रस्पर्शाङ्गीकारस्यावश्यकत्वात्॥

**मु—द्रव्यसमवायिकारणवृत्तीति** । यद्यप्यत्र द्रव्यसमवायिवृत्तित्वमेवालम्, तथापि मूले भाष्यानुरोधिन्यारम्भपदस्वारस्यमनुसृत्य गुर्वपि लक्षणं दर्शितमित्यवसेयम् ॥

**भा—अथाकाशशरीरिणामिति** । यद्यपि चतुर्णां साधर्म्यकथनानन्तरं 'रूपद्रवत्व' इत्यादिना त्रयाणां तत्कथनमेवोचितम्, दृश्यते च भाष्येपि तथैव, तथापि स्पर्शरूपसाधर्म्येऽभिहिते तस्य व्याप्यवृत्तिचिरस्थायिविशेषगुणत्वज्ञाने जाते व्याप्यवृत्तिक्षणिकेतरविशेषगुणवत्त्वरूपमपि क्षित्यादीनां चतुर्णां साधर्म्यमुक्तप्रायम् । ततश्च तद्विपरीतविशेषगुणस्मृत्या स्मृतस्य चोपेक्षानर्हत्वादत्र विचारणीयांशबहुत्वाच्चान्तरा आत्माकाशसाधर्म्यप्रदर्शनं कृतमिति ध्येयम् ॥

**दि—योग्येति**—विभ्विति प्रक्षिप्तं नाशककोटौ ॥

**त—न व्यभिचार इति । नान्वयव्यभिचारइत्यर्थ इति** । उभयत्र नञौ प्रक्षिप्तौ । **अन्वयव्यभिचार इत्यर्थ इति** । अथ प्रायश्चित्तादिरूपविशेषसामग्र्य भावान्न तदापत्तिरिति चेन्न, प्रायश्चित्तादिना अवश्यक्लृप्तेन योग्यविशेषगुणस्य तत्रान्यथासिद्धत्वेनादृष्टनाशस्य तत्कार्यत्वासम्भवात्तद्व्युदासार्थं योग्यत्वनिवेशावश्यकत्वात् । यत्र मरणरूपं प्रायश्चित्तं तज्जन्यादृष्टनाशे व्यतिरेकव्यभिचारोपि बोध्यः । प्रायश्चित्ता दीत्यत्रादिपदेन सुकृतनाशककीर्तनादिपरिग्रहः । भोगतत्त्वज्ञानयोः परिग्रहस्तु न सम्भवति तत्र व्यभिचाराभावात् ॥

**दि—स्वाव्यवहितपूर्ववृत्तित्वसम्बन्धनिवेशाच्चेति** । पूर्वत्वमत्र न स्वाधि करणक्षणप्रागभावाधिकरणत्वम्, ज्ञानादीनां स्वेनैव द्वितीयक्षणे नाशापत्तेः, किन्तु स्वप्रागभावाधिकरणत्वमिति ध्येयम् । 'ज्ञानादिना उत्पत्तिकाले इच्छादीनां नाशः' इत्यस्मदीयपाठः । ज्ञानोत्तरमिच्छेति सर्वत्र सम्भवादेष वरीयान् । **केचित्त्विति** । अत्र कार्यतावच्छेदककारणतावच्छेदकसम्बन्धौ क्रमाद्विशेषणतासमवायौ बोध्यौ । अपेक्षाबुद्धिनाशे तु इच्छादिकं विहाय स्वप्रतियोगिजन्यसंख्यादिप्रत्यक्षमेव तत्तद्व्यक्ति त्वेन नाशकम्, नत्वनुगतरूपेण, स्वत्वघटितत्वेनाननुगमात् । कथञ्चिदनुगमस्य शक्य त्वेपि अपेक्षाबुद्धिभिन्नस्थलेऽपि तस्य शक्यत्वेन सन्दर्भासङ्गतेः, अतस्तरङ्गिणीदर्शिताव तारिका चिन्त्या । तत्तद्गुणनाश्यतावच्छेदकं च न तद्गुणध्वंसत्वम्, किन्तु लाघवात्तद्गुणध्वंसनिष्ठतद्व्यक्तित्वमेवेति ध्येयम् ॥



**त—बहुतरादीति** । अत्र आदिपदं प्रक्षिप्तम् ॥

**दि—एतत्क्षणोत्तरेत्यादि** । अत्र योग्यविभुविशेषेति प्रक्षिप्तम् । एवं तेनेत्यादिर्नक्षतिरित्यन्तो ग्रन्थश्च प्रक्षिप्तः ॥

**मु—एवं ज्ञानादीनामपीति** । 'एवं ज्ञानादिकमपि' इति पाठः ॥

**त—नन्वेवमिति** । प्रथमकल्पे इति प्रक्षिप्तम् । **तज्जनकादृष्टनाशे प्रतिबन्धकत्वेति** । एवं सति तज्जनकादृष्टस्य नाशकत्वसम्भवात् 'स्वमेव नाशकम्' इत्यवधारणमसङ्गतं स्यात् । अत आत्मसाक्षात्कारजनकादृष्टस्य तद्द्वारैव महाप्रलय जनकत्वमिति क्षणविशेषस्य प्रतिबन्धकत्वकल्पनं नावश्यकम्, न वा ग्रन्थासङ्गतिः । यद्वा, अदृष्टस्य न कार्यमात्रे जनकत्वं किन्तु प्रयोजकत्वमेव, व्यक्तीभविष्यति चेदं 'सर्वमेव कार्यजातमदृष्टाधीनम्, इति ग्रन्थव्याख्यानावसरे । एवञ्च महाप्रळयाव्यवहित पूर्वक्षणे अदृष्टासत्त्वेपि न क्षतिः । इदमत्रावधेयम्—सिद्धान्तेपि सुषुप्तिप्राक्कालीन ज्ञानादीनां तत्तदात्मचरमयोग्यविशेषगुणानां च स्वोत्तरवृत्तित्वविशिष्टं स्वं पैवनसंयोगादि वा नाशकं वक्तव्यम्, योग्यविशेषगुणान्तरदौर्लभ्यात् । एवञ्च व्यतिरेकव्यभिचार वारणाय पूर्वोपदर्शितकार्यतावच्छेदककोटौ स्वसामानाधिकरण्य,स्वाव्यवहितपूर्वत्वोभय सम्बन्धेन विजातीयात्ममनस्संयोगविशिष्टत्वशब्दत्वान्यतरवत्त्वमपि निवेशनीयम् । वैजात्यं च मुक्तिसुषुप्तिकालीनात्ममनस्संयोगव्यावृत्तम् । अस्यैव परिचायकं विभुवृत्तित्वम् । तादृशोभयसम्बन्धेन विजातीयात्ममनस्संयोगविशिष्टान्यात्मयोग्यविशेषगुणनाशं प्रति तादृशो भयसम्बन्धेन गुणः कारणमित्यपरः कार्यकारणभावः । उभयत्रापि विजातीयात्ममनर स्संयोगस्थाने ज्ञानं निवेश्यमिति तु परे । इच्छादिकालेपि ज्ञानमस्तीति तेषामाशयोऽ वसेयः । आत्मत्वस्थाने विभुत्वं घटयित्वा द्वितीयकार्यत्वं यदि शब्दनाशस्य सम्पाद्यते, तदा प्रथमे शब्दत्वप्रवेशो मास्तु । पूर्वत्वं च स्वाधिकरणक्षणप्रागभावाधिकरणत्व रूपम् । एवञ्च द्वितीयक्षणवृत्तिस्वस्यापि स्वनाशकत्वोपपत्तिः । द्वितीये कार्यभूतनाश प्रतियोगिगुणश्च न कदाप्यपेक्षाबुध्यात्मकः, तदुत्तरं द्वित्वाद्यनुभवादिति ॥

**दि—अव्याप्यवृत्तिवृत्तीति** । चित्ररूपानङ्गीकर्तृमते रूपस्याव्याप्यवृत्ति त्वात् रूपत्वमादायातिव्याप्तिः व्याप्यवृत्तिजन्यावृत्तित्वमेतत्स्थाने निवेश्य परिहरणीया ।

तदर्थत्वादितीति । 'क्षणिकविशेषगुणवत्त्वार्थत्वादित्यर्थः' इति पाठः ॥

**त—ज्ञानत्वमादायेति** ज्ञानत्वस्य प्रथमोपस्थितत्वादुपेक्षानर्हत्वमिति भावः ॥

**मु—यथाकाशजीवात्मनोरिति ।** अनेकद्रव्यविभाजकोपाधिव्यापकसाधर्म्य प्रदर्शनस्यैव प्रकृतत्वात्तत्सन्दर्भत्यागेऽनौचित्यं सूचयितुं **यद्वीति** ॥

**दि—ननु परममहत्त्वं न जातिरिति ।** नन्वापकर्षानाश्रयपरिमाणत्वरूपत्वेपि विशिष्टस्य शुद्धानतिरेकितया जातित्वमक्षतमिति वाच्यम्, घटादिपरिमाणस्यापि तथात्वापत्त्या अपकर्षानाश्रयत्वविशिष्टपरिमाणत्वाधिकरणतारूपताया एव परममहत्त्वत्वे स्वीकार्यत्वात् । ननु टीकाकृन्मतेऽतिप्रसङ्गाभावेपि सिद्धान्ते तस्य जातित्वाङ्गीकर्त्वैवातिप्रसङ्ग इत्यतोऽवतरणिकान्तरं ददाति—**यद्वा नन्विति** ॥

**मु—त्रिक्षणवृत्तित्वं वेति ।** अत्र व्यावर्त्याभावाद्विशेषत्वमपि न देयमिति मञ्जूषाकृतः । गुणनिरूपणे दिनकरभट्टेन दर्शयिष्यमाणनव्यमते द्वित्वादे द्विक्षणमात्रावस्थायितया द्वित्वादिकमादाय, विभागस्य संयोगनाशैकफलकतया द्विक्षणावस्थायित्वमेव, विभक्तप्रत्यये च पूर्वसंयोगनाश एव विषय इति मते विभागमादाय चातिप्रसङ्गवारणाय विशेषपदसार्थकतापि बोध्या । मूलस्थप्रत्यक्षयोगेत्यस्य प्रत्यक्षविषयत्वार्थकतां स्पष्टयति—**प्रत्यक्षविषयत्वञ्चेति ।** तथाच रूपं द्रवत्वं प्रत्यक्षयोग श्चेति द्वन्द्वः, तत इनिप्रत्यय इति भावः । **अतिव्याप्तं च रूपादाविति ।** वाय्वादावित्येव वक्तव्ये तत्त्यागः प्रत्यक्षपदस्य लौकिकचाक्षुषार्थकत्वमभिसन्धायेति बोध्यम् ॥

**भा—यदुक्तं यस्येति ।** साधर्म्यपदस्य समानधर्ममात्रार्थकत्वात् मुखचन्द्रयोः कान्तिः साधर्म्यमित्युक्ते तस्या इतरावृत्तित्वं न लभ्यते । एवञ्च 'द्रव्यादयः पञ्च भावा अनेके' इत्यादिना दर्शितसाधर्म्याणामितरवैधर्म्यतया व्यावर्तकत्वरूपलक्षणत्वज्ञापनायैतदुक्तं वेदितव्यम् ॥

**क्षितावेते चतुर्दशेति ।** ननु स्थितस्थापकस्यापि पृथिव्यां सत्त्वाच्चतुर्दशत्वोक्तिरसङ्गतेति चेन्न, यतः 'स्पर्शादयोऽष्टौ' इत्यादिना तत्तद्द्रव्येषु गुणविभाजकजातिपुरस्कारेण तद्वतां परिगणनमेव क्रियते, तथैव जिज्ञासितत्वात् । एतत्स्फोरणायैव वेगः इत्येतावन्मात्रमनुक्त्वा 'वेगाख्यः संस्कारः' इत्युक्तम् । इत्थञ्च उत्तरत्र वेगपदानि संस्कारत्वेन रूपेण तदाश्रयपराणि । एवञ्च 'क्षितावेते' इत्यत्र सर्वनाम्ना पूर्वोपस्थितसंस्कारत्वात्मकेनैकेन धर्मेण योग्यतावशाद्वेगस्थितस्थापकयो र्बोधः । चतुर्दशेत्यस्य च चतुर्दशसंख्याकताद्दशधर्मवन्त इत्यर्थः । एवमेवाष्टावित्यादावपि, व्यक्तीनामनन्तत्वात् । अग्रे भावनापदमपि संस्कारत्वरूपेण भावनाबोधकमिति ॥



**मु—ते चेति ।** 'ते च संख्यादिपञ्चकम् । खे आकाशे' इति पाठः ॥

**दि—वायोर्नवेति ।** अनयाऽवतारिकया स्वोद्देशक्रममुलङ्घ्य वाय्वादिक्रमेण गुणप्रदर्शने निमित्तमभिहितम् । **तावदिति ।** प्रथममित्यर्थः ॥

**त—ननु द्रव्यत्वं यद्यीति ।** निरुपाधिकं न स्यात् निरुपाधिकमिति व्यवहारविषयो न स्यात् । द्रव्यत्वेन परिमाणसाधने हेतोस्सोपाधिकत्वाभ्रावव्यवहारोऽनुपपन्नः स्यादिति भावः ॥

**दि—व्यक्तीभविष्यतीति ।** आत्मनिरूपणे वेदान्तिमतप्रस्तावे । वेदस्थनपुंसकानन्दशब्दस्य मत्वर्थीयाच्प्रत्ययान्तत्वादानन्दवत्त्वबोधकत्वं दर्शयिष्यते । आहुरित्यस्वरसोद्भावनम् । 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इत्यादिना सर्वमूर्तसंयोगित्वरूपं विभुत्वमुक्तम् । संयोगेन च तत्कारणतावच्छेदकद्रव्यत्वसिद्धिः, तेन च परिमाणसिद्धिः । श्रुतिस्थानन्दपदस्य दुःखाभावपरतया च नेश्वरे सुखसिद्धिरित्यादिकं तद्बीजमवसेयम् ॥

## इति द्वितीयः परिच्छेदः ॥

# तृतीयपरिच्छेदः

## पृथिवीनिरूपणम्

**मु—साधर्म्यवैधर्म्ये निरूप्येति** । इदञ्चावसरसङ्गतिप्रदर्शनाय । नच साधर्म्यस्यैव वैधर्म्यत्वेन भेदाभावात् कथं द्वन्द्व इति वाच्यम्, नीलघटयोरभेद इत्यत्रेव पदार्थतावच्छेदकभेदमादाय द्वन्द्वोपपत्तेः । **प्रत्येकमिति** । द्रव्यविभाजकैकैक धर्मावच्छिन्नमित्यर्थः । जलादिसाधारणरूपेण पूर्वं निरूपणेपि न पौनरुक्त्यशङ्कावसर इत्यनेन दर्शितम् । मनोनिरूपणान्तग्रन्थस्येयमवतारिका । एवञ्चाख्यातार्थ आदिकृति रित्यवधेयम् ॥

**त—गुणत्वावच्छिन्नकार्यतानिरूपितेति** । अथ द्रव्यत्वेन गुणत्वेन कार्यकारणभावे किं मानमिति चेन्न, गुणादौ गुणाभावप्रयोजकत्वस्यैकस्मिन् द्रव्यभेदे स्वीकारसम्भवेन लाघवात्, कार्याभावे कारणाभावस्यैव प्रयोजकत्वात् । **विजातीया दृष्टसंग्रह इति** । यद्यप्यसमवायिकारणे गन्ध एवातिव्याप्तिस्सम्भवति, तथापि गन्धत्व पर्याप्तावच्छेदकताककार्यतानिवेशेनैव तद्व्यावृत्तिः, गन्धकार्यतावच्छेदककोटौ पाकजन्य त्वस्याप्यवश्यं निवेश्यत्वादित्याशयः । अदृष्टेति गन्धाभावस्योपलक्षणम्, तेन गन्ध त्वेनादृष्टविशेषत्वेन कार्यकारणभावानङ्गीकारेपि न क्षतिः । अत्र लक्षणे कार्यतायां सम वायसम्बन्धावच्छिन्नत्वं न देयम्, प्रयोजनाभावात् । गन्धसमवायिकारणत्वलक्षणस्य निर्गन्धघटेपि सत्त्वादव्याप्त्यसम्भवादाह—**गन्धवद्वृत्तीत्यादिग्रन्थस्येति** । **अनेन च तादृशघट इति** । अनेनेत्यस्य सूचितमित्यनेनान्वयः । **विनिगमनाविरहेणापीति** । नच विनिगमनाविरहे गन्धवत्त्वलक्षणस्य मूलोक्तमौचित्यं दुर्घटमिति वाच्यम्, जाति घटनेन लक्षणानामव्याप्तिनिरासस्य पूर्वं बहुषु स्थलेषु दर्शितत्वात् शिष्याणां तद्रीतेः सुवेद्यत्वात् ॥

**दि—हेतुत्वानङ्गीकारे इति** । 'पृथिव्या हेतुत्वानङ्गीकारे' इति पाठः ॥

**त—जलादिव्यावृत्तत्वमिति** । व्यावृत्तत्वमत्र भिन्नत्वम् ॥



**मु—अन्यथा गन्धत्वावच्छिन्नस्येति** । तद्व्यक्तिसमवेतसत्सामान्यं प्रति तद्व्यक्तेः कारणत्वादेव तत्तद्गन्धव्यक्तेः समवायिकारणनियम्यत्वलाभात् गन्धस्येत्यनुक्त्वा गन्धत्वावच्छिन्नस्येत्युक्तिः ॥

**त—वैजात्यस्य पृथिव्यनुयोगिकसंयोग एवेति** । यद्यपि पृथिवी वृत्तित्वोक्तौ न जलवाय्वादौ गन्धोत्पादापत्तिः, तथापि तेजसि न तद्वारणमित्यनु योगित्वोक्तिः । इत्थञ्च वैजात्यविशिष्टस्य समवायेनानुयोगिन्येव स्वीकारान्नोक्तापत्तिरिति भावः । **स्वसमवायिसमवेतत्वेतीति** । दिनकरीयप्राचीनग्रन्थेषूभयत्र पृथिवीसमवेत त्वघटित एव पाठो दृश्यते । उभयत्रापि पृथिवीत्वमघटयित्वैव तरङ्गिणीकृत्सम्मतः पाठः । मुद्रितपुस्तकेषु स्वसमवायिपृथिवीसमवेतत्वेत्यत्र पृथिवीपदं प्रक्षिप्तम् । पृथिवीत्वाघटनेपि तेजसि व्यभिचारवारणप्रकार उपपाद्यते—**विलक्षणेत्यादिना** । इत्थञ्च पृथिवीत्वजातिसिद्धिप्रकारः सम्बन्धघटकतादृशानुयोगिता किञ्चिद्धर्मावच्छिन्नेत्यनुमाना दिति बोध्यम् ॥ मञ्जूषोक्तरीत्या तेजोनुयोगिकसंयोगादपि रूपपरावृत्त्यादिसम्भवा त्तत्रापि वैलक्षण्याङ्गीकारस्यावश्यकतया तेजसि व्यभिचारवारणाय सम्बन्धकोटौ पृथिवीत्वं निवेशनीयमित्यभिसन्धाय 'इति हृदयम्' इत्युक्तम् ॥

**मु—गन्धवत्त्वमव्याप्तमिति** । अत्र, 'कथं तत्र पृथिवीत्वम्' इति पाठ इति मञ्जूषाकृतः । स तु स्वकल्पनामात्रमूलक इति न स्वीकारमर्हति । किञ्च गन्धशून्यत्वात् पृथिवीत्वप्रतिक्षेपेण पाषाणस्य दशमद्रव्यत्वापादने तमसो द्रव्या न्तरत्वसाधकयुक्तेरत्रापि तुल्यत्वात् द्रव्यविभाग एवास्या अपि शङ्काया युक्तत्वम् । अत एव हिमकरकयोः कठिनत्वात् पार्थिवत्वमेवाग्रे आशङ्कितम् । हिमादेर्जलीय विषयत्वं सुवर्णस्य तैजसविषयत्वञ्च मूल एव प्रतिपादितमिति तद्विचारावसरोऽस्ति । न तथा पाषाणस्येति तत्र पृथिवीत्वाक्षेपो नोचित इति । गन्धसत्त्वादित्यत्र सत्त्वं न कालसम्बन्धित्वरूपम्, किन्तु प्रमाणसिद्धत्वमिति स्फुटीकृतं 'गन्धानुमानात्' इति व्याख्यातवता दिनकरभट्टेन । 'तथाच तस्यापि' इत्युत्तरग्रन्थपर्यालोचनया च गन्धसिद्धेः पृथिवीत्वसिद्ध्यधीनत्वमवगत्य कृतं पृथिवीत्वेनेति पूरणमपि नानुचितम् । शुक्लेतररूपा दिनापि पाषाणे पृथिवीत्वसाधनसम्भवेपि तस्येदानीं न पृथिवीत्वव्याप्यत्वनिश्चय इति

---

शुक्लेतररूपादिनेत्यादिपदेन स्नेहशून्यत्वे सति गुरुत्ववत्त्वादेस्संग्रहः, तेन शुक्लपाषाणेपि पृथिवीत्वसिद्धिर्बोध्या ॥

ऋजुभिन्नापि सरणिरत्राङ्गीकृतेति च वेदितव्यम्। **पाषाणध्वंसजन्यत्वादिति**। तद्विशिष्ट द्रव्यत्वादित्यर्थः, तेन न पाषाणध्वंसजन्ये तत्प्रत्यक्षे व्यभिचारः। नच कालादि विधया पाषाणध्वंसजन्यपटादावेवमपि व्यभिचार इति वाच्यम्, जनकतायां ध्वंसत्वा वच्छिन्नत्वनिवेशेन तद्वारणात्। नचैवं प्रत्यक्षेपि न व्यभिचार इति द्रव्यत्वनिवेशन मफलमिति वाच्यम्, पाषाणनाशजन्यरूपादिनाशे व्यभिचारवारणाय तदावश्यकत्वात्। पाषाणे गन्धसिद्धिप्रकारस्त्वेवम्—पाषाणभस्म पृथिवी गन्धवत्त्वात्, भस्मावयवपरमाणुः पृथिवी पृथिव्यवयवत्वात्, पाषाणभस्म पाषाणोपादानोपादेयं पाषाणध्वंसजन्यत्वे सति द्रव्यत्वात्, पाषाणः पृथिवी पृथिव्यारब्धत्वात्, पाषाणो गन्धवान् पृथिवीत्वादिति ॥

दि—**यद्यपि पाषाणे इति**। एतदनन्तरं 'पृथिवीत्वाभावे अलक्ष्यत्वा देव गन्धवत्त्वलक्षणम्' इत्यादिपाठः। **पाषाणावयवयोरिति**। 'पाषाणारम्भका वयवयोः' इति पाठः। ननु पाषाणतद्भस्मावयवयोरैक्याद्भस्मावयवे च गन्धसत्त्वाद्गन्ध वदवयवारब्धत्वादेव पाषाणे गन्धसिद्धिसम्भवे तस्याः पृथिवीत्वसिद्ध्यधीनत्वकथनमनु चितमिति शङ्कां निरसितुमाह—**एतेन पाषाण इवेति**। एतेन, गन्धसिद्धेः पृथि वीत्वसिद्ध्यधीनत्वप्रदर्शनेन। **निर्गन्धैश्च तैरेवेति**। नच गुणग्रन्थे पाकप्रक्रियायां निर्गुणे द्रव्ये द्रव्यारम्भानुगुणक्रियानुत्पत्तेर्वक्ष्यमाणतया कथं निर्गन्धैर्द्रव्यारम्भ इति वाच्यम्, लाघवात् स्पर्शस्यैव द्रव्यारम्भानुगुणक्रियोपयोगित्वम्, अतः पाषाणपरमाणूनां गन्धसमवायिकारणतावच्छेदकपृथिवीत्वनिश्चयात् पूर्वं गन्धनिश्चयस्यासम्भवान्निर्गन्धत्व सम्भावनोपपत्तेः ॥

त—**पृथिवीत्वेन गन्धहेतुतेति**। 'गन्धनाशत्वेन गन्धहेतुता' इति पाठः। स वरीयान्, गन्धनाशनिष्ठकारणताया एव पूर्वं प्रतिक्षिप्तत्वात्। **निषिद्ध कर्मणोपीति**। तादृशकर्माधीनसालग्रामध्वंसस्यापीत्यर्थः। सम्बन्धघटकस्वानुकूलत्वं च स्वजनकचेष्टाजनकत्वरूपम्, विनिगमकदौर्लभ्यात् कर्मण इव सालग्रामध्वंसस्यापि हेतुत्व मित्याशयः ॥

दि—**दुग्धपरमाणाविति**। दुग्धपरमाणुः दुग्धत्वाभाववान् द्रव्यत्व व्याप्यव्याप्यजात्यभावादिति सामान्याभावेन विशेषाभावसाधनम्। ननु परमाणौ दुग्ध त्वमस्तु, ततश्च तादृशजातिरूपसामान्यञ्चेति शङ्कां क्रमेणापनुदति—**अन्यथेत्यादिना**।



दुग्धपरमाणुजन्येषु सर्वद्रव्येषु दुग्धत्वमस्तीति नियमानङ्गीकारात्र परमाणौ द्रव्यत्वव्याप्यव्याप्य जातिसत्त्वेपि क्षतिरित्यतो दूषणान्तरमाह—**दधित्वदुग्धत्वयोरिति** इत्यप्याहुः ॥

दि—**परमाणुवृत्तित्वे इति**। अत्र 'परमाणौ' इति क्वचित् पाठः ॥

त—**दुग्धपरमाण्वजन्यत्व इति**। दुग्धपरमाणुजन्यत्व इति पाठः ॥

मु—**तथाच तस्यापीति**। तथाच, पाषाणस्य पृथिवीत्वसिद्धौ च। तस्यापि, पाषाणस्यापि। अपिना तद्भस्मादिपृथिव्यन्तरवदिति दृष्टान्तः सूच्यते। **बाधकाभाव इति**। सति कारणकलापे कार्यानुदयः कस्यचित् प्रतिबन्धकत्वमङ्गी कृत्यैवोपपादनीयः, तत्कल्पने चात्र न मानमिति भावः। यद्वा, तस्यापीत्यस्य पाषाण भस्मनोपीत्यर्थः। कथमन्यथेत्यादिना पाषाणे पृथिवीत्वानङ्गीकारे भस्मनो गन्धानु पपत्तिमभिधाय दर्शितयुक्त्या तत्र पृथिवीत्वसिद्धौ नोक्तानुपपत्तिरूपं बाधकमिति निग मनं कृतमिति ज्ञेयम् ॥

भा—**नानारूपवतीति**। केचिच्चित्रं रूपान्तरमभ्युपगच्छन्ति, केचिन्नेति रूपविधानां संख्याविषये मतभेदादुभयाविरोधायाह—**नानेति**। अत एव भाष्येपि न सा निर्दिष्टा। व्यक्तिगतनानात्वमत्र न बुबोधयिषितम्, जिज्ञासाभावात्, किन्तु रूपत्व व्याप्यजातिगतमिति विशदयति—मुक्तावल्यां **नानाजातीयमिति** ॥

मु—**रूपनाशवद्वृत्तीति**। एतत्पूर्वं 'विवक्षितत्वात्' इति प्रक्षिप्तम्। यद्यपि नीलवद्वृत्तीत्यादि नाशाघटितमपि लघुलक्षणं सुवचम्, तथापि मूलस्वारस्यात् गुणत्वसाक्षाद्व्याप्यरूपत्वघटितलक्षणमादृतमिति बोध्यम्। एवमग्रेपि। अत एव पृथि व्यनुष्णाशीते वैजात्याङ्गीकारेपि पाकजस्पर्शत्वघटितं गुरुलक्षणमेवाग्रे दर्शितम्। स्पर्शे पाकजत्वोक्त्या स्पर्शद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्यापि लक्षणत्वसम्भवः सूचितः। पाकजरूपवद्वृत्तीत्यादेः पृथिवीलक्षणत्वमपि नानारूपवत्त्वोपपादनावसरे बोधितम्। पाकजरूपवतीत्यनुक्त्वा नानारूपवतीत्युक्तिस्तु पृथिव्यां नानाजातीयरूपवत्त्वज्ञापनायेति बोध्यम्। उदयनाचार्यास्तु 'गन्धरूपरसानां पाकजत्वं सदपि स्पुटत्वान्नोक्तम्। स्पर्शस्य तु तथात्वे विप्रतिपत्तिः। नहि गन्धादिवद्विशेषतः स्पर्शः पाकस्यान्वय

---

तादृशजातीति। द्रव्यत्वव्याप्यव्याप्यजातीत्यर्थः ॥

व्यतिरेकावनुविधत्ते' इति प्राहुः ॥

दि—**अलक्ष्ये इति**। 'अलक्ष्ये लक्षणस्यासत्त्वम्' इति पाठः। **रूपद्वयवद्वृत्तीति**। एतत्पूर्वं 'रूपद्वयेति' इत्यपि पाठः। **जलत्वादीति**। 'जलत्वादिजातिमति' इति पाठः। **जलपृथिव्यन्यतरत्वेति**। 'जलपृथिव्यन्यतरत्वादिरूपधर्ममादाय' इति पाठः। **द्वित्वेति**। 'द्वित्वादिघटितत्वेन' इति पाठः॥

**मु**—षड्विधस्तु रसस्तत्रेति मूलस्थतुशब्दार्थं तदन्वयं च दर्शयति—**पृथिव्यामेवेति**। **अवसेय इति**। एतदनन्तरं 'गन्धस्त्विति। द्विविध इति' इत्यादि पाठः। **वर्तत इतीति**। 'वर्तत इत्यत उक्तम्' इति पाठः। **ज्ञापनार्थन्तदुक्तमिति**। शीतादिभेदेन त्रिविधस्पर्शोपि पृथिव्यामस्तीति भ्रमापनोदनायेति भावः॥

दि—**मधुरेत्यादिनेति**। एतदुत्तरं 'ननु यत्र' इत्यादिपाठः। **व्यतिरेकव्याप्तेरिति**। इतरत्वव्यापकीभूताभावप्रतियोगिपृथिवीत्वमिति व्याप्तिज्ञानस्यानुमितिजनकतायामित्यर्थः। **सुतरामिति**। हेतुः साध्यसमानाधिकरण इति ज्ञाने तुल्यवित्तिवेद्यतया साध्यविशिष्टहेतुमज्ज्ञानाङ्गीकारेण तत्र सिद्ध्युपपादनेपि नात्र तत्सम्भवशङ्कापीति भावः॥

त—**उपनयवाक्याच्छाब्दबोधानुपपत्तेरिति**। इदमापाततः, केवलव्यतिरेकिणि 'यत् पुनरितरेभ्यो न भिद्यते, नासौ पृथिवी यथा अबादि' इत्युदाहरणप्रयोगानन्तरं 'नचेयं न पृथिवी' इत्येवाचार्यैरुपनयस्य लेखनात्। **तत्राप्रतिबन्धकत्वादिति**। **दिगिति**। विस्तरस्त्वीश्वरानुमाने द्रष्टव्यः॥

**मु**—**घटादीनामिति**। 'घटादेः प्रत्यक्षत्वं न स्यात्' इति पाठः। **प्रत्यक्षत्वं न स्यादिति**। तथाच घटादिर्न परमाणवः परमाण्ववृत्तिधर्मवत्त्वादित्यनुमानेनावयवातिरिक्तावयविसिद्धिरिति भावः। उक्तहेतुभूतप्रत्यक्षत्वस्य न परमाण्ववृत्तित्वमिति न तेन परमाणुभेदसाधनसम्भव इति दर्शयति—**एकस्येति**। यद्वा, प्रत्यक्षत्वमेव हेतुः, गुणादेर्दृष्टान्तत्वसम्भवात्, उक्तानुमानेऽप्रयोजकत्वशङ्कायां बाधकस्य हेतूच्छित्तिरूपानुकूलतर्कस्यासम्भवं दर्शयति—**एकस्येति**। **प्रत्यक्षत्वेपि विरोध इति**। अत्र अपिः प्रक्षिप्तः। **अदृश्यस्येति**। स्वभावतो दर्शनायोग्यस्य द्रव्यस्येत्यर्थः। इत्थञ्च



तरङ्गिण्युक्त'त्वन्मते' इति पूरणक्लेशो नास्ति, उपादानपदस्य कारणत्वमात्रार्थकत्वेपि वैशेषिकमतेप्यनुपपत्त्यभावात्। यद्वा, अनुपादानत्वादित्यस्य कारणत्वविशिष्टद्रव्यत्वाभावादित्यर्थः। एतेन वैशेषिकमते स्वभावतोऽयोग्यद्रव्याप्रसिद्धावपि न क्षतिः। पूरणं चात्र न समञ्जसम्, प्रतिवादिनं प्रति 'नचातितत्र' इत्यादिबौद्धाक्षेपस्यासाङ्गत्यापत्तेः। **यतो नेति**। 'यतो न वयम्' इति ताळीग्रन्थपाठः। **कस्यचिदिति**। द्रव्यस्येति शेषः। तेन गुरुत्वादेस्स्वमते स्वभावेनादृश्यत्वेपि न क्षतिः। स्वभावेनादृश्यत्वं नाम तादात्म्येन प्रत्यक्षप्रतिबन्धकत्वम्। **समुदायंवत इति**। 'समुदायवशात्' इति ताळीग्रन्थपाठः। एवं 'नहि' इत्यस्यानन्तरं 'त्वन्मतेपीदं सम्भवति' इति च। नन्ववयविसिद्धावपि कुतस्तेषामनित्यत्वमित्यत आह—**इत्थञ्चेति**। **प्रत्यक्षसिद्धत्वादिति**। द्व्यणुके तु घटादिदृष्टान्तेन सावयवत्वहेतुना अनित्यत्वसिद्धिरिति ध्येयम्॥

दि—**दूरत्वस्य प्रतिबन्धकत्वादिति**। नच दूरत्वरूपदोषस्य प्रतिबन्धकस्य सत्त्वात् केशसमूहस्य दूरे कथं प्रत्यक्षत्वमिति वाच्यम्, सजातीयानेकसंयोगस्य उत्तेजकत्वात्। **अदृश्यस्येति**। 'अदृश्यस्य दृश्योपादानत्वे' इति पाठः। **घटरूपेति**। परमाण्विति प्रक्षिप्तम्। **घट इत्यादिप्रतीतिविषयताया इति**। घट इत्यादिप्रतीतिविषयता किञ्चिन्निष्ठा विषयतात्वादित्यनुमानेन तस्यैकत्वे लाघवमिति लाघवज्ञाने सत्येकत्वसिद्धिरिति भावः। नन्वनन्तावयविकल्पनाद्गौरवमिति चेन्न, तस्य फलमुखत्वेनादोषत्वात्। यदि घटादयः परमाणुपुञ्जास्तर्हि पश्चात्स्थितानामत एव चक्षुरसंयुक्तानामग्रहणात् कथं घटादेः प्रत्यक्षम्, तेषां पदार्थान्तरत्वे तु अर्वाक्स्थितैस्तदवयवैरिवावयविनापि चक्षुस्संयोगस्य सत्त्वादुपपद्यते प्रत्यक्षम्। न्यायभाष्ययुक्तैतादृशार्थसंग्रहाय दिगित्युक्तम्॥

**मु**—**अवयवधाराया इति**। साक्षात्परम्परासाधारणावयवघटितसमुदायस्येत्यर्थः। अनन्तत्वे निरवयवाघटितत्वे तत्तदवयवपर्याप्तसंख्यानियमाभाव इति यावत्। **मेरुसर्षपयोरपीति**। अपिशब्दः सकलानुभवसिद्धसाम्याभाववत्त्वरूपमापाद्यव्यतिरेकमिष्टापत्त्यभावं च बोधयति। न्यूनतापरिहाराय समुच्चयार्थकत्वमस्याङ्गीकृतं दिनकर

---

**एतेन उद्देश्यतावच्छेदककोटौ द्रव्यत्वमघटयित्वा विधेयकोटौ तस्य निवेशनेन॥**

भङ्गेन। **साम्यप्रसङ्ग इति** । मेरुर्यदि सर्षपावयवपर्याप्तसंख्याधिकसंख्यापर्याप्त्यधिकरणावयवको न स्यात्, तदा सर्षपपरिमाणोत्कृष्टपरिमाणवान्न स्यादिति तर्काकारो बोध्यः। यदि च तरङ्गिणीदर्शयिष्यमाणदिशा अवयवपर्याप्तसंख्याया अप्रसिद्धिः, तदा स्वाश्रयपर्याप्तसंख्याधिकसंख्यापर्याप्त्यधिकरणावयवकत्वसम्बन्धेन सर्षपावयवत्वाभाववानित्यापादकांशो बोध्यः। घटद्वयसंयोगादेः स्वपदेन ग्रहणे स्वाश्रयपर्याप्तद्वित्वसंख्याधिकसंख्यापर्याप्त्यधिकरणत्वस्य पटावयवतन्तुत्रयादौ प्रसिद्धिरवसेया ॥

**दि—**दर्शिततर्कोत्थापकमापादकस्यापाद्यव्याप्यत्वं बोधयितुं तद्व्यतिरेकयोः प्रयोज्यप्रयोजकभावमाह—**परिमाणकारणीभूताया इति** । अन्यदेव परिमाणतारतम्यप्रयोजकमस्तीत्याशङ्कामपनयति—**नचेत्यादिना** । **प्रचयविशेषस्येति** । परिमाणोत्कर्षप्रयोजकत्वविशिष्टप्रचयस्येत्यर्थः । 'विशिष्टे विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधे' इति नियमेन सिद्धं प्रचयस्यापि परिमाणोत्कर्षप्रयोजकत्वं तत्रैव, यत्रावयवसंख्यानियमः, यथा द्वित्रैः प्रचितैरवयवैरारब्धद्रव्यपरिमाणस्योत्कर्षः द्वित्रैः पञ्चषैर्वावयवैरारब्धद्रव्यपरिमाणापेक्षया भवेत्, न तु सहस्रावयवारब्धद्रव्यपरिमाणापेक्षया, सुतरां संख्याविहीनावयवारब्धद्रव्यपरिमाणापेक्षयेति भावः । **असमवेतेतीति** । 'असमवेतकार्योत्पत्तिप्रसङ्ग इति' इति पाठः ॥

**त—दीपकधारेति** । 'दीपधारावदविच्छिन्नत्वेन' इति पाठः । **तथापीति** । 'तथाप्यसंख्यावयवेषु दृढतरसंयोगेनापि परिमाणापकर्षासम्भव इत्यत्र तात्पर्यम्' इति साधुः पाठः ॥

**मु—अतः क्वचिदिति** । क्वचित् अवयवसमुदायघटके कस्मिंश्चित्, विश्रामः निरवयवत्वं, वाच्यः अङ्गीकार्यः । यद्वा, क्वचित् कुत्रचित्, विश्रामः निरवयवत्वसमानाधिकरणस्वघटकता । अवयवधाराया इत्यनुषज्यते । उक्ततर्कानुगृहीतानुमानसत्त्वादिति भावः । अवयवधारा अन्तवती धारात्वात् दीपधारावदित्यनुमानाकारो बोध्यः । **असमवेतेति** । 'असमवेतकार्योत्पत्तिप्रसङ्गः अतस्तस्य नित्यत्वम्' इति पाठः । **अतः तस्य नित्यत्वमिति** । विश्रामाश्रयो नित्यः असमवेतभावत्वात् आकाशवदित्यनुमानेन नित्यत्वसिद्धिरिति भावः । तत्राप्रयोजकशङ्कानिवृत्तये

अवयवधाराया इत्यस्य क्वचिदित्यत्रान्वयो न स्वरस इत्यत आह—यद्वेति ॥



तर्कप्रदर्शनम् । **तस्यानित्यत्व इति** । अत्रापीष्टापत्तौ घटार्थिनः कपालादिसम्पादनानुकूलप्रवृत्त्यनुपपत्तिरूपव्याघातात् सा अपसारणीया । **तस्य परमाणुत्वसिद्धिरिति** । अणुत्वं अपकर्षानाश्रयपरिमाणवृत्ति परिमाणत्वसाक्षाद्व्याप्यजातित्वात् महत्त्वत्ववत्, अपकर्षानाश्रयाणुपरिमाणं नित्यद्रव्यवृत्ति अपकर्षानाश्रयपरिमाणत्वात् गगनादिपरिमाणवदित्यनुमानाभ्यां नित्यपरमाणुसिद्धिरिति भावः । प्रथमानुमाने साक्षाद्व्याप्यत्वनिवेशात् परिमाणनिष्ठापकर्षरूपजातौ न व्यभिचारः । महत्परिमाणतारतम्यस्य महत्परिमाणोत्कर्षधारायाः, गगनादौ गगनादिपरिमाणे, विश्रान्तत्वं अपकर्षासामानाधिकरण्यम् । एवमग्रेपि । **नच त्रसरेणाविति** । तथाचाणुपरिमाणस्यैवाप्रसिद्ध्या तत्तारतम्यस्य विश्रान्तत्वविचारः शशशृङ्गस्य तैक्ष्ण्यादिविचारसमानयोगक्षेम इति भावः ॥

**दि—घटाभावे व्यभिचारेति** । अत्र विधेयं सावयवत्वं समवेतत्वरूपमिति गुणादिकं विहायाभावपर्यन्तानुधावनम् ॥

**त—इत्यस्वरसस्सूचित इति** । घट इति प्रतीतिविषयताया अनेकत्वकल्पनायां गौरवादतिरिक्तावयविसिद्धिरप्रत्यूहैवेति चिन्त्यमेतत् । वस्तुतस्तु, अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यवत्त्वस्य हेतुतायां त्रुटौ व्यभिचारान्नव्यमते त्रसरेणुपरिमाणभिन्नत्वं कार्यतावच्छेदककोटौ निवेशनीयमिति गौरवम् । स्वमते द्व्यणुकादिकल्पनागौरवन्तु फलमुखमिति न दोषावहमित्येवास्वरसबीजं बोध्यम् ॥

**दि—द्रव्यारम्भकसंयोगाकल्पनादिति** । प्रमाणसिद्धद्रव्यान्यथानुपपत्त्यैवावयवसंयोगविशेषेषु आरम्भकत्वरूपं वैलक्षण्यं कल्प्यते, तदभावे च तदभाव इति भावः । **अत्रेदं चिन्त्यमिति** । अपकृष्टमहत्त्वं प्रति स्वाश्रयसमवेतत्वसम्बन्धेन बहुत्वसंख्यैव हेतुः, नतु समवेतसमवेतत्वसम्बन्धेनानेकद्रव्यवत्त्वं गौरवादित्यभिप्रायः । द्वित्वस्यापि तेन सम्बन्धेन हेतुत्वे बाधकाभावादवयवत्रयाकल्पनेन लाघवाचाह—**वस्तुत इति** । अथ द्वित्वस्य महत्त्वजनकत्वं न कुत्रापि दृष्टम्, वक्ष्यते च स्वयमेव महद्भ्यां प्रचिताभ्यामवयवाभ्यामारब्धद्रव्यपरिमाणस्य परिमाणप्रचयोभयजन्यत्वम्, नतु संख्याजन्यत्वमिति चेन्न, अपकृष्टमहत्त्वत्वावच्छिन्नं प्रति बहुत्वत्वेनापि न कारणत्वम्, दर्शितपरिमाण एव व्यभिचारात्, अवयवसंख्याधिक्ये परिमाणोत्कर्षस्य दर्शनाच्च, अतो विलक्षणमहत्त्वं प्रत्येवावयवसंख्याविशेषस्य हेतुत्वं वाच्यम् । इत्थञ्चोत्कर्षानाश्रय

महत्त्वं प्रति द्वित्वत्वेन हेतुत्वेपि क्षतिविरहात्। एतत्कल्पानुसारेण निरवयवमूर्तस्य द्वाभ्यां मूर्ताभ्यां सह युगपत्संयोगोऽसम्भवीत्याक्षेपोपि निरस्तः ॥

त—**त्रिभिः सहितो रेणुरिति**। त्रिभिः महत्त्वोद्भूतरूपानेकद्रव्यवत्त्वरूपैस्त्रिभिश्चाक्षुषत्वोपयोगिभिर्धर्मैर्युक्तमुत्कर्षानाश्रयपरिमाणवद्द्रव्यमित्यर्थः। अत्रानेकद्रव्यवत्त्वं स्वाश्रयसमवेतत्वसम्बन्धेनैकत्वान्यसंख्यावत्त्वं बोध्यम्। त्रसति चलतीति त्रसः गवाक्षरन्ध्रे दोधूयमानः स चासौ रेणुरिति व्युत्पत्तिरिति वाचस्पत्यनिघण्टौ ॥

दि—सा च त्रिधेत्यादिमूलस्य शरीरेन्द्रियविषयभेदादिति पञ्चम्यन्तघटिततया व्याख्याने बीजं दर्शयति—**मूलस्थस्येति**। **हेतुपरत्वं** ज्ञापकपरत्वम्। तथाच देहादीनां परस्परभेदज्ञाप्यं कार्यपृथिव्याः परस्परासमानाधिकरणधर्मत्रयवत्त्वमित्यर्थः। 'त्रैविध्ये' इति पदं तरङ्गिणीकृत्पाठे नास्ति। तत्पक्षे 'कार्यरूपा' इति व्याख्या बीजप्रदर्शनपरा 'मूलस्थस्य' इत्याद्यवतारिकेति च भाति ॥

भा—'योनिजादि भवेद्देहमिन्द्रियम्' इति पाठः ॥

मु—**उद्भिदस्तरुगुल्माद्या इति**। एषां शरीरविशेषत्वेपि प्रशस्तपादभाष्ये विषयेष्वन्तर्भावनं सुखदुःखभोगायतनत्वेन लौकिकानामनुभवाभावात् जङ्गमोपकारकत्वमालविवक्षयेति किरणावल्यां स्पष्टम् ॥

दि—**शरीरेति**। 'शरीरपदं वा मनुष्यदेहपरम्' इति पाठः स्वरसः ॥

मु—**क्लेदोष्मादेरिति**। ऊष्मपदस्य पाक इति व्याख्या, आचार्येणात्र स्थाने पाकपदप्रयोगात्। तत्र च कार्यवाचकेन लक्षणया स्वकारणौष्ण्यबोधनं तत्र प्रमाणप्रदर्शनाय। एवं दिनकरभट्टेन स्वेद इति क्लेदपदविवरणमपि लक्षणया शैत्यबोधनायैवेति ध्येयम्। अत एव जलीयत्वादिखण्डनान्ते 'शैत्यादयस्तु कुसुमादिवासितजलादिगन्धवन्निवर्तन्ते' इति शैत्यपदमेवोपात्तमाचार्यैः। शरीरावयवत्वभ्रमेण स्वेदोपि हेतुर्भवेदिति मञ्जूषाकृतः। **जलत्वस्येति**। 'जलत्वपृथिवीत्वादीनाम्' इति ताळीग्रन्थपाठः। **नच वृक्षादेरिति**। शरीरत्वे चेष्टारूपविलक्षणक्रियावत्त्वे। वैलक्षण्यञ्च प्रयत्नजन्यायामेव शरीरक्रियायाम्, नतु शरीरक्रियासामान्ये। वक्ष्यते च दिनकरीये



हिताहितप्राप्तिपरिहारानुकूलक्रिया चेष्टेति। यद्वा, शरीरत्व इत्यस्य भोगायतनत्व इत्यर्थः। **किं मानमिति**। अलक्ष्यत्वादेवाव्याप्तिशङ्काया नोत्थितिरिति भावः। अत एव चेष्टाश्रयत्व इत्यनुक्त्वा शरीरत्व इत्युक्तिः। **आध्यात्मिकेति**। वृक्षादिः भोगायतनं प्राणसम्बन्धित्वात् मानुषशरीरवदित्यनुमानेन तत्सिद्धिरिति भावः। अत्र स्वरूपासिद्धिशङ्कां वारयति—**तत्रैवेत्यादिना**। 'इति चेन्न' इति पाठः। **भग्नेति**। वृक्षादिः प्राणवान् भग्नक्षतसंरोहणादिमत्त्वादित्यनुमानादित्यर्थः। भग्नक्षतसंरोहणं नाम भङ्गादिना स्वनाशोत्तरं स्वावयवेषु स्वसजातीयोत्पत्तिः। इत्थञ्च तादृशोत्पत्त्यधिकरणस्वावयवकत्वं हेतुः पर्यवसितः। स्वसाजात्यञ्चैकक्षणावच्छेदेन पदार्थद्वयावृत्तिस्ववृत्तिजातिमत्त्वम्। अधिकमन्यतोऽवगन्तव्यम् ॥

दि—**विभागविशेषेति**। 'विभागविशेषविशिष्टावयवयोः संरोहणम्' इति पाठः। **प्राणत्वे प्रमाणाभाव इति**। संरोहणादिकं प्रति पवनसम्बन्धविशेष एव निमित्तम्, इत्थञ्च प्राणवत्त्वसाधने दर्शितहेतोरप्रयोजकत्वमिति भावः। **द्रव्यानारम्भकद्रव्यत्वेनेति**। इदं चान्त्यावयविपदार्थप्रदर्शनम्। यदिच गगनादावन्त्यावयविव्यवहारो नास्ति, तदा द्रव्यपदं कार्यद्रव्यपरम्। लक्षणे तु समवायेन द्रव्यविशिष्टान्यत्वरूपं द्रव्यानारम्भकत्वमेव निवेश्यम् ॥

मु—**तादृशे प्रमाणाभावादिति**। योगाभ्यासपाटवेन बहुकालं निश्चेष्टतासम्पादनेपि तत्र शरीरे उपचयापचयादर्शनेन चेष्टावतः शरीरात् पूर्वदृष्टाद्भेदे प्रमाणाभावादिति भावः। **अन्त्यावयविमात्रवृत्तीति**। द्रव्यारम्भकावृत्तीत्यर्थः, इतरांशनिवेशे प्रयोजनाभावात्। यद्यपि पूर्वलक्षणे द्रव्यत्वव्याप्यत्वस्थाने द्रव्यत्वव्याप्यव्याप्यत्वनिवेशे न पृथिवीत्वमादायातिव्याप्तिः, द्रव्यत्वव्याप्यव्याप्यत्वं च स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वस्वसामानाधिकरण्योभयसम्बन्धेन द्रव्यविभाजकोपाधिमत्त्वरूपम्, तथापि लाघवमेवोत्तरकल्पानुसरणे बीजमवसेयम् ॥

---

**स्वसजातीयोत्पत्तिरिति**। संरोहणपदार्थविवरणमिदम् ॥

**लाघवमेवेति**। नच लक्षणस्य लक्षणान्तरादूषकत्वाल्लाघवमकिञ्चित्करमिति, वाच्यम्, अस्य व्यावहारिकलक्षणत्वात् ॥

**दि—पृथिवीत्वेति।** 'द्रव्यत्वादिजातिव्युदासः' इति पाठः। **द्रव्यत्वादीति।** अनेन द्रव्यत्वव्याप्यत्वनिवेशो नावश्यक इति सूचितम्। आदिना पृथिवीत्वपरिग्रहः ॥

**त—अत्रेष्टत्वमिति।** हिताहितेत्यत्र इष्टानिष्टेति पाठमङ्गीकृत्येदम्। **स्वावच्छिन्नेति।** अत्र स्वपदेन लक्ष्यं ग्राह्यम्। नन्वेवं मृतखण्डशरीरेऽव्याप्तिः, तदवच्छिन्नेच्छादेरप्रसिद्धेः, शरीरान्तरधरणे च घटादावतिव्याप्त्यनिरास इति चेन्न, स्वाश्रयावच्छिन्नेच्छाविषयत्वमित्यादेस्तदर्थत्वात्। यां जातिमादाय लक्षणसमन्वयः, सैव स्वपदार्थः। अन्त्यावयवित्वमत्र समवायेन द्रव्यशून्यत्वं द्रव्यवद्भिन्नत्वं वा। इदन्तु चिन्त्यम्। स्वावच्छिन्नेच्छादिकत्वस्य इच्छाद्यवच्छेदकत्वस्य वा प्रवेशेनैव चारितार्थ्ये तद्घटितगुरुतरचेष्टावत्त्वनिवेशो न न्याय्यः। अतो मन्त्राधीनघटादिक्रियायां चेष्टात्वं व्यवहार औपचारिक इति दर्शयितुं चेष्टास्वरूपमाह चेष्टाचेतीत्येवावतारिका सम ञ्जसा। लक्षणं च चेष्टात्वजातिघटितमेव। उत्क्षेपणत्वादिकमपि चेष्टात्वव्याप्यं न मुसलादिक्रियासाधारणमिति न जातिसङ्करप्रसङ्गोपीति। वस्तुतो मृतखण्डशरीरस्य भोगायतनत्वाभावेन तत्र शरीरपदप्रयोगस्याप्यौपचारिकत्वमेव युक्तमिति जातिघटितलक्षणे न निर्भर इति ज्ञेयम् ॥

**त—नच शरीर इत्यादि।** एतत्स्थाने 'मूले जातिमत्त्वं वा तदिति। ननु शरीरे कीदृशजातिमादाय लक्षणं सङ्गमनीयम्, पृथिवीत्वादेरतथात्वादित्यत आह—मानुषत्वेति' इति साधुः पाठः। एवं 'न जातिः' इत्यनन्तरम्, 'नृसिंहादिशरीरे' इत्यपि पाठः ॥

**भा—इन्द्रियमिति।** अत्रेन्द्रियशब्दस्य प्रकरणात् पार्थिवेन्द्रियपरत्वात् तस्य चासिद्धत्वादुद्देश्यत्वासम्भव इति पार्थिवमित्यस्याध्याहारं विधेयपरतां च दर्शयति—मुक्तावल्यां **घ्राणेन्द्रियं पार्थिवमित्यर्थ इति।** घ्राणेन्द्रियं गन्धग्राहकतया सिद्धमिति भावः ॥

**मु—रूपादिषु मध्य इति।** एवकारार्थः प्रकृते गन्धभिन्नाव्यञ्जकत्वम्। तत्र गन्धभिन्ने निर्धारणसप्तम्यन्तार्थरूपादिघटकत्वमन्वेति। मध्ये इत्यव्ययं च तात्पर्य



ग्राहकम्। तथाच रूपादिपञ्चतयघटकं यत् गन्धभिन्नं तदव्यञ्जकत्वं समुदितार्थः। दलद्वयेपि व्यञ्जकत्वघटकप्रत्यक्षविषयिता लौकिकी ग्राह्या, अन्यथा गोघृतादिजन्यगन्धप्रत्यक्षे उपनीतरूपादिविषयकत्वसम्भवेन दृष्टान्तासिद्धेः, शब्दप्रत्यक्षे तादृशगन्धविषयकत्वसम्भवेन श्रोत्रे व्यभिचाराच्च। अत एव प्रथमदलपरिष्कारः साक्षात्कारघटितो दर्शयिष्यते दिनकरभट्टेन। **स्वीयरूपादिव्यञ्जकत्वादिति।** रूपादिसाक्षात्कारकारणसंयुक्तसमवायात्मकसन्निकर्षघटकतया व्यञ्जकत्वम्, कारणतावच्छेदकसाधारणस्य तस्यैवात्र निवेशात्, अन्यथा वक्ष्यमाणदृष्टान्तेपि हेत्वसिद्धिप्रसङ्गात्, तस्य प्रत्यक्षं प्रति जनकत्वाभावात्। नन्वेवं घ्राणत्वे व्यभिचार इति चेन्न, वक्ष्यमाणद्रव्यत्वनिवेशेनैव तद्वारणात्। दोषविधया स्वीयरूपादिप्रत्यक्षजनकत्वाद्व्यञ्जकत्वस्य कारणतारूपत्वेपि न क्षतिरिति मञ्जूषाकृतः। परन्तु पक्षेऽस्मिन् वायूपनीतसुरभिभागादौ व्याप्तिग्रहो भ्रममादायैवेति विशेषोऽवसेयः ॥

**दि—रसगन्धेति।** अत्र 'रसगन्धस्पर्शशब्दाः' इति पाठः। **इदमत्र बोध्यमिति।** यद्यप्यखण्डाभावघटिततया रूपादिघटित एकहेतुरपि सम्भवति, तदनुरोधेनैव च नवशरावगन्धव्यञ्जकजले व्यभिचारवारणं च दर्शितम्, तथापि प्रयोजनान्तराभावेनैकैकं घटयित्वापि हेतुः सुवच इति शिष्यबुद्धिवैशद्यमस्य प्रयोजनं बोध्यम्। यत्तु मषीतिरोधायकपांसुकणापनयन एव जलस्योपयोगः, नतु नीलसाक्षात्कार इति प्रथमहेतोर्जले व्यभिचार इति, तन्न, आर्द्रतादशायां नीलोत्कर्षस्यानुभूयमानत्वात्। **नचेति।** उभयत्रापि 'हेतोः' इति षष्ठ्यन्तः पाठः। **एतदस्वरसेनापीति।** तथाच 'रूपादिषु मध्ये' इति प्राचीनोक्तेः परकीयत्वघटितहेतुत्रयतात्पर्यकत्वासम्भवेपि तदघटितहेतुत्रयतात्पर्यकत्वं सम्भवत्येवेति ज्ञापनमपि यद्वेति कल्पान्तरारम्भबीजमिति भावः। अधिकं मञ्जूषातोऽवगन्तव्यम्। वस्तुतस्तु, चक्षुषस्तैजसत्वानुमाने दीपादिदृष्टान्तस्य परकीयरूपव्यञ्जकत्वं न दोषविधया, नवा संयुक्तसमवायादिरूपसन्निकर्षनिष्ठकारणतायां साक्षादवच्छेदकतया, द्रव्यसमवेतचाक्षुषं प्रति चक्षुस्संयुक्त

---

दोषविधयेति। गोघृतसंयुक्ते भस्मनि घृतीयं विलक्षणं रूपं प्रतीयते। एवं तत्संयुक्ते पिष्टविशेषादौ रसमृदुस्पर्शविशेषावपि प्रतीयेते। अतो विलक्षणरूपादिनिष्ठलौकिकविषयतानिरूपितविषयतासम्बन्धेन चाक्षुषत्वाद्यवच्छिन्नं प्रति अनुभूयमानारोपजनकदोषविधया गोघृतस्य संयोगसम्बन्धेन कारणत्वं वाच्यमिति भावः ॥

क्तसमवायत्वरूपकारणतावच्छेदकघटकसंयुक्ते तेजस्संयोगस्य, तादृशसंयोगे तेजस्संयोगावच्छिन्नत्वस्य वा विशेषणत्वावश्यकताया अग्रे दर्शयिष्यमाणत्वात्। अतः सन्निकर्षघटकतया व्यञ्जकत्वमेव वाय्वानीतसुरभिभागानामपि विश्वनाथपञ्चाननाभिमतमिति ॥

त—व्याप्तिग्रहानुकूलत्वमिति । 'व्याप्तिग्रहानुकूलत्वप्रयुक्तत्वम्' इति पाठः । **हेतोरेवेति** । 'हेतोरेव क्वाप्यप्रसिद्धया' इति पाठः ॥

मु—विषयमाहेत्यवतारिका प्रक्षिप्ता ॥

दि—**सामान्यादौ सत्त्वादिति** । ननु विषयत्वं नित्यव्यावृत्ता जातिरस्त्विति चेन्न, ध्वंससाधारण्येन जातित्वासम्भवात्। एतत्सूचनायैवादिपदमुपात्तम् । नित्यव्यावृत्तत्वे पृथिवीत्वादिना साङ्कर्यमपि जातिबाधकं बोध्यम्। **साक्षात्परम्परासाधारणभोगसाधनत्वमिति** । यद्येवम्, तदा अन्त्यावयविनामेव भोगसाधनत्वमग्रे साधनीयम्, तत एव तत्कारणावयवधारासु तत्साधनत्वबोधसम्भवादिति न शङ्क्यम्, येन हेतुना निखिलान्त्यावयविषु तत्त्वं सिद्ध्यति, तेनैव जन्यसामान्येपीति तथोपवर्णनात्। अयं न्यायो नित्येषु न प्रवर्तत इति च सुज्ञेयम्! न्यायप्रयोगश्चेत्थम्—द्व्यणुकादि अदृष्टाधीनं कार्यत्वात्, द्व्यणुकादि उपभोगसाधनम् अदृष्टाधीनत्वादिति। एतदनुमानद्वयोपयोगिव्याप्तिद्वयं दर्शितं सर्वमेवेत्यादिमुक्तावलीग्रन्थेन। **द्व्यणुकादीति** । 'द्व्यणुकादिर्ब्रह्माण्डान्तः' इति पाठः। **परन्तु स्वसमवायीति** । इदञ्च समवाय एव कार्यतावच्छेदकसम्बन्ध इत्यभिप्रायेण। कालिकस्य तत्त्वे तु कालिकमेव कारणतावच्छेदकसम्बन्धोपि बोध्यः। नचैवं सति चरमध्वंसरूपकार्याधिकरणे महाप्रलये कालिकसम्बन्धेनादृष्टाभावाद्व्यभिचार इति वाच्यम्, महाप्रलयो नास्तीत्यभिप्रायात्। अस्ति चेत्, कालिक,स्वोत्तरचरमध्वंसत्वान्यतर एव कारणतावच्छेदकसम्बन्धो वक्तव्य इत्यदोषात्। इदन्तु बोध्यम्—ननु विषयलक्षणं कार्यत्वमेव कुतो नोक्तम्। नच देह इत्यादिविभागव्याघातः, उपभोगसाधनत्वस्य तत्त्वेऽपि तौल्याद्देहेन्द्रियभिन्नत्वघटनस्यावश्यकत्वात् । नच कार्यत्वं गुरु, साधनत्वापेक्षया गौरवाभावात्, समवायकालिकोभयसम्बन्धेन पृथिवीत्वस्यैव पृथिवीविषयलक्षणत्वेन परमलाघवाच्चेति चेन्न, शिष्यबुद्धिवैशद्यसम्पादनायैव गुरुलक्षणादरणात्। विशेषेण सिनोति बध्नाति देहिनमिति व्युत्पत्त्या बन्धहेतुत्वं हि

---

समवाय एवेति । ध्वंसं प्रति पृथक् कार्यकारणभाव इति भावः ॥



विषयपदप्रवृत्तिनिमित्तम्। तद्बन्धहेतुत्वं बाह्यवस्तूनामुपपादयितुमेव 'उपभोगसाधनं विषयः' इत्युक्तिः। तथाचोपभोगं सम्पाद्य स्वस्मिन् रागद्वेषवासनारूपं बन्धं ते जनयन्तीति भावः। भोगसाधनत्वमेव सहेतुकं विवृणोति सर्वमेवेत्यादिना। एवञ्च न कश्चिदनुपपत्तिलेशोपीति। अथ सुषुप्तिप्राक्कालीनज्ञानादिध्वंसानां कथमुपभोगसाधनत्वमिति चेन्न, सुषुप्तेरिव तेषामपि प्रबोधकालीनमनःप्रसादादावुपयोगात्। चरमोपभोगतद्ध्वंसयोर्व्यभिचारस्तु व्याप्यकोटौ तद्भिन्नत्वनिवेशेनैव वारणीय इति भाति। केचित्तु, विषयलक्षणमुपभोगसाधनत्वं तज्जनकत्वरूपम्, नतु प्रयोजकत्वम्, परमाण्वाकाशादीनां च तत्रान्यथासिद्धत्वमेवेत्याहुः। तच्चिन्त्यम्, यत्र खण्डपटादेवोपभोगः तत्र महापटस्य खण्डपटं प्रत्यन्यथासिद्धस्य तद्द्वारा जनकत्वासम्भवात्, एवं समाप्तिं प्रत्यन्यथासिद्धत्वेन सिद्धान्तितस्य मङ्गलस्य समाप्तिसाध्योपभोगे सुतरामन्यथासिद्धस्य तज्जनकत्वासम्भवाद्व्याप्तिभङ्गापत्तेः। अधिकमन्यतोऽवगन्तव्यम्। **तदुपभोगमिति** । एतदनन्तरं 'तत्पुरुषस्योपभोगम्' इति पाठः ॥

त—**नत्वेवमिति** । 'नन्वेवं कार्यमात्रेऽदृष्टस्य प्रयोजकत्वमेव' इत्यादिपाठः। **शिष्यबुद्धेर्वैशद्यमिति** । 'यदवच्छिन्ने आत्मनि भोगस्तदन्त्यावयवि शरीरम्। शरीरसंयुक्तमतीन्द्रियं प्रतीतिसाधनमिन्द्रियम्। प्रतीयमानतया भोगसाधनं विषयः' इत्याचार्योक्त्या इदमेव वैशद्यमत्राभिमतं बोध्यम् ॥

मु—**स्नेहसमवायीति** । गुणत्वसाक्षाद्व्याप्यजातेरेव तद्व्याप्यात् पूर्वमुपस्थितिरिति शीतस्पर्शसांसिद्धिकद्रवत्वे उपेक्ष्य स्नेहघटनम्। **यद्यपि स्नेहत्वमिति** । स्नेहनिष्ठकार्यताघटने स्नेहनिष्ठां सत्त्वावच्छिन्नां तद्व्यक्तिसमवेतसत्सामान्यत्वावच्छिन्नां वा कार्यतामादाय सिद्धसाधनम्, अतः स्नेहत्वावच्छिन्नकार्यता प्रवेशनीया, तच्च न सम्भवतीति न जलत्वसिद्धिरिति भावः। **जन्यस्नेहाभावादिति** । ततश्च फलोपधायकत्वघटितसमवायिकारणत्वाभावात् तदवच्छेदकस्य तदन्यूनानतिरिक्तवृत्तेरपि तत्रासम्भवादिति भावः। **तस्य च नित्यस्येति** । यत्र नित्यत्वे सति यत्कार्यनिरूपितस्वरूपयोग्यत्वं तत्र तत्फलोपधायकत्वमिति व्याप्तेरित्यर्थः[१]। तथाच परमाणुः नित्यत्वविशिष्ट

---

**सत्त्वावच्छिन्नामिति** । समवायेन सत्त्वावच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेन कारणतायाः सामान्यग्रन्थे उक्तत्वादिति भावः ॥

क्तसमवायत्वरूपकारणतावच्छेदकघटकसंयुक्ते तेजस्संयोगस्य, तादृशसंयोगे तेजस्संयोगावच्छिन्नत्वस्य वा विशेषणत्वावश्यकताया अग्रे दर्शयिष्यमाणत्वात्। अतः सन्निकर्षघटकतया व्यञ्जकत्वमेव वाय्वानीतसुरभिभागानामपि विश्वनाथपञ्चाननाभिमतमिति ॥

त—**व्याप्तिग्रहानुकूलत्वमिति** । 'व्याप्तिग्रहानुकूलत्वप्रयुक्तत्वम्' इति पाठः। **हेतोरेवेति** । 'हेतोरेव क्वाप्यप्रसिद्धया' इति पाठः ॥

मु—विषयमाहेत्यवतारिका प्रक्षिप्ता ॥

दि—**सामान्यादौ सत्त्वादिति** । ननु विषयत्वं नित्यव्यावृत्ता जातिरस्त्विति चेन्न, ध्वंससाधारण्येन जातित्वासम्भवात्। एतत्सूचनायैवादिपदमुपात्तम्। नित्यव्यावृत्तत्वे पृथिवीत्वादिना साङ्कर्यमपि जातिबाधकं बोध्यम्। **साक्षात्परम्परासाधारणभोगसाधनत्वमिति** । यद्येवम्, तदा अन्त्यावयविनामेव भोगसाधनत्वमग्रे साधनीयम्, तत एव तत्कारणावयवधारासु तत्साधनत्वबोधसम्भवादिति न शङ्कयम्, येन हेतुना निखिलान्त्यावयविषु तत्त्वं सिद्धयति, तेनैव जन्यसामान्येपीति तथोपवर्णनात्। अयं न्यायो नित्येषु न प्रवर्तत इति च सुज्ञेयम्। न्यायप्रयोगश्चेत्थम्—द्व्यणुकादि अदृष्टाधीनं कार्यत्वात्, द्व्यणुकादि उपभोगसाधनम् अदृष्टाधीनत्वादिति। एतदनुमानद्वयोपयोगिव्याप्तिद्वयं दर्शितं सर्वमेवेत्यादिमुक्तावलीग्रन्थेन। **द्व्यणुकादीति** । 'द्व्यणुकादिब्रह्माण्डान्तः' इति पाठः। **परन्तु स्वसमवायीति** । इदञ्च समवाय एव कार्यतावच्छेदकसम्बन्ध इत्यभिप्रायेण। कालिकस्य तत्त्वे तु कालिकमेव कारणतावच्छेदकसम्बन्धोपि बोध्यः। नचैवं सति चरमध्वंसरूपकार्याधिकरणे महाप्रलये कालिकसम्बन्धेनादृष्टाभावाद्व्यभिचार इति वाच्यम्, महाप्रलयो नास्तीत्यभिप्रायात्। अस्ति चेत्, कालिक,स्वोत्तरचरमध्वंसत्वान्यतर एव कारणतावच्छेदकसम्बन्धो वक्तव्य इत्यदोषात्। इदन्तु बोध्यम्—ननु विषयलक्षणं कार्यत्वमेव कुतो नोक्तम्। नच देह इत्यादिविभागव्याघातः, तौल्याद्देहेन्द्रियभिन्नत्वघटनस्यावश्यकत्वात्। नच उपभोगसाधनत्वस्य तत्त्वेऽपि कार्यत्वं गुरु, साधनत्वापेक्षया गौरवाभावात्, समवायकालिकोभयसम्बन्धेन पृथिवीत्वस्यैव पृथिवीविषयलक्षणत्वेन परमलाघवाचेति चेन्न, शिष्यबुद्धिवैशद्यसम्पादनायैव गुरुलक्षणादरणात्। विशेषेण सिनोति बध्नाति देहिनमिति व्युत्पत्त्या बन्धहेतुत्वं हि

---

**समवाय एवेति** । ध्वंसं प्रति पृथक् कार्यकारणभाव इति भावः ॥



विषयपदप्रवृत्तिनिमित्तम्। तद्बन्धहेतुत्वं बाह्यवस्तूनामुपपादयितुमेव 'उपभोगसाधनं विषयः' इत्युक्तिः। तथाचोपभोगं सम्पाद्य स्वस्मिन् रागद्वेषवासनारूपं बन्धं ते जनयन्तीति भावः। भोगसाधनत्वमेव सहेतुकं विवृणोति सर्वमेवेत्यादिना। एवञ्च न कश्चिदनुपपत्तिलेशोपीति। अथ सुषुप्तिप्राक्कालीनज्ञानादिध्वंसानां कथमुपभोगसाधनत्वमिति चेन्न, सुषुप्तेरिव तेषामपि प्रबोधकालीनमनःप्रसादादावुपयोगात्। चरमोपभोगतद्ध्वंसयोर्व्यभिचारस्तु व्याप्यकोटौ तद्भिन्नत्वनिवेशेनैव वारणीय इति भाति। केचित्तु, विषयलक्षणमुपभोगसाधनत्वं तज्जनकत्वरूपम्, नतु प्रयोजकत्वम्, परमाण्वाकाशादीनां च तत्रान्यथासिद्धत्वमेवेत्याहुः। तच्चिन्त्यम्, यत्र खण्डपटादेवोपभोगः तत्र महापटस्य खण्डपटं प्रत्यन्यथासिद्धस्य तद्द्वारा जनकत्वासम्भवात्, एवं समाप्तिं प्रत्यन्यथासिद्धत्वेन सिद्धान्तितस्य मङ्गलस्य समाप्तिसाध्योपभोगे सुतरामन्यथासिद्धस्य तज्जनकत्वासम्भवाद्व्याप्तिभङ्गापत्तेः। अधिकमन्यतोऽवगन्तव्यम्। **तदुपभोगमिति** । एतदनन्तरं 'तत्पुरुषस्योपभोगम्' इति पाठः ॥

त—**नत्वेवमिति** । 'नन्वेवं कार्यमात्रेऽदृष्टस्य प्रयोजकत्वमेव' इत्यादिपाठः। **शिष्यबुद्धेर्वैशद्यमिति** । 'यदवच्छिन्ने आत्मनि भोगस्तदन्त्यावयवि शरीरम्। शरीरसंयुक्तमतीन्द्रियं प्रतीतिसाधनमिन्द्रियम्। प्रतीयमानतया भोगसाधनं विषयः' इत्याचार्योक्त्या इदमेव वैशद्यमत्राभिमतं बोध्यम् ॥

मु—**स्नेहसमवायीति** । गुणत्वसाक्षाद्व्याप्यजातेरेव तद्व्याप्यात् पूर्वमुपस्थितिरिति शीतस्पर्शसांसिद्धिकद्रवत्वे उपेक्ष्य स्नेहघटनम्। **यद्यपि स्नेहत्वमिति** । स्नेहनिष्ठकार्यताघटने स्नेहनिष्ठां सत्त्वावच्छिन्नां तद्व्यक्तिसमवेतसत्सामान्यत्वावच्छिन्नां वा कार्यतामादाय सिद्धसाधनम्, अतः स्नेहत्वावच्छिन्नकार्यता प्रवेशनीया, तच्च न सम्भवतीति न जलत्वसिद्धिरिति भावः। **जन्यस्नेहाभावादिति** । ततश्च फलोपधायकत्वघटितसमवायिकारणत्वाभावात् तदवच्छेदकस्य तदन्यूनानतिरिक्तवृत्तेरपि तत्रासम्भवादिति भावः। **तस्य च नित्यस्येति** । यत्र नित्यत्वे सति यत्कार्यनिरूपितस्वरूपयोग्यत्वं तत्र तत्फलोपधायकत्वमिति व्याप्तेरित्यर्थः। तथाच परमाणुः नित्यत्वविशिष्ट

---

**सत्त्वावच्छिन्नामिति** । समवायेन सत्त्वावच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेन कारणतायाः सामान्यग्रन्थे उक्तत्वादिति भावः ॥

जन्यस्नेहस्वरूपयोग्यत्वाभाववान् स्नेहानुपधायकत्वात् घटवदित्यनुमानेन विशेषणवति सिद्ध्यन् विशिष्टाभावो विशेष्याभावे पर्यवस्यतीति स्वरूपयोग्यत्वरूपजलत्वस्याभावः सिद्ध्यति। व्यापकाभावस्य व्याप्याभावनियमाच्च नोक्तहेतावप्रयोजकशङ्केति बोधयितु मेव तस्य चेति व्याप्तिप्रदर्शनम्। 'जलत्वजातिसिद्धेः' इति पञ्चम्यन्तः पाठः ॥

**दि—जलस्यान्त्यावयवित्वानुपगमादिति**। जलीयशरीरलक्षणघटकम न्त्यावयवित्वं समवायेन द्रव्यशून्यत्वपर्यवसन्नं द्रव्यान्तरानुपधायकत्वमेव। जलत्वानुमितौ पक्षभूता च जन्यजलसमवायिकारणता स्वरूपयोग्यतारूपेति न कश्चित्सन्दर्भविरोधः। अत एव 'बृहज्जलजननयोग्यतासत्त्वात्' इति तरङ्गिण्युक्तिः। **स्नेहस्यैवेति**। न तु तादात्म्येन जलत्वावच्छिन्नस्येत्यवधारणार्थः। नचैवं कार्यमात्रस्य ससमवायिकारणकत्व नियमभङ्ग इति वाच्यम्, द्रव्यत्वाद्यवच्छिन्नकारणतामादायैव नियमोपपत्तेः। अत्र 'कारणत्वम्' इति स्थाने 'कारणतावच्छेदकत्वम्' इति, 'स्नेहत्वेन शीतस्पर्शत्वेन वा' इति स्थाने च 'स्नेहवत्त्वेन शीतस्पर्शवत्त्वेन वा' इति च पाठो दृश्यते। स तु न तरङ्गिणीकारसम्मतः, 'एतेन कारणतावच्छेदकीभूतम्' इत्यादिना दत्तोत्तरप्रायत्वेन शङ्काया एवानुत्थानात् ॥

**त—प्रयोजकत्वे मानाभावेनेति**। इदमुपलक्षणम्, जलसंयोगस्य धूम कारणतावच्छेदकत्वं न जलसंयोगत्वेन, किन्तु परमाण्वादिसंयोगव्यावृत्तवैजात्येनेति जलत्वस्य न कारणतावच्छेदकत्वमिति। **स्वानुमतमेवेति**। जलं प्रति तादात्म्येन जलत्वेन, समवायेन स्नेहत्वादिना वा हेतुत्वमित्यत्र विनिगमकासिद्धिः जलत्वस्यापि कल्पत्वा दिति स्वानुमतत्वोक्तिश्चिन्त्या ॥

**दि—द्रव्यत्वव्याप्याव्याप्यत्वमात्रमिति**। द्रव्यत्वव्याप्याव्याप्यत्वं नाम द्रव्यत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकस्वभिन्नजातित्वव्यापकस्वसमानाधिकरणभेद प्रतियोगितावच्छेदकताकत्वम्। स्वं लक्षणघटकत्वेनाभिमता जातिः। स्वभिन्नत्वानुपा दाने तादृशजातित्वविशिष्टे जलत्वे न जलत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वमिति

---

**प्रयोजकत्वे मानाभावेनेतीति**। ननु तथापीन्धनसंयुक्ते महति जले धूमकारणताव च्छेदकतया तादृशजलत्वजातेस्सिद्धौ तदवच्छिन्नजनकतावच्छेदकतया परमाण्वादिसाधारण्येन जलत्वजातिसिद्धिर्निष्प्रत्यूहेत्यत आह—**इदमुपलक्षणमिति** ॥



व्यापकत्वभङ्गः। जलान्यतमत्वमादायोक्तदोषवारणाय जातित्वनिवेशः। प्रकारान्तराण्य न्यतोऽवगन्तव्यानि। परे तु, द्रव्यविभाजकोपाधित्वमेव द्रव्यत्वसाक्षाद्व्याप्यत्वमित्याहुः ॥

**मु—अभास्वरशुक्लेतरेति**। 'वर्णः शुक्लः' इत्यत्र शुक्लपदस्य अभास्वरशुक्ला र्थकतया, एवकारघटितव्याख्यानेन वाक्यस्य सावधारणत्वबोधनेन च अभास्वरशुक्ले तररूपे जलावृत्तित्वस्य, अभास्वरशुक्ले च जलवृत्तित्वस्य लाभात् तुल्यवित्तिवेद्यतया जलत्वे तादृशरूपासामानाधिकरण्य,रूपसामानाधिकरण्ययोर्लाभो मूलादेव भवतीति ज्ञेयम्। अत्र शुक्लत्वानुपादाने पृथिवीत्वस्य सङ्ग्रहसम्भवादतिव्याप्तिः। अभास्वरशुक्लेतररसादिसामाना धिकरण्यमेव जलत्वस्येत्यसम्भवाद्रूपासमानाधिकरणेति। रूपवद्वृत्तीत्यत्र शुक्लत्वं विहाय रूपत्वेन रूपप्रवेशः रूपत्वोपस्थितेस्सन्निहिततरत्वात्, रूपत्वस्य गुणत्वसाक्षाद्व्याप्य त्वाद्वा सङ्गमनीयः। 'तेन स्फटिकादौ नातिव्याप्तिः' इति ग्रन्थः प्रक्षिप्तः। एवं 'तेन शर्करादौ' इत्यारभ्य 'तदर्थः' इत्यन्तोऽपि। **तिक्तवदवृत्तीति**। तिक्तपदं मधुरेतररसो पलक्षकम्। मधुरवत्त्वस्थाने रसवत्त्वघटितं लक्षणमपि सम्भवतीति बोध्यम्। **एवमिति**। अत्र 'एवं जन्यशीतस्पर्शजनकतावच्छेदकं जलत्वं, जन्यजलत्वं वा बोध्यम्' इति ताळी ग्रन्थपाठः। तत्र **जलत्वमिति**। यथा सुखादिसमवायिकारणतावच्छेदकतया सिद्धाया आत्मत्वजातेरीश्वरसाधारण्यम्, तथा अत्रापि जलत्वस्य परमाणुसाधारण्यमङ्गीक्रियते, ईश्वरे अदृष्टादिरूपकारणाभावप्रयोज्या सुखाद्यनुत्पत्तिरिव शीतस्पर्शादिरूपासमवायि कारणाभावप्रयोज्या जलपरमाणौ शीतस्पर्शानुत्पत्तिरित्याशयः। अतिप्रसक्तस्यानवच्छेदकत्व नियमभङ्गीकृत्याह—**जन्यजलत्वं वेति**। अत एव नवीना ईश्वरे आत्मत्वजातिं नाभ्युप गच्छन्ति इति व्याख्येयम्। **घृतादावपीति**। एतत्पूर्वं 'स्नेहत्त्वेति' इति पाठः ॥

**दि—तिक्तावृत्तीति**। 'तिक्तवदवृत्तीति' इति पाठः। **स्वसमवायिसंयोग सम्बन्धेनेति**। इदञ्च विशेषदर्शिनां नीलं जलमिति प्रमात्मिका प्रतीतिरस्तीति सिद्धान्तमनुरुध्य। उक्तञ्च 'एकाकारमपि लोहितः स्फटिक इत्यादि ज्ञानं संसर्ग भेदेन प्रमा अप्रमा चेति सर्वदर्शनसिद्धान्तः' इति विधिवादस्थचिन्तामणिप्रकाशे। कारणतावादे 'जम्बीरादिजलेषु तदुपष्टम्भकस्य जम्बीरादिभागस्यैवाम्लादिरसस्य पर म्परया प्रत्ययात्' इति लिखितवतां तर्कालङ्कारणामप्यस्मिन्नेव पक्षे निर्भरो ज्ञायते।

---

**एकाकारमिति**। समानविशेष्यप्रकारमित्यर्थः ॥

इत्थञ्च, 'इदन्तु बोध्यम्' इत्यादि तरङ्गिण्युक्तिश्चिन्त्या। स्वसमवायिसंयोगसम्बन्धेने त्यत्र न विषयत्वं तृतीयार्थः, किन्तु जनकत्वम्, तच्च दोषविधयेति व्याख्याने तरङ्गिणीकृन्मतानुसारेणापि दिनकरभट्टोक्तिस्सङ्गमयितुं शक्येत्यप्यवसेयम्। **तत्र मधुर स्वीकारस्यावश्यकत्वादिति।** तत्र जले। 'अशक्यतया' इति तरङ्गिणीकारसम्मतः पाठः। 'अनुभवविरोधेनेत्यादिः' इति च तत्पङ्क्तिः। एवं 'पृथिवीत्वेनेव' इति च। अस्मिन् पाठे, ननु जलेपि मधुरोपलब्धेरित्युक्तमसङ्गतम्, हरीतकीगतमाधुर्यस्यैव तत्रानुभवात् इत्याशङ्कापनोदकत्वं तत्रेत्यादिभागस्य बोध्यम्। प्रसिद्धपाठे तु तस्य नातीवोपयोग इति च वेदितव्यम्॥

त—**तस्यापि रसस्येति।** 'कस्यापि रसस्य' इति साधुः पाठः॥

दि—**समनियतयोग्यव्यक्तिवृत्तित्वादिति।** अत्र समनैयत्यं तादात्म्य सम्बन्धेन विवक्षितम्। तथा च स्वाश्रययोग्यसमनियतस्वभिन्नजात्याश्रययोग्यकत्वं तयो र्जात्योर्भेदग्रहप्रतिबन्धकदोष इति भावः। व्याप्यत्वव्यापकत्वयोरेकतरानिवेशे द्रव्यत्व पृथिवीत्वाद्योर्भेदग्रहानुपपत्तिर्बोध्या। **स्नेहप्रकर्षेणेतीति।** एतदनन्तरं 'प्रकृष्टस्नेहस्य दहनानुकूल्यमेव, अपकृष्टस्नेहस्यैव दहनप्रतिकूलत्वादिति भावः' इति ताळीग्रन्थपाठः। अत्र आनुकूल्यप्रातिकूल्ये कारणतावच्छेदकत्वनाशकतावच्छेदकत्वरूपे बोध्ये॥

मु—**गन्धाद्यव्यञ्जकत्वे सतीति।** गन्धादिप्रत्यक्षानुपधायकत्वे सती त्यर्थः। स्वीयरूपस्पर्शप्रत्यक्षानुपधायकः सक्तुरसाभिव्यञ्जकजलव्यक्तिविशेष एवात्र दृष्टान्तः। **द्रव्यत्वं देयमिति।** ननु कथं रसनादीनां द्रव्यत्वं सिद्ध्यतीति चेन्न, तस्य गुणादिरूपत्वे तदाश्रयद्रव्यकल्पनाया आवश्यकत्वात्तदपेक्षया तत्र द्रव्यत्वकल्पनाया एव लघीयस्त्वात्, रसादिप्रत्यक्षकारणसन्निकर्षस्यापि स्वाश्रयसंयुक्तसमवायापेक्षया संयुक्त समवायस्य लघुत्वात्तद्घटकसंयोगाश्रयतया द्रव्यत्वसिद्धिसम्भवाच्च। **सिन्धुरितीति।** 'सिन्धुहिमादिरिति' इति साधुः पाठः। **द्रवत्वप्रतिरोधादिति।** यद्यपि प्रतिरोध शब्दस्य प्रतिबन्धरूपार्थ एव भूयान् प्रयोगः, तथापि मञ्जूषादर्शितदिशा मुक्तावली स्वारस्यमनुसन्धायैव 'प्रतिरोधोऽप्रत्यक्षम्' इति तरङ्गिणीकृतां व्याख्यानम्। परन्तु

---

लघुत्वादिति। तथाच रसादिप्रत्यक्षं सन्निकर्षजन्यं प्रत्यक्षत्वाद्बुद्धिवदित्यनुमानेन लाघव ज्ञानसहकृतेन संयुक्तसमवायस्य सन्निकर्षत्वसिद्धिरिति भावः॥



'तेन परमाणुद्रवत्वप्रतिबन्धात् कार्ये हिमकरकादौ द्रवत्वानुत्पत्तिः' इति भाष्यसिद्धा न्तोलङ्घनं विश्वनाथपञ्चाननैः किमर्थमादृतमिति न विद्मः। समवायेन द्रवत्वं प्रति स्वसम वायिसमवेतत्वसम्बन्धेन करकारम्भकसंयोगत्वेन प्रतिबन्धकत्वकल्पनेनैव सर्वानुभवविरोध परिहाराल्लाघवाच्च मतमेतदेव ज्यायः। करकादिद्रवत्वाप्रत्यक्षतावादिनस्तु द्रवत्वनिष्ठ लौकिकविषयता प्रतिबध्यतावच्छेदकसम्बन्धः, स्वजन्यकरकादिसमवेतत्वं प्रतिबन्धक तावच्छेदकसम्बन्ध इति गौरवम्। एवमनन्तद्रवत्वतद्ध्वंसादिकल्पनञ्चेति वेदितव्यम्। द्रवत्वनिष्ठलौकिकविषयतानिरूपितविषयतासम्बन्धेन प्रत्यक्षं प्रति जन्यतासम्बन्धेन कर काद्यारम्भकादृष्टं प्रतिबन्धकमिति केचिदाहुः। तच्चिन्त्यम्, आश्रयानवगाहिनः इदं द्रवत्वमित्याकारककरकादिद्रवत्वप्रत्यक्षस्यैतावताप्यवारणात्। किञ्च करकादौ द्रवत्वोत्प त्त्यङ्गीकारे स्नेहस्यापि तत्र सत्त्वात् करकादिना सक्त्वादिसङ्ग्रहापत्तिः, स्नेहसहित द्रवत्वस्यैव तत्र हेतुत्वात्। कस्यचित् प्रतिबन्धकत्वकल्पने च गौरवमिति बोध्यम्। **अभिभवादिति।** प्रतिबन्धादित्यर्थः। उष्णस्पर्शनिष्ठलौकिकविषयतासम्ब न्धेन स्पार्शनं प्रति स्वाश्रयसंयुक्तसमवेतत्वसम्बन्धेन उष्णान्यस्पर्शस्य प्रतिबन्धकत्वं बोध्यम्। इदञ्च सजातीयसंवलनं दोष इत्यभिप्रायेण। सजातीयग्रहणमेव[*] दोष इति मते स्वाश्रयत्वस्थाने स्वविषयस्पर्शाश्रयत्वं दोषतावच्छेदकसम्बन्धकोटौ निवेशनीयम्। अत्र प्रथमपक्षे तप्तजलान्तर्वर्तिदहनोष्णस्पर्शे दर्शितसम्बन्धेन जलीयशीतस्पर्शसत्त्वात् तत्साक्षात्कारानुपपत्तेर्वारणमनुभवबलात्तस्य दोषत्वाकल्पनादिति विभावनीयम्। **रत्न किरणादाविति।** चकारः प्रक्षिप्तः। रत्नादावित्यनुक्त्वा एवमुक्तिः रत्नादेस्तेजस्त्व ख्यापनाय। **चक्षुरादाविति।** आदिना प्रभापरिग्रहः। अथ रत्नकिरणादावपि स्पर्शोऽनुद्भूत एवास्तु, किन्तत्राभिभवकल्पनयेति चेन्न, धर्मिणोपि स्पार्शनाभावप्रसङ्गात्। सुवर्णादिद्रवत्वस्पार्शनोपपत्तये धर्मिण्युद्भूतस्पर्शाङ्गीकारस्यावश्यकत्वाच्च॥

दि—**इत्यपिना सूचितमिति।** एतत्स्थाने 'इत्यपि सूचितम्' इति, मुक्तावल्याञ्च 'धर्मिणोपि' इति स्थाने 'वैश्वानरादेः' इति च तरङ्गिणीकृत्सम्मतः पाठ इति भाति॥

---

तेन द्रव्यारम्भकसङ्घाताख्यपरमाणुसंयोगविशेषेण॥

दोषत्वाकल्पनादिति। तथाच विशेषरूपेणैव प्रतिबध्यप्रतिबन्धकभाव इति भावः॥

मु—त्रह्वेस्त्विति। सुवर्णादे रूपमप्यभिभूतमिति तुशब्दो व्यञ्जयति। **शुक्लत्वमभिभूतमित्यन्य इति**। प्रतिबध्यप्रतिबन्धकतावच्छेदकसम्बन्धकोटौ आश्रयान्तर घटनेन गौरवमस्वरसबीजम् 'अन्ये' इत्यनेन सूचितमिति केचित्। तन्न, यतः वैश्वानररूपे रक्तत्वप्रत्यक्षकाले कुत्रापि शुक्लत्वप्रत्यक्षं न स्यात्, शुक्लत्वजातेरेकत्वात्, तत्र स्वविषयाश्रयरूपसमवायिसंयुक्तसमवेतसमवेतत्वसम्बन्धेन रक्तत्वप्रत्यक्षस्य सत्त्वात्। अतः शुक्लत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन प्रत्यक्षं प्रति रक्तत्वाश्रयप्रत्यक्षस्यैव स्वविषयाश्रयसंयुक्तसमवेतत्वसम्बन्धेन प्रतिबन्धकत्वस्य वक्तव्यतया शुक्लत्वविषयतायाः प्रतिबध्यतावच्छेदकसम्बन्धकोटौ, रक्तत्वविषयतायाः प्रतिबन्धकतावच्छेदककोटौ च प्रवेशाधिक्यमस्वरसबीजं बोध्यम्। एतत्पक्षे इदन्त्वादिना शुक्लत्वप्रत्यक्षस्य, अयन्न रक्त इति प्रत्यक्षस्य चापत्तिरपि सुकरेत्यप्यवसेयम्। ननु शुक्लस्यैवाग्रह इति पक्षे तद्गत भास्वरत्वजातिप्रत्यक्षं नोपपद्यत इति चेन्न, वायोस्तदीयसंख्यादेश्चाप्रत्यक्षत्वेपि यथा तदीयस्पर्शस्य प्रत्यक्षं तथात्राप्युपगमसम्भवात्। तमःपदार्थघटकं रूपनिष्ठानभिभूतत्वञ्च साक्षात्कारविशिष्टत्वम्। वैशिष्ट्यञ्च स्वीयभास्वरत्वनिष्ठप्रकारतानिरूपितविशेष्यतानाश्रयरूपान्तरासंवलितत्वादिरूपमिति न वैश्वानरसत्त्वे तमःप्रतीत्यापत्तिः। सुवर्णाद्युपष्टम्भक पार्थिवभागगतरूपे च भास्वरत्वप्रतीत्यभावात्तद्रूपेण सुवर्णादिरूपस्याभिभवान्न सुवर्णादि सत्त्वे तमःप्रतीत्यनुपपत्तिश्चेत्यवसेयम्। **पृथिव्यवृत्तीत्यादि**। 'अत्र द्रव्यत्वसाक्षाद्व्याप्य' इति प्रक्षिप्तम्॥

दि—'पृथिव्यवृत्तिवायुत्वादिकमादाय वायौ' इति भागः प्रक्षिप्तः॥

त—**अत्र जातिपदस्येति**। 'नैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यपृथिवीत्वरूप' इति पाठोऽत्रानुसृतः। यद्वा, 'द्रव्यत्वसाक्षाद्व्याप्येत्युक्तम्' इति स्थाने 'पृथिवीत्वेत्युक्तम्' इति पठनीयम्॥

मु—**इन्द्रियमितीति**। एतदनन्तरं 'ननु' इत्यारभ्य 'चेत्' इत्यन्तो ग्रन्थः प्रक्षिप्तः। एवमुत्तरत्र 'अत्र दृष्टान्तेऽव्याप्तिवारणाय' इति भागोपि प्रक्षिप्तः॥

दि—**हेत्वन्तरसूचनायेति**। नच परकीयस्पर्शाव्यञ्जकत्वस्य मषीनील व्यञ्जकत्वस्य च जले पूर्वं दिनकरभट्टेन दर्शितत्वात् प्रथमहेतोर्जले व्यभिचार इति वाच्यम्,



इष्टत्वात्, तत्रैवात्राप्यस्य दोषस्य 'अथवा' इति पक्षान्तरावलम्बनबीजत्वसम्भवात्। **परकीयरूपादीति**। आदिना संख्यादिपरिग्रहः। **चक्षुर्विषयासम्बद्धमिति**। विषय ग्रहणे चक्षुषो न व्यापारावश्यकतेति भावः। **रसनादिवदिति**। इदञ्चापाद्यापादकयो र्व्याप्तिग्रहोपयोगिदृष्टान्तप्रदर्शनम्। 'नचैवम्' इत्यापाद्यव्यतिरेकनिश्चयकथनम्। **यदीति**। अत्र 'यदि प्राप्यकारि स्यात्तदा रसनादिवदधिष्ठानासम्बद्धन्न गृह्णीयात्' इति पाठः॥

त—**इति सामान्यमुखव्याप्त्यभिप्रायेणेति**। यत् स्वसम्बन्धिनि फल जनकं तन्न स्वाधिकपरिमाणवन्निष्ठकार्यजनकमिति यथाश्रुतलभ्यसामान्यमुखव्याप्तौ व्यापक कोटौ कार्यजनकत्वांशप्रवेशो नातिप्रयोजनम्, स्वसम्बन्धिनि स्वाधिकपरिमाणवत्त्वाभावश्च स्वस्मिन् तदपेक्षया अत्यन्तन्यूनपरिमाणवत्त्वाभावे पर्यवस्यतीति भावः। नखरञ्जनिका नखेन सम्बध्य तत्र छेदनरूपं फलं जनयति, नखापेक्षया च नात्यन्तन्यूनपरिमाणवतीति दृष्टान्तसङ्गतिः। 'न खलु' इति वाक्येनैव व्याप्त्यनुग्राहकस्तर्कोपि दर्शित इत्याह— **तथाचेति**॥

दि—**अङ्गीक्रियत इति**। एतदनन्तरं 'गोळकस्य चन्द्रादिप्राप्त्यसम्भवात्' इति पाठो न ताळीग्रन्थे दृश्यते। **प्रदीपप्रभाया इवोपपत्तेरिति**। प्रदीपप्रभायाः पृथ्वग्रत्वं प्रत्यक्षसिद्धम्, चक्षुषस्तत्त्वे तु प्रमाणाभाव इत्यत आह—**स्वाधिकेति**। ननु त्वचा गजादिपृथुतरग्रहणं नाङ्गीक्रियते, किन्तु तत्रावयवस्पार्शनं ततश्चावयव्यनुमान मिति न व्यभिचार इत्यत आह—**तादृशेति**॥

त—**उदयाचलेति**। 'उदयाचलारोहणकिरणप्रसारयोः' इति पाठः। **न शङ्कास्पदमपीति**। उक्तानुमानमत्रयोजकम्, अतः प्राप्यकारित्वानुरोधेनैव तेज स्त्वानुमानं युक्तम्, रसनादीनामधिष्ठानातिरिक्तत्वञ्चाधिष्ठानजिह्वादिसत्त्वेपि केषाञ्चि द्रासनानुदयादेवेति शङ्कासङ्गतेश्चिन्त्यमेतत्। **सौरालोकादिरिति**। 'परमाण्वादिः' इति प्रक्षिप्तम्॥

मु—**आद्यं परकीयेतीति**। पृथिवीजलत्र्यणुकयोर्व्यभिचारवारणाय द्वितीयं देयमेव॥

त—**पक्षतावच्छेदकत्वेपि न क्षतिरिति**। क्षतिमाशङ्क्य परिहरति— **शोभन इत्यादिना**। **दीपादिरपीतीति**। एतदनन्तरं 'सामानाधिकरण्येन सिद्धि

सत्त्वान्न सुवर्णस्य' इति पाठः। सुवर्णत्वावच्छेदेन तेजस्त्वसिद्धेरेवाभिमततया उद्देश्यासिद्धिरूपा क्षतिर्विर्तत एवेति बोध्यम्। **वाच्यत्वाप्रसिद्धेरिति।** 'बाच्यत्वासिद्धेः' इति पाठः। **इत्यभिप्रायेणैतदभिहितमिति।** व्यतिरेकसहचारेणाप्यन्वयव्याप्तिरेव गृह्यत इत्याचार्यमतानुसारेण वेदमुक्तम् ॥

**मु—असति प्रतिबन्धक इति।** अस्य परिष्कारो मञ्जूषातोऽवगन्तव्यः ॥

**दि—संयोगे सतीत्यन्तमिति।** एतद्विशेषणाभावे अनुच्छिद्यमानत्वमपि नावश्यकं प्रयोजनाभावात्, उच्छित्तेर्नाशात्मकत्वे सुवर्णद्रवत्वे अनुच्छिद्यमानत्वासम्भवाच्च तस्य जन्यत्वेन नाशावश्यम्भावात्। तथाच तेजस्त्वसाधकानुमानमेवोच्छिद्येत। इत्थञ्चात्यन्तपदस्यापि प्रयोजनं स्फुटयितुमग्निसंयोगानाश्येति द्रवत्वविशेषणं दत्तमिति बोध्यम्। **द्रवत्वाधिकरणत्वादित्यर्थ इति।** नचैवं कदाप्यद्रुतसुवर्णव्यक्तिषु कथं तेजस्त्वसिद्धिरिति वाच्यम्, तादृशद्रवत्वस्वरूपयोग्यत्वस्यैव हेतुत्वात् पक्षतावच्छेदकत्वाच्च ॥

**त—गगनादिसामानाधिकरण्येनेति।** 'गगनादिसाधारण्येन' इति साधुः पाठः। **नत्वितीति।** एतदनन्तरम् 'अनधिकरणत्वादितीत्यस्य पूर्वतनेन अर्थ इत्यनेनान्वयः' इति पाठः। **अवयवनाशजन्यत्वस्येति।** अत्र 'आश्रयनाशाजन्यत्वस्य' इति पाठः समुचितः ॥

**दि—तेन जलपरमाणाविति।** यद्यपि स्थूलजलेपि हेतुसत्त्वात् परमाणुपर्यन्तानुधावनं व्यर्थम्, तथापि दोषस्यास्य पूर्वहेतुसाधारण्याय तदुपयोगात्। **सजातीयसम्बन्धस्यैवेति।** स्वसजातीयगुणवदुपष्टब्धसमवेतत्वस्यैवेत्यर्थः। **भ्रमत्वायोगादिति।** उत्तरकालं बाधबुध्यदर्शनादिति भावः। नन्वत्यन्तानलसंयोगे सत्यनुच्छिद्यमानद्रवत्वप्रत्यक्षेण भवत्येव बाधबुद्धिरित्यत आह—**द्रुतन्द्रुततरमिति।** ननु तथापि द्रुतद्रव्यस्य पार्थिवत्वनिश्चयः कुत इत्यत आह—**पृथिवीत्वस्येति। रूपनाश इति।** यद्यत्यन्तानलसंयोगानाश्यमत्युत्कृष्टं द्रवत्वमनुभवसिद्धम्, तदा तस्याप्युपलक्षणमिदम्। **वदन्तीति।** 'अग्नेः' इत्यादिश्रुतिश्च'स्तुतिपरेति भावः ॥

**त—अस्वरससूचनाय स चेति।** सुवर्णत्वस्य द्रव्यत्वव्याप्यव्याप्यजातित्वेन परमाणावनङ्गीकारात्तत्र पीतपरावृत्त्यापत्तेरुपलक्षणमिदमिति ज्ञेयम्। एवं सम्भवति



स्वार्थपरत्वे श्रुतेरर्थवादमात्रत्वकल्पनमप्यरुचिबीजमवसेयम् ॥

**दि—वायौ प्रमाणमिति।** वायौ प्रमाणस्य मूल एव दर्शयिष्यमाणत्वाद्भावप्रधाननिर्देशोऽयं वायाविति। 'वायुत्वे' इति वा पाठः। 'तथाच विजातीय' इति ग्रन्थेन मुक्तावल्यामपि 'तज्जनकतावच्छेदकं वायुत्वम्' इत्युक्त्या वायुत्वे प्रमाणस्यैव दर्शितत्वात् ॥

**त—युक्तमुत्पश्याम इति।** 'वर्णश्शुक्लः' इति मूलानुसाराय यथा अभास्वरेत्यादिः गुरुतरोपि परिष्कारो मुक्तावल्यां दर्शितः, तथात्रापि कर्तव्य इत्यभिप्रायो दिनकरभट्टस्य। 'एतेन वायवीयः' इत्याद्युक्तिश्च वायुत्वसाधन एवात्यन्तमुपयोगिनी, वैजात्यावच्छिन्नकार्यतानिरूपितकारणताया एव पक्षत्वसम्भवादिति च बोध्यम् ॥

**दि—स्पर्शादीनि लिङ्गानीति।** अत्र लिङ्गानीत्यनन्तरं 'पक्षः' इति अन्यद्वा तदर्थकं पदं किञ्चित् लुप्तम्, विग्रहमात्रप्रदर्शनस्यात्यन्तमनुपयोगादिति भाति। अधिकं मञ्जूषायां स्पष्टम्। **योऽयं रूपवदिति।** यद्यप्यत्र दर्शितवैजात्यस्यैव पक्षतावच्छेदकत्वं सम्भवति, तथापि प्राचीनन्यायप्रयोगमनुसृत्यैवमुक्तम्। 'योऽयम्' इति प्रसिद्धिमाह। **शब्दसन्तान इति।** पर्णाद्यवच्छिन्नस्य प्रथमशब्दस्याप्रत्यक्षत्वात् पक्षप्रसिद्धिसम्पादनाय सन्तानग्रहणम्। एवञ्च साध्यघटकजन्यत्वं जन्य,तज्जन्यादिसाधारणप्रयोज्यत्वं बोध्यम्। विभागाप्रयोज्यत्वस्य हेतुकोटौ निवेशाद्विभागजशब्दजन्ये शब्देपि न व्यभिचारः ॥

**त—स्पर्शवत्त्वविशेषणमनर्थकमिति।** शब्दजनको योऽभिघाताख्यः संयोगः, तत्र वेगस्येव स्पर्शस्यापि सहकारित्वमुदयनाचार्यैः स्पष्टमभिहितमिति 'वेगादीनामभिघाताद्यसमवायिकारणत्वम्' इति सन्दर्भे विशदीकृतमित्युक्तिरियं चिन्त्या। **अस्वरसादाह—वेगवदितीति।** 'इति' इत्यस्यानन्तरं 'वेगपदञ्चात्र द्रव्यान्तरक्रियाजनकवेगपरम्, तेन तेजस्यपि वेगसत्त्वेन तदुपादानेपि नार्थान्तरापत्तिरिति। तत्र, गगनादावेतादृशवेगाभावादेव पूर्वोक्तार्थान्तरतावारणेन स्पर्शवत्त्वोपादानवैयर्थ्यात्' इति तरङ्गिणीपाठः। **नत्वस्मदादिद्वृतेति।** प्रयत्नैकसाध्ये *तिर्यक्प्रसारितहस्तादिधरणे पक्षिधृतौ च व्यभिचारः सम्भवत्येवेति ध्येयम् ॥

---

*प्रथमशब्दस्याप्रत्यक्षत्वादिति। कर्णशष्कुल्यवच्छिन्नसन्निकर्षाभावादिति भावः ॥

**दि—धृत्यादौ व्यभिचारेति** । अत्रादिपदग्राह्यमन्वेष्टव्यम् । आत्मपदस्य जीवपरतां कल्पयित्वा परमेश्वरकर्तृकपृथिव्यादिधृतिर्वा आदिपदार्थः । 'अत्र यो विशेषः' इत्यादिः समासघटकत्वगिति भागस्य, देहव्यापीति भागस्य चावतारिकेति मत्वाह— **अत्र त्वगिति** । असमस्तं त्वक् इन्द्रियम् इति पदद्वयमिति मुक्तावलीस्वरसादव गम्यते । **त्वचि स्थितमिन्द्रियमित्यर्थ इति** । 'न मुख्यतो वायवीयमिन्द्रियं त्वगित्युच्यते, किन्तु लक्षणया तत्स्थमिन्द्रियं त्वगिति व्यवह्रियते लोकैः' इति किरणावल्युक्त्या त्वक्पदमपीन्द्रियविशेषे स्वारसिकमेवेति बोध्यम् । **त्वगिन्द्रियलक्षणमाहेत्यादि** । अत्रेदं बोध्यम्—देहव्यापित्वे सति इन्द्रियत्वरूपं लक्षणं कारिकयैव प्रतिपादितम् । मुक्तावल्यां स्पर्शग्राहकेति पूरणं त्वगिन्द्रिये प्रमाणोपन्यासायेत्यपि शक्यते वक्तुमिति ॥

**त—तथापि त्वक्संयोगादाविति** । आदिना स्पार्शनजनकस्योद्भूतस्पर्शस्य त्वक्संयुक्तसमवायादेश्च संग्रहः । **इन्द्रियपदमितीति** । अत्रेन्द्रियत्वं संयोगाश्रयत्वरूपम् । इतरांशस्य वैयर्थ्यात् , स्पार्शनत्वावच्छिन्नजन्यतानिवेशेनैव द्रव्यान्तराणां वारणसम्भवात् । वस्तुतस्तु, चक्षुरादावतिव्याप्तिवारणाय कार्यत्वानवच्छिन्नत्वमेव जन्यतायां निवेश्यते । इत्थञ्च स्पार्शनं प्रति विषयविधया कारणेषु घटादिषु तं प्रति समवायिकारणे आत्मनि चातिव्याप्तिवारणाय शब्देतरोद्भूतेत्यादीन्द्रियत्वमेव निवेशनीयमिति मुक्तावलीकाराभिप्रायो वेदितव्यः ॥

**मु—चतुर्थी विधा प्राणादिरिति** । 'चतुर्थः प्राणादिः' इत्यपपाठः । प्राणस्याकरे पृथगुक्तिर्व्यजनपवनादिविषयान्तरादस्य वैलक्षण्यसूचनाय । वैलक्षण्यञ्च सर्वोपभोगनिमित्तत्वमेव । अत एव मृतशरीरावच्छेदेन नोपभोगः । **हृदादीति** । अत्र 'हृदादि' इति विशेषणं दिनकरपक्षे प्रक्षिप्तम् ॥

**आकाशकालदिशामेकैकव्यक्तित्वादिति** । एकव्यक्तिकत्वादिति पाठमनुसृत्य तरङ्गिण्यां विचारः कृतः । परन्तु, 'एकैकव्यक्तित्वात्' इत्येव साम्प्रदायिकः पाठः । अनुसरति चायम् 'आकाशकालदिशामेकैकत्वात्' इति भाष्यम् । एकैका

---

**इति भागस्येति** । ननु विषयो मत इत्यन्तस्येत्यर्थः, तथासति वायावित्येव व्याख्येयत्वादिति भावः ॥



स्वस्वसजातीयद्वितीयरहिता स्वस्वभिन्नत्वव्यापक,स्वस्वसजातीयत्वाभाविका व्यक्तिः स्वरूपं तस्याभावस्तत्त्वं तस्मादित्यर्थः । सत्तादिकमादायाप्रसिद्धिपरिहाराय स्वसजातीयत्वमत्र स्ववृत्तिद्रव्यविभाजकोपाधिरूपं बोध्यम् । एतादृशैकत्वस्यैव पर्यवसितं लघुरूपं तरङ्गिण्यां स्वप्रतियोगिवृत्तीत्यादिना दर्शितम् ॥

**त—स्वरूपासिद्धिप्रसङ्गादिति** । नचानेकांशस्य स्वरूपासिद्धिवारकत्वेपि व्यभिचारावारकत्वाद्धेतुरयं व्याप्यत्वासिद्ध इति वाच्यम्, अखण्डाभावसम्पादकत्वेन तस्य सार्थक्याद्व्याप्यत्वासिद्ध्यसम्भवादित्याशयात् ॥

**दि—सावधारणं ज्ञेयमिति** । 'असति बाधके सर्वं वाक्यं सावधारणम्' इति न्यायादिति भावः । आकाशविशेषगुणत्वरूपोद्देश्यतावच्छेदकव्यापकत्वस्य शब्दत्वे विधेयतावच्छेदके, विधेये शब्दे वा भानादेवाभिमतसिद्ध्या 'एवकारसहितम्' इति तरङ्गिण्युक्तिश्चिन्त्या इति केचित् । वस्तुतस्तु, 'ज्ञाताज्ञातयोर्ज्ञातस्यैवोद्देश्यत्वं परस्य विधेयत्वम्' इति नियमादत्र शब्दस्यैवोद्देश्यत्वात्, क्लिष्टयोजनातात्पर्यग्राहकाभावाच्च एवकाराध्याहार एव श्रेयानिति बोध्यम् ॥

**मु—विशेषगुणान्तरव्यवच्छेदायेति** । यद्येतदेव प्रयोजनम्, तर्हि वायोः स्पर्शेपि विशेषगुणत्वं कुतो न दर्शितमिति शङ्काव्युदासाय प्रयोजनान्तरं दर्शयति—**एतेनेति** ॥

**दि—अयोग्येतीति** । 'चक्षुर्ग्रहणायोग्येति' इति पाठः ॥

**त—सत्यन्तार्थ इति** । सत्यन्तेत्यंशः प्रक्षिप्तः । **साच उद्भूतरूपमिति** । तथाच उद्भूतरूपाद्यन्यतमभिन्नत्वमेव चक्षुर्ग्रहणायोग्यत्वमित्याशयः । अथ सामानाधिकरण्यसम्बन्धेनोद्भूतरूपशून्यत्वमेव तदस्तु, तत एव घटतत्क्रियादौ व्यभिचारवारणादिति चेन्न, घटादिस्पर्शे दृष्टान्ते तदसम्भवेन दृष्टान्तासिद्धेः । वस्तुतस्तु, वायोरूष्मणश्च स्पर्शस्य दृष्टान्तत्वसम्भवात्तथा परिष्कारोपि सम्भवतीति ज्ञेयम् ॥

**दि—आत्मनि व्यभिचारवारणायेति** । वाय्वादौ लौकिकत्वघटितेन्द्रियग्राह्यत्वेनैव वारणाद्बहिःपदसार्थक्यायात्मपर्यन्तानुधावनम् । **रसत्वादाविति** । 'रसत्वादिव्यावृत्तये' इति क्वचित् पाठः । **जातिमदितीति** । जातिमत्त्वं समवेतवत्त्वमात्रम् , इतरांशस्य वैयर्थ्यादिति केचित् । वस्तुतस्तु, जातिमत्त्वं समवायानुयोगित्वं सत्तावत्त्वं वा लाघवादि

त्यवसेयम्। केचित्तु जातावेव विशेषणद्वयमित्याहुः। तन्मते स्पार्शनमात्रविषयसंयोगादि व्यक्तिमादाय घटविशेषादौ व्यभिचारवारणाय जातिमत्त्वं नित्यत्वरूपं बोध्यम्। द्रव्यस्य बहिरिन्द्रियजन्यप्रत्यक्षं उद्भूतरूपं विना न सम्भवतीति बहिरिन्द्रियग्राह्यद्रव्यस्य चक्षुर्ग्रहणयोग्यता नियता। एवं कर्मणोपि। सामान्यादीनाञ्च न जातिमत्त्वमिति हेतूच्छित्तिरूपो विपक्षे बाधकस्तर्कोऽत्रानुसन्धेयः॥

त—**व्यभिचारानवकाशादिति**। एतदनन्तरं 'सार्थकत्वाच्च' इत्यन्तो ग्रन्थः प्रक्षिप्तः। अन्यथेत्यनन्तरञ्च 'चक्षुर्ग्रहणायोग्ये बहिरिन्द्रियग्राह्ये' इत्यादिपाठः॥

मु—**स्पर्शवद्विशेषगुण इति**। स्पर्शवद्विशेषगुणानां रूपादीनां पाकजत्वकारणगुणपूर्वकत्वाप्रत्यक्षत्वान्यतमवत्त्वनियमादलापि हेतूच्छित्तिरेव तर्को बोध्यः॥

त—**अकारणगुणपूर्वकप्रत्यक्षविषयत्वादित्यस्येति**। अकारणगुणपूर्वकं प्रत्यक्षं यस्य इति बहुव्रीह्यादरणादुक्तार्थलाभः। नच प्रत्यक्षपदस्य प्रत्यक्षविषये निरूढलक्षणया तद्घटकप्रत्यक्षे अकारणगुणपूर्वकस्यान्वयोऽस्त्विति वाच्यम्, अभेदसम्बन्धेन पदार्थैकदेशेऽन्वयस्याव्युत्पन्नत्वात्॥

मु—**पाकजरूपादाविति**। इदञ्चावयविन्यपि पाकाङ्गीकर्तृनैयायिकमतेन। मतान्तरे तु, प्रत्यक्षत्वपदेनैवास्य वारणं बोध्यम्। अत एवैतद्वारकसत्यन्तं प्रशस्तपादभाष्ये नोपात्तम्। **अकारणगुणपूर्वकेतीति**। अकारणगुणपूर्वकत्वञ्च स्वसमवायिसमवेतत्वसम्बन्धावच्छिन्नस्वनिष्ठकारणताकत्वसम्बन्धेन गुणविशिष्टान्यत्वपर्यवसन्नस्वाश्रयसमवायिकारणवृत्तिगुणासमवायिकारणकत्वाभावरूपम्। **शब्दो न दिक्कालेति**। शब्द इति प्रक्षिप्तम्। **विशेषगुणत्वादिति**। विशेषगुणत्वं परिगणितसामान्यगुणभिन्नत्वमनुगतमिति केचित्। रूपादिचतुष्टयशब्दान्यतमत्वमिति परे। उभयमपि न सम्यक्, ईदृशविशेषगुणस्य शब्दे उभयवादिसिद्धत्वेनाग्रे तत्साधनप्रयासवैफल्यापत्तेः। किन्तु, प्रतिपाद्यतासम्बन्धेन विशेषगुणशब्दवत्त्वमेव तत्। तच्च शब्दे साधनीयमिति नानुपपत्तिः। **नात्मविशेषगुण इति**। सम्प्रदायसिद्धस्तु पाठः 'नात्मगुणः' इत्येव, भाष्येपि तथैव दर्शनात्॥

दि—**इत्यनुमानस्यैवेति**। पूर्वोक्तगुणत्वसाधकहेतोरेव विशेषगुणत्वसाधकत्वसम्भवात्ततो नातिविलक्षणहेत्वन्तरप्रदर्शनक्लेशः किमर्थ इति चिन्तनीयम्। वस्तुतस्तु,

---

आहुरिति। अनेन सूचितास्वरसबीजं तरङ्गिण्यां स्पष्टम्॥



विशेषगुणत्वेन प्रसिद्धरूप,बुद्ध्यादिसाधारण्यमपि हेतोस्सम्पादयितुं शक्यत इति विशेषबोधनायैवानुमानान्तरप्रदर्शनम्। किरणावलीप्रदर्शितस्य 'प्रतिनियतेन्द्रियग्राह्यत्वात्' इति हेतोरेवायं परिष्कार इति च बोध्यम्। **गुणत्वव्याप्येति**। गुणवृत्तीत्यर्थः। गुणत्वं सत्ता चात्र हेतुतया नोपादातुं शक्यत इति ज्ञापनाय तथोक्तिः॥

त—**योग्यतानिवेशे प्रयोजनाभावादिति**। नच प्रथमसत्यन्तं जातिमत्येव विशेषणम्, एवञ्च दर्शितदिशा सार्थक एव तन्निवेश इति वाच्यम्, प्रभायास्त्र्यणुकस्य च संख्यादौ व्यभिचारात्। **स्वभिन्नविजातीयेति**। अत्र 'भिन्न' इति प्रक्षिप्तम्। उद्भूतस्पर्शाद्यन्यतमत्वमित्यनन्तरम् 'एवं रूपत्वादीन्द्रिययोग्यतायाः' इति प्रक्षिप्तम्। **तत्तद्व्यक्तित्वेनैव योग्यताघटकत्वेति**। दर्शितेन्द्रियविशिष्टान्यत्वरूपभेदस्यापि तद्व्यक्तित्वेन हेतुघटकत्वसम्भवाल्लाघवानपायोक्तिश्चिन्त्या। वस्तुतस्तु, स्वात्मकेन्द्रियजन्यग्रहविषयत्वादेस्सम्बन्धत्वे विवादसम्भवात्तत्त्याग इत्यवसेयम्॥

मु—**वायौ कारणगुणेति**। श्रोत्रसमीपे पृथिवीजलतेजसामभावेपि शब्दस्यानुभूयमानत्वाद्वायुपर्यन्तानुधावनम्। **अयावद्द्रव्यभावित्वेनेति**। अनेन हेत्वन्तरं प्रदर्शितमिति केचिन्मन्यन्ते। तदसत्, पूर्वोक्तबाधानुद्धारे हेत्वन्तरस्यापि सत्प्रतिपक्षतया साधकत्वासम्भवात्। अतो विपक्षे बाधकस्तर्क एवानेन सूच्यते। यदि शब्दो वायुविशेषगुणस्स्यात्, तर्हि आश्रयनाशजन्यनाशप्रतियोगी स्यादिति तर्काकारो बोध्यः। एतत्तर्कोत्थापकव्याप्तावपि यद्यप्रयोजकशङ्का स्यात्, तदा पाकाजन्यस्पर्शवद्विशेषगुणनाशं प्रति आश्रयनाशस्य कारणतां प्रतिबोध्य सा परिहरणीया। विशेषगुणत्वञ्चात्र लाघवान्मनोवृत्तितानवच्छेदकधर्मसमवायिगुणत्वं बोध्यम्। नाश्यतावच्छेदकघटकगुणे शब्दभिन्नत्वनिवेशश्च विशेषणविशेष्यभावे विनिगमनाविरहाधीननानाकारणताकल्पनगौरवपराहत इति ध्येयम्। कालविधया घटादिनाशजनकताकत्वस्य शब्दनाशेपि सत्त्वादिष्टापत्तिवारणाय जनकतावच्छेदकसम्बन्धविशेषज्ञापनायापाद्यकोटावाश्रयघटनम्। अयावद्द्रव्यभावित्वं तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वमिति केचित्। तन्न, कस्यचिद्वायुस्पर्शस्याश्रयनाशेन तृतीयक्षणे नाशसम्भवात्तत्र व्यभिचारात्। अयावद्द्रव्यभावित्वेनेत्युपलक्षणम्।

---

नोपादातुं शक्यत इति। तयोर्द्वीन्द्रियग्रहणयोग्यताराहित्याभावादिति भावः॥
सम्बन्धविशेषेति। स च स्वप्रतियोगिसमवेतत्वरूपः॥

शब्दस्य वायवीयत्वे तद्ग्राहकश्रोत्रस्यापि वायवीयत्वमापद्येत, स्वग्राह्यजातीयविशेषगुणवत्त्वस्य बहिरिन्द्रियेषु घ्राणादिषु दर्शनात्। इत्थञ्च वायवीयमिन्द्रियं विषयद्वयग्राहि भवेत्। अदृष्टविशेषादेवमपि स्यादिति चेत्, घ्राणादीनामपि वायवीयत्वमेवास्तु। अत इन्द्रियाणि विजातीयानीति ॥

दि—**स्पर्शवद्वायुगुणत्वस्य तत्रेति** । 'स्पर्शवद्वायुविशेषगुणत्वस्यात्र' इति पाठः । **चाक्षुषाधिकरणत्वेनेति** । 'चाक्षुषेऽधिकरणत्वेन' इति पाठः । **आलोक एवेति** । अथ इहालोक इति प्रतीतौ किं भासत इति चेदालोकावयव एवेति गृहाण ॥

मु—**कर्णशष्कुलीभेदादिति** । 'कर्णशष्कुल्या भेदात्' इति पाठः । एतदनुरोधेन दिनकरीयेपि 'कर्णशष्कुल्या भेदादिति' इति प्रतीकधारणं बोध्यम्॥

दि—**शब्दनिमित्तेति** । जगन्निमित्तेत्यर्थः । तथैव वा पाठः । अत एवाग्रे तत्समवायिकारणत्वमित्यनुक्त्वा शब्दसमवायिकारणत्वमित्युक्तिः । **इत्याहुरिति**। अदृष्टादीनाम्मानसे कारणत्वाकल्पनेनोपपत्तौ न प्रतिबन्धकताकल्पनगौरवम्, 'अशब्दमस्पर्शम्' इत्यादिश्रुतिविरोधश्चेत्यस्वरसबीजमवसेयम् । **स्वतन्त्रास्त्वित्ति** । मृदङ्गादावनेकत्र शब्दकारणताकल्पने गौरवाल्लाघवादाकाशसिद्धिरित्यत आह—**प्राचीनैरिति**। नन्वावश्यकेन पाणिमृदङ्गसंयोगादीनां कारणत्वेनैव निर्वाहान्न मृदङ्गत्वादिना कारणत्वान्तरमङ्गीकुर्म इति चेदाह—**मृदङ्गे शब्द इति** । नन्वग्रे वृक्षः कपिसंयोगीत्यादाववच्छेदकत्वस्य विषयत्वं प्रामाणिकमित्यत आह—**अन्यथेति** । तथाच "गुणगुणिनोश्शब्दमृदङ्गयोस्सम्बन्धस्य समवायत्वान्मृदङ्गे शब्दसमवायिकारणता न निवारयितुं शक्यत इति भावः। वदन्तीत्यनेनास्वरसः, अयावद्द्रव्यभावित्वेनापाकजत्वेन च शब्दस्य पृथिवीविशेषगुणत्वाभावात् । एवं जलतेजोवायूनामपि । एवमाश्रयादन्यत्रानुपलब्धिप्रसङ्गः, अन्यगुणस्यान्यत्र ग्रहणाभावात्। समुपलभ्यते च शब्दो मृदङ्गादेरन्यत्र कर्णशष्कुलीदेशे। नच श्रोत्रस्यात्मत्वात्तत्संयुक्ते मृदङ्गादौ स्थित एव स गृह्यत इति वाच्यम्, सन्निकृष्टविप्रकृष्टयोरविशेषेण ग्रहणप्रसङ्गात्, शब्ददिक्सन्देहस्य कदाचिदनुभूयमानस्यानुपपत्तिप्रसङ्गाच्च । विस्तरोऽन्यत्रानुसन्धेयः ॥

**कार्यत्वावच्छिन्नकार्यतेति** । अत्र कार्यत्वावच्छिन्नेत्यंशः प्रक्षिप्त इति भाति, अंशान्तरयोरिव स्वयं प्रयोजनानभिधानात्, रामरुद्रभट्टैरव्याख्यातत्वाच्च। यदि



तत्पाठेप्याग्रहः, तदा अन्यूनानतिप्रसक्तकार्यतावच्छेदकबोधनाय तदंशघटनमिति वक्तव्यम्, व्यावर्त्याभावेन लक्षणे तन्निवेशासम्भवात् । यद्वा, कालिकेन तत्तत्कार्यं प्रति तत्तदुपाधीनामप्यधिकरणतया निमित्तत्वमस्तीत्यग्रे दर्शयिष्यमाणमते तत्तदुपाधावतिव्याप्तिवारणाय तदावश्यकताऽवसेया । नच यद्विशेषयोरिति न्यायेन कार्यत्वावच्छिन्नं प्रत्युपाधीनामपि सामान्यरूपेण हेतुत्वादतिव्याप्तिस्तदवस्थेति वाच्यम्, अनुगतानतिप्रसक्तसामान्यधर्मस्यागुरोरभावात् । वस्तुतस्त्वेतन्मते कार्यत्वावच्छिन्ननिरूपितनिमित्तत्वं तन्नियतपूर्ववर्तित्वमेव, नतु स्वरूपयोग्यत्वम्, तच्च न कस्याप्युपाधेरिति बोध्यम् ॥

त—**घटादावतिव्याप्त्यापत्तेरिति**। अथ सिद्धान्ते कालिकसम्बन्धावच्छिन्नाधिकरणत्वस्य महाकालमात्रवृत्तिताया 'इदमुपलक्षणम्' इति पङ्क्तिव्याख्यानावसरे कण्ठतो वक्ष्यमाणतया कथमियमतिव्याप्तिरिति चेन्न, सिद्धान्ते महाकालस्य लाघवात्तद्व्यक्तित्वेनैव कारणतया लक्षणस्यासम्भवग्रस्ततापरिहाराय मतान्तरालम्बनस्यावश्यकत्वात्। तादात्म्यसम्बन्धेनेत्यर्थकत्वे तु लक्षणस्य स्वमतानुसारित्वसम्भवेनातिव्याप्त्यादिदोषाभावात् । अधिकरणतयेत्यत्र प्रयोज्यत्वं तृतीयार्थः, ततश्च तादात्म्यसम्बन्धुलाभ इति बोध्यम् । दिनकरीये 'अधिकरणविधया' इत्यत्र 'अधिकरणतया' इति केरलीयताळीग्रन्थपाठः। **विप्रतिपन्नैवेति** । एतदनन्तरं 'कपालादिदृष्टान्ते असम्भवदुक्तिका च । उक्तनियमोप्यप्रयोजकत्वेन विप्रतिपन्न एव । यदुत्पत्त्याधारत्वेन प्रतिपन्नं यत्, तत्तत्कारणमित्येवन्नियमस्यैवोपगमसम्भवादुत्पत्तिनिवेशे प्रयोजनाभावश्च । तथाप्युत्पत्तेराकसिकत्वापत्तिवारणायैव नियमे उत्पत्तेः प्रवेशिततया दोषाभाव एव । परन्तु, उत्पत्तिर्यदि घटादिरूपा, तदा सा कपालादिनियम्या, अतो नाकस्मिकत्वापत्तिः । 'यदि तस्याः' इति साधुः पाठः । **असम्भवदुक्तिका चेति** । ननु उत्पत्तिर्नानुयोगिक्षणरूपा, किन्तु प्रतियोगिघटरूपा इति नोक्तदोष इत्यतो दूषणान्तरमाह—**उक्तनियमोपीति**। **एवञ्च कालविशेषनियतेति**। एवञ्च दर्शितव्याप्त्योरप्रयोजकत्वे च ॥

दि—तद्धेतुत्वव्याप्यत्वादित्यनन्तरम् 'एवञ्च' इति क्वचित्पाठो दृश्यते । पञ्चम्यन्तद्वयान्वयक्लेशात्स त्याज्यः। **स्वाश्रयतपनसंयोगिसंयोग एवेति** । इदमुपलक्षणम्। इदानीं रूपमित्यादौ तादृशसंयोगिसंयोगिसमवायस्सम्बन्धः। एवमन्यत्राप्यूह्यम्॥

---

तावदन्यतमत्वादिना अनुगमसम्भवादाह—**अगुरोरिति**। दर्शिताक्षेपस्यैव नावतार इत्याह—**वस्तुतस्त्विति** ॥

सु—'जन्यानां जनकः' इत्यनेनैव परापरत्वधीहेतुत्वसिद्धया पौनरुक्त्य शङ्कानिरासायाह—**असाधारणं निमित्तमिति** ॥

त—**उचितमिति भात्र इति।** इदमुपलक्षणम्। पृथिव्यां पाकेन स्पर्श नाशकाले स्पर्शान्तरोत्पत्तिक्षणे चानुभूयमानपरत्वाद्यनुपपत्तिरपि बोध्या ॥

दि—कालस्यैकत्वादिष्टापत्तिवारणायाह—**समयभेदव्यवहार इति।** आ पाद्यापादकयोस्सामानाधिकरण्यायाह—**विभिन्नव्यवहारेति।** तयोर्व्याप्तिं दर्शयति—**एकस्मिन्निति।** 'यदि सूर्यपरिस्पन्दादिकं विषयीकरोति' इत्यनेन दर्शितमतानुसारेणाह—**इदमुपलक्षणमिति।** एतेन प्रभोक्तं दूषणमपास्तम्। **सिद्धान्तसिद्धतयेति।** उत्तर देशसंयोगकाल एव विभागसविकल्पकोत्पत्त्या तदानीं विषयस्य विभागस्य सत्त्वा वश्यकत्वादिति भावः। **नाशकत्वाभिप्रायेणेति।** विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणतां, विषयस्य सर्वत्र कार्यसहभावेन हेतुतां वाऽनङ्गीकृत्यायमभिप्रायस्सङ्ग मनीयः ॥

सु—**महाप्रलय इति।** अत्र 'क्षणादि' इत्यपपाठः, तत्र दिनादिव्यव हारस्य कैश्चिदप्यस्वीकारेणादिपदग्राह्याभावात् ॥

त—**तदुत्पत्त्यापत्तेरिति।** उत्तरसंयोगान्तरोत्पत्त्यापत्तेरित्यर्थः। पूर्वसंयोग ध्वंसस्य सत्त्वादिति भावः। ननु पूर्वसंयोगनाशस्य उत्पत्तिमत्त्वसम्बन्धेनैव हेतुत्वमिति नोक्तापत्तिरित्यत आह—**संयोगेति।** तथाच भावकार्याणां सासमवायिकारणकत्व नियमादुत्तरसंयोगस्य कर्मजन्यत्वमिति भावः ॥

दि—**क्षणावृत्तित्वव्याप्येति।** अत्र सामानाधिकरण्यमात्रनिवेशे घट द्वितीयादिक्षणवृत्तिध्वंसप्रतियोगिनि घटोत्पत्तेः प्राङ्नष्टपटादौ घटाधिकरणवृत्तित्वस्य सत्त्वात् द्वितीयादिक्षणसम्बन्धस्याप्युत्पत्तित्वापत्तिः। व्याप्यत्वोक्तौ च घटप्रथमक्षणानन्तरनष्टपटा दावपि तादृशप्रतियोगिता सम्भवति, तत्र च न तादृशक्षणावृत्तित्वमिति व्याप्तिभङ्गान्न दोषः। **स्ववृत्तिध्वंसप्रतियोगिकालेति।** तदधिकरणकालध्वंसानधिकरणकालवृत्तित्व स्योपलक्षणमिदमिति केचित्। तत्र, महाप्रलयाधिकरणसमयध्वंसस्याप्रसिद्धेः। **स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकेति।** घटाद्यात्मकघटप्रागभावध्वंसादीनामपि याव दृध्वंसान्तर्गततया तद्विशिष्टसमयाप्रसिद्धिपरिहाराय यावद्ध्वंसविशेषणमिदम्। दत्ते



चास्मिन् घटाद्यात्मकध्वंसानां महाप्रलयसमयरूपस्ववृत्तित्वाभावान्नाप्रसिद्धिः ॥

त—**तादृशसमयश्चरमध्वंस एवेति।** चरमेतरध्वंसानां स्वपदेन धरणे यत्किञ्चिज्जन्यभावात्मकतत्प्रागभावध्वंसस्य महाप्रलयात्मकध्वंसस्य च स्ववृत्तितया तत्प्रति योगिप्रतियोगिकयावद्ध्वंसविशिष्टसमयाप्रसिद्धिरिति भावः। इदमत्रावसेयम्—यद्यत्र चरमध्वंसमात्रात्मकक्षणोपाधित्रदर्शनमभिमतमभविष्यत्, तदा प्रागभावानधिकरणसमयः ध्वंसप्रतियोग्यनधिकरणसमय इति वा लघुरूपं प्रादर्शयिष्यत्, अतः सर्गसाधारणक्षणो पाधिस्वरूपमेवात्र दर्शितम्। तथाच घटादीनामप्यन्त्यक्षणावच्छेदेन तादृशयावद्ध्वंस विशिष्टतया तानादाय सर्गकालेपि क्षणव्यवहारोपपत्तिः। ध्वंसत्वञ्च भावासाधारणमिति भावात्मकयत्किञ्चिद्ध्वंसस्य घटाद्यन्त्यक्षणावच्छेदेन घटादावसत्त्वेपि न तादृशयावद्ध्वंस विशिष्टसमयाप्रसिद्धिः। दिनादेरपि स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकयत्किञ्चिद्ध्वंसविशिष्ट त्वादतिव्याप्तिरतो यावदिति। स्ववृत्तित्वं ध्वंसविशिष्टत्वञ्च कालिकेन बोध्यम्, तेन स्वोत्तरोत्पन्नध्वंसानामपि व्यभिचारित्वसम्बन्धेन स्ववृत्तितया सर्गकाले न तादृशसमया प्रसिद्धिः, नवा घटादावनन्त्यक्षणेष्वपि व्यभिचारित्वसम्बन्धेन यावद्ध्वंसविशिष्टत्वात् क्षणोपाधित्वानुपपत्तिः। इह हेतावुपाधिरिति प्रत्ययाद्व्यभिचारित्वस्य सम्बन्धता निर पवादा। सर्गकालीनक्षणमात्रस्यैव स्वोत्तरोत्पन्नपदार्थात्यन्ताभाववत्त्वादव्याप्तिवारणाय ध्वंसत्वेन प्रथमध्वंसस्य निवेशः। स्वपदेन घटस्य धरणे स्ववृत्तिध्वंसः पटध्वंसः तत्प्र तियोगिप्रतियोगिकः पूर्वनष्टतत्संयोगतत्प्रागभावादिरपीति यावत्तद्विशिष्टसमयाप्रसिद्धिरिति चरमध्वंसपदम्। स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकत्वस्थाने लाघवात् स्ववृत्तित्वं वा देयम्। सर्वमिदं सामान्यलक्षणाग्रन्थस्थदीधितितद्व्याख्यासु स्पष्टमिति ॥

भा—**दूरान्तिकेति।** 'दूरान्तिकत्व' इति पाठः। अत एव मुक्तावल्या मादिशब्दं विहाय 'दूरत्वमन्तिकत्वञ्च' इति व्याख्यानम्। **एका नित्या दिगुच्यत इति।** नित्या इति स्थाने 'विभ्वी' इति क्वचित् पाठः। लिङ्गविपरिणामेन 'एको नित्यः' इति पदद्वयं 'जगतामाश्रयः' इत्यनन्तरं कालग्रन्थे योज्यम्। एवं 'जन्यानां जनिका, जगतामाश्रयः' इति दिग्ग्रन्थेपि। इत्थञ्च दिग्विशेषणतासम्बन्धावच्छिन्न कार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणत्वं दिशो लक्षणमप्युक्तं भवति। अत्र

---

प्रागभावानङ्गीकारेप्याह—ध्वंसप्रतियोग्यनधिकरणेति ॥

दृष्टादीनां कालिकेनेव विनिगमकाभावाद्दिग्विशेषणतयापि हेतुत्वमित्यदृष्टादावतिव्याप्ति वारणाय तादात्म्यावच्छिन्नत्वप्रवेशः । **उपाधिभेदादिति** । नच प्राच्यादिदिशां भेद एवास्त्विति वाच्यम् , एकस्मिन्नेव युगपद्भिन्नवस्त्वपेक्षया पूर्वापरादिप्रत्ययस्यानुपपत्तेः । उक्तञ्च न्यायकन्दल्यां, 'दिग्भेदे हि यत्पूर्वं न तत्र पश्चिमप्रत्ययो भवेत् । सर्वे दिक्सम्बन्धस्तस्यास्तीति चेत्, तर्हि सर्वार्थेषु सर्वापेक्षया सर्वेषां सर्वे प्रत्ययाः प्रसज्येरन्' इति ॥

त—**पुरुषावधिकेति** । 'तत्पुरुषावधिक' इति पाठः । एवं 'तस्य' इति स्थाने 'तत्पुरुषस्य' इत्यपि ॥

दि—**संयुक्तसंयोगपर्याप्तेति** । काशीपश्चिममथुरानिष्ठसंयुक्तसंयोगपर्याप्ता या बहुतरा संख्या, तस्याः काशीनिष्ठसंयुक्तसंयोगवृत्तित्वानपायात् तदपेक्षया च प्रयाग निष्ठसंयुक्तसंयोगपर्याप्तसंख्याया व्याप्यत्वात् काशीतः प्राच्यां प्रयाग इति व्यवहारा पत्तिः, अतः पर्याप्तत्वनिवेशः । तत्पर्याप्तत्वञ्च तदघटकसंयोगावृत्तित्वरूपम् । तादृश यावत्संयोगवृत्तित्वमपि न निवेश्यम्, प्रयोजनाभावात् । संख्याव्याप्यत्वञ्च लाघवात्तादृशसं ख्यावधिकाधिकपर्याख्यजातिमत्त्वमेव गुणात्मकसंख्यानिवेशपक्ष इति बोध्यम् । व्याप्यसंख्या वत्त्वमात्रोक्तौ काशीनिष्ठोदयगिरिसंयुक्तसंयोगपर्याप्तसंख्यायास्सहस्रत्वे प्रयागनिष्ठतादृश संयोगसंख्याया वस्तुतस्सहस्राधिकत्वेपि तद्घटककाशीप्रतीचीस्थकतिपयमूर्तसंयोगवृत्ति संख्यायाश्शतत्वादेर्व्याप्यत्वात् काशीतः प्राच्यां प्रयाग इति प्रयोगापत्तिः । तत्पर्याप्त्य धिकरणत्वञ्च तादृशसंख्याशून्यावृत्तिस्वघटकसंयोगत्वकत्वमवसेयम् । **यन्मूर्तं तत्प्राचीति** । तादृशपरम्पराघटकभिन्नं तादृशपरम्पराघटितपरम्परान्तरघटकं यन्मूर्तं तत् प्रतीची । उदयाचलात्समदूरवस्तुद्वयमादाय एकस्मात् प्रतीच्यामपरमिति व्यवहारवारणाय घटि तान्तम् । यद्वा, तन्निष्ठास्ताचलसंयुक्तसंयोगपरम्पराघटकं यन्मूर्तं तत् प्रतीची । वदन्ती त्यस्वरसः सूचितः । तद्बीजन्तु, काशीतः पूर्वदक्षिणस्थायां गयायां काशीतः प्राच्या मिति व्यवहारानुपपत्तिः, ऋजुरेखास्थकाशीनिष्ठोदयगिरिसंयुक्तसंयोगपरम्पराघटकमूर्तेन गयायाः सम्बन्धाभावात् । वक्ररेखास्थपरम्परामादाय प्राच्यामिति व्यवहारसङ्गमने

---

**गुणात्मकेति** । अपेक्षाबुध्यात्मकेत्यर्थः । गुणात्मकेति विशेषणेन तत्र जातिस्वीकारे बाधकाभावः सूचितः । **तरङ्गिण्यां विच्छिन्नेति** । 'विभिन्न' इति साधुः पाठः । एवं प्रतियोगि तानवच्छेदकेत्यत्र नञघटितश्च । लाघवादाह—**यद्वेति** ॥



प्रतीचीस्थेपि प्राच्यामिति व्यवहारापत्तिः । सिद्धान्ते काशीनिष्ठोदयगिरिसंयुक्तसंयोगपर्याप्त संख्यायां तादृशसंख्यानिष्ठन्यूनवृत्तित्वानिरूपकत्वदानेन वक्ररेखास्थसंयोगसंख्यामादाय तादृशव्यवहारवारणं सम्भवतीति बोध्यम् । प्रथममस्यामञ्चति सवितेत्यादिरूपा प्राच्यादि पदव्युत्पत्तिरिति किरणावल्यादितोऽवगम्यते ॥

मु—**सुखदुःखादीति** । नित्यसाधारणस्य न कार्यतावच्छेदकत्वमित्यभ्युप गम्य ज्ञानपरित्यागः कृतः । तस्य तत्त्वे विरोधाभावमभिसन्धाय ज्ञानादीनामप्यादि पदग्राह्यत्वमुक्तं दिनकरभट्टेन । विरोधाभावश्च, कारणताशरीरे कार्यतावच्छेदकविशिष्ट यावद्व्यक्त्यघटनेन, स्वावच्छिन्नाव्यवहितपूर्वक्षणावच्छेदेन स्वावच्छिन्नव्यापकतावच्छेदक धर्मकत्वस्यैव कार्यतारूपत्वादित्यवधेयम् । यद्वा, भाट्टमते ज्ञानस्यातीन्द्रियतया पक्षसिद्धा वनुमानान्तरापेक्षामनुचिन्त्य ज्ञानपरित्यागः । **सुखदुःखाद्युत्पत्तिरिति** । 'सुखाद्युत्पत्तिः' इति ताळीग्रन्थपाठः । 'नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भाव इत्यस्य' इति पाठः ॥

दि—**अनिष्टसाधनत्वादीति** । आदिपदं प्रक्षिप्तम् । **विहितनिषिद्धकर्मणामिति** । तत्कारणीभूतकृतीनामित्यर्थः, अन्यथा समवायसम्बन्धेनेत्यस्यासङ्गत्यापत्तेः । **द्रव्यत्वेनेति** । एतदनन्तरं 'तत्तद्व्यक्तिसमवेतं प्रति तत्तद्व्यक्तित्वेनैव वा' इति पाठः । **जातेः समवायिकारणेति** । अत्र समवायिकारणेति प्रक्षिप्तम् ॥

त—**नोक्तनियमस्य भङ्ग इति** । 'नोक्तनियमस्याभङ्गरूपानुपपत्तिः' इति पाठः ॥

दि—**मनसि ज्ञानोत्पत्तिवारणायेति** । नन्वीश्वरस्येव मनसोपि शरीरा भावादेव नेयमापत्तिरिति चेन्न, मनसि ज्ञानमापादयतां तस्य शरीराङ्गीकारस्यापि सम्भवात् । आत्ममनस्संयोगस्यानुयोगितासम्बन्धेन कारणत्वाङ्गीकारान्नोक्तापत्तिरिति न शङ्क्यम् , तस्यासमवायिकारणत्वान्यथानुपपत्त्या समवायस्यैव कारणतावच्छेदक सम्बन्धत्वात् । आत्ममनस्संयोगस्यासमवायिकारणत्वान्यथानुपपत्त्यैवात्मत्वेन सुखत्वादिना हेतुहेतुमद्भावसिद्धिरिति केचित् । तन्न, आत्मत्वावच्छिन्नाघटितजातिविशेषणैव तस्य

---

नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वेपि मुक्तावल्यां ज्ञानपरित्यागस्य बीजं दर्शयति —**यद्वा भाट्टमत इति** ॥

**असमवायिकारणत्वान्यथानुपपत्त्यैवेति** । असमवायिकारणतावच्छेदकरूपस्य सम वायिकारणतावच्छेदकधर्मघटितत्वनियमादित्यभिमानः ॥

कारणत्वं व्यवस्थितमित्युक्तान्यथानुपपत्तेरसम्भवात् । **ज्ञानत्वाद्यवच्छिन्नमिति** । अत्रादि पदं प्रक्षिप्तम् ॥

**त--तदनभ्युपगमे क्षतिविरहादिति** । दधित्वादावुक्तनियमभङ्गस्याप्युप लक्षणमिदम् । नच दधित्वावच्छिन्नं प्रति तादात्म्येन दधित्वेन हेतुत्वान्न व्यभिचार इति वाच्यम्, दधिद्व्यणुकसमवायिकारणे दधित्वानङ्गीकाराद्व्यभिचारेण तथा कार्य कारणभावाभावात् । **ईश्वरशरीरे अहं स्यामित्युपासनयेति** । ईश्वरकृत्यधीनचेष्टाव तया लोकोत्तरं यच्छरीरं तदवच्छिन्नभोगवानहं भवेयमितीच्छाधीनयोपासनयेत्यर्थः । **मूले इन्द्रियाणामित्यादि** । 'इन्द्रियाद्यधिष्ठातेति मूले' इति चारुतरः पाठः । एवमेतद्वाक्या न्तेपि 'अतस्तन्निष्ठज्ञानवत्त्वसम्पादकतार्थकतां दर्शयति—मुक्तावल्यामिन्द्रियाणामित्या दिना' इति ॥

**दि—प्रमाणपरतयेति** । मूलस्य स्वरूपलक्षणमात्रपरत्वे 'यद्यपि' इत्याद्य ग्रिमशङ्काया नोत्थितिरिति भावः । इन्द्रियाद्यधिष्ठातेत्यनेन दिदर्शयिषितस्य इन्द्रि याणि शरीरञ्च ज्ञात्रधिष्ठितमिति प्रतिज्ञावाक्यस्यापि 'करणं हि' इत्यादिवाक्यलभ्यो दाहरणवाक्यर्वत् न्यायान्तर्गतत्वात् प्रमाणपरत्वोपपत्तिः । यद्वा, इन्द्रियाद्यधिष्ठातेत्यस्य इन्द्रियादिजन्यक्रियासहकारीति यथाश्रुतार्थमुल्लङ्घ्य तत्सूचितज्ञात्रधिष्ठितत्वरूपप्रकृतसाध्य साधनोपयोगिजनकत्वावच्छेदकत्वान्यतरसम्बन्धेन ज्ञानवत्त्वरूपहेतुपर्यवसायितया व्याख्या नात् प्रमाणपरत्वं बोध्यम् ॥

**त—तदीयशरीरस्य हेतुताया आवश्यकतयेति** । नच विशिष्टबुद्धि विशेषणज्ञानयोरनुमितिपरामर्शादीनाञ्चावच्छेदकत्वघटितसामानाधिकरण्येन हेतुत्वमस्तु, किं शरीरस्य हेतुतयेति वाच्यम्, निर्विकल्पकस्यावच्छेदकनियमार्थं तदावश्यकत्वात् । कार्यतावच्छेदकन्तु तदीयज्ञानत्वं, तदात्मविशेषगुणत्वं वेत्यन्यदेतत् ॥

**गु—परम्परयेति** । अनेनात्मन्यनुमानान्तरमपि सूचितम् । तथाहि, पर म्परया इन्द्रियादिनिष्ठं चैतन्यं साक्षात्सम्बन्धेन क्वचिदाश्रितम् आश्रितत्वात् रूप

---

नियमाभ्युपगमे बाधकं दर्शयति—दधित्वादाविति ॥

प्रमाणपदस्य मुख्यार्थकत्वनिर्वाहायाह—यद्वेति । **निर्विकल्पकस्येति** । तथाच घटादौ निर्विकल्पकोत्पादवारणाय तथा कार्यकारणभाव आवश्यक इति भावः ॥

**परम्परयेति** । परम्परायाः प्रायशो वृत्तिनियमकत्वाभावात् हेतूच्छित्तिरूपतर्कोऽत्रावसेयः ॥



-वेदिति । स च साक्षात्सम्बन्धश्चैतन्यस्य गुणत्वात् समवाय एव । **फलानुपधानं दृष्ट मिति** । 'फलोपधानं न दृष्टम्' इति पाठः ॥

**दि—ज्ञानवत्त्वमिति** । अप्रतिपत्तिरत्र व्याख्याबीजम् । यद्वा, चेतनचैतन्ययो रभेदवादिमतनिरासायाह—**ज्ञानवत्त्वमिति** । ज्ञानाधिकरणत्वमित्यर्थः । 'अचेतनं चेतनाधिष्ठिततया कार्यं करोति' इति पाठः ॥

**त—खण्डशरीरसमकालेति** । अथ खण्डशरीरोत्पत्तेः पूर्वक्षणे शरीररूप कारणविरहात् कथं तत्समकाले ज्ञानोत्पत्तिरिति चेन्न, अवच्छेदकतासम्बन्धेन ज्ञानं प्रति चेष्टावत एव तादात्म्येन हेतुत्वात् दर्शितपूर्वक्षणे शरीरावयवसत्त्वेन बाधका भावात् । स्पष्टञ्चेदं व्याप्तिग्रहं प्रति व्यभिचारज्ञानाभावस्य कारणताविचारे मथुरा नाथीये । नच तर्हि व्यभिचाराभाव एवेति वाच्यम्, कार्यतावच्छेदकसम्बन्धेन कार्या धिकरणे दर्शितखण्डशरीरे तत्पूर्वक्षणावच्छेदेन तादात्म्येन चेष्टावतोऽसत्त्वात् । यद्यपि शरीरस्योक्तदिशा कारणत्वासम्भवेपि समवायेन ज्ञानं प्रति स्वावच्छिन्नभोगजनकादृष्ट वत्त्वसम्बन्धेन कारणत्वस्य सम्भवादवच्छेदकत्वोपादाने प्रयोजनाभावः, तथाप्यात्मन्येव सन्दिहानस्यादृष्टाप्रसिद्ध्या तादृशकारणताग्रहो न सम्भवतीत्याशयः । इदमुपलक्षणम् । जनकत्वमत्र न कालोपाधिविधया चक्षुरादिनिष्ठं विवक्षितम्, तस्य घटादिसाधारण्यात्, विशिष्य इन्द्रियादिग्रहणवैयर्थ्यापातात् । किन्तु विषयतासम्बन्धावच्छिन्नजन्यतानिरू पितम्, अवच्छेदकतासम्बन्धावच्छिन्नजन्यतानिरूपितञ्चेति वक्तव्यम् । इत्थञ्च तादृश जनकताद्वयान्यतरसम्बन्धेन चेतनजन्यज्ञानवत्त्वं साध्यं भवेत् । तदपेक्षया विषयतासम्ब न्धावच्छिन्नजन्यतानिरूपितजनकत्वावच्छेदकत्वान्यतरसम्बन्धेन साध्यतायां लाघवमित्य वच्छेदकतासम्बन्धेन वेत्युक्तिरिति । एतेन खण्डशरीरस्य न स्वसमकालोत्पन्नज्ञानावच्छे दकत्वमङ्गीक्रियते, किन्तु तदवयवानामेवेति न व्यभिचारः । यद्वा, खण्डशरीरोत्पत्ति क्षणे न ज्ञानोत्पत्तिः, अपि तु तद्द्वितीयक्षण एव, क्षणविलम्बस्यापरिज्ञेयत्वात् । तथाच शरीरस्य जनकत्वे न किमपि बाधकमित्यवच्छेदकतासम्बन्धानुधावनं निष्प्रयो जनमिति पूर्वपक्षो निरस्त इति । इदन्तु तत्त्वम्—मैत्रीयचक्षुस्संयोगादिना मैत्रशरीरे ज्ञानोत्पत्तौ तस्यावच्छेदकतासम्बन्धेन चैत्रशरीरेऽप्यापत्तिवारणायावच्छेदकतासम्बन्धेन तदीयज्ञानादिकं प्रति तेन सम्बन्धेन तदीयात्ममनस्संयोगस्यापि वैजात्येन हेतुत्वमावश्यकम् ।

एवञ्च शरीरस्य न कारणत्वं कल्पनीयमिति। अधिकमूहनीयम्। **अचेतनत्वे सतीति।** अत्र स्वरूपासिद्धिशङ्का 'शरीरस्य न चैतन्यम्' इत्यादिमूल एव निराकरिष्यते। 'यत् यत्करणं यत्फलोपहितकारणम्, तत् सकर्तृकम्' इति पाठः। यत्करणमित्यस्य व्याख्या यत्फलोपहितकारणमिति। एवमग्रेपि। अप्रसिद्धेरित्यनन्तरं 'हेतोः' इत्यप पाठः। 'साध्यस्य' इति साधुः पाठः, तस्यैव कर्तृत्वघटितत्वात्। **अयं परिष्कार इति।** तथाच दर्शितव्यभिचारवारणाय हेतावचेतनत्वं देयम्, गौरवपरिहाराय च साध्य घटककर्तृत्वस्थाने चेतनत्वं देयमिति भावः। **यद्यदचेतनमिति।** नच पर्णक्रियादि कारिवायुसंयोगादौ व्यभिचार इति वाच्यम्, वाय्वभिघाताद्यजन्यत्वस्यापि हेतौ विव क्षितत्वात् ॥

भा—**मृतेषु व्यभिचारत इति।** व्यभिचारतः अभावात्। अत्रेदमव सेयम्—'मृते चासम्भवात्' इत्येतत्प्रकरणस्थं भाष्यम्। तच्च कन्दलीकारैराचार्यैश्चेत्थं व्याख्यातम्। तथाहि, मृते चासम्भवादित्यनेन अयावद्द्रव्यभावित्वमुक्तम्। यदि हि शरीरविशेषगुणश्चैतन्यं भवेत्, रूपादिवद्यावद्द्रव्यभावि भवेत्। नच तत्तथेति तन्न शरीरविशेषगुण इति। पाकजरूपादौ व्यभिचारान्नोक्तनियमसम्भव इत्यभिप्रेत्य तद्रीतिः परित्यक्ता मुक्तावलीकृता। परन्तु, पाकेन तत्तद्रूपव्यक्तिनाशेपि क्षणादूर्ध्वं न पृथिव्या अपि नीरूपताद्यवस्थेति नियमसत्त्वादाचार्यादिव्याख्याया अप्युपपत्तिर्बोध्या। अत एव नीलादिवदित्यनुक्त्वा रूपादिवदित्युक्तिः। एवमपि नियमस्यास्याप्रयोजकतामाशङ्क्य स्मरणानुपपत्तिरूपतर्क एवान्ते दर्शित आचार्यैरिति ॥

दि—नन्वात्मनोऽचेतनत्वाङ्गीकारस्सिद्धान्तविरुद्धत्वादुभयमतेपि क्षतिमावह तीति 'का क्षतिः' इत्युक्तिरुक्त्याक्षेपमवतारिकया परिहरति —**नैयायिकमत इति। ज्ञानाभावेनेत्यादि।** 'ज्ञानाभावेपि ज्ञानाधिकरणत्वरूपचैतन्यम्, तथा ममापि मते मृतशरीरस्य चैतन्यम्' इत्युभयत्र नञ्घटितः पाठः ताळीग्रन्थेषु दृश्यते। स साधुतरः, अग्रे तदभाव इत्यस्य अधिकरणत्वमघटयित्वा व्याख्यानात्। तथाच चैतन्यस्याव्याप्य वृत्तितया कदाचितदभावोपीष्ट एव । चेतनभिन्नत्वरूपाचेतनत्वापत्तिस्तूभयमतेपि नास्तीति भावः। अथ सुषुप्तावुभयवादिसिद्धायामेवात्मनि ज्ञानाभावः कुतोन दर्शित

अधिकमिति। खण्डशरीरे व्यभिचारवारणप्रकारः पूर्वोक्तदिशा अवसेयः॥



इति चेन्न, ज्ञानतत्प्रागभावान्यतरवत्त्वमेव चैतन्यमित्युक्तावपि न निस्तार इति सूचना र्थत्वात् ॥

मु—**अनुभावकाभावादिति।** 'अनुभवाभावात्' इति पाठो युक्तः। **उद्बोध काभावादिति।** नच चरमफलेनान्यविषयकसंस्कारनाशादेव स्मरणानुत्पत्तिसम्भवे उद्बो धकाभावस्य प्रयोजकत्वोक्तिरनुचितेति वाच्यम्, जन्मान्तरीयजात्यादेः कैश्चित्स्मरणस्य पुराणेषु प्रतिपादनात्, लोकेपि कदाचिदनुभवाच्च संस्कारानुवृत्तेरवश्यकल्पनीयत्वात्॥

दि—**इत्थश्चेतीति।** एतदनन्तरम् 'इत्थञ्च' इत्यपि पाठः॥

मु—**संस्कारस्यानादितयेति।** अनादित्वमत्र न प्रागभावाप्रतियोगित्वम्, अनुभवजन्यत्वात्। किन्तु, स्वसमानाधिकरणसंस्कारपूर्वकसंस्कारसामान्यकत्वम्। स्व समानाधिकरणेति निवेशात् प्रत्यात्मं संस्कारानादित्वसिद्धिः। आत्मनोऽनादित्वन्तु प्राग भावाप्रतियोगित्वमेव। प्रयोगश्चात्र, आत्मा अनादिः अनादिपरम्पराधिकरणत्वात्, यन्नैवं तन्नैवं यथा घटादिरिति। 'संसारस्यानादितया' इति केचित् पठन्ति। तदर्थः प्रभायां स्पष्टः। अनुसरति चायं पाठः 'वीतरागजन्मादर्शनात्' इति सूत्रम् ॥

भा—**तथात्वश्चेदिति।** अग्रे मनसः पृथगुक्त्या उपघातासम्भवेन च इन्द्रियशब्दस्यात्र बाह्येन्द्रियमात्रपरत्वं बोध्यम्। यद्वा, मनोघटितेन्द्रियसङ्घातस्यैवात्म त्वमभिमतम्। अत एव स्वप्ने इन्द्रियान्तरव्यापाराभावेपि न ज्ञानानुपपत्तिः॥

दि—**अस्त्वितीति।** कर्तरि कथं करणत्वसम्भव इत्याशङ्कानिरासाय करणत्वं निरुच्य चक्षुरादौ दर्शयति—**करणत्वश्चेति। न तु फलोपहितत्वं** न तु फलाव्यवहितपूर्वक्षणवृत्तित्वम्। 'यागादिनिष्ठकरणत्वादौ' इति पाठः॥

त—'विशेष्यदलासत्त्वेन यागस्याकरणत्वापत्तेः' इति पाठः। **न तयोर्भेदानु पपत्तिगन्धोपीति।** इदमत्र चिन्त्यम्—कारणत्वं द्विविधं स्वरूपयोग्यत्वं फलोप हितत्वञ्चेति सर्वैरभ्युपगम्यते। तत्र द्वितीयादेव करणत्वस्य चक्षुस्संयोगादिव्यावृत्तस्य वैलक्षण्याभावोऽत्रापादित इति न ग्रन्थासङ्गतिः। करणत्वस्य फलोपहितकारणत्वरूपत्वे तु चक्षुस्संयोगादावपि चक्षुरादाविव करणव्यवहारापत्तिरिति भावः॥

कैश्चित् नारदादिभिः॥

**दि—करणत्वे कर्तृत्व इति।** 'कर्तृत्वे करणत्वे' इति पाठः। एवं मुक्तावल्यामपि 'कर्तृत्वं करणत्वञ्च' इति पाठः। **भेदव्यवहार इति।** 'व्यवहार भेदः' इति पाठः। **उपाधेर्भेदादिति।** तथाच प्रवृत्तिनिमित्तयोर्भेद एव व्यवहार वैलक्षण्यहेतुः, नतु तयोरसामानाधिकरण्यमपीति भावः। **केवलावयवनाशे इति।** 'लोके अवयवनाशे' इति क्वचित्पाठः। एवकारेणैव विवक्षितार्थलाभादयं पाठः श्रेयानिति भाति ॥

**मु—कथं स्मृतिरिति।** 'कथमिति' इति पाठः ॥

**त—कार्यकारणभावेति।** 'कार्यकारणभावद्वयाङ्गीकारेपि' इति पाठः ॥

**दि—चैतन्यपक्ष इति।** एतदनन्तरं 'चक्षुरभावे' इति प्रक्षिप्तम् ॥

त—समवायेनेत्यनन्तरं 'पटत्वप्रकारकघटविशेष्यकानुभवात् समवायेन घटत्व प्रकारककालिकेन पटत्वप्रकारकघटविशेष्यक' इत्यादिपाठः। **युक्तश्चुत्पश्याम इति।** अथात्र विशेष्यभेदेनानन्तकार्यकारणभावकल्पनागौरवभिया समवायसम्बन्धावच्छिन्नघटत्व निष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन स्मरणं प्रति तादृशसम्बन्धेनानुभवः कारण मित्येव कार्यकारणभावः कल्पनीयः। नचैकपटादिव्यक्तिं विशेष्यीकृत्य घटत्वपृथिवी त्वद्रव्यत्वपटत्वकुडयत्वाद्यनन्तधर्मप्रकारकस्मरणानुरोधेन प्रकारभेदेनानन्तकार्यकारणभाव कल्पनाभिया पटनिष्ठविशेष्यतानिरूपिततत्सम्बन्धावच्छिन्नप्रकारतासम्बन्धेनापि विनि गमनाविरहेण कार्यकारणभावापत्त्या नैतत्कल्पे लाघवमिति वाच्यम्, आत्मनिष्ठप्रत्या सत्त्या हेतुत्वे विशेष्यसम्बन्धप्रकारात्मकविषयभेदप्रयुक्तभेदस्य तुल्यत्वेपि कार्यकारण तावच्छेदककोटिप्रविष्टविशेष्यताप्रकारतयोर्विशेष्यविशेषणभावांशे विनिगमनाविरहप्रयुक्त द्विगुणीभावकृतगौरवस्य जागरूकत्वात्। इत्थञ्च तरङ्गिणीदर्शितात्मनिष्ठप्रत्यासत्तिघटित कार्यकारणभावे मानाभाव इति चेन्न, अन्येनानुभूतस्यान्येन स्मरणवारणाय विषयनिष्ठ प्रत्यासत्त्या कार्यकारणभावेषु तत्पुरुषीयत्वनिवेशावश्यकतया महागौरवात्। इदमत्र विभावनीयम्—विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावेषु तत्पुरुषीयत्वं न घटनीयम्। दर्शितदोषवारणाय समवायेन स्मरणं प्रति समवायेनानुभवः कारणमित्यपर एकः कार्यकारणभाव एव स्वीक्रियते। परन्तु, यत्र विभिन्नसम्बन्धावच्छिन्नकार्यताद्वया वच्छेदकधर्म एकः, एवं तन्निरूपितकारणताद्वयावच्छेदकधर्मोप्येकः, तत्र कार्य निष्ठायास्सामग्रीव्याप्तेर्वैलक्षण्यमङ्गीक्रियते। तत्स्वरूपञ्चेत्थम्—एकसम्बन्धावच्छिन्नकार्यता



निरूपितकारणतावच्छेदकसम्बन्धेन कारणाधिकरणयद्व्यक्तिसम्बद्धस्य कारणस्यान्य सम्बन्धावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकसम्बन्धेनाधिकरणत्वं यत्र, तत्रैव तद्व्यक्ति सम्बद्धकार्यं तेनान्यसम्बन्धेन भवतीति। एवञ्च चैत्रेण घटस्य मैत्रेण पटस्य चानुभव काले न चैत्रेण पटस्मरणस्यापत्तिः। तत्र कारणपदेन चैत्रानुभवस्य धरणे विषयता विशेषसम्बन्धेन तदधिकरणं घटव्यक्तिरेव, तत्सम्बद्धकारणस्य समवायेनाधिकरणे चैत्रे घटव्यक्तिसम्बद्धस्मृतिरेव समवायेन भवति। मैत्रानुभवस्य धरणे तु विषयतया तदधिकरणं पट एव। तत्सम्बद्धकारणस्य समवायेनाधिकरणत्वं मैत्रस्यैव, न चैत्रस्येति न तत्र पटविषयकस्मरणापत्तिः। एवं प्रथमकारणतावच्छेदकसम्बन्धपदेन समवायस्य धरणे वारणप्रकारः स्वयमूहनीयः। एतद्रीत्यैव वह्न्यनुमितिं प्रति वह्निव्याप्यवत्तापरामर्शस्यापि धर्मितावच्छेदकनिष्ठप्रत्यासत्त्या आत्मनिष्ठप्रत्यासत्त्या च कार्यकारणभावद्वये दर्शितसामग्री व्याप्तिस्वीकारेणैव एकस्य द्रव्यत्वमपरस्य पर्वतत्वं धर्मितावच्छेदकीकृत्य परामर्शेपि न तद्व्यत्ययेन कार्योत्पादापत्तिरिति। अथवा, यदा सामग्री, तदा कार्यमिति हि काल निष्ठप्रत्यासत्त्या कार्यनिष्ठा सामग्रीप्रयोज्यता। तत्र दण्डचक्रकुलालादिसामग्र्यां सत्यां तन्त्वाद्यवच्छेदेन घटाद्युत्पत्त्यापत्तिपरिहाराय तत्तत्कारणतावच्छेदकसम्बन्धेन तत्तत्कार णाधिकरणं यद्यत्, तत्तदवच्छेदेनैव काले कार्यं जायत इति परिष्कारः सर्वैरादरणीयः। इत्थञ्च प्रकृते एकविशिष्टापररूपसामग्रीकुक्षावनुभवस्यैकवारमेव प्रवेशात् तत्तत्कारण तावच्छेदकसम्बन्धेन कारणाधिकरणं विषय आत्मा चेत्युभयमिति तदुभयावच्छेदे नैव काले कार्यं जायत इति नियमात् यदा चैत्रस्य घटानुभवः मैत्रस्य च पटानुभवः, तदा न चैत्रस्य पटस्मरणापत्तिः, चैत्रपटोभयावच्छेदेन काले अनुभवाभावादिति कार्य कारणभावद्वयमत्र प्रदर्शितवतो दिनकरभट्टस्याशय इति। **असङ्गतिस्स्यादिति।** स्यादिति प्रक्षिप्तम् ॥

**दि—प्रदर्शयन्नाहेति।** 'प्रदर्शयन्नर्थमाह' इति पाठः ॥

**त—अदोषत्वादिति भाव इति।** इदमुपलक्षणम्। युगपत्सर्वाङ्गीणसुखा द्यनुभवानुपपत्तिरप्यत्र दोषो बोध्य इति प्रभाकृन्नः ॥

---

**प्रयोज्यतेति।** प्रयोज्यता तु स्वरूपसम्बन्धरूपा व्याप्तिरूपा वेत्यन्यदेतत्। **एक विशिष्टापरेति।** वैशिष्ट्यं स्वाधिकरणकालवृत्तित्वसम्बन्धेन। स्वाधिकरणता विषयतासम्बन्धा वच्छिन्नविषयनिष्ठावच्छेदकतानिरूपिका, समवायसम्बन्धावच्छिन्नावच्छेदकतानिरूपिका चेति बोध्यम्।

सु—एवात्मेति। एवकारेण ज्ञानवद्व्यवच्छेदः। नन्वात्मनो ज्ञानरूपत्वे ज्ञानाधिकरणत्वरूपं चेतनत्वं कथमित्यत आह—स्वत इति। तथाच चेतनत्वं न ज्ञानाधिकरणत्वम्। किन्तु स्वाभिन्नस्वप्रत्यक्षकत्वम्, अन्यानधीनप्रकाशत्वं वेति भावः। नन्वात्मनो ज्ञानरूपत्वे अहं जानामि, अहं सुखीत्यादिज्ञानादिविशिष्टप्रत्ययः कथ मुपपद्यत इत्यत आह—ज्ञानसुखादिकमिति। वस्तुतः तदभिन्नत्वेपि तद्भिन्नत्वेन भासमानत्वं तदाकारत्वम्, घटो मृदाकार इति व्यवहारात्। तथाच नोक्तप्रतीत्य नुपपत्तिरिति भावः। अथैवमात्मनो विकारित्वप्राप्त्या अनित्यत्वापत्तिरित्यतेष्टापत्तिं सयुक्तिकमाह—तस्यापीति। अपिशब्दो घटादेस्सर्वस्य संग्राहकः। इदमत्राकूतम्, किञ्चि—सत्त्वापरपर्यायं भावत्वमर्थक्रियाकारित्वम्, तच्छून्यनृशृङ्गादेरलीकत्वात्। किञ्चि दर्थकरणे समर्थं वस्तु स्वोत्तरक्षण एव स्वकार्यं सर्वं जनयेत्, विलम्बे मानाभा वात्। अशक्तं चेत् कालान्तरेपि न जनयेत्, स्वभावस्यानतिवृत्तेः। अतः तृतीयक्षणे अर्थक्रियानुत्पत्त्या तस्य द्वितीयक्षणावस्थाने मानाभावात् क्षणिकत्वमेवेति। सुषुप्त्य वस्थायामपीति। 'सुषुप्तावपि' इति ताळीग्रन्थपाठः॥

दि—विज्ञानमेवेति। एतत्पूर्वं 'विज्ञानवादी शङ्कते—नन्विति' इत्यपि पाठः। वस्तुमात्रस्येति। बाह्यवस्तुषु प्रमाणाभावात्। ननु घटादौ प्रत्यक्षमेव प्रमाणमिति चेन्न, उत्पत्तिक्षणे तदुत्तरक्षणे वा प्रत्यक्षसम्भव इष्यते। उत्पत्तिपूर्व क्षणे इन्द्रियादिसम्बन्धाभावान्न प्रथमः। क्षणिकत्वेन विषयाभावान्न द्वितीयः। अती तस्यैव प्रत्यक्षमिति चेन्न, वर्तमानत्वावभासविरोधात्। एवञ्च यत् येन वेदनेन वेद्यते, तत् तदभिन्नं, यथा आत्मा इत्यनुमानेन च ग्रहग्राह्ययोरभेदसिद्धिरिति भावः। तदु क्तम्—'सहोपलम्भनियमादभेदो नीलतद्धियोः। भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवा द्वये' इति। अनादिविपर्ययवासनैव ग्रहग्राह्यग्राहकाणां भेदभ्रमे निदानम्। सर्वं जगत् क्षणिकं, दुःखं, स्वलक्षणं, शून्यमिति भावनाबलेन विपर्ययवासनायां नष्टायां विगलित विविधविषयाकारोपप्लवविशुद्धचित्सन्ततिरेव मोक्ष इति ध्येयम्। सत्त्वस्येति। 'सत्त्व स्य वा' इति पाठः। तत्रायं घट इतीति। 'तत्र घट इति प्रवृत्तिविज्ञानम्, अह मित्यालयविज्ञानम्' इति ताळीग्रन्थपाठः। स ऋजुरेव॥

त—सत्त्वस्य वेतीति। ननु सामान्यादिषु सत्त्वाभावात्तेषु न विज्ञान त्वसिद्धिरिति शङ्कामपनुदति—सामान्यादीनामिति। ननु सत्त्वस्यापि सामान्यत्वेन



अलीकत्वाद्विप्रतिपत्तिकोटित्वानुपपत्तिरित्यत आह—सत्त्वमत्रेति। 'सत्त्वमत्र काल सम्बन्धित्वम् अर्थक्रियाकारित्वमेव वा ग्राह्यम्' इति पाठः। स्वयमेव विषय इति। इदञ्च प्रौढिवादमात्रम्। वेदान्तिमते चित इव आलयविज्ञानस्य न स्वविषयकत्वं योगाचारमते। अत एव 'निराकारा चित्सन्ततिः' इति वक्ष्यते। अनादिवासना कल्पितं स्वविषयकत्वमादाय च अहमित्याकारकमिति व्यवहारोपपत्तिः। आलयविज्ञानस्य विज्ञानरूपप्रमाविषयत्वाभावमनुसन्धायैव प्रमेयत्वं विहाय 'सत्त्वस्य वा व्यापकम्' इति दिनकरभट्टोक्तिः। यद्वा, आलयविज्ञानरूपात्मनोपि ज्ञानसुखाद्याकारविशिष्टतयैव विषयत्वं भवति, अहं जानामि, अहं करोमीत्यादिप्रतीतेः। तथाच सुषुप्तौ ज्ञानाद्या कारपरिणामाभावाच्च विषयत्वमिति नात्मरूपविषयावभासप्रसङ्गः॥

सु—विषयेति। 'विषयावभासप्रसङ्गश्च' इति प्रथमान्तः पाठः। एत दुत्तरं 'ज्ञानस्य सविषयत्वात्' इति ताळीग्रन्थपाठे नास्ति॥

दि—तस्येतीति। 'तस्य विज्ञानस्य' इति पाठः। सविषयत्वे दूषण मिति। अनुभवबलात्तद्विषयकत्वमिति न द्वितीयकल्पे विनिगमनाविरह इति स विषयकत्वमेव दूषयतीति भावः। बाधकाभाव एव प्रमाणमिति शङ्कां व्युदसितुं व्याप काभावरूपबाधकसूचनाय व्याप्तिं दर्शयति—ज्ञानत्वस्येति। अनीलव्यावृत्तिरूप इति। नीलभेदाभावरूप इत्यर्थः। अभावस्यालीकत्वं प्रसिद्धमिति भावः। वासना संक्रममिति। 'पूर्वोक्तवासनासंक्रमम्' इति ताळीग्रन्थपाठः। मुख्यतया दूषयतीति। अनेन दर्शितदोषोद्धारसरणिरपि न समीचीना, समूहालम्बनानुभवोत्तरमुद्बोधकविशेष वशान्नीलमात्रस्मरणस्यानुभवसिद्धस्यापलापापत्तेरिति सूचितम्॥

सु—विज्ञानस्य चेन्नेति। नञ्रहितः पाठः। तदुत्पादकाभावादिति। अनुभवस्यैव संस्कारजनकत्वादुत्तरविज्ञानेषु च तदभावादिति भावः। क्षणिकविज्ञाने ष्विति। क्षणिकविज्ञानविशेषेष्वित्यर्थः। क्वचित्तथैव पाठः। मानाभावादिति। शक्तेरतीन्द्रियतया न प्रत्यक्षसम्भवः, लिङ्गाद्यभावाच्च नानुमित्यादिकमित्याशयः। ननु संस्कारजनकता किञ्चिदवच्छिन्ना जनकतात्वादित्यनुमानेन चित्त्वादिधर्मान्तरबाधात्तत्सि द्धिरित्यत आह—गौरवाच्चेति॥

दि—**वासनोत्पादकेत्यर्थ इति**। एतत्पूर्वं 'तदुत्पादकेति' इत्यपि पाठः। **उत्तरोत्तरेति**। 'उत्तरोत्तरविज्ञाननिष्ठसंस्कारानुकूलतयेति शेषः' इति पाठः॥

त—**संस्कारज्ञानेति**। अत्र 'ज्ञान' इति प्रक्षिप्तम्। 'अतिशयः कल्प्यते इति न' इति पाठः। **कारणताकल्पनेनापीति**। अतिशयं प्रति प्रयोजकोऽति शयविशेषः तत्पूर्वज्ञाने स्वीकार्यः। एवं तत्पूर्वज्ञानेपीत्यानन्त्यमिति भावः॥

दि—**स एवायमिति**। सः अनुभविता। अयं स्मृतिमान्। तथा चानुभवितृस्मर्त्रोः प्रामाणिकेनैकत्वेनैव संस्कारानन्त्यप्रसङ्गवारणे तद्विरुद्धं तयोर्भेदकल्पनं तदधीनानन्तशक्त्यादिकल्पनञ्चाप्रामाणिकगौरवपराहतमिति भावः। तरङ्गिण्यनुसारे स इत्यादिसर्वनामद्वयं घटादिपरमपि बोध्यम्। परन्त्वेवं व्याख्याने 'किञ्च जगतः क्षणि कत्वे' इत्यग्रिमदिनकरीयग्रन्थस्य पुनरुक्तित्वप्रसङ्गः कथञ्चित्परिहार्यः। **तत्प्रागभाव ध्वंसकल्पन इति**। इदञ्च स्वमतमनुसृत्य प्रौढिवादमात्रम्, तयोरभावत्वेन योगाचारमतेऽ ळीकत्वात्। **स च फलोपधायकेति**। समर्थत्वमर्थक्रियाकारित्वम्, तच्च फलोपधाय कस्यैव। 'एवमक्षणिकत्वे कुर्वद्रूपत्वसिद्धिरेव न भवतीति बोधयितुं फलोपधायकेति क्षणि केति च विशेषणम्। **अङ्कुरानुपपत्तेरिति**। 'अङ्कुरानुत्पत्तेः' इति पाठः॥

त—**एकरूपेणेति**। एतदुत्तरं 'कारणतानिश्चयस्य' इति पाठः। **यद्य पीति**। एतत्पूर्वं 'जातेरपि क्षणिकत्वेनेति' इति पाठः॥

दि—**यदपि स्थिरेति**। तदवृत्तिधर्मवत्त्वहेतुना तद्भिन्नत्वं साधयितुं शक्यत इति भावः। अस्य हेतोः स्वरूपासिद्धिं दर्शयति—**तदपि नेति**। **दिगिति**। नन्वात्मन एवाकारविशेषज्ञानसुखादिधर्म इवात्मापि भेदप्रतीतिस्सङ्गच्छत इति चेन्न, ज्ञानादीनां तथात्वेपि घटत्वकुर्वद्रूपत्वादीनामनुगतानां तन्मतेऽलीकतया तेषां धर्म्यभेदस्य वक्तुमशक्यत्वात्। अयमेवार्थो दिगित्यनेन सूचितः॥

त—**क्षणिकविज्ञानपक्ष इति**। 'क्षणिकविज्ञान' इति स्थाने 'क्षणिक विज्ञानपक्ष' इति तरङ्गिणीसम्मतः पाठः। **इत्यर्थकताभ्रममिति**। इत्यर्थतात्पर्येणो च्चरितत्वभ्रममित्यर्थः। सिद्धान्ते ज्ञानस्य, वेदान्तिमतेपि वृत्तिरूपज्ञानस्य प्रायशो द्विक्षणा वस्थायित्वेनानन्त्यस्य प्रामाणिकगौरवत्वेनादोषत्वादुक्तार्थकत्वे तात्पर्यभ्रम एवेति भावः॥

---

सिद्धान्ते अपेक्षाबुद्धेः वेदान्तिमते धारावाहिकज्ञानस्य च व्यावृत्त्यर्थम्—प्रायश इति॥



मु—**नित्यविज्ञानमेवात्मेति**। ननु घटादिजगदभ्युपगमात्तवैव गौरव मिति चेन्न, 'सर्वं खल्विदं यदयमात्मा' इति श्रुत्या अद्वितीयं ब्रह्मैव परमार्थ इति वेदान्तिनां राद्धान्तात्। **अविनाशीति**। आत्मेत्यन्तमेका श्रुतिः, सा चात्मनो नित्यत्वबोधिका। सत्यमित्यादिरात्मनः सद्रूपत्वचिद्रूपत्वत्रिविधपरिच्छेदराहित्यानां क्रमेण बोधिकेति विवेकः। सत्यमित्यनेन च जगतो ज्ञाननिवर्त्यत्वादिरूपं मिथ्यात्वं सूचि तम्। **अननुभवादिति**। घटस्य ज्ञानमित्यादिवत् घटस्याहमित्यननुभवादित्यर्थः। **ब्रह्मपरमिति**। 'ब्रह्मविदाप्नोति परम्' इत्युपक्रम्य 'सत्यम्' इत्यादिना तद्घटकब्रह्म पदार्थस्यैव कथनादिति भावः। जगन्मिथ्यात्वसूचनोक्तिश्चाप्रामाणिकीति हृदयम्। **ज्ञानाज्ञानेति**। चैत्रात्मा मैत्रात्मनो भिन्नः मैत्रात्मावृत्तिधर्मवत्त्वादित्यनुमानेन सिद्धि रित्यर्थः। **भेदसिद्धेः** परस्परस्माद्भेदसिद्धेः। **ईश्वरभेदः** ईश्वराद्भेद इति पञ्चमी तत्पुरुषः। ईश्वरपक्षकमप्यनुमानं सम्भवतीति बोधयितुम् ईश्वरजीवात्मनोर्भेद इति व्याख्यातं दिनकरभट्टेन। यद्वा, ईश्वराणां परस्परं भेद इति भ्रमव्यावर्तनाय व्याख्यानम्॥

त—**न हि घटविषयक इति**। 'नाहं घटविषयकः' इति पाठः॥

दि—**ईश्वरस्यैकस्येति**। यदीश्वरो नानाजीवात्मकः, तदा 'देव एकः' इत्यादिश्रुतिसिद्धैकत्ववान्न स्यादिति तर्केण नानाजीवात्मकत्वज्ञानं नोदियादेवेति भावः। **सिद्ध्यतीत्यर्थ इति**। 'सिद्ध्यतीति शेषः' इति पाठः। **तत्त्वमसीत्यादीति**। तत् सार्वज्ञ्यादिविशिष्टं ब्रह्म। त्वमसि त्वदभिन्नः। छान्दोग्योपनिषदि श्वेतकेतुं प्रत्युप देशोऽयम्। आदिपदेन 'प्रज्ञानं ब्रह्म' इत्यादेः परिग्रहः। **अभेदबोधकः** अभेद बोधोपयोग्याकाङ्क्षावान्॥

मु—**तदभेदेनेति**। स्तौतीत्यनेनास्यान्वयः। स्तुतिर्नाम वस्तुतस्तदवृत्त्यु त्कृष्टधर्मवत्तया बोधनम्। तद्घटकधर्मे अभेदेनेति तृतीयार्थाभेदस्यान्वयः। तथाचेश्वरा भेदरूपो यस्तादृशधर्मस्तद्बोधानुकूलाकाङ्क्षाशाली स इति बोधः। **तदीयत्वं** तत्सेव कत्वम्। तथाचाभेदायोग्यतानिश्चयवतां श्रुतिगततच्छब्दस्य तदीये लक्षणां गृही त्वैव बोध इति भावः। तर्हि श्रुतौ तदीयेत्येव कुतो नोक्तमित्यत आह—**अभेद भावनयेति**। मुक्त्यर्थमभेदभावनायां यत्नः कार्य इति बोधयतीत्यर्थः। इयं भावनैव निदिध्यासनशब्देनाप्युच्यते। तथाचोपासनाप्रकारप्रदर्शनार्थमेव श्रुतिरभेदं बोधयतीति

भावः । 'अभेदेन वेदितव्यम्' इति प्रभासम्मतः पाठः । तदर्थस्ततोऽवगन्तव्यः । यथा श्रुतार्थत्यागे भेदश्रुतिं प्रमाणयति—**अत एवेति** । **समर्पितः** सेवकत्वेन नियुक्तः । **उभयं नैकमित्यस्येति** । नचैकभेदोल्लेखिन्या अस्याः प्रतीतेरेकत्वाभावे प्रमाणतया प्रदर्शनमसङ्गतमिति वाच्यम्, अग्रे महीरुहो विहगसंयोगी, न मूले इत्यत्र मूलाव च्छेदेन विहगसंयोगाभावभानस्यैव मणिकृता दर्शितत्वात्तद्रीत्या प्रकृतेऽप्येकत्वाभावस्यो भयत्वावच्छेदेन भानात् । **निर्दुःखत्वादिना साम्यमिति** । निर्दुःखत्वादिरूपभूयोधर्म वत्त्वमित्यर्थः । ईश्वरे आनन्दोऽस्तीति नैयायिकैकदेशिमतं मनसिकृत्य निस्सुखत्वादि नेति नोक्तम् । यद्वा, निस्सुखत्वस्येच्छाविषयत्वासम्भवात् प्रवर्तकत्वमनुपपन्नं स्यादिति तत्परित्यागः । आदिपदाद्द्वेषादिराहित्यं ग्राह्यम् । **परमं साम्यमिति** । पुंसामभिलाष विषया ईश्वरगता यावद्धर्माः, तावद्धर्मवत्त्वमित्यर्थः । इत्थञ्चेश्वरगतैकत्वपरिमाणादेर्जीवेऽ सम्भवेऽपि न क्षतिः । निर्दुःखत्वञ्च सामानाधिकरण्य,समानकालीनत्वोभयसम्बन्धेन दुःख प्रागभावविशिष्टान्यदुःखसंसर्गाभाववत्त्वम् । ईश्वरे दुःखात्यन्ताभावं जीवे च मुक्ति रूपतद्ध्वंसञ्चादाय तद्वत्त्वोपपत्तिः । 'नित्यं विज्ञानमानन्दं ब्रह्मेत्यादौ' इति प्रक्षिप्तम् । **आनन्दोपीति** । आनन्दः आनन्दशब्दः । **उपचर्यते** लक्षणया प्रयुज्यते । **प्रकरण विरोधादिति** । एतदनन्तरम् 'आनन्दमित्यत्र मत्वर्थीय' इति पाठो न ताळीग्रन्थेषु दृश्यते ॥

**दि—नञ्तत्पुरुषेति** । 'तव तत्पुरुषेति' इति ताळीग्रन्थपाठः ॥

**त—वस्तुतः प्रकरणपदस्येति** । 'क्लिष्टकल्पनापत्तेः प्रकरणविरोधाच्चेति संक्षेपः' इति मुक्तावलीपाठं, 'प्रकरणविरोधादिति । प्रत्ययविरोधादित्यर्थः' इति दिन करीयपाठं चानुसृत्येयं व्याख्या । 'प्रत्ययविरोधादिति' इति च प्रतीकधारणमवसेयम् ॥

**सु—संक्षेप इति** । एतेन, ननु 'नेह नानास्ति किञ्चन' इत्यादि श्रुत्या ब्रह्मणि सर्वधर्मनिषेधान्न ज्ञानसुखादिमत्त्वसम्भव इति चेन्न, 'सर्वज्ञः' इत्यादिबहुश्रुति विरोधात्, हेयधर्माभावस्यैव तत्रो बोधादित्याक्षेपसमाधानादिकमन्यतोऽवगन्तव्यमिति बोधितम् ॥

**—निर्लिप्त इति** । 'निर्लेपः' इति पाठः ॥

---

**इत्थञ्च अभिलाषविषया इत्युक्तौ च** ॥

**हेयधर्मा रागादयः** ॥



**त—मूलप्रकृतिरिरिति** । मूलकारणमित्यर्थः । एतदेव प्रधानपदेनापि व्यव ह्रियते । **अविकृतिः** न विकृतिः न कस्यापि कार्यम् । **महदाद्याः** महत्तत्त्वम्, अहङ्कारतत्त्वम्, पञ्चतन्मात्रापरपर्यायाणि सूक्ष्मभूतानि । **प्रकृतिविकृतयः** कारणानि कार्याणि च । प्रकृतेर्महान्, ततोऽहङ्कारः, ततस्तन्मात्राणि इति क्रमोऽवसेयः । **षोडशकः** पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, मनः, पञ्च महाभूतानि च । **तुरव धारणे** । **विकार** एवेत्यर्थः । यद्यपि पञ्चमहाभूतानां घटवृक्षादिकारणत्वात् प्रकृतित्व मपि सम्भवति, तथापि स्थूलत्वबहिरिन्द्रियग्राह्यगुणवत्त्वादिना घटादीनां भूतसाम्यान्न तत्त्वान्तरत्वम्, तत्त्वान्तरकारणत्वमेव चात्र प्रकृतित्वमभिमतमिति न दोषः । अधिक मन्यतोऽवगन्तव्यम् ॥

**दि—इत्यनुमानमिति** । महत्तत्त्वं दृष्टान्तीकृत्य व्यतिरेकव्याप्तिग्रहो बोध्यः । यद्वा, अन्वयव्याप्तिरेव । दृष्टान्तश्च पारिमाण्डल्यादिकं वैशेषिकाद्यभिमतम् ॥

**त—ननु** यथा घटादिकार्यनाशेऽपि प्रधानस्यानाशः, तथा पुरुषस्यापीत्या शङ्कां भावबर्णनेन परिहरति—**पुरुषस्येति** ॥

**सु—ननु** बुद्धिर्नाम अयं घट इत्यादि ज्ञानम्, तत्र चैतन्याभिमानोऽ प्रसिद्ध इत्यत आह—**बुद्धिश्चेति** । नच बुद्धावेव चैतन्यमिति वाच्यम्, स्वयं समाधा स्यमानत्वात् ॥

**त—स एव वृत्तिरूपमिति** । साङ्ख्यादिमते ज्ञानं द्विविधं वृत्तिरूपं फल रूपं च । फलरूपन्तु वृत्तिप्रतिबिम्बितचैतन्यं प्रकाशस्फुरणादिपदबोध्यमेव ॥

**सु—तत्सत्त्वासत्त्वाभ्यामिति** । यद्यपि बुद्धिसत्त्वेऽपि दोषदर्शनादिजनित विवेकज्ञाने जाते स्वाकारेत्यादिदर्शयिष्यमाणविषयसम्बन्धासम्भवात् भवति मुक्तिः तथापि जाते तत्त्वज्ञाने बुद्धेः प्रकृतिलयरूपनाशः सम्भवतीति तदसत्त्वे मुक्त्यसम्भव इत्याशयः । बुद्धिसत्त्वे परस्परधर्मारोपदर्शनात्तदन्यथानुपपत्त्या बुद्धिपुरुषयोर्भेदाग्रहः कल्प नीय इत्याशयेनाह—**पुरुष इति** ॥

---

**दि—स्वाकारज्ञानेति** । स्वं घटादिविषयः तदाकारं यत् ज्ञानं तत्परिणामिनी तत्कारणं बुद्धिः तद्भेदाग्रहसम्बन्धेनेत्यर्थः । **कैवल्यावस्थानरूपो मोक्ष इति** ।

'कैवल्येनावस्थानं पुंसो मोक्षः' इति ताळीग्रन्थपाठः। तस्या एवेन्द्रियेत्यत्र एवकारफल मवतारिकया दर्शयति—**ननु पुरुष इति**। इन्द्रियप्रणालिकयेत्याद्यंशस्तु दर्शितपर म्परासम्बन्धोपदर्शनमिति स्पष्टमिति भावः। **विषयप्रकाशार्थमिति**। घटादिर्विषयः पुरुषसम्बद्धः प्रकाशमानत्वादित्यनुमानं लाघवतर्कानुगृहीतं तत्र मानमिति भावः। **विषयसम्बन्धस्य सत्त्वादिति**। 'विषयसम्बन्धस्य सर्वदा सत्त्वात्' इति पाठः। विषयस्वभावनिबन्धनत्वे त्वाह—**घटप्रकाशकाल इति**। **पटादीति**। पटादिरूपस्य चैतन्यसम्बन्धस्येत्यर्थः। पटादिविषयचैतन्यसम्बन्धस्य इति पाठे पटादिविषयेण सह चैतन्यस्य सम्बन्धस्येत्यर्थः। **यद्वा बुद्धितो ज्ञानस्य भेदमिति**। स्वाकारज्ञानपरिणा मीति दर्शितसम्बन्धोपपादनार्थं तत्प्रदर्शनमित्याशयः। यथाश्रुते बुद्धितः ज्ञानोपलब्ध्यो र्भेदप्रदर्शनमध्ये पुरुषे कर्तृत्वाभिमान इत्यादिग्रन्थो न सुयोज इति ध्येयम्। यद्वेति कल्पे घटादिना तस्यास्सम्बन्धः तस्या इन्द्रियप्रणालिकया परिणतिरेव ज्ञानरूपेति सम्बन्धः। परिणतौ प्रमाणप्रदर्शनायोक्तं तस्या घटादिना सम्बन्ध इति। शरीरा न्तःस्थबुद्धेर्बाह्यविषयेणान्यसम्बन्धस्य दुरुपपादत्वादिति भावः। ज्ञानोपलब्ध्योर्बुद्धितो भेद प्रदर्शनञ्च कॅाणादमतनिरासाय। बुद्धितस्तयोरभेदस्य 'बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्यायाः' इति प्रशस्तपादोक्तत्वात्। स्वच्छतया तत्प्रतिबिम्बादताात्त्विक इत्यंशं दृष्टान्त दार्ष्टान्तिकयोरुपपादयति—**दर्पणस्य यथेति** ॥

**मु—ममेदं कर्तव्यमितीति**। ममेदं कर्तव्यमिति शब्दाभिलप्यमानेऽ ध्यवसायनामके बुद्धिवृत्तिविशेषे इत्यर्थः। **दर्पणस्येति**। मुक्तावल्यां दिनकरीये च 'दर्पणमलिनिम्ना' इति पाठः ॥

**दि—एकत्वाभिमानः** कल्पितं तादात्म्यम्। पूर्वोक्तपुरुषोपरागविषयो परागाभ्यामिति हेतौ तृतीया, तत्प्रयोज्य इत्यर्थः। **अवभासः** प्रकाशापरपर्याया अभि व्यक्तिः तार्किकाणां निर्विकल्पकस्थानीया। बुद्धिर्यदा घटादिविषयाकारेण परिणमते, पुरुषोपरागं च लभते, तदैव घटादेरवभास इत्युपरागद्वयप्रयोज्यत्वं घटादेरुपपन्नम्। **तेन** तादृशावभासेन जनितः कर्तव्यमित्यध्यवसायः कर्तव्यत्वप्रकारकनिश्चयः। **व्यापारांशः**

---

**न सुयोज इति**। इदानीं सम्बन्धोपपादने अवसिते अहं करोमीत्येव प्रतीतेः प्रकृतेः कर्तृत्वोक्तिरसङ्गतेत्याशङ्कापरिहारार्थतया स ग्रन्थो योजयितुं शक्यत इति भावः ॥



व्यापारस्य कृतेः अंशः सम्बन्धो यस्मिन् सः। तरङ्गिणीकृतान्तु 'पूर्वोक्तपुरुषोपराग विषयोपरागाभ्यां कर्तव्यघटादेरध्यवसायो व्यापारांशः' इति पाठ इति भाति। **अतात्त्विके दृष्टान्त इति**। 'अतात्त्विकत्वे दृष्टान्तमाह' इति पाठः। **तथाच ज्ञाने नेति**। 'तथाच ज्ञानेन सह चेतनोऽहमिदं जानामि करोमीत्याकारेण बुद्धावारोपितस्य पुरुषस्य यः' इत्यादिस्तरङ्गिणीकृत्सम्मतः पाठः। करोमीत्यस्य प्रयोजनञ्च बुद्धावारोप इति स्पष्टीकरणमित्यवसेयम्। 'इत्याकारः' इति प्रथमान्तोऽपपाठः। 'इत्याकारेण' इत्येव साधुः तरङ्गिण्यनुसृतश्च। **करोमीति**। 'करोमीत्यादौ तदंशे उपनीतभानरूपं तत्प्रत्यक्षम्' इति पाठः ॥

**त—अनित्यधर्मत्वादितीति**। अनित्यत्वे सति धर्मत्वादिति तदर्थः। अयमेव पाठस्तरङ्गिणीकृत्सम्मतः। एतत्पक्षे मुक्तावल्यां 'परिणामत्वात्' इति पाठः। अनित्यत्वस्य बुद्धौ साक्षाल्लाभादयमेव पाठः स्वरसतरः। **यद्यपीति**। 'यद्यपि धर्म त्वांशे' इति साधुः पाठः। **व्यभिचारहेतुनेति**। 'व्यभिचारिहेतुना' इति साधुः पाठः ॥

**मु—किन्नेष्यत इति**। तथाच प्रतिबन्दीबलादुभयत्र प्रमात्वनिश्चयेन कृत्याश्रयोपि पुरुष एवेति सांख्याभिमतबुद्धौ प्रमाणाभाव इति भावः। प्रतिबन्दे रनुत्तरतया बाधकान्तरं दर्शयति—**अन्यथेति**। अथ सृष्टिपूर्वमदृष्टस्याभिव्यक्त्य भावेपि कारणभूतप्रकृतिलीनतया महत्तत्त्वादिवदवस्थानान्न असंसारापत्तिरित्यभिसन्धाय 'कृत्यंशेपि', इत्यादिना दर्शितदूषणं परिहर्तुमाह—**नन्वचेतनाया इति**। तथाच प्रमाणान्तरेण बुद्धेरचेतनत्वनिर्णयात् चेतनोऽहं करोमीत्यत्र चैतन्यांशे भ्रमत्वमनिवार्यम्, कृत्यंशे तु तथा कल्पने मानाभावात् प्रमात्वमेवेति भावः ॥

**दि—अनुकूलतर्काभावादिति**। अथ नानेन्द्रियैर्युगपत् ज्ञानोदयानु रोधेन बुद्धेरेकदैव नानेन्द्रियैः संयोगाद्धटाद्याकारपरिणामित्वाच्च मध्यमपरिमाणवत्त्वं युक्तम्, तेन च हेतुना घटादिदृष्टान्तकेन जन्यत्वमनुमातुं शक्यत इति चेन्न, मध्य मपरिमाणवत्त्वसाधकत्वेन उक्तयोर्द्वयोरप्यनङ्गीकारात्। **विमूढ इति**। भ्रान्तिमानित्यर्थः॥

**मु—केवलन्तु॰य इति**। 'पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः' इति पद्यशेषः। स्वमते 'अहङ्कारविमूढात्मा' इत्यत्र अहङ्कारो गर्वः ॥

**दि—इत्यादिविस्तरेति** । अथ आत्मा यदि न स्वप्रकाशचैतन्यरूपः, तदा विषयाणां प्रकाशकाभावात् जगदान्ध्यप्रसङ्ग इति चेन्न, आत्मविशेषगुणज्ञाने सामग्रीबलादुत्पन्ने प्रकाशसम्भवात् ज्ञानविषयत्वस्यैव घटादिप्रकाशरूपत्वात् । एतदभिप्रेत्योक्तमित्यादिविस्तर इति ॥

**भा—धर्माधर्मेति** । सुखदुःखहेतुतया सिद्धौ यौ धर्माधर्मौ, तौ द्रव्याश्रितौ गुणत्वादित्यनुमानेनाप्यात्मसिद्धिरिति भावः । शरीरेण सिद्धसाधनं वारयति मुक्तावल्यां शरीरस्येत्यादिना । अथ अयमात्मा किमनुमेय एव ? नेत्याह—**अध्यक्ष इति** ॥

**मु—धर्माधर्मेतीति** । 'धर्माधर्माश्रय इति' इति पाठः । **न त्वन्यथेति** । यत्रात्मविषयकप्रत्यक्षत्वं तत्रात्मविशेषगुणविषयकप्रत्यक्षत्वम्, तदवच्छिन्नजनकत्वं विषयविधया तादृशगुणस्येति व्यापकधर्मावच्छिन्नजनकसामग्रीविधया हेतुत्वम्, न स्वातन्त्र्येणेति केचित् । तन्न, घटविषयकप्रत्यक्षत्वादेरिव तादृशगुणविषयकप्रत्यक्षत्वस्यापि विषयनिरूपितकार्यतानवच्छेदकत्वात्, सामान्यतः प्रत्यक्षत्वस्य विशेषतस्तत्तत्प्रत्यक्षत्वानां चैव तत्कार्यतावच्छेदकत्वात् । इत्थञ्चात्मनिष्ठविषयतासम्बन्धेन प्रत्यक्षं प्रति समवायेन योग्यविशेषगुणत्वेन स्वातन्त्र्येण हेतुत्वं बोध्यम् । यद्यपि तद्धर्मावच्छिन्नोत्पत्तौ तद्धर्माश्रययत्किञ्चिद्व्यक्तिनिरूपितकारणतावच्छेदकनिखिलधर्मावच्छिन्नसमुदायः प्रयोजक इति विशेषगुणशून्यतादशायां नात्मप्रत्यक्षापत्तिरित्युक्तस्वतन्त्रकार्यकारणभावाङ्गीकारो विफलः, तथापि तत्तद्व्यक्तिकारणसमुदायरूपप्रयोजकाभावकूटस्य निर्विकल्पोत्तरमात्मप्रत्यक्षाभावे प्रयोजकत्वकल्पनापेक्षया लाघवाद्दर्शितकार्यकारणभावान्तराङ्गीकार एव युक्तः । मूले योग्यविशेषगुणस्य कारणताग्राहकान्वयव्यतिरेकयोरेव प्रदर्शितत्वाच्च योग्यविशेषगुणत्वेन कारणतैव स्वाभिमताऽवसेया । नचैतादृशकार्यकारणभावे किं मानम्, सुषुप्तौ त्वङ्मनस्संयोगाभावादेवात्मप्रत्यक्षापत्तिवारणात्, जाग्रत्स्वप्नयोश्च ज्ञानाद्यन्यतमनियमादिति वाच्यम्, जाग्रत्काले निर्विकल्पकोत्तरमात्मप्रत्यक्षापत्तिवारणाय तदावश्यकत्वात् । सिद्धे च योग्यविशेषगुणस्य कारणत्वे तद्भासकसामग्रीनैयत्यादात्मप्रत्यक्षकाले तस्यापि प्रत्यक्षं भवतीति भावः ॥

---

विफल इति । योग्यविशेषगुणविषयकत्वेनैवात्मप्रत्यक्षस्यानुभाविकतया सर्वामपि तत्प्रत्यक्षव्यक्तिं प्रति विषयविधया यत्किञ्चिद्योग्यविशेषगुणस्यापि हेतुत्वादिति भाव ॥



**दि—ज्ञानादिसम्बन्धप्रकारेणेति** । इदञ्च सम्भवस्थलाभिप्रायेण, तेन ज्ञानादिप्रकारकप्रत्यक्षस्यानुभवसिद्धत्वेपि नानुपपत्तिः ॥

**भा—प्रवृत्त्याद्यनुमेयोऽयमिति** । आदिना भाष्योक्तः प्राणो गृह्यते । प्रयोगश्चेत्थम्—जीवच्छरीरं प्रयत्नवदधिष्ठितं विकृतक्रियपवनाश्रयत्वात् भस्त्रावत् । यद्वा, प्राणवायुः प्रयत्नवत्प्रेरितः विकृतक्रियवायुत्वात् भस्त्रावायुवदिति । विकृतक्रियत्वं नाम स्वभावभूततिर्यग्गमनान्योर्ध्वाधोदेशगतिमत्त्वम् । अधिकं किरणावलीतोऽवगन्तव्यम् ॥

**मु—आत्मेति** । एतत्पूर्वं 'प्रवृत्तीति' इत्यपि पाठः । **परदेहादाविति** । आदिना स्वदेहपरिग्रहः । देहत्वमेवात्र पक्षतावच्छेदकमभिमतम् । अत एव स्वदेहस्य न दृष्टान्ततयोपन्यासः ॥

**दि—हेतुज्ञानासम्भवादिति** । ननु चेष्टया कृतिरनुमातुं शक्यत इत्यत आह—**स्वरूपासिद्धेश्चेति** ॥

**मु—यथानुमीयत इति** । साध्यकोटिप्रविष्टस्य प्रयत्नस्याप्रत्यक्षत्वादिति भावः । **यथेति** । प्रयत्नात्मकेन येन रूपेणेत्यर्थः । इदन्तु प्रयत्नवानात्मेति पूर्वग्रन्थस्वारस्यमनुसन्धाय । दिनकरभट्टेन तु रथदृष्टान्तमनादृत्यानुमानद्वयप्रकारः प्रदर्शित इति बोध्यम् ॥

**दि—तथाचेति** । एतत्पूर्वं 'तथापीति' इत्यपि पाठः । **उत्तरसंयोगप्राप्तीति** । उत्तरसंयोगेत्यंशः प्रक्षिप्तः । मुद्रितपाठे प्राप्तिशब्दस्यैवोत्तरसंयोगार्थकतया पौनरुक्त्येन, यथाकथञ्चित्तद्वारणेपि वैयर्थ्येन चायमेव पाठः साधुः । दृश्यते च 'हितप्राप्ति' इत्येव किरणावल्याम् । अत्र हितप्राप्तीत्यहितपरिहारस्याप्युपलक्षणम् । ग्रन्थपाठे प्राप्तिशब्दस्यायमेवार्थः, तेन पर्णादौ न व्यभिचारः ॥

**त—दृष्टान्तासिद्धिमितीति** । ननूक्तरीत्या अनुमानद्वयाङ्गीकारे रथे अवच्छेदकतासम्बन्धेन प्रवृत्त्यभावात् दृष्टान्तासिद्धावपि प्रयत्नवदधिष्ठितत्वस्य साध्यत्वाङ्गीकारे रथेपि तत्सत्त्वात् दृष्टान्तासिद्ध्युक्तिरसङ्गतेत्याक्षेपं परिहरति—**शरीरमिदमिति** ॥

**मु—परमेति** । अत्र 'परममहत्त्वम्' इति पाठः ॥

## इति तृतीयः परिच्छेदः ॥

---

अयमेवेति । हितप्राप्तिरहितपरिहारश्चेत्यर्थः । अर्थः लक्ष्यार्थः । दृष्टान्ते हिताहिते सारथेर्बोध्ये । न व्यभिचार इति । अनेन मुद्रितपाठे अयमपि दोषो दुरुद्धर इति सूचितम् ॥

# चतुर्थपरिच्छेदः

## प्रत्यक्षलक्षणम्

**मु—कतिपयं बुद्धेः प्रपञ्चमिति।** कौचन बुद्धित्वसाक्षाद्व्याप्यधर्मौ, तदन्यतरानुभवत्वव्याप्यधर्मान्, तादृशधर्मावच्छिन्नकरणादीनि चेत्यर्थः ॥

**दि—अनुमित्यादावन्तर्भाव इति।** 'अनुमित्यादावन्तर्भाव इति भावः' इति पाठः ॥

**मु—अनुभूतिरितीति।** एतदनन्तरम् एतासामित्यारभ्य वेदितव्यानीत्यन्तं प्रक्षिप्तम्। **इन्द्रियजन्यमिति।** एतत्पूर्वं 'चातुर्विध्यं व्युत्पादयति—प्रत्यक्षमिति' इत्यपि पाठः ॥

**दि—उद्दिष्टासु प्रमास्विति।** प्रमास्वित्युक्तिर्दर्शयिष्यमाणन्यायसूत्रानुसारिणीति, सूत्रे तथा निरूपणञ्च प्रकृतप्रमाणनिरूपणाङ्गतयेति च बोध्यम्। सूत्रस्थस्य इन्द्रियार्थसन्निकर्षोत्पन्नमित्यस्य स्थाने इन्द्रियजन्यमित्युक्तिर्लाघवमभिसन्धायैव ॥

**त—इन्द्रियत्वावच्छिन्नजनकतेति।** ज्ञानकारणमनस्संयोगेषु वैजात्यमङ्गीकृत्य तदवच्छिन्नावच्छेदकताकजनकतेत्यर्थः। मनसस्तु ज्ञानसामान्यहेतुत्वं लाघवान्मनस्त्वेनैवेति न दोषः ॥

**दि—विशिष्टव्यवसायात्मकमिति।** नन्वेवमनुव्यवसायासंग्रह इत्यत आह—**विशिष्टज्ञानात्मकमिति यात्रदिति ॥**

**त—दुर्वारैवेति वाच्यमिति।** एतदनन्तरं 'ज्ञानाजन्येत्यस्य' इति पाठः। **योगिप्रत्यक्षं तत्त्वज्ञानरूपं बोध्यमिति।** यद्यपि सादृश्यस्यातिरिक्तपदार्थत्ववादिनव्यमतविचारे तत्त्वज्ञानस्वरूपमनुमित्यात्मकं दर्शितम्, तथापि 'आत्मा वारे द्रष्टव्यः' इति श्रुतिप्रतिपादिततत्त्वसाक्षात्कारोपधायकतया अनुमित्यात्मकमननेपि तत्त्वज्ञानत्वोपचारः



शरीरादितादात्म्यविषयकानादिवासनायास्तदधीनभ्रमस्य च लौकिकसाक्षात्कारमन्तरा निवृत्त्यसम्भवात् युक्तं साक्षात्कारस्यैव तत्त्वज्ञानत्वम्। तत्त्वसाक्षात्कारोत्पत्तौ श्रवणमनननिदिध्यासनानां हेतुत्वं 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुत्यैव प्रतिपादितम्। निदिध्यासनं नाम प्रत्ययान्तरानन्तरितशरीरादिभिन्नात्मस्वरूपप्रत्ययधारैव। तच्च श्रवणमनननानन्तरमेव जायत इति तस्य तद्व्यापारत्वम्। अधिकमन्यतोऽवगन्तव्यम् ॥

**दि—ज्ञानकरणकत्वाव्यभिचारीति।** करणतानिरूपकत्वस्य, जन्यत्वस्य वा अव्यभिचारीत्युक्तौ चाक्षुषत्वादिकमादायाव्याप्तिर्बोध्या। ज्ञानकरणकत्वव्यभिचारिजातिमत्त्वमित्युक्तौ गुणत्वादिकमादायातिव्याप्तिरिति तत्परित्यागः ॥

**त—निर्विकल्पककरणक इति।** 'विशिष्टवैशिष्ट्यप्रत्यक्षे च विशेषणज्ञानं हेतुः, न तु विशेषणविशेषणधीरपि विशेषणधीद्वारा कारणं मानाभावात्' इति चिन्तामणिग्रन्थविरोधाच्चिन्त्येयमवतारिका। अनुभवत्वावच्छिन्नकरणताके स्मरणेऽतिव्याप्तिमाशङ्क्याहेति चावतारणीयम्। **एवं तत्त्वमिति।** अत्र 'तत्त्वम्' इति प्रक्षिप्तम् ॥

**लक्षणघटकत्वमिति।** व्याप्तिज्ञानकरणकं ज्ञानमनुमितिरिति लक्षणघटकत्वमित्यर्थः। **व्याप्तिविशिष्टमिति।** एतदुत्तरं 'व्याप्तिप्रकारकं यत् पक्षधर्मताज्ञानं पक्षविशेष्यकं हेतुता' इत्यादिपाठः। इदञ्च दीधित्यनुसारेणोक्तम्। 'व्याप्यस्य पक्षवृत्तित्वधीः परामर्शः' इति कारिकानुसारि चेति बोध्यम्। तदनुसारे व्याप्तिविशिष्टस्य पक्षधर्मताज्ञानमिति षष्ठीतत्पुरुषः। षष्ठ्यर्थः प्रकारित्वं ज्ञानान्वयि। धर्मिपारतन्त्र्येण व्याप्तेरपि स्वावच्छिन्ननिरूपकताकत्वसम्बन्धेन प्रकारितायां बोधः। पक्षे धर्मताज्ञानमिति विग्रहः। धर्मताज्ञानमिति च धर्मतायाः ज्ञानमिति षष्ठीतत्पुरुषः, हेतुतावच्छेदकसम्बन्धावगाहिज्ञानमिति तदर्थः। इत्थञ्चोद्देश्यविधेयभावमहिम्ना हेतुतावच्छेदकसम्बन्धावगाहित्वावच्छिन्नत्वं पक्षविशेष्यकत्वे भासते। एवं व्याप्त्यवच्छिन्नप्रकारितायामपि पक्ष

---

**दीधित्यनुसारेणेति।** तत्पक्षे च पक्षे धर्मतया हेतुतावच्छेदकसम्बन्धेन ज्ञानमिति तृतीयासमासगर्भसप्तमीसमासादरात् पक्षविशेष्यकत्वावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नप्रकारताकत्वविशिष्टज्ञानं पक्षधर्मताज्ञानपदार्थः, पक्षधर्मतयेत्यत्र तृतीयाया एव अवच्छिन्नप्रकारत्वार्थकत्वात्। तत्र व्याप्तिप्रकारकत्वान्वये च उद्देश्यविधेयभावमहिम्ना हेतुनिष्ठनिरुक्तप्रकारताकत्वावच्छिन्नव्याप्तिप्रकारकत्वलाभः। अत्र पक्षे विधेये उद्देश्यतावच्छेदकैकदेशावच्छिन्नत्वभानमङ्गीकर्तव्यमिति बोध्यम् ॥

विशेष्यकहेतुतावच्छेदकसम्बन्धावगाहित्वयोरवच्छिन्नत्वं लभ्यत इति समूहालम्बनादि व्यावृत्तस्य विवक्षितार्थस्य लाभ इति। **धूमो वह्निव्याप्य इति**। अत्र प्रथमाति व्याप्तिकथनं व्याप्तिप्रकारकत्वनिवेशाभिप्रायेण। व्याप्त्यवच्छिन्नप्रकारकत्वनिवेशेपि द्विती यातिव्याप्तिरिति विवेको बोध्यः। **अतिव्याप्तेर्वारणाय चेति**। 'अतिव्याप्तिश्चेति तद्वारणाय हेतुता' इत्यादिः साधुः पाठः ॥

**मु—अव्याप्तमिलीति**। 'अव्याप्तिरिति' इति ताळीग्रन्थपाठः ॥

**दि—धूमवान् पर्वतो वह्निमानित्यनुमिताविति**। यद्यपि पर्वतो वह्नि मान् धूमो द्रव्यमित्यादि समूहालम्बनानुमितावप्यव्याप्तिस्सम्भवति, तथापि हेत्वविषय कत्वं हेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षविषयताशून्यत्वमित्युक्तावप्यव्याप्तिप्र दर्शनार्थमेव तादृशस्थलानुसरणम्। इदञ्च लिङ्गोपधानमतमवलम्ब्येति केचित्। तन्न, कादा चित्केत्युक्तिविरोधापत्तेः। अत्र पर्वतो वह्निमान् धूमवांश्चेत्यनुमितिमादायापि दोषात् पक्षतावच्छेदकविधयेति किमर्थमुक्तमिति न शङ्क्यम्, हेतुतावच्छेदकावच्छिन्नप्रकारता निरूपितेत्यत्र प्रकारतायां विधेयतानात्मकत्वनिवेशेपि न निस्तार इति द्योतनार्थत्वात् ॥

**त—आलोकादिलिङ्गकेति**। नन्वत्र धूमस्य हेतुत्वं कथमिति न शङ्क्यम्, वह्निव्याप्यधूमवान् पर्वतः, वह्निव्याप्यालोकवान् धूमवान् पर्वत इति समूहालम्बनपरा मर्शजन्यायाः पर्वतो वह्निमान्, धूमवान् पर्वतो वह्निमानित्यनुमितेर्विवक्षितत्वात्। यद्वा, तत्तत्साध्यकानुमितिलक्षणे तत्तत्साध्यव्याप्यतावच्छेदकधर्मावच्छिन्नाविषयकत्व मेवात्र हेत्वविषयकपदेन विवक्ष्यते। एवञ्चालोकहेतुकपरामर्शमात्रजन्यदर्शितासमूहालम्ब नानुमितावप्यव्याप्तिस्सुष्ठु घटत एव ॥

**दि—लाघवाल्लक्षणान्तरमाहेति**। अथ पुरुषत्वव्याप्यकरादिमानयमित्यादि विशेषदर्शनाधीने अयं पुरुष इत्याकारके संशयोत्तरप्रत्यक्षे तदादाय प्रत्यक्षसामान्ये वा अतिव्याप्तिं परिचिन्त्याहेति कुतो नावतारितमिति चेन्न, विशेषदर्शनस्य व्याप्य वत्ताज्ञानावच्छेदकधर्मज्ञान,व्यञ्जकधर्मदर्शना,लोकसंयोगादिनानाप्रकारस्य विपरीतबुद्धि विरोधित्वेनैव जनकत्वान्न परामर्शत्वावच्छिन्नत्वं तन्निष्ठजनकताया इत्यतिव्याप्त्यभावात्।

---

**विरोधापत्तेरिति**। तन्मते अनुमितिसामान्यस्य लिङ्गविषयकत्वनियमादिति भावः॥



विशेषदर्शनस्य, विपरीतकोटिभानप्रतिबन्धकत्वमेव, न तु संशयोत्तरप्रत्यक्षे स्वातन्त्र्येण हेतुत्वमिति उपाध्यायादिनये दर्शिताक्षेपस्यैवानुत्थानमिति बोध्यम्। विशेषणज्ञानादि विधया कारणत्वेपि न सा जनकता परामर्शत्वावच्छिन्नेति न दोषप्रसक्तिः। एतेनोक्त दोषपरिहाराय प्रभायां दर्शितस्य लौकिकविषयत्वासामानाधिकरण्यघटितपरिष्कारस्या वश्यकता निरस्ता ॥

**त—स्वजन्यज्ञानसम्बन्धावच्छिन्नेति**। सम्बन्धांशे परामर्शस्य ज्ञानत्वे नैव निवेशः, न तु परामर्शत्वेनेति न लाघवापाय इति भावः। अत्र स्वजन्यवत्व सम्बन्धावच्छिन्नेत्युक्तौ संस्कारमादाय व्याप्तिस्मृतावतिव्याप्तिरिति स्वजन्यज्ञानसम्बन्धेति। हेत्वविषयकत्वस्यापि लक्षणे प्रवेशे तत्प्रयोजनं मृग्यम्। **अत्रापि लिङ्गाविषयकत्वेति**। वस्तुतः पूर्वोक्तदिशा दर्शितविशिष्टवैशिष्ट्यबोधे व्याप्तिज्ञानस्यान्यथासिद्धत्वमेवेति नास्मिन् कल्पे लिङ्गविषयकत्वनिवेशावश्यकतेत्यवधेयम्। **व्याप्त्यवच्छिन्नप्रकारताशून्यत्व मेवेति**। नच हेतुतावच्छेदकावच्छिन्नाविषयकत्वमेव लाघवान्निवेष्टुमुचितमिति वाच्यम्, जात्यघटितलक्षणस्य पूर्वोक्तायां धूमवान् पर्वतो वह्निमानित्यनुमितावव्याप्तिप्रसङ्गात्। परन्तु, वह्निव्याप्यधूमवान् वह्निव्याप्यधूमव्याप्यवांश्च पर्वत इति समूहालम्बनजन्यानु मितावव्याप्तिपरिहारस्यैतावताप्यसम्भवादपि जातिघटितलक्षणावश्यकता बोध्या। **धूलीति**। 'धूलीपटलादिविषयकविशिष्टवैशिष्ट्यावगाहि' इति पाठः ॥

**दि—किन्तु ज्ञानत्वेनेति**। ननु ज्ञानत्वेन व्याप्त्यादिज्ञानानामपि करणत्वानपायादसम्भवोक्तिरसङ्गतेति चेन्न, यत्रोपमित्यादिकरणसादृश्यज्ञानादिकं व्याप्ति विषयकमपि, तत्रोपमित्यादावतिव्याप्तिवारणाय व्याप्तिज्ञानत्वावच्छिन्नकरणताकत्वनिवेशा वश्यकतया असम्भवोपपत्तेः ॥

**त—करणत्वकल्पनापत्तिरिति**। ननु ज्ञानव्यक्तीनामिव मनोव्यक्तीनामप्य नन्तत्वमेव, अनन्तानाम्मध्ये च का गौरवलाघवचिन्तेति चेदाह—**ज्ञानस्येति**। 'अपि च' इत्यंशस्त्याज्यः। 'मानाभावाच्च' इत्यत्र 'मानाभावश्च' इति पठनीयम्। व्याप्तिज्ञानादौ व्यापारवत्कारणत्वघटितप्रमाणत्वव्यवहारान्यथानुपपत्तेरेवात्र मानत्वसम्भ वात् 'मानाभावश्च' इत्युक्तिश्चिन्त्या। यदि च दर्शितरीत्या प्रथमदोषोपि नास्तीति

---

**मृग्यमिति**। जातिघटितलक्षणादरात्र हेतुविषयकानुमितावव्याप्तिः ॥

मन्यते, तदा प्रत्यक्षसाधारण्यायाह—मनस्त्वेन वेतीत्यवतरणीयम् । नच चाक्षुषादौ मनसः को व्यापार इति शङ्क्यम्, चक्षुर्मनस्संयोगादेरेव तथात्वात् ॥

दि—**एकशब्देन वक्तुमिति** । अनुभवत्वजात्यङ्गीकारे तन्न्यूनवृत्तित्व निवेशे यद्यपि शब्दैक्यं सुसम्पादम्, तथापि गौरवभिया तन्निवेशो न युक्त इत्याशयः ॥

सु—**घ्राणजादीतीति** । विभागवाक्ये श्रौत्रमित्यस्य रासनमित्यनन्तरमेव पाठः । अत एव 'घ्राणस्य' इत्यादिकारिकानुसारः । **घ्राणस्येति** । 'घ्राणस्य न सामर्थ्यम्' इति ताळीग्रन्थपाठः । 'तथा शब्दोपि' इत्यत्र अपिशब्दः प्रक्षिप्तः ॥

भा—**क्रिया जातिरिति** । अत्र क्रियेति पदमन्यद्वा वेगस्याप्युपलक्षकम् । चकारेण वा तत्संग्रहः । **आलोकोद्भूतरूपयोरिति** । महत्त्वोद्भूतरूपवत्तेजस्संयोग एव हेतुरिति बोधयितुं तेज इति विहाय आलोकेत्युक्तिः, आलोक्यते अनेनेति व्युत्पत्त्या तादृशतेजस्येवालोकपदप्रयोगात् । तेजस्त्र्यणुकसंयोगेपि घटादिप्रत्यक्षानुदया देतद्घटकमहत्त्वं प्रकृष्टं ग्राह्यम् । अत्रेदमवसेयम्—परभागावच्छेदेनालोकसंयोगे सत्यपि घटादीनां प्रत्यक्षानुदयात् यदवच्छेदेन घटादौ चक्षुस्संयोगः, तदवयवाव च्छेदेनैवालोकसंयोगो हेतुर्वाच्यः । इत्थञ्च चक्षुरालोकसंयोगो वा विषयालोकसंयोगो वा हेतुरित्यत्र विनिगमकाभावादुभयं हेतुरिति केचित् । अन्वयव्यतिरेकसहकारि प्रत्यक्षगम्यतया प्रथमोपस्थितहेतुताकविषयालोकसंयोगेनातीन्द्रियतया अनुमानगम्यहेतुताक चक्षुरालोकसंयोगोऽन्यथासिद्ध इति परे । अत्र विषयतायाः कार्यतावच्छेदकसम्बन्ध त्वाच्चक्षुरालोकसंयोगस्य हेतुतायां परम्परासम्बन्धस्यैवावच्छेदकत्वेन गौरवादप्यन्यथा सिद्धिरिति ॥

सु—**योग्यव्यक्तिवृत्तितयेति** । अत्र 'योग्यव्यक्तिवृत्ति' इति पाठः । नन्विन्द्रियाणां गोचरप्रस्तावे चाक्षुषकारणप्रदर्शनमसङ्गतमिति शङ्कां वारयति—**चक्षुर्योग्यत्वमेवेति** । तथाचोपोद्घातसङ्गतिरिति भावः । संयोगेनालोकस्य हेतुत्वे लाघवेपि आलोकसंयोगस्य तदुक्तिरालोकप्रत्यक्षे व्यभिचारवारणाय । उद्भूतरूपसम्बन्धस्य हेतुत्वे गौरवादाह—**उद्भूतरूपमिति** । तथाच 'सम्बन्धात्' इति मूलस्थपञ्चम्याः प्रयोज्य त्वमेवार्थ इति ध्येयम् । **द्रव्यचाक्षुषं प्रतीति** । द्रव्यनिष्ठविषयतासम्बन्धेन चाक्षुषं



प्रतीत्यर्थः, तेन न द्रव्यविषयकत्वचाक्षुषत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरह प्रयुक्तकार्यकारणभावद्वयापत्तिरित्यादिकं प्रभायां स्पष्टम् । **रूपत्वादिभिन्नमिति** । 'रूपत्वादिभिन्नं च' इति पाठः । **चक्षुर्ग्राह्या इति** । 'चक्षुर्ग्राह्या गुणा उक्ताः' इति पाठः । **क्रियाजातय इति** । अत्र बहुवचनमाद्यर्थे, क्रियाजात्यादिरित्यर्थः । आदिना सम वायसंग्रहः । **इत्यर्थ इति** । एतदनन्तरं 'रूपमत्रापि कारणं द्रव्याध्यक्ष इति । अत्रापि त्वगिन्द्रियजन्येपि । तथाच बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणमित्यर्थः' इति पाठः । त्वाचचाक्षुषयो रूपस्य पृथक्कारणत्वशङ्कामपनुदति—**तथाचेति । रूपमिति** । चक्षुरूष्मादेस्त्वाचापत्तिवारणाय रूपमुद्भूतं बोध्यम् । 'बहिरिन्द्रियजन्यद्रव्यप्रत्यक्ष मात्रे' इत्यत्र 'मात्र'पदरहितः, 'न किञ्चिदपि' इत्यत्र 'अपि'शब्दरहितश्च ताळी ग्रन्थपाठः । **आत्मावृत्तीति** । यद्यप्यात्मावृत्तिशब्दभिन्नविशेषगुणसमनियतः स्पर्श इति स्पर्शत्वेन स्पर्शस्यैव प्रयोजकत्वं लाघवाद्युक्तमिति शङ्का भवति, तथापि चक्षु रूष्मादेर्बहिरिन्द्रियजन्यप्रत्यक्षापत्त्या प्रयोजकत्वं न केवलस्य स्पर्शस्य, न वा तादृशगुणवत्त्वस्य, किन्त्वात्मावृत्तिशब्दभिन्नोद्भूतविशेषगुणवत्त्वस्येत्यवश्यं वाच्यम् । इत्थञ्च नोद्भूतस्पर्शेनान्यथासिद्धिः, प्रभाया अप्रत्यक्षत्वापातात् । **स्पृशामीतीति** । एत दुत्तरं 'प्रत्ययसत्त्वात्' इति पाठः । **संख्यापरिमाणाद्यग्रह इति** । आदिपदरहितः प्रायशस्ताळीग्रन्थपाठः । स एव दिनकरसम्मत इति प्रतिभाति ॥

दि—**त्रुटेः स्पार्शनेति** । त्रुटिपदं प्रभाया अप्युपलक्षकम् । वायुस्पर्श स्पार्शनोपपत्तये द्रव्यसमवेते स्पर्शान्यत्वविशेषणं प्राचीनानामावश्यकम्, न तु नवीनाना मिति विवेको बोध्यः । स्पार्शनवद्द्रव्यसमवायेनेत्यत्र द्रव्यपदरहितः ताळीग्रन्थपाठः ॥

त—वायोः स्पार्शनाङ्गीकारो नोचितः, उक्तकारणविरहादित्यनुक्त्वा 'अन्यथा वायुगत' इत्यादिना दोषप्रदर्शनं व्यर्थमिति शङ्कां व्युदसितुमाह—**अत्र च यद्यपीति** । महत्त्वे प्रकृष्टत्वस्य जातितया त्रुटिभिन्नत्वापेक्षया लाघवादाह—**प्रकृष्टमहत्त्वस्य वेति । नासङ्गतिरिति** । नन्वेवं वायुचतुरणुकस्य कया सामग्र्या स्पार्शनमिति चेत्, महत्त्वोद्भूतस्पर्शत्वक्संयोगादिघटितयेत्यवेहि । **उद्भूतस्पर्शसहितं महत्त्वमिति** । त्वक्त्रुटिसंयोगकाले त्रुटिगतस्य संख्यादेः पृथिवीत्वादेश्च स्पार्शनवारणाय महत्त्वमत्र

तरङ्गिण्यां आत्मावृत्तीत्यनन्तरं त्वावच्छिन्नेत्यादिप्रयोजकत्वमित्यन्तं प्रक्षिप्तम् ॥
प्रभाया अप्युपलक्षकमिति । अत एव स्पार्शनयोग्यतायां उद्भूतस्पर्शवत्त्वं सार्थकमिति भावः ॥

प्रकृष्टं बोध्यम्। नचैवं चतुरणुकस्पार्शनानुपपत्तिरिति वाच्यम्, कार्यतावच्छेदकघटक द्रव्यसमवेते द्रव्यान्यत्वस्यापि निवेशात्। द्रव्यस्पार्शनन्तु दर्शितदिशा प्रकृष्टमहत्त्व त्वगिन्द्रियसंयोगादिकारणकलापात्। इत्थञ्च 'त्रुटेः स्पार्शनवारणाय' इत्यत्र त्रुटिपदं तद्गतसंख्यापरिमाणादिपरम्। एवञ्च 'अत्र च यद्यपि' इत्यादिशङ्कासमाधानयोरपि नाव काश इति मन्तव्यम्। केचित्तु दर्शितदोषवारणाय कार्यतावच्छेदकघटकद्रव्ये त्रुट्य न्यत्वं निवेशनीयम्। त्रुटिसमवेतस्पार्शनत्वञ्च न कस्यापि कार्यतावच्छेदकमिति न तत्संख्यादिस्पार्शनापत्तिः। चतुरणुकस्य चोक्तरीत्यैव स्पार्शनसम्भवः। एवञ्च 'त्रुटेः स्पार्शनवारणाय' इत्यत्र त्रुटिपदमपि यथाश्रुतार्थकमेवेति वदन्ति ॥

दि—**वायुगतप्रत्यक्षतेति।** 'वायुप्रत्यक्षता इति ताळीग्रन्थपाठः। **इत्यादिकमिति।** सजातीयसंवलनस्य दोषत्वकल्पनागौरवमादिपदार्थः। केषुचित् ग्रन्थेषु 'इत्यादिकम्' इति न दृश्यते ॥

सु—'मनसा' इत्यस्य ज्ञाने अन्वयभ्रमम्, 'ज्ञान' इत्यस्यापि अनुपदोक्त द्रव्याध्यक्षपरत्वभ्रमञ्च वारयितुमाह—**त्वङ्मनस्संयोगो ज्ञानसामान्ये कारणमित्यर्थं इति।** कार्यकारणभावश्च शरीरनिष्ठावच्छेदकत्वप्रत्यासत्त्येति दिनकरीये अग्रे स्पष्टम्। एककार्यकारित्वं प्रसङ्गो वात्र सङ्गतिरवसेया। **सुषुप्तिकाल इति।** सुषुप्तिश्च पुरीततिमनस्संयोगरूपा। **ज्ञानाजननमितीति।** सुषुप्तौ ज्ञानाभावः किञ्चित्कारणाभावप्रयोज्यः कार्याभावत्वात् घटाभाववदिति प्रयोगः। इत्थञ्च ज्ञानाजननमित्यस्य ज्ञानाजननपक्षकानुमानमित्यर्थः। दृष्टा चैतादृशी लक्षणा 'कार्यायोजनधृत्यादेः' इत्याचार्यपद्यादौ। यद्वा, सुषुप्तिकालः यत्किञ्चिज्ज्ञानकारणाभाववत्त्वाव्यवहितप्राक्क्षणकः ज्ञानोत्पत्त्यभाववत्त्वादिति न्यायाकारः। सामान्यमुखी चात्र व्याप्तिर्बोध्या। नच पूर्वक्षणे त्वङ्मनोयोगसत्त्वात्सुषुप्त्युत्पत्तिक्षणे कुतो न ज्ञानोत्पाद इति शङ्क्यम्, पूर्वक्षणे त्वङ्मनस्संयोगात्मकपूर्वसंयोगस्य नाशात्तं विना सुषुप्त्यात्मकोत्तरसंयोगस्यैवासम्भवात् ॥

---

त्रुटित्वस्य जातित्वाभावेन त्रुटिभिन्नत्वनिवेशे गौरवमेवास्वरसो वदन्तीत्यनेन सूचितः ॥

लक्षणां विनाप्युपपत्तिमाह—यद्वेति। अत्र पक्षतावच्छेदकादिकोटौ तत्पुरुषीयत्वं निवेशनीयम्, साध्ये यत्किञ्चित्त्वमपि कारणविशेषणतयेति बोध्यम्। 'सामान्यमुखीति'। यत्काले यत्कार्योत्पत्त्यभाववान्, स तन्निरूपितयत्किञ्चित्कारणाभाववत्त्वाव्यवहितप्राक्क्षणक इति सामान्यमुखीत्यर्थः ॥



त—**उत्तरग्रन्थानुत्थितेरिति।** ननूत्तरग्रन्थो मास्त्विति चेन्न, एकत्र मानसाभावः तत्कारणाभावप्रयुक्तः, अपरत्र तत्प्रयोजकसामग्रीविरहप्रयुक्त इति वैलक्षण्यद्योतनाय पृथगभिधानस्यावश्यकत्वात् ॥

दि—**प्रत्यक्षसामग्र्यन्तर्गतस्येति।** व्यापकधर्मावच्छिन्नजनकसामग्रीत्वात्तस्या इति भावः। अस्मिन् विषये 'अध्यक्षो विशेषगुणयोगतः' इति मूलव्याख्यानस्थले यदुक्तं तदत्रानुसन्धेयम्। यद्वा, ज्ञानादितत्तद्विषयकप्रत्यक्षत्वस्यात्मप्रत्यक्षत्वव्याप्यत्वाद्व्याप्यधर्मावच्छिन्नान्यतमसामग्र्यभावोऽत्र दर्शितो बोध्यः ॥

त—**युक्तमुत्पश्याम इति।** अत्रेदमालोचनीयम्—सुषुप्तिप्राक्काले इच्छादेरङ्गीकारे चिकीर्षादिघटितसामग्रीसत्त्वात्सुषुप्तिकाले प्रवृत्त्यादेरापत्तिः। त्वङ्मनस्संयोगस्य कारणत्वेपि नास्या निस्तारः, तस्य ज्ञानं प्रत्येव कारणत्वेन तदभावस्यात्र किञ्चित्करत्वात्। अतः सुषुप्तेः प्राक् स्वप्नात्मकं ज्ञानमेवाभ्युपेयम्। प्रलापादीनां जाग्रत्कालीनत्वाङ्गीकारे क्षतिविरहः। स्वप्नाव्यवहितकालोत्पन्नत्वाच्च तेषां स्वाप्निकत्वव्यवहार इति दिनकरभट्टव्याख्या सङ्गतैवेति ॥

सु—**आत्ममनश्च प्रत्यक्षत्वप्रसङ्गादिति।** नन्वेवं मानसस्यैवापत्त्या मानसत्वमेवास्तु कार्यतावच्छेदकम्, सम्भवति व्याप्यधर्मस्य तत्त्वे व्यापकधर्मे तत्त्वायोगादिति चेन्न, सुषुप्तौ चाक्षुषाद्यभावप्रयोजकतया बहुषु कल्पनापेक्षया ज्ञानत्वस्य कार्यतावच्छेदकत्वस्वीकारस्यैव युक्तत्वात्, सुषुप्तिप्राक्कालीनज्ञानस्य परामर्शादिरूपत्वे अनुमित्यादेरापत्तिसम्भवाच्च। **रासनेति।** 'रासनादिप्रत्यक्षकाले' इति ताळीग्रन्थपाठः। **ज्ञानहेतुत्वे इति।** ज्ञानपदरहितः ताळीग्रन्थपाठः। **स्पार्शनादिप्रतिबन्धकत्वमिति।** आदिपदं प्रक्षिप्तम्। **त्वाचप्रत्यक्षमितीति।** 'त्वाचप्रत्यक्षमिति वदन्ति' इति क्वचित्पाठः ॥

दि—**चाक्षुषमपि न स्यादिति।** इदञ्च मुक्तावल्यां 'तदा चाक्षुषादिप्रत्यक्षकाले' इति पाठाभिप्रायेण। रासनादीनामप्युपलक्षणमेतत्। 'चाक्षुषादिकमपि न स्यात्' इति वा पाठः। **यदि स्यादिति।** एतदनन्तरं 'स्यादपि तदा तत्प्रत्यक्षापत्ति' इत्यादिपाठः। **यदि च कार्यनाशेति।** त्वङ्मनस्संयोगस्यातिरिक्तकारणत्वकल्पनापेक्षया आत्ममनस्संयोगस्य कार्यसहभावेन हेतुत्वकल्पनमेव लघीय इति मनसिकृत्य

यदिचेत्युक्तम्। नच मनसः पूर्वदेशविभागकालोत्पन्नापेक्षाबुद्धेः सुषुप्तिकाले प्रत्यक्षापत्तिरिति वाच्यम्, तत्कालोत्पन्नज्ञानव्यक्तेरपेक्षाबुद्धित्वे मानाभावात्, अपेक्षाबुद्धेर्गुणग्रन्थवक्ष्यमाणरीत्या त्रिक्षणवृत्तित्वे मानाभावाच्च। स्पष्टञ्चेदं मणिमथुरानाथीये ॥

त—**द्रव्यं प्रत्येवासमवायिकारणस्येति** । अन्यथा द्रव्यस्य कदाचित् क्षणिकत्वं प्रसज्येतेति भावः। एककपालक्रियाधीनविभागसम्भवाद्धटोत्पत्तिकाले असमवायिकारणनाशोत्पत्तौ बाधकाभावात् क्षणिकत्वापत्तिरवसेया। **वैजात्यानङ्गीकारादिति**। वैजात्यावच्छिन्नासत्त्वेपि जीवनयोनियत्नसत्त्वात्तत्कार्यतावच्छेदककोटौ तादृशयत्नान्यत्वं देयमिति बोध्यम्। **चकारः प्रामादिक एवेति**। त्वङ्मनस्संयोगादेर्हेतुत्वेप्युक्तदोषवारणाभावस्य समुच्चयसम्भवात् प्रामादिकत्वोक्तिश्चिन्त्या। **तद्भिन्नेति**। सुषुप्तिप्राक्कालीनात्ममनस्संयोगभिन्नेत्यर्थः। **आदिपदेन पुरीततीति**। 'आदिपदेन पुरीततिमनस्संयोगाभावस्यैव ज्ञानकारणतायाम्' इति साधुः पाठः। **एवमेव** 'आदेः' इति षष्ठ्यर्थस्य हेतुतायामन्वयसम्भवात् ॥

दि—'तत्प्रत्यक्षवारणात्' इत्यनन्तरं 'तच्च वैजात्यम्' इत्यारभ्य 'भावः' इत्यन्तः, एवं 'सुषुप्तित्वाभावाच्च' इत्यनन्तरं 'तदानीं मनसः' इत्यारभ्य 'बाधकाभावात्' इत्यन्तश्च ग्रन्थः क्वचित् दृश्यमानः प्रक्षिप्तो ज्ञेयः ॥

मु—**मतिर्ज्ञानमिति** । 'स्मृतिस्त्वतीतविषया मतिरागामिगोचरा' इत्यभियुक्तवचनान्मतिशब्दस्य ज्ञानविशेषबोधकत्वसम्भवात् प्रकृते तत्परत्वभ्रमं व्यावर्तयितुमियं व्याख्या। एवं 'कालिदासस्य कृतिः' इत्यादौ कृतिकर्मणि प्रयोगादाह—**कृतिर्यत्न इति** ।

भा—मनोग्राह्यमित्यादिकारिकया ज्ञानस्य प्रत्यक्षत्वमुक्तम्। तत्र सुखत्वाद्यवच्छेदेनेव ज्ञानत्वावच्छेदेन प्रत्यक्षयोग्यत्वभ्रममपाकर्तुमाह—**ज्ञानं यदिति** । ज्ञानमित्यस्य प्रत्यक्षमित्यर्थः, प्रत्यक्षस्यात्र प्रकृतत्वात्। इत्थञ्च निर्विकल्पकसविकल्पकभेदेन प्रत्यक्षद्वैविध्यमपि मूलेनानेन सूचितम् ॥

---

तत्कार्यतावच्छेदककोटाविति । सविषयकत्वरूपविजातीयात्ममनस्संयोगकार्यतावच्छेदककोटावित्यर्थः ॥



मु—**चक्षुस्संयोगाद्यनन्तरमिति** । एतत्पूर्वं 'निर्विकल्पाख्यमिति' इत्यपि पाठः ॥

दि—**घटत्वादिप्रकारकमिति** । अत्रादिपदं प्रक्षिप्तम्। **तन्निर्वाहायेति** । ननु घटत्वादेः किञ्चिद्रूपेण भासकं जातिरित्यादिज्ञानं यत्र नास्ति, तत्र घटत्वादेरन्याप्रकारकं ज्ञानम्, नान्यत्र इत्येव वक्तव्यम्, किं तादृशघटत्वादिज्ञानस्य कारणत्वेनेति चेन्न, यत्र जातिघटादिपदाभ्यां जातित्वेन स्वरूपतश्च घटत्वाद्यवगाहि शाब्दादिकं जातम्, तदनन्तरं घटो जातिमानिति प्रत्यक्षानुपपत्तेः। अथैवमपि जातित्वघटत्वयोर्विशकलितज्ञानानन्तरं घटो जातिमानिति विशेष्ये विशेषणमिति रीत्या प्रत्यक्षापत्तिरिति चेन्न, इष्टत्वात्। **वैशिष्ट्येति** । स्थलत्रयेपि 'वैशिष्ट्यनिष्ठसांसर्गिकविषयता' इति पाठः। निरासेनैवेत्यत्र 'शून्यत्वाभिधानेन' इति ताळीग्रन्थपाठः ॥

मु—**न प्रत्यक्षमिति** । न प्रत्यक्षविषय इत्यर्थः। मूलस्थातीन्द्रियपदव्याख्येयम्। **तथाहीत्यादि** । अत्र दिनकरीये च वैशिष्ट्यानवगाहीति मुद्रितपाठस्थाने 'विषयानवगाहि' इति साधुः पाठः। इममेवानुसरति 'घटाद्यवगाहित्वेनैव' इत्यादि प्रकाशग्रन्थः। इत्थमेव च दृश्यते ताळीपत्रग्रन्थेषु। प्रभाकृतामप्ययमेव सम्मतः। **इति प्रत्ययादिति** । अनेन जानामीत्याकारकस्य निर्विकल्पकप्रत्यक्षस्य सम्भावना निराकृता। स्वविषयविषयकस्यापि तस्य तां निराकरोति—**तत्रात्मनीत्यादिना** । **विशेषणतावच्छेदकमितीति** । विशेषणतावच्छेदकत्वमत्र विशेषणव्यावर्तकत्वरूपमिति प्रभाकृतः। तच्चिन्त्यम्, प्रमेयं जानामीत्यनुव्यवसायविषयप्रमेयत्वे तदसम्भवात्। अतः प्रकारतावच्छेदकताख्यविषयतारूपमेव तदिति ध्येयम्। **विशिष्टवैशिष्ट्यज्ञाने कारणमिति** । अत्र विशिष्टवैशिष्ट्यप्रत्यक्षत्वमेव कार्यतावच्छेदकम्, अनुमित्यादौ परामर्शादीनां विशेषणतावच्छेदकप्रकारकनिर्णयत्वनियमादिति केचित्। परेतु, यत्र गन्धव्याप्यपृथिवीत्ववत्तापरामर्शकाले असुरभिगन्धाभावज्ञानं गन्धत्वाविषयकसुरभिस्मरणञ्च तत्र घटः सुरभिगन्धवानिति विशिष्टवैशिष्ट्यावगाह्यनुमित्यापत्त्या, इतरभेद इति ज्ञानाभावेपि इतरत्वव्यापकत्वघटितपरामर्शादितरभिन्नेति विशिष्टवैशिष्ट्यावगाह्यनुमित्यापत्त्या च ज्ञानत्वघटितमेव कार्यतावच्छेदकमिति वदन्ति ॥

---

नान्यत्रेति । न किञ्चिद्रूपेण भासकसामग्रीस्थल इत्यर्थः ॥

दि—घटत्वादिविशिष्टघटादिवैशिष्ट्येति । एतत्स्थाने 'विशिष्टवैशिष्ट्य' इति ताळीग्रन्थपाठः । मूले 'घटादि' इति पदरहितश्चेति बोध्यम् ॥

मु—महत्त्वमितीति । 'महत्त्वं षड्विधे हेतुरिति' इति पाठः । **द्रव्यसमवेतानां गुणकर्मसामान्यानामिति** । द्रव्यसमवेतप्रत्यक्षत्वस्य त्रुटिचाक्षुषेपि सत्त्वात्तत्र सामानाधिकरण्येन महत्त्वाभावाद्व्यभिचार इति तद्वारणाय द्रव्यसमवेते द्रव्यान्यत्वं देयम् । इत्थञ्च गुणादिप्रत्यक्षं प्रत्येव महत्त्वस्य सामानाधिकरण्येन हेतुत्वमिति बोधयितुमुक्तं गुणकर्मसामान्यानामिति । **नानैवानुद्भूतत्वमिति** । अत्र केचित्, रसनाचक्षुषोरिव घ्राणेप्यनुद्भूतं रूपं शुक्लमेवेति शुक्लत्वव्याप्यमेवानुद्भूतत्वं लाघवात् । अनुद्भूतरूपस्यात्यन्तापकृष्टतया न शुक्लत्वव्याप्योत्कर्षापकर्षाभ्यामपि साङ्कर्यम् । तेजश्शुक्लगतभास्वरत्वमादाय साङ्कर्यवारणाय भास्वरत्वव्याप्यमेकं तद्विरुद्धमपरमिति द्वे एव रूपनिष्ठे अनुद्भूतत्वे । रसगतमनुद्भूतत्वं मधुरत्वव्याप्यमेकमेव । घ्राणपाषाणादौ सुरभिरसुरभिर्वा गन्ध इत्यत्र विनिगमकाभावात् द्वे अनुद्भूतत्वे गन्धनिष्ठे । एवं स्पर्शनिष्ठान्यपि शीतत्वादिव्याप्यानि त्रीणि । अतोऽनुद्भूतत्वाभावाष्टकवत्त्वमेवोद्भूतत्वमिन्द्रियलक्षणघटकमिति वदन्ति । पृथिवीरूपरसयोः पाकाधीनत्वात् घ्राणे शुक्ल एव वर्णः मधुर एव रस इति निर्णेतुमशक्यत्वमभिसन्धाय शुक्लत्वादिव्याप्यं नानैवेति ग्रन्थकारः प्रत्यपादयत् । भाष्याद्यननुसारिणः स्वतन्त्रास्त्वनुद्भूतरूपादिकमेव नाभ्युपगच्छन्ति । गन्धाद्यनुमापकं पृथिवीत्वादिलिङ्गञ्चाप्रयोजकं मन्यन्त इत्यलमधिकेन । 'नवीनमते' इति प्रक्षिप्तम् । **सन्निकर्षघटकतया कारणीभूतेति** । अथ कारणतावच्छेदकधर्माणामन्यथासिद्धत्वमेवेति न कारणत्वमिति चेन्न, अनन्यथासिद्धत्वाघटितमेव कारणत्वमत्र लक्षणे निवेश्यते, लघुभूतमनोघटनेनैव दोषवारणादित्यभिप्रायात् । नचाकाशादिवदुदासीनकालमनस्संयोगस्यापि नियतपूर्ववृत्तित्वमव्याहतमिति तद्दोषतादवस्थ्यमिति वाच्यम्, मनःक्रियया कालमनस्संयोगनाशोत्तरक्षणमपि ज्ञानसम्भवान्नैयत्याभावात् । नच कालमनस्संयोगनाशकाले आत्ममनस्संयोगस्यापि नाशान्न तदुत्तरं ज्ञानसम्भव इति वाच्यम्, कालचक्षुस्संयोगाद्या ये दर्शितकारणतावच्छेदकसम्बन्धघटकाः, तद्भिन्नत्वाघटितानन्यथासिद्धत्वस्य निवेशात् । मनःप्रतियोगिकत्वनिवेशे कालचक्षुस्संयोगाद्यन्यत्वस्य गुरुणो न निवेशावश्यकतेति लाघवस्येदानीमप्यनपायात् । 'वारणाय वा मनःपदम्' इति पाठः । **ज्ञानकारणमित्यपि तद्वारणायेति** । यद्यपि ज्ञानकारणेष्वात्मेन्द्रियैस्सह मनस्संयोगेषु



वैजात्यं चर्ममनस्संयोगव्यावृत्तं स्वीकृत्यात्ममनिन्नत्वे सति तादृशविजातीयवत्त्वमेव लघु लक्षणं सम्भवति, तथापि लक्षणस्य लक्षणान्तरादूषकत्वाददोषः ॥

दि—घटाद्यभावेति । आदिपदं प्रक्षिप्तम् ॥

मु—व्यापारः सन्निकर्ष इति । एतत्पूर्वं 'विषयेन्द्रियसम्बन्धो व्यापारः सोपि षड्विध इति' इत्यपि पाठः ॥

त—शब्दादेर्निर्विषयस्यैव व्यापारत्वादिति । ननु शब्दत्वादिप्रत्यक्षे को व्यापार इति चेच्छब्द एव, शब्दाविषयकशब्दत्वादिसाक्षात्कारस्याननुभवात् । परन्तु शब्दाभावप्रत्यक्षे एवमप्यगतिरित्यस्मिन् कल्पेऽस्वरसं सूचयितुमस्तु वेत्युक्तिः । वस्तुतस्तु, सर्वत्रेन्द्रियमनस्संयोगस्य जन्यत्वघटितव्यापारत्वसम्भवाच्चक्षुरादीनां करणत्वोपपत्तिरवसेया । **प्रत्यक्षत्वावच्छिन्नस्यैवोपादानसम्भवादिति** । अतीन्द्रियसन्निकर्षात्मकव्यापकधर्मावच्छिन्नजनकसामग्रीसमवहितमालोकसंयोगरूपं चाक्षुषहेतुमुपादाय चाक्षुषत्वावच्छिन्नापत्तिरपि सम्भवति । एवमुद्भूतस्पर्शमादायान्धकारे स्पार्शनत्वावच्छिन्नापत्तिरपीति विभावनीयम् ॥

दि—एवमन्धकार इति । नन्वनन्धकारेपि कुतो नेयमापत्तिरिति न शङ्क्यम्, तत्र चाक्षुषोदयेन तत्सामग्र्याः स्पार्शनप्रतिबन्धकत्वाङ्गीकारे तद्वारणात् । वायोः प्रत्यक्षत्वनये वायुचक्षुस्संयोगादनन्धकारेपि स्पार्शनापत्तिर्बोध्या ॥

मु—चक्षुस्संयुक्तसमवाय इति । एतदनन्तरं 'कारणम्' इति प्रक्षिप्तम् । 'चक्षुस्संयुक्तसमवेतसमवायः इति विशिष्यैव कार्यकारणभावः' इति पाठः ॥

त—घ्राणेन्द्रियादिसंयोगसत्त्वेपीति । घ्राणसंयुक्तजलादिसमवायसत्त्वेपि द्रव्यसमवेतनिष्ठलौकिकविषयतासम्बन्धेन प्रत्यक्षसामान्याभावसत्त्वादिन्द्रियसंयुक्तसमवायस्यापि न तत्र प्रयोजकत्वमित्याद्यूह्यम् ॥

दि—संयोगतत्संयुक्तसमवाययोः प्रत्यासत्तित्वे प्रमाणाभाव इति । अत्र केचिदाहुः—संयुक्तसमवेतसमवायस्यैव प्रत्यासत्तित्वे घटतन्नीलनीलत्वानां प्रत्यक्षे

---

तद्वारणादिति । ननु तरङ्गिण्युक्तरीत्या प्रत्यक्षत्वावच्छिन्नस्यैवापाद्यतया घटचक्षुस्संयोगकाले अनन्धकारे प्रत्यक्षस्येष्टत्वात् स्थलान्तरे आपत्तिं दर्शयति—वायोरिति ॥

सन्निकर्षघटकतया कारणत्वं क्रमेण कपालिकाकपालघटसंयोगानां वक्तव्यमिति गौरवम्। संयोगादेः प्रत्यासत्तित्वे च घटसंयोग एव कारणमिति लाघवमेव तयोस्तत्त्वे मानम्। अत एव घटादिप्रत्यक्षकाले न नियमेन कपालत्वतद्रूपादिचाक्षुषापत्तिरिति 'नन्वेवम्' इत्याद्यवतारिका न सुसङ्गतेति। तन्न समञ्जसम्, आवश्यकैकविधकार्यकारणभावे सिद्धे नानासंयोगव्यक्तीनां कारणतावच्छेदकघटकत्वप्रयुक्तप्रयोजकत्वकल्पनागौरवं फलमुख त्वान्न दोषावहम्, चक्षुस्संयुक्तघटादिसमवायस्य घटादिगतगुणकर्मसामान्येषु तुल्यत्वेपि घटचाक्षुषकाले सर्वदा सर्वेषां तेषां प्रत्यक्षापादनं कस्यचित् प्रतिबन्धकत्वं कल्प यित्वा यथा परिह्रियते, तथा घटादिप्रत्यक्षकाले नियमेन कपालत्वादिप्रत्यक्षापत्तिरपि परिहर्तुं शक्यत इति प्रकाशस्यावतारिकाया असाङ्गत्याभाव इति। द्रव्यसमवेतादिचाक्षुषे महत्त्वादीनां न पृथक्कारणत्वमिति बोधयितुमाह—परन्त्विति इति रीत्या कुतो नावतारितमिति न शङ्क्यम्, उद्देशक्रममुल्लङ्घ्य द्रव्यसमवेतसमवेतप्रत्यक्षकारणतायां दोषस्य प्रथमं प्रदर्शने निमित्ताकाङ्क्षाया अपरिहारात्॥

मु—**पृथिवीत्वं च चक्षुषेति।** सामानाधिकरण्येन महत्त्वाभावादेव पृथिवी परमाणुनीलादौ नापत्तिरिति पृथिवीत्वपर्यन्तानुधावनम्। संयुक्तसमवायेनापि संयोगस्य नान्यथासिद्धिरिति ज्ञापयितुमेव पृथिवीपरमाणौ पृथिवीत्वप्रत्यक्षापादनमत्र कृतं वेदि तव्यम्। **महत्त्वावच्छिन्नेति।** एतदुत्तरं 'चक्षुस्संयुक्तसमवेतसमवायस्य द्रव्यसमवेतसम वेतप्रत्यक्षे, तादृशचक्षुस्संयुक्तसमवायस्य द्रव्यसमवेतप्रत्यक्षे' इति साधुः पाठः, 'पृथिवी परमाणुनीले नीलत्वम्' इत्यादिपूर्वस्य 'इत्थञ्च परमाणुनीलादौ न नीलत्वादिग्रहः' इत्यु त्तरस्य च ग्रन्थस्यानुरोधात्। अत्रैवं परिष्कारे कृते तादृशचक्षुस्संयुक्तसमवेतसमवाय कार्यतावच्छेदकसम्बन्धघटकद्रव्यसमवेतसमवेते द्रव्यान्यत्वं द्रव्यसमवेतान्यत्वञ्च देयम्। अन्यथा द्रव्यसमवेतसमवेतनिष्ठलौकिकविषयतासम्बन्धेन चाक्षुषं त्रुटौ त्रुटिरूपादौ च वर्तते, तत्र च न यथोक्तकारणमिति व्यभिचारापत्तेः। एवं चक्षुस्संयुक्तसमवायकार्य तावच्छेदकसम्बन्धकोटावपि द्रव्यसमवेते द्रव्यान्यत्वं देयम्। इत्थञ्च द्रव्यचाक्षुषे चक्षु स्संयोग एव प्रत्यासत्तिः, नेतराविति च ज्ञेयम्। **आलोकसंयोगावच्छिन्नत्वमिति।** आलोकसंयोगावच्छेदकदेशावच्छिन्नत्वमित्यर्थः। सामानाधिकरण्यरूपत्वे उक्तदोषा निवृत्तेः॥



दि—**उद्भूतरूपेत्यादि।** 'उद्भतेति' इति प्रतीकपाठः। **उद्भूतरूपावच्छि न्नेतीति।** अत्र इतीति प्रक्षिप्तम्। 'नान्यथासिद्धिरित्याह' इत्यनन्तरं 'द्रव्यसमवेतेति' इति प्रक्षिप्तम्। **तथावेति।** एतदनन्तरं 'महत्त्वावच्छिन्नचक्षुस्संयुक्तसमवेतसमवायस्य' इति पाठः॥

मु—**रासनप्रत्यक्षे इति।** 'रसप्रत्यक्षे' इति पाठो युक्ततरः। 'रस समवेत' इत्यत्र 'रससमवेतस्य' इति ताळीग्रन्थपाठः॥

त—चक्षुष्ट्वादेरित्यत्र 'शुक्लत्वादेः' इति पाठः॥

दि—**प्रभाघटितेति।** 'प्रभाघटितसन्निकर्षात्सत्तादिस्पार्शनवारणाय उद्भूत स्पर्शावच्छिन्नत्वम्' इति पाठः॥

भा—'प्रत्यक्षं समवायस्य' इत्यादिकारिकार्धानन्तरमेव 'विशेषणतया तद्वत्' इति कारिकापाठो युक्तः, अन्यथा समवायवदित्यर्थक'तद्व'दित्यस्यासाम ञ्जस्यापत्तेः। मुक्तावल्यामपि 'समवायप्रत्यक्षे अभावप्रत्यक्षे च' इति क्रमो ज्ञेयः। अत एव प्रथमं समवायप्रत्यक्षविषय एव मतान्तरं दर्शितम्। तरङ्गिण्यामपि 'समवाया भावयोः प्रत्यक्षम्' इत्युक्तम्॥

मु—भूतलादिनिरूपितघटाभावादिनिष्ठविशेषणतायाश्चक्षुरादिप्रतियोगिकत्वा भावात् कथं प्रत्यासत्तित्वमिति शङ्कामपनुदति—**इन्द्रियसम्बद्धविशेषणतेति॥**

[1]दि—अभावप्रत्यक्षजनकसन्निकर्षविचारे 'यदि स्यात्' इत्यादिग्रन्थावश्य कतां स्पष्टयितुमाह—**नन्वित्यादि॥**

त—'कालिकेन सम्बद्धे घटादौ विशेषणतया' इत्यनन्तरं 'पटत्वाभावादेः प्रत्यक्षापत्तेः' इति पाठः। **इत्यस्येति।** 'नच समवायप्रत्यक्षानुरोधात्, तस्यानुपगमात्' इति तरङ्गिणीकृत्सम्मतः प्रकाशपाठः। अत एव पूरणावश्यकता। **अवयवावयव्या दीनामिति।** अथैवं रूपादिप्रत्यक्षे चक्षुस्संयुक्तस्वरूपमेव प्रत्यासत्तिरित्यायातम्, तच्च रूपादाविवाभावेपि समानमिति कुतो नाभावप्रत्ययस्यापि प्रत्यक्षत्वमिति चेन्न, यतः प्रत्ययस्य प्रत्यक्षत्वे सिद्धे कस्यचित् प्रत्यासत्तित्वकल्पना, अन्यथा पर्वतो वह्निमानित्य नुमितिस्थले चक्षुस्संयुक्तसंयोगस्य वह्नौ सत्त्वात् तत्प्रत्यासत्त्या वह्निप्रत्यक्षापत्तेः, अत्र चाभाव प्रत्ययस्य प्रत्यक्षत्वं न सिद्धमिति तादृशस्वरूपस्याभावे सत्त्वेपि न तस्य प्रत्यासत्तित्वमिति॥

मु—एवं कत्वाद्यवच्छिन्नेत्यादिरूद्यमित्यन्तः प्रक्षिप्तः ॥

भा—यदि स्यादिति। स्यादित्यस्य प्रतियोगीत्यादिः। एवं उपलभ्ये तेत्यस्यापि 'तर्हि सः' इत्यादिः। स्यात् उपलभ्येत इत्युभयत्रापि लिङः आपत्तिरर्थः। यदितर्हिभ्यां च आपत्त्योर्हेतुहेतुमद्भावोपि बोध्यते। तदेव स्पष्टीकृतं मुक्तावल्यां प्रसञ्जन प्रसञ्जितेत्यनेन। यत्र यस्मिन्नधिकरणे। तत्र अभावानां ग्रहः इति सम्बन्धः ॥

दि—अनुपलम्भस्यैव तत्प्रत्ययस्येति। घटो नास्तीति प्रत्ययानन्तरं घटाभावं पश्यामि इति नानुव्यवसायाकारः, अपि तु घटं नोपलभे इतीत्याशयः। अथाभावप्रत्ययेपीन्द्रियकरणकत्वात् प्रत्यक्षत्वमनपवादमित्यत आह—अत एवेति। 'अभावप्रत्यये इन्द्रियम्' इत्यत्र प्रत्ययपदस्थाने प्रत्यक्षपदघटितः पाठोऽसाधुः, व्याहतार्थत्वात् ॥

त—इदानीन्त्विति। इदानीमित्यस्य पूर्वं 'भावः' इति स्थाने 'भाट्टाशयः' इति पठनीयम्। प्रतिबन्धकतयेति। एतदनन्तरं कारणीभूतेत्यादिः दुरपह्नवतयेत्यन्तः प्रक्षिप्तः। दोषप्रतिबन्धकतां विनैवेति। भूतलघटाभावयोरिन्द्रियसन्निकर्षसत्त्वेपि यत्र घटभ्रमजनकदोषोऽस्ति, तत्र भ्रम एव जायते, न त्वभावप्रमेति तदनुत्पत्तिनिर्वाहाय अभावप्रत्यक्षं प्रति दोषस्यापि प्रतिबन्धकत्वमावश्यकमिति विभावनीयम् ॥

दि—तदभावलौकिकप्रत्यक्ष इति। यद्यप्यभावालौकिकप्रत्यक्षं प्रत्यपि प्रतियोग्युपलम्भाभावः कारणम्, तथापि योग्यानुपलब्धेरभावेप्यलौकिकाभावप्रत्यक्षोदयाद्व्यभिचारस्स्यादिति लौकिकत्वनिवेशः। अत्रेदमवधेयम्—घटादेरिवाभावस्यापि प्रत्यक्षं द्विविधम्, अभावविशेष्यकम् अत्र घटो नास्तीत्याकारकम्, अभावप्रकारकम् अयं घटाभाववानित्याकारकञ्च। द्वितीयस्य कार्यत्वमभिप्रेत्योक्तं कारणकोटौ तत्प्रकारकेति। प्रथमस्थलानुरोधेनाभावविशेष्यकत्वादिकं घटयित्वा कार्यकारणभावान्तरमपि स्वयमूह्यम्। इन्द्रियसंयोगादिवदिन्द्रियसम्बद्धविशेषणताया निर्विकल्पकेपि हेतुत्वमिति न भ्रमितव्यम्, अभावस्य निर्विकल्पकानङ्गीकारात्। उक्तञ्च मणिकृता—'यत्र विशिष्टज्ञानसामग्री नास्ति, तत्र निर्विकल्पकम्। अत एवाभावे न निर्विकल्पकम्, तद्बुद्धौ प्रतियोग्यधिकरणज्ञानयोः कारणत्वेन तदुभयविशिष्टज्ञानसामग्रीनियमात्' इति। आलोकेपि 'अभावत्वस्याभाववित्तिवेद्यतया अभावत्वविशिष्टज्ञानसामग्र्यास्सत्त्वादपि नाभावे निर्विकल्पकमिति स्मर्तव्यम्' इति। नचैवं विशेषणज्ञानकारणताया भूतलं घटाभाववदिति प्रत्यक्षे व्यभिचार इति वाच्यम्, प्रथमं घटाभावादिविशेष्यकमेव प्रत्यक्षं जायते, तदनन्तरमेव चाभावप्रकारकमिति नियमात्। एतदपि तत्रैव चिन्तामणौ स्पष्टमित्यलमधिकेन। अभावप्रत्यक्षहेत्विति। अनेन विशेषणेन प्रतियोगिविशेषमनपेक्ष्य सर्वत्र कारणतावच्छेदककोटावनाहार्यत्वं दातव्यमिति बोध्यते। नव्यमते तु, यत्र स्थलविशेषे प्रतियोगिप्रकारकाहार्यं कस्यापि न जातम्, तत्रानाहार्यत्वं न निवेशनीयम्। व्याप्तिनिरूपकत्वमिति। व्याप्यव्यापकतावच्छेदकसम्बन्धौ क्रमेण प्रकृतप्रतियोगितावच्छेदकीभूतसम्बन्ध,विषयत्वरूपौ बोध्यौ। गन्धवदणुभिन्नत्वेति। अखण्डाभावसम्पादकतया गन्धवत्पदार्थसार्थक्यान्नात्र व्यर्थविशेषणत्वमित्याशयः। प्रतियोगिग्राहकेति। नच घटादिरूपप्रतियोगिनिष्ठव्याप्तौ घटत्वादेस्तदधिकरणावृत्तेः प्रतियोगिग्राहकातिरिक्तस्य चावच्छेदकत्वादप्रसिद्धिरिति वाच्यम्, सामानाधिकरण्यसम्बन्धावच्छिन्नावच्छेदकत्वानिरूपकत्वस्य, तदधिकरणावृत्तिधर्मे प्रतियोगितावच्छेदकातिरिक्तत्वस्य वा विवक्षितत्वात् ॥



त—एवमितीति। अस्य स्थाने 'एवमपि' इति पाठः साधुः। विरहेणैवेति। एतदुत्तरं 'स्तम्भे' इत्यपि पाठः। योग्यत्वस्येति। एतदुत्तरं 'तदधिकरणावृत्तिधर्मानवच्छिन्न' इति च पाठः। महत्त्वाभावे अक्षतैवेति। नच प्रत्यक्षत्वावच्छिन्नं प्रति महत्त्वस्य केनापि सम्बन्धेनाहेतुतया द्रव्यनिष्ठलौकिकविशेष्यत्वाभावे समवायसम्बन्धावच्छिन्नमहत्त्वाभावस्य, द्रव्यसमवेतनिष्ठताद्दशविशेष्यत्वाभावे सामानाधिकरण्यसम्बन्धावच्छिन्नमहत्त्वाभावस्येत्येवं रीत्यैव प्रयोज्यप्रयोजकभावः, नतु लौकिकविशेष्यत्वसामान्याभावे कस्यापि महत्त्वाभावस्य प्रयोजकता सम्भवतीति वाच्यम्, यतो लौकिकविशेष्यतात्वमनुगतमगुरु निर्वक्तुमशक्यमितीन्द्रियसंयोगप्रयोज्यविशेष्यत्वाभावप्रयोजकाभावप्रतियोगित्वे सति इन्द्रियसंयुक्तसमवायप्रयोज्यविशेष्यत्वाभावप्रयोजकाभावप्रतियोगित्वे सतीत्यादिरीत्या प्रतियोगित्वषट्कवत्त्वमेव प्रतियोगिग्राहकत्वं वक्तव्यम्। इत्थञ्च तत्तत्सम्बन्धावच्छिन्नमहत्त्वाभावानादाय प्रतियोगित्वषट्कमपि महत्त्वे अक्षतम्। इन्द्रियसंयोगादौ तु न सम्भवतीति। वस्तुतस्तु, महत्त्वाभावे इत्यस्य कारणतावच्छेदकीभूतसमवायाद्यन्यतमसम्बन्धावच्छिन्नप्रतियोगिताकमहत्त्वाभावे इत्यर्थः। कार्यतावच्छेदकसम्बन्धव्यापकसम्बन्धाव

---

अनिरूपकत्वस्येति। नतु यत्र सामानाधिकरण्यस्य प्रतियोगितावच्छेदकतावच्छेदकसम्बन्धत्वं यथा गुणान्यत्वविशिष्टसत्ता नास्तीत्यादौ, तत्र व्याप्यतावच्छेदकतायाः सामानाधिकरण्यसम्बन्धावच्छिन्नत्वेन तदनवच्छिन्नावच्छेदकत्वानिरूपकत्वस्य व्याप्त्यभावादाह—तदधिकरणेति।

च्छिन्नप्रतियोगिताककार्याभावे कारणतावच्छेदकान्यतमसम्बन्धावच्छिन्नप्रतियोगिताककारणाभावस्य प्रयोजकत्वमिति नियमात्। दृश्यते चैवमेव कार्यतावच्छेदकव्यापकधर्मावच्छिन्नकार्याभावं प्रति कारणतावच्छेदकान्यतमधर्मावच्छिन्नकारणाभावस्य प्रयोजकत्वम्। यथा तत्तल्लिङ्गकवह्न्यनुमितित्वव्यापकानुमितित्वावच्छिन्नाभावं प्रति तत्तल्लिङ्गकपरामर्शत्वान्यतमावच्छिन्नप्रतियोगिताकाभावस्य प्रयोजकत्वम्। **इन्द्रियसंयोगादीनामभावेति।** गीतं मधुरमित्यादिज्ञानीयलौकिकविशेष्यताया इन्द्रियसंयोगाभावेपि गीतादौ सत्त्वान्नेन्द्रियसंयोगाभावस्य लौकिकविशेष्यतासामान्याभावप्रयोजकत्वम्। एवमादिपदग्राह्यसंयुक्तसमवायादीनामभावस्यापि बोध्यम्॥

**दि—लौकिकविशेष्यत्वाप्रसिद्धचेति।** ननु स्तम्भः पिशाच इति भ्रमीयलौकिकविशेष्यत्वं प्रसिद्धमेवेति चेन्न, प्रकारताया अपि लौकिक्या एव निवेशनीयतया अप्रसिद्धिसम्भवात्। तदनिवेशे रूपं पृथिवीत्यादिभ्रमीयप्रकारतानिरूपितलौकिकविशेष्यताया रूपादावपि सम्भवादिन्द्रियसंयोगे प्रतियोगिग्राहकातिरिक्तत्वापत्तेरपरिहारात्। **तदधिकरणीयत्वेति।** प्रतियोगितावच्छेदकसम्बन्धेन तदधिकरणवृत्तित्वेत्यर्थः। **जातित्वादिविशिष्टस्तम्भवृत्तित्वस्येति।** स्तम्भवृत्तित्वस्यात्र स्तम्भसमवेतत्वरूपत्वाज्जातित्वमत्र नित्यत्वमात्रमवसेयम्॥

**त—उपादानमिति।** उपादाने च तादृशविशेष्यताया द्रव्य एव सम्भवात् तदभावप्रयोजकत्वमिन्द्रियसंयोगाभावस्यानपवादमेवेति बोध्यम्। **इति शेष इति।** एतत्पूर्वम् 'अयोग्याभावप्रत्यक्षे' इति प्रक्षिप्तम्। **ग्राह्या चेत्तथावेति।** अत्र चेत् इति प्रक्षिप्तम्। **स्तम्भावृत्तीति।** 'स्तम्भवृत्ति' इति साधुः। तत्त्वेनोपलम्भासम्भवेनेत्यनन्तरं 'तदापादनासम्भवेन' इति पाठः क्वचित् लुप्तः। **न पिशाचादावितीति।** अत्रादीति प्रक्षिप्तम्। **सर्वत्रैव सम्भवतीति।** एतदनन्तरं 'किञ्चिदिन्द्रियजन्यप्रतियोग्युपलम्भत्वावच्छिन्नैव व्याप्तिनिरूपकता योग्यतालक्षणे' इति साधुः पाठः॥

**दि—ननु जातित्वादिविशिष्टस्येति।** अत्र प्रत्यक्षाप्रतिबन्धकत्वस्योद्भूतरूपस्य चादिपदग्राह्यत्वान्न वह्निगतवैजात्यचक्षुष्ट्वयोर्व्यभिचारः। तेजःपदस्य सौरादि

---

**अपरिहारादिति।** तथाच प्रतियोगिसत्त्वनिष्ठव्याप्तेस्तदतिरिक्तधर्मानवच्छिन्नत्वं दुर्घटमिति जले पृथिवीत्वाभावप्रत्यक्षस्यानुपपत्तिरिति भावः॥



तेजोविशेषार्थकत्वे तु न तयोरादिपदग्रहणेन निवेशावश्यकतेति ध्येयम्। स्तम्भे पिशाचाभावस्येति साधुः। **अशक्यत्वादितीति।** नन्वत्र गुरुत्वादिप्रत्यक्षापादनाशक्यत्वस्य हेतुतयोपन्यासोऽसङ्गतः, प्रतियोगिप्रत्यक्षापादनयोग्यतायाः प्रथमयोग्यानुपलब्धावेव घटकत्वात्, तस्याश्चायोग्यगुरुत्वाद्यभावप्रत्यक्षाहेतुत्वात्, द्वितीयायाश्चोक्तदिशा सत्त्वादित्यतो भावमाह—**निरुक्तेति।** तथाच पूर्वत्रापत्तौ तदधिकरणकत्वस्य व्याप्तौ तदधिकरणावृत्तिधर्मानवच्छिन्नत्वपर्यवसितस्यैवात्राप्यापत्तौ प्रतियोगिविशेष्यकत्वस्य व्याप्तौ प्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वपर्यवसितस्य निवेशः। तत्र गुरुत्वादिप्रत्यक्षस्य इत्यस्य च गुरुत्वादौ तदधिकरणीयत्वप्रत्यक्षस्येत्यर्थ इत्याशयः॥

**त—गुरुत्वादिकमिति पदमिति।** एतदुत्तरं 'तादात्म्येन प्रत्यक्षाप्रतिबन्धकजातिभिन्नसामान्यपरमेव' इति साधुः पाठः। सामान्यपदमत्र यावदर्थकम्। भिन्नान्तनिवेशान्न पिशाचत्वाभावस्याप्रत्यक्षापत्तिः। **तेनेति।** अप्रतिबन्धकत्वान्तस्य जातिविशेषणत्वेनेत्यर्थः। एवं 'गुरुत्वादिकं यदयोग्यम्' इत्यत्र 'गुरुत्वादिकं यथाऽयोग्यम्' इति पाठः साधुः। 'महत्त्वसत्त्वे तद्वृत्तित्वेन' इत्यत्रापि 'महत्त्वसत्त्वे तद्वत्त्वेन' इति पाठः। **तदभावे पिशाचेति।** 'तदभावेपि पिशाच' इति साधुः पाठः। **इत्यापत्तिवारणार्थमेवेति।** नच स्तम्भ इव वाय्वादौ पिशाचत्वाभावप्रत्यक्षापत्तिवारणाय तद्धेतुत्वमावश्यकमिति वाच्यम्, पिशाचत्वं नास्तीति बुद्धौ पिशाचभेद एव विषयः, तत्प्रत्यक्षेचेन्द्रियसम्बद्धयोग्यविशेषणतैव संसर्ग इत्यग्रे समाधास्यमानत्वात्। **संसर्गाभावप्रत्यक्ष इत्यादीति।** अत्र प्रत्यक्षेति प्रक्षिप्तम्। 'पिशाचत्वाभावादौ विषयत्वसत्वेन प्रत्यक्षस्य चोपपत्तेः' इति पाठः। अथ भावाभावसाधारणं योग्यतास्वरूपं निर्णीय योग्यमात्रप्रतियोगिकत्वे सतीत्यादिसंसर्गाभावयोग्यताप्रदर्शनफलं प्रतिपादयितुमारभते—**ननु केयं योग्यता नामेत्यादिना।** नेदं योग्यमात्रप्रतियोगिकत्वघटकयोग्यतानिर्वचनम्, योग्यमात्रेति प्रतीकस्योत्तरत्रैव दर्शनात्। सा च योग्यता प्रत्यक्षविषयत्वोपलक्षितत्वमेव। अत एव 'अथैवमपि पिशाचत्वादीनाम्' इत्याक्षेपसङ्गतिः। **मैवमिति।** एतत्पूर्वं 'चेत्' इत्यपि पाठः। एतदुत्तरं 'प्रतिबन्धकाभावत्वस्यैव' इति स्थाने 'प्रत्यक्षप्रतिबन्धकत्वाभावस्यैव' इति पाठः साधुः। एवं 'नचैवं गुरुत्वाभावादीनां गुरुत्वादिप्रतियोगिकाभावत्वेनैकप्रतिबन्धकतासम्भवेपि परमाण्वादीनां तद्गतानन्तरूपादीनाञ्चाभावव्यक्तीनाम्' इति पाठः। **विभावनीयं सुधी**

मानसे चात्ममनस्संयोगस्य व्यापारत्वाङ्गीकारेणेत्यर्थः, तेन शब्दप्रत्यक्षादौ नानुपपत्तिः । **विनश्यदवस्थापन्नेत्यादिरिति** । अनेन लौकिकसन्निकर्षस्य प्रत्यक्षाव्यवहितपूर्वसत्त्वमेवावश्यकम्, न तु तत्कालवृत्तित्वमपीति सूचितम् ॥

दि—धूमान्तरे सत्त्वादित्यनन्तरं 'धूमान्तराणाम्' इति पदं प्रक्षिप्तम् ॥

त—**एकक्षण इति** । अत्रापि पाठभेद आदर्तव्य इति भाति । स चेत्थम्—'पूर्वं चक्षुस्संयोगजन्यज्ञानसत्त्वेन सामान्यलक्षणया ज्ञानोत्पत्त्यापत्तेस्सम्भवात् तज्ज्ञानानन्तरञ्च ज्ञानप्रकारत्वविरहादेवापत्त्यसम्भवादिति भावः । नचैवमपि क्षणद्वयेपि तादृशज्ञानस्य सत्त्वात् द्वितीयतृतीयक्षणयोरापत्तिसम्भवादेकक्षण इत्यसङ्गतमिति वाच्यम्, यत्र पूर्वक्षणे धूमत्वप्रकारकज्ञानमासीत्, तत्र तज्ज्ञानद्वितीयक्षणे जायमानज्ञानस्य सामान्यलक्षणया सकलधूमविषयतायास्सर्ववादिसिद्धतया तृतीयक्षण एव तदापत्तिः कर्तव्येत्यभिप्रायेण एकक्षणाभिधानात्' इति । स्थितस्यैवोपपत्तिः पाठान्तरं वा सुधीभिः स्वयमूहनीयम् ॥

मु—**लौकिको ग्राह्य इति** । नच लौकिकत्वं ज्ञान एव निवेश्यतामिति वाच्यम्, ज्ञाने लौकिकत्वस्य संयोगसंयुक्तसमवायाद्यन्यतमसन्निकर्षजन्यत्वरूपादन्यस्य निर्वक्तुमशक्यतया गौरवात् ॥

दि—**अणुत्वेन यत्किञ्चिदिति** । अणुपदमत्र परिमाणपरम्, द्रव्यपरत्वे अणुत्वस्य परिमाणात्मकस्य सामान्यत्वासम्भवादिति ध्येयम् ॥

मु—**तद्घटेति** । 'तद्घटवतां भूतलादीनां कपालानां वा' इति पाठः । अत एव पूर्वं 'यत्रैको घटः' इत्युक्तम् । तमेवानुसरति दिनकरभट्टश्च ॥

दि—**नच तत्रेति** । पूर्वसूचितयोरेव शङ्कासमाधानयोः स्पष्टप्रतिपत्त्यर्थमनुवादोऽयम् ॥

त—'विशेषणत्वञ्च स्वविशेष्यान्वय्यन्वयित्वम्' इति साधुः पाठः । **मनोजन्यत्वस्य चेतीति** । वस्तुतस्तु, चाक्षुषत्वमानसत्वादिनैव ज्ञानस्य कारणतावच्छेदककोटौ निवेशो लाघवात् । इत्थञ्च 'मनोजन्यत्वस्य' इत्यस्य मानसत्वस्य इत्येवार्थ इति



'यद्यपि ज्ञानसामान्यस्य' इत्यादिशङ्कासमाधाने यथाश्रुतानुसारेण कृते इति वेदितव्यम् । **तद्विशेष्यताव्यावर्तकत्वेनेत्यर्थ इति** । तथाचेन्द्रियसम्बन्धप्रयोज्यलौकिकविशेष्यताकेत्यर्थः पर्यवस्यतीति भावः ॥

दि—**एवासत्तितयेति** । 'एव प्रत्यासत्तितया' इति पाठः । **इन्द्रियेति** । इन्द्रियसम्बद्धविशेष्यकं सामान्यप्रकारकं ज्ञानमित्यर्थः । यद्वा, 'सामान्यविषयकं ज्ञानमालम्' इति पाठः । **वक्ष्यमाणेति** । 'वक्ष्यमाणतदिन्द्रियजेत्यादिनैव' इति पाठः । **चाक्षुषमिति** । एतदुत्तरं 'तदा' इति प्रक्षिप्तम् । एवं 'तदोत्तरक्षणे' इत्यत्र 'तयोत्तरक्षणे' इति, 'ज्ञानं न जन्यते' इत्यत्र 'ज्ञानं जन्यते' इति च पाठः । **सन्निकृष्टघटांशे लौकिकमिति** । लौकिकमपीत्यपिना अलौकिकपरिग्रह इति केचित् । लौकिकसामग्र्या बलीयस्या प्रतिबन्धाल्लौकिकमेवेति परे । तरङ्गिणीकृद्भिरत्र प्रथम एव पक्षोऽवलम्बितः । **तथाच सामान्यलक्षणाजन्येति** । योगजधर्माधीनघटत्वप्रकारकप्रत्यक्षे व्यापकत्वभङ्गवारणाय सामान्यलक्षणाजन्येति ॥

त—**एतच्चापातत इति** । एतत्पूर्वं 'स्वप्रकारीभूतेति' इति प्रतीकपाठः । एकद्व्यादिघटविषयकप्रत्यक्षोत्पत्तावपि कारणाधिकरणेषु सर्वघटेषूक्तसम्बन्धेन कार्योत्पत्तेः सूपपादत्वान्न सर्वघटविषयकत्वनियमोपपत्तिः । अलौकिकविशेष्यतायाः कार्यतावच्छेदकसम्बन्धत्वे तु तेन सम्बन्धेन सर्वघटेषु कार्यसत्त्वमावश्यकमिति प्रत्यक्षस्य निखिलघटविषयकत्वनियम इति भावः । इदन्तु बोध्यम्—स्वप्रकारीभूतघटत्वाश्रयत्वस्य कार्यतावच्छेदकसम्बन्धत्वेपि कस्या घटव्यक्तेस्सामान्यलक्षणाजन्यप्रत्यक्षे भानमिति विनिगमकाभावात्सकलघटभाननिर्वाह इति दिनकरभट्टोक्तिरपि समीचीनेति । दर्शितञ्चेदं मथुरानाथैस्सामान्यलक्षणाग्रन्थे । यद्यपि नवीनमते आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभावः, एवञ्च लाघवमिति दिनकरभट्टैः पूर्वमुक्तम्, तत् कथमिदानीं विषयनिष्ठप्रत्यासत्त्या तत्प्रदर्शनमिति शङ्कोदेति, तथापि पुरुषघटितानां विषयाणामपेक्षया पुरुषाणामल्पीयस्त्वात्, लौकिकसन्निकर्षाणां विषयनिष्ठतयैव कारणत्वदर्शनाच्चात्र तथोक्तिरित्यवधेयम् । **नन्विति** । एतदुत्तरं 'सामान्यज्ञानस्य' इति पाठः । **लोप इति** । 'लाभः' इति साधुः ॥

दि—**प्रत्यक्षान्यतरसामग्रीति** । अत्र प्रत्यक्षपदं लौकिकप्रत्यक्षपरम्, तेन न चन्दनांशेप्यलौकिकत्वे तद्भानापत्तिः । अन्यतरत्वकोटौ सौरभत्वप्रकारक

लौकिकप्रत्यक्षघटनं घ्राणजस्थलानुरोधेन । वस्तुतस्तु, प्रयोज्यप्रयोजकभावस्य घ्राणजचाक्षुषादिभेदेन भिन्नत्वात् सौरभत्वप्रकारकघ्राणजं प्रति सौरभत्वप्रकारकलौकिकप्रत्यक्षसामग्री, तत्प्रकारकचाक्षुषादिकं प्रति तदवच्छिन्नप्रकारकलौकिकप्रत्यक्षसामग्री अपेक्षितेति विवेको बोध्यः ॥

त—अत्र च **सौरभत्वावच्छिन्नप्रकारकेत्यपपाठ इति** । इदमत्र चिन्त्यम्—सौरभप्रकारकप्रत्यक्षसामग्री हि सौरभात्मकविशेषणज्ञानं, सौरभे विशेष्ये चेन्द्रियसन्निकर्षः दर्शितान्यतरसामग्री च । इत्थञ्च द्वितीयसामग्र्या अत्रानपायाज्ज्ञानलक्षणानङ्गीकारेपि भवत्येव सौरभप्रकारकप्रत्यक्षोपपत्तिरिति । तरङ्गिण्युक्तपाठानुसारे तु पूर्वोक्तदिशा चाक्षुषज्ञानधारापत्तेर्वारणं न सम्भवति । एवमन्यतरकोटौ लौकिकप्रत्यक्षघटनमपि व्यर्थं स्यात्, सौरभत्वप्रकारकप्रत्यक्षत्वस्य व्यापकत्वसम्भवादिति च वेदितव्यम् । **उपादातुमित्यादि** । 'उपपादयितुमशक्यत्वात्' इति साधुः । **तद्भानानिर्वाहादितीति** । एतदुत्तरं 'सौरभत्वज्ञानरूपसामान्यप्रत्यासत्तेरलौकिकविषयता' इत्यादिः पाठः । एवं 'प्रत्यक्षे सन्निकर्ष' इति च । **इत्याशयेनाहेति** । आह—सौरभत्वादीति' इति पाठः । कार्यतावच्छेदकेत्याद्युक्तदूषणमापातत इति प्रभोक्तमनेनापास्तम् । परन्त्वेवमाशयवर्णने 'नच ज्ञानलक्षणाया' इत्याद्युत्तरग्रन्थानुत्थितिरापद्येत । अतोऽत्र प्रयोजनाभाववर्णनं ज्ञानलक्षणामभ्युपगच्छतां मतमवलम्ब्यैव कृतमिति वक्तव्यम् । इत्थञ्च, ननु सामान्यज्ञाननिष्ठकारणताया अवच्छेदकसम्बन्धः स्वविषयतादात्म्यसमवायान्यतररूपः । तथाच तस्य सौरभत्वेपि सत्त्वेन तद्भाननिर्वाह इत्याशयेनाहेत्यवतारिकात्रावसेया ॥

दि—**मुख्यविशेष्यकमिति** । 'उपनीतं विशेषणतयैव भासते' इति व्यवहारो मानसेतरस्थलविषयक इत्याशयः । अत एव 'इत्यभिप्रायेण' इति तरङ्गिण्युक्तिः । **विशेषणज्ञानकारणतयैव न निर्वाह इति** । तथाच ज्ञानलक्षणायाः कारणत्वान्तरकल्पनाभियैव सौरभत्वादिप्रकारकत्वस्य सामान्यलक्षणाकार्यतावच्छेदककोटौ प्रवेश इति पूर्वापरग्रन्थसङ्गतिः ॥

त—**तथाच तदिति** । 'तद्विषयकालौकिकप्रत्यक्षं प्रति' इति पाठः । एवम् 'अन्यथा घटादि' इति स्थानेपि 'अन्यथा घटादिविषयकभानेन विना घटादिभानस्यालौकिकस्यापत्तेः' इति च पाठ इति भाति । अन्यथेत्यादेश्चायमेवार्थः—



घटत्वादिविषयकज्ञानसत्त्वेपि घटादिभानं विना तदुपनीतभानमनिष्टम् । इत्थञ्चोक्तकार्यकारणभावाभावे घटादिज्ञानशून्यकालेपि घटादिमुख्यविशेष्यकमानसोपनीतभानापत्तिरिति । अयञ्च कार्यकारणभावो नाङ्गीकर्तव्यः, सामान्यलक्षणयैव विशेष्यभाननिर्वाह इति पूर्वपक्षाशयोऽवगन्तव्यः ॥

भा—**चिन्तासहकृत इति** । चिन्ता नाम विषयविशेषबुभुत्सया स्थिरीकृतेन मनसा तस्यैव ज्ञानधारा । युक्तयुञ्जानयोः क्रमेण वियुक्तयुक्तसंज्ञा भाष्ये दृश्यते । तत्र युक्तस्य चिन्तासहकृतं मानसमेवाकाशादिप्रत्यक्षम् । वियुक्तस्य त्वात्मादिचतुष्टयसंयोगाच्चाक्षुषादिकमपि सूक्ष्मव्यवहितादिविषयकं प्रत्यक्षं सम्भवतीत्यादिकं भाष्यादित एवावगन्तव्यम् । इदन्तु चिन्तनीयम्—यदि चाक्षुषादिकमपि युक्तस्य ज्ञानमङ्गीक्रियते, तदा चाक्षुषत्वस्पार्शनत्वादीनां जातीनां सङ्करप्रसङ्गः । नच साङ्कर्यं न जातित्वबाधकमिति वाच्यम्, भाष्यविवरणकारैरुदयनाचार्यप्रभृतिभिस्तस्य तथात्वस्य स्पष्टमभिधानात् । अतो मानसमेव युक्तस्यापि प्रत्यक्षं स्वाभिमतमिति बोधयितुमुक्तम्—योगजधर्मसहायेन मनसेतीति । परमते चाक्षुषादिकाले रासनादिवारणं चाक्षुषादिसामग्र्याः अनुभवबलादितरप्रतिबन्धकत्वं स्वीकृत्य कर्तव्यमिति बोध्यम् । अधिकं स्वयमूह्यम् ॥

इति महामहिमश्रीरामवर्मपरीक्षिद्वोश्रीमहाराजविरचितायां
सुबोधिन्यां
प्रत्यक्षपरिच्छेदः ॥

# अनुमानपरिच्छेदः

मु—'व्यापारस्तु परामर्शः' इत्यादिमूलस्य योजनयैवार्थबोधोऽभिमत इति दर्शयति—**अनुमायामिति**। 'अनुमायाम् अनुमितौ' इत्यादिपाठः॥

त—**अनुमाननिरूपणे सङ्गतिरिति**। इदञ्च न्यायचिन्तामणिमनुसृत्य शिष्यबुद्धिवैशद्यायोक्तम्। वस्तुतस्तु, अनुमितेरेवात्र प्रकृतत्वादनुमितिनिरूपण एव सङ्गतिरपेक्षितेति प्रत्यक्षनिरूपणानन्तरमनुमितिनिरूपणे इत्येव 'सङ्गतिश्चात्र' इति दिनकरीय घटका'त्र'शब्दार्थः। एवमुत्तरत्रापि बोध्यम्। **अनुमानज्ञानस्येति**। अनुमानज्ञानं मदिष्ट साधनमिति ज्ञानस्येत्यर्थः। **घटज्ञानाप्रयोज्यत्वादिति**। नच घटज्ञानजन्यप्रत्यक्ष ज्ञानजन्यत्वात् जन्यतज्जन्यादिसाधारणं प्रयोज्यत्वमनुमानज्ञानस्य सम्भवतीत्यप्रयोज्यत्वोक्तिरसङ्गतेति वाच्यम्, व्यवहारसिद्धस्वरूपसम्बन्धविशेषरूपस्यैवात्र प्रयोज्यत्वस्य विवक्षितत्वात्। दर्पणादाविति स्थाने 'घर्षणादौ' इति पठनीयम्॥

दि—पश्चात् स एवेत्यादिपश्यतीत्यन्तग्रन्थस्य प्रकृतानुपयोगशङ्कां परिहर्तुमाह—**धूमदर्शनस्येति**। सम्पत्त्यर्थमित्यत्र वाक्यसमाप्तिरवसेया। अविच्छिन्नमूलामिति धूमलेखाविशेषणस्य प्रयोजनं स्पष्टयति—**यादृशेति**। 'व्याप्तिसम्बन्धितया' इत्यपि क्वचित् पाठः। 'इत्यभिप्रायेण' इति वचनात् तादृशनियमसत्त्वे केषाञ्चिद्विप्रतिपत्तिरस्तीति सूचितम्। तन्मते वाय्वानीतधूमशकलस्य वह्निव्यभिचारिणो व्यावृत्तये विशेषणमिदमिति बोध्यम्। **स्मरणात्मकेति**। 'स्मरणात्मकव्याप्तिज्ञानस्य' इत्यपि पाठः॥

त—**संस्कारसम्बन्धेनेति**। संस्कारस्य सप्रतियोगिकत्वाभावेनासम्बन्धत्वापत्तिः, कालिकादिना स्ववृत्तिसंस्कारेत्युक्तौ च यावन्मुक्ति जीवात्मनि यत्किञ्चित्संस्कारनियमेनोपेक्षात्मकज्ञानादपि स्मरणापत्तिरित आह—**स्वजन्यसंस्कारसम्बन्धेनेत्यर्थ इति**॥

दि—**परामर्शत्वव्यापकतयेति**। 'परामर्शव्यापकतया' इति तरङ्गिणीकृत्सम्मतः पाठः। अत्र व्याप्यधर्मावच्छिन्नस्य व्यापारत्वात् व्यापारेण व्यापारिणो



नान्यथासिद्धिरिति प्राचामाशयो बोध्यः। व्यापाराभावादिव विनिगमनाविरहासम्भवादपि न लिङ्गस्य कारणत्वसम्भव इति दर्शयति—**इदमुपलक्षणमिति**। यद्वा, 'विषयेन्द्रियसम्बन्धो व्यापारः' इति मूलव्याख्यानावसरे नित्यस्य समवायस्य यथा तरङ्गिण्यां व्यापारत्वमुपवर्णितम्, तथा लिङ्गपरामर्शस्यापि लिङ्गव्यापारत्वमक्षतमिति मन्वान आह—**इदमिति**। तथाच लिङ्गपरामर्शस्यैव हेतुत्वमित्यत्र लाघवरूपं विनिगमकमस्तीति भावः। अत्र पुरुषापेक्षया पुरुषघटितविषयाणामाधिक्यात् परामर्शस्यापि विषयनिष्ठप्रत्यासत्त्यैव हेतुत्वं युक्तमित्यापाततो रमणीयमेतद्दूषणमिति मुक्तावली दर्शितदोष एव निर्भरोऽवसेयः। व्याप्तिज्ञानकरणतावादिमते मुख्यव्यापारत्वसम्भवात्तदुपेक्षा न समञ्जसेत्याशयः। **अनुमितिप्रसङ्ग इति**। ननु व्यापारभूतस्य परामर्शस्य समवायघटितसामानाधिकरण्येनैव हेतुत्वात्तदभावादेव मैत्रस्य तत्रानुमितिवारणं सम्भवतीति चेन्न, करणव्यापारयोरेकाधिकरण एव कार्यसम्पादकत्वनियमेन व्यापारस्यापि पक्षनिष्ठप्रत्यासत्त्यैव हेतुत्वावश्यकत्वात्॥

मु—'व्याप्यस्य' इत्यादिमूले व्याप्तेर्नोपलक्षणतया प्रवेशः, किन्तु विशेषणतया। एवं वृत्तित्वमपि नाधेयतारूपम्, किन्तु सम्बन्धरूपमिति विशदयति—**व्याप्तिविशिष्टस्येति**। शेषमनुमितिलक्षणे द्रष्टव्यम्॥

दि—**न व्यभिचार इति**। 'न व्यभिचार इति भावः' इति पाठः॥

तै—**अन्यसम्बन्धेति**। उभयत्रापि 'अन्यसम्बन्धानवच्छिन्ना' इति पठनीयम्। एवं व्याप्यभावेत्यत्र 'व्याप्याभाव' इति च। **असम्भव इति**। ननु तत्तद्धेतुतावच्छेदकावच्छिन्नाभावत्वेनाभावनिवेशान्न दोष इत्यत आह—**एवमप्रामाण्येति**। **शाब्दादिपरामर्शस्थल इति**। आदिना विशेषणज्ञानमात्रजन्यस्य व्याप्तिविशिष्टवैशिष्ट्यानवगाहिनो वह्निव्याप्यधूमवान् पर्वत इति ज्ञानस्य मीमांसकाभिमतकारणभावस्य संग्रहः। एतेन मतविशेषे शाब्दस्य विशिष्टवैशिष्ट्यावगाहित्वनियमेन तत्पूर्वं व्याप्तिप्रकारकज्ञानस्यावश्यंभावात् ज्ञानद्वयस्य तत्राप्यनपायेपि नासङ्गतिः। यद्वा, स्मरणात्मकपरामर्शस्य समूहालम्बनात्मकव्याप्तिपक्षधर्मताज्ञानस्य वा अत्रादिपदेन ग्रहणम्॥

दि—**कारणतावच्छेदकमिति**। 'न कारणतावच्छेदकम्' इति पाठः॥

त—**तथाचानन्यथासिद्धत्वमात्रमिति** । एवं भाववर्णने प्रकाशे 'ननु ज्ञानद्वयस्थले' इत्याद्युत्तरशङ्काया उत्थितिः कथमिति चिन्त्यम् । अतः कारणताग्रहविरोधिव्यभिचारज्ञानस्याभाव एवानेन दर्शित इति व्याख्या साधीयसी । वस्तुतस्तु, 'विशिष्टज्ञानकल्पने गौरवात्' इति मूलस्याभिप्रायवर्णनमेतत् । विशिष्टज्ञानेतीति प्रतीकधारणं परमावश्यकं भाति ॥

मु—**पक्षधर्मताज्ञानत्वेनेति** । एतदुत्तरं 'कारणत्वम्, आवश्यकत्वात्' इति पाठः । **विशिष्टज्ञानकल्पने इति** । 'विशिष्टवैशिष्ट्यज्ञानकल्पने' इत्यत्रत्यताळीग्रन्थपाठः । **वह्निव्याप्यवानिति ज्ञानादिति** । धूमो वह्निव्यभिचारीति ज्ञानसत्त्वेप्येतादृशपरामर्शादनुमित्यापत्तिरिष्टापत्त्या परिहर्तव्या । व्यभिचारस्य हेत्वाभासत्वञ्च पक्षः साध्यवान् साध्यव्याप्यहेतुमानिति समूहालम्बनात्मकानुमितेर्हेतुतावच्छेदकावगाहिन्या एव दोषसामान्यलक्षणघटकत्वान्न दुरुपपादम् ॥

दि—**व्याप्यतावच्छेदकप्रकारकज्ञानं कल्पनीयमिति** । वह्निव्याप्यो वह्निव्याप्य इति ज्ञानं कल्पनीयमित्यर्थः । **पूर्वोक्तकल्पनालाघवमेवेति** । यद्यपि मीमांसकानामपि क्वचिद्व्याप्यतावच्छेदकप्रकारकज्ञानं कल्पनीयमिति तदंशे तौल्यम्, तथापि नैयायिकानां बहुतरविषयिताशालिज्ञानं कल्पनीयमित्यधिकं गौरवमित्याशयः । **स्वतन्त्रमिति** । 'स्वतन्त्रं कारणमित्यनेन' इति पाठः । **इति भाव इति** । 'इति न गौरवमिति भावः' इति पाठः ॥

त—'यद्यपि' इत्यनन्तरं 'व्याप्यतावच्छेदक' इत्यस्य प्राक् 'व्याप्तिप्रकारकज्ञानस्य व्याप्तिप्रकारकहेतुविशेष्यकनिश्चयत्वेन, हेतुविशेष्यकव्याप्तिप्रकारकनिश्चयत्वेन वा, एवं पक्षधर्मताज्ञानस्य' इति भागस्य अंशोऽवसेयः । इत्यत्रेति स्थाने 'इत्येवम्' इति पाठः । **गुरुभूतकार्यकारणभावचतुष्टयेति** । व्याप्तिप्रकारकत्वविशिष्टं यद्धेतुप्रकारकत्वं तद्विशिष्टपक्षविशेष्यकत्वेन, पक्षविशेष्यकत्वविशिष्टं यद्धेतुप्रकारकत्वं तद्विशिष्टव्याप्तिप्रकारकत्वेन, व्याप्तिप्रकारकत्वविशिष्टं यत् पक्षविशेष्यकत्वविशिष्टहेतुप्रकारकत्वं तेन रूपेण, पक्षविशेष्यकत्वविशिष्टं यत् व्याप्तिप्रकारकत्वविशिष्टहेतुप्रकारकत्वं तेन रूपेण वेति चातुर्विध्यं बोध्यम् ।

---

उत्थितिः कथमिति । विशिष्टज्ञानस्य नियतपूर्ववृत्तित्वकल्पनेन व्यभिचारशङ्काया अनुत्थानादिति भावः ॥



वैशिष्ट्यं सर्वत्वावच्छिन्नत्वसम्बन्धेन । 'कार्यकारणभावत्वयापत्त्या' इति क्वचित् पाठः । हेतुप्रकारकत्वे व्याप्तिप्रकारकत्वपक्षविशेष्यकत्वयोरेकत्र द्वयमिति रीत्या प्रवेशसम्भवेन तत्साङ्गत्यमव्याहतम् । क्वचिन्मुद्रितपुस्तकेषु कार्यकारणभावषट्केति दृश्यते । सोऽसाधुः ॥

मु—**ज्ञानादनुमितिः स्यादिति** । 'ज्ञानादनुमित्यापत्तेः' इति पाठः । **व्याप्तिप्रकारकमिति** । 'व्याप्तिप्रकारकं ज्ञानम्' इति पाठः । **ज्ञानादप्यनुमितिः स्यादिति** । यद्यपि स्वीयव्याप्तिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकावच्छिन्नत्वस्वसमानाधिकरणज्ञानीयत्वोभयसम्बन्धेन वर्तमानग्रहविशिष्टा या प्रकारता तन्निरूपितपक्षविशेष्यताशालिनिश्चयत्वेन हेतुत्वमिति प्रभादर्शितपरिष्कारादरणे नालानुमित्यापत्तिर्न वा पुरुषभेदेनानन्तकार्यकारणभावकल्पनापत्तिः, तथापि सिद्धान्ते स्वावच्छिन्नप्रकारित्वावच्छिन्नत्वसम्बन्धेन व्याप्तिप्रकारिताविशिष्टपक्षविशेष्यिताशालिनिश्चयत्वेन लघुरूपेण हेतुत्वात् मीमांसकमते गौरवमनिवार्यम् । एवं व्याप्त्यंशे निश्चयत्वादिनिवेशकृतं गौरवमपि बोध्यम् । स्वमते तु परामर्शस्य विशिष्टवैशिष्ट्यावगाहित्वनियमेन विशेषणतावच्छेदकव्याप्त्यंशे संशयत्वासम्भव एव ॥

दि—**विशिष्टज्ञानकल्पनागौरवं न्यायमते दूषणं भविष्यतीति** । केवलान्वयिसाध्यकानुमित्युपपत्तये हेतुव्यापकेत्यादिपरामर्शस्यैवानुमितिहेतुत्वान्न व्याप्यतावच्छेदकाज्ञाने अनुमितिरिति न मीमांसकानां ज्ञानान्तरकल्पनेत्याशयः । **कारणत्वनिश्चयाधीन इति** । अधीनेत्यविसर्गपाठः स्वरसतरः, अधीनान्तञ्च निर्णयविशेषणम्, अन्यथा पौनरुक्त्यप्रसङ्गात् । **न तादृशं गौरवं दोष इति** । नच तादृशगौरवज्ञानस्य पूर्वोत्पन्नकारणताग्रहे अप्रामाण्यग्रहसम्पादकत्वात् कुतो न दोषत्वमिति शङ्क्यम्, कारणतावच्छेदकांशे लाघवज्ञानसत्त्वात् लाघवज्ञानाभावविशिष्टस्यैव कल्पनागौरवज्ञानस्याप्रामाण्यग्राहकत्वात् ॥

'व्याप्यो नाम व्याप्त्याश्रयः, तत्र' इत्यंशस्य सार्थक्यं दर्शयन्नाह—**मूल इति** ॥

---

असाधुरिति । व्याप्तिप्रकारकत्वपक्षविशेष्यकत्वयोरवच्छेद्यावच्छेदकभावरूपवैशिष्ट्यस्य कथमप्यसंभवादिति भावः ॥

स्वावच्छिन्नेति । नच व्याप्तिप्रकारित्वावच्छिन्नत्वं हेतुविशेष्यितायाः एवेति हेतुप्रकारितायाः स्वावच्छिन्नत्वं कथमिति शङ्क्यम्, हेतुविशेष्यित्वप्रकारित्वयोरभेदपक्षावलम्बनात् । भेदपक्षे तु स्वावच्छिन्नविशेष्यित्वावच्छिन्नप्रकारित्वावच्छिन्नेति निवेशक्रमो बोध्यः ॥

**त—उपोद्घातमितीति**। प्रकाशे 'परामर्शलक्षणानन्तरम्' इति स्थाने 'परामर्शनिरूपणानन्तरम्' इति पाठानुसारेणेत्थं भाववर्णनम्। उपोद्घातश्च प्रकृतप्रयोजकचिन्ताविषयत्वमित्याशयः। परामर्शलक्षणानन्तरमिति पाठे परामर्शलक्षणमेव सङ्गतिनिरूपकम्, नतु परामर्शः। प्रकृतसिद्धिप्रयोजकचिन्ताविषयत्वञ्चोपोद्घातपदार्थः। अत्रैव मुक्तावलीस्वारस्यम्। **तदविषयकेति**। 'स्वाविषयकप्रतीत्यविषयतत्कत्वम्' इति पाठः॥

**भा—असम्बन्ध इति**। साध्यवदन्यावृत्तित्वमिति मणिकाराद्युक्तौ वृत्तित्वं नाधेयतारूपम्, किन्तु हेतुतावच्छेदकसम्बन्धप्रतियोगित्वरूपम्, अन्यथा वृत्त्यनियामकतादात्म्यादिना हेतुत्वस्थले अव्याप्त्यापत्तेरिति दर्शयितुम् अवृत्तित्वमित्यनुक्त्वा असम्बन्ध इत्युक्तिः॥

**दि—निरूपयन्नाहेति**। 'निरूपयति' इति पाठः॥

**सु—साध्यो वह्निरिति**। 'साध्यं वह्निः' इति साम्प्रदायिकः पाठः। **येन सम्बन्धेनेति**। साध्यमिति भावप्रधाननिर्देशः। तथाच यत्सम्बन्धावच्छिन्ना साध्यतेत्यर्थः। एवमेव 'येन सम्बन्धेन हेतुः' इत्यत्रापि। साध्यता नाम अनुमितिविधेयताख्यविषयताविशेषः। हेतुता च परामर्शीयपक्षविशेष्यतानिरूपितहेतुप्रकारता॥

**त—यद्यपीति**। एतदनन्तरं 'विषयितादियत्किञ्चित्' इत्यादिपाठः। **तथापि सविषयकान्यत्वविशिष्टेति**। अत्र समवाय,कालिक,दिग्विशेषणताभिर्घटस्य हेतुमतः साध्यवत्त्वमेव, विषयितया च साध्यं कुत्रापि न प्रसिद्ध्यतीति यत्किञ्चित्सम्बन्धपदेन सा धर्तुं न शक्यत इति लक्षणसमन्वयः। अथैवमपि अनुयोगिताविशेषसम्बन्धेन साध्यवान् सविषयकान्यत्वविशिष्टतद्रूपस्याभावः तद्भिन्नो हेत्वधिकरणं तद्घट इति भवति तत्राव्याप्तिरित्यत आह—**तद्घटभिन्नेति। यदि च धूमासमानकालीन इति**। एवं रीत्या वह्निमान् धूमादित्यादावव्याप्तिः स्यात्, अतस्साध्यवदन्यनिरूपितवृत्तित्वे हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वहेतुतावच्छेदकावच्छिन्नत्वोभयाभावो निवेश्यः। तथाचोक्तातिव्याप्तिर्लगत्येवेति सूचयितुं यदिचेत्युक्तिः। **साध्यतावच्छेदकावच्छिन्नपर्याप्तेति**। साध्यतावच्छेदकपर्याप्तावच्छेदकताकेत्यर्थः। यथाश्रुते महानसीय

---

**तादात्म्यादिनेति**। आदिना सामानाधिकरण्यादिपरिग्रहः॥

**इत्यत्रापीति**। तथाच 'हेतुता' इति पाठो न साम्प्रदायिक इति भावः॥



वह्निमद्भेदप्रतियोगितावच्छेदकतापर्याप्तेर्महानसीयवह्निनिष्ठाया वह्नित्वावच्छिन्नत्वानपायात् तद्भेदाव्यावृत्तेः। पर्याप्तत्वनिवेशं सार्थकयितुं महानसीयवह्निमद्भेदस्य चेति। अत्र साध्यतावच्छेदकेत्यस्यापि साध्यतावच्छेदकतापर्याप्त्यधिकरणेत्यर्थः, तेन महानसीयत्ववह्नित्वोभयाभाववांस्तद्वह्नित्वादित्यादौ महानसीयत्वं विहाय वह्नित्व,भावत्वरूपसाध्यतावच्छेदकद्वयमात्रपर्याप्तावच्छेदकताकप्रतियोगितावच्छेदकताकं वह्नित्वाभाववद्भेदमादाय नाव्याप्तिः। यद्यपि प्रतियोगितावच्छेदकतायां साध्यनिष्ठत्वनिवेशेनाप्यत्र वारणं भवति, तथापि रूपत्वरसत्वान्यतरविशिष्टवांस्तेजस्त्वादित्यादावव्याप्तिः, रसत्वरूपं साध्यतावच्छेदकमादाय तत्पर्याप्तावच्छेदकताकप्रतियोगितावच्छेदकताकरसवद्भेदवति हेतोर्वृत्तेः। अन्यत् स्वयमूहनीयम्। **इदञ्च गुरुधर्मस्यापीति**। गुरुधर्मस्यानवच्छेदकतामते प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकेतरानवच्छिन्नत्वमेव देयम्। इत्थञ्च द्रव्यं पृथिवीत्वादित्यादौ घटभेदव्यावृत्तिः प्रतियोगितावच्छेदकतायां साध्यनिष्ठत्वविवक्षणादित्यवधेयम्। यदि च द्रव्यं गुणादित्यादौ स्वरूपेण साध्यता स्वीक्रियते, तदा साध्यनिष्ठप्रतियोगितावच्छेदकतायां स्वावच्छेदकेतरावच्छिन्नत्वसम्बन्धेन साध्यताशून्यत्वमेव देयम्। साध्यतासमनैयत्यमवच्छेदकतायां निवेश्य तद्वारणं केचिदिच्छन्ति। तन्मते तार्णातार्णदहनोभयवद्भेदवारणाय विशेषणान्तरमपि देयमिति महागौरवम्। एकोक्त्यनादरे तु निरवच्छिन्नसाध्यनिष्ठप्रतियोगितावच्छेदकताघटितं तत्रान्यदेव लक्षणम्। एवञ्च साध्यताख्यविषयतायाः पूर्वमज्ञानेपि नानुमित्यनुपपत्तिरिति च बोध्यम्॥

**सु—तथापि हेतुतावच्छेदकरूपेणेति**। नन्वत्र तृतीयाया वैशिष्ट्यं अभावान्वयि सामानाधिकरण्यरूपम्, उत वृत्तित्वान्वय्यवच्छिन्नत्वरूपमर्थः। आद्ये वैयर्थ्यम्, द्वितीये सद्धेतौ सर्वत्र तादृशवृत्तित्वाप्रसिद्धिरिति चेन्न, अभावान्वय्यवच्छिन्नत्वस्य तृतीयार्थत्वात्। अभावस्य चाव्याप्यवृत्तित्वान्नाव्याप्तिः। वक्ष्यते च तरङ्गिण्यां व्याप्यत्वासिद्धिप्रस्तावे 'यो धर्मो यस्यानवच्छेदकः, तदवच्छेदेन तदभावः मूलावच्छे

---

**स्वावच्छेदकेतरेति**। अवच्छेदकतासम्बन्धेन स्ववद्भिन्नेत्यर्थः, तेन अवच्छेदकेतरस्याप्रसिद्धावपि न क्षतिः। **विशेषणान्तरमिति**। सङ्ख्यतावच्छेदकेतरव्यासज्यवृत्तिधर्मानवच्छिन्नत्वरूपं विशेषणमित्यर्थः॥

**तादृशवृत्तित्वेति**। साध्यवदन्यनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छिन्नवृत्तित्वेत्यर्थः॥

देन वृक्षे कपिसंयोगाभाववत्' इति। एवमपि सिद्धान्ते सप्तम्युपस्थितदेशकालावच्छेदकत्वस्थल एवाव्याप्यवृत्तित्वाङ्गीकारादप्रसिद्धितादवस्थ्यमतो भावमाह—**हेतुतावच्छेदकमिति ॥**

त—**विशिष्टपर्याप्ताधेयताया न गुणादीति।** तथाच साध्यवदन्यनिरूपितवृत्तिता यद्धर्मविशिष्टापर्याप्ता तदभिन्नहेतुतावच्छेदकवत्त्वस्य लक्षणत्वेपि न दोषवारणमिति भावः ॥

दि—**आद्यलक्षण इति।** 'अत्र लक्षणे' इति ताळीग्रन्थपाठः। **भ्रमात्मकव्याप्तिज्ञानादिति।** भ्रमं विनैवानुमितिजनकत्वं हि सद्धेतूनां स्वभावः। तत् केवलान्वयिहेतौ न सम्भवतीति तस्यालक्ष्यत्वमेव युक्तमिति भावः ॥

त—**मीमांसकमत इति।** मतविशेषावलम्बनेन समनन्तरग्रन्थावतरणं हि सर्वतान्त्रिकसम्मतम् ॥

मु—**अप्रसिद्धत्वादत इति।** 'अप्रसिद्धत्वादव्याप्तिरित्यत आह' इति पाठः। **व्याप्तिरुच्यत इति।** 'उच्यते' इति प्रक्षिप्तम् ॥

दि—'नियामकसंयोगेन' इत्यनन्तरं 'तथा भूतले संयोगेन' इति 'विषयितया' इत्यनन्तरं 'च' इति च पाठः। **वृत्तेरप्रसिद्धेरिति।** यद्यपि साध्यवदन्यनिरूपितवृत्तितासामान्ये हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावः, तदभिन्नहेतुतावच्छेदकवत्त्वमित्युक्तौ नोक्तदोषास्सम्भवन्ति, तथापि स्वमते केवलान्वयित्वज्ञानकालेपि सिद्ध्यभावरूपपक्षतासम्भवात् वाच्यं ज्ञेयत्वादित्यादावव्याप्तिरेव सारभूतं दूषणं बोध्यम् ॥

भा—**ऐकाधिकरण्यमिति।** एकम् अभिन्नं वृत्त्यसाधारणधर्मवद्वा अधिकरणं यस्य, तस्य भावः ऐकाधिकरण्यम्। साध्येनेत्यत्र साध्यपदं तदधिकरणे निरूढलाक्षणिकम्। तृतीयायाः प्रथमकल्पे भेदान्वयि प्रतियोगित्वं, द्वितीये वृत्तित्वान्वयि निरूपितत्वमर्थः। 'प्रकृत्यादिगणाज्ज्ञाता तृतीया तु तदात्मताम्। अवच्छेदकतावृत्तिप्रका

भेदाभावस्याप्रसिद्ध्या भेदे अभाववति च खण्डशक्तिरभ्युपेयेति गौरवादाह—**वृत्त्यसाधारणेति ॥**



रत्वादि शंसति ॥' इति वचनात्। साध्येनेति तृतीयाया वृत्तित्वार्थकत्वे एकपदस्य असाधारणधर्मवदित्येवार्थः। यस्येति षष्ठ्यर्थ अधिकरणत्वान्वयि निरूपितत्वम्। तथाच साध्याधिकरणप्रतियोगिकभेदाभाववत्, साध्याधिकरणवृत्त्यसाधारणधर्मवद्वा यन्निरूपिताधिकरणतावदिति विग्रहदशायां बोधः। समासवाक्यात्तु भावप्रत्ययान्तात् साध्याधिकरणाभिन्नाधिकरणवृत्तित्वं, साध्याधिकरणवृत्त्यसाधारणधर्मवदधिकरणवृत्तित्वमिति वा बोधः। प्रयोजनाभावादितरांशपरित्यागेन साध्याधिकरणवृत्तित्वमेव लक्षणं पर्यवस्यति ॥

दि—**विशिष्टाभावमादायाव्याप्तिरिति।** एतद्रूपसाध्यकस्थलेपि पूर्वक्षणवृत्तित्वविशिष्टसाध्यस्याभावमादाय लक्षणसमन्वयसम्भवात् अव्याप्तिपदमसम्भवार्थकमवसेयम्। उभयाभावोपादानेपीदं समानम् ॥

मु—**गुणवान् द्रव्यत्वादित्यादाविति।** अथात्र यावद्द्रव्यगतसंख्याया अप्रतियोगित्वमेवेति नाव्याप्तिः। नच तादृशसंख्याजनकापेक्षाबुद्धिः कस्यापि नोत्पत्तुमर्हतीति वाच्यम्, योगिनां तत्सम्भवादिति चेन्न, तत्समवायिकारणत्वेनाभिमतानां सर्वद्रव्याणामेकदा वर्तमानत्वासम्भवात् तादृशसंख्यायाश्शशविषाणतुल्यत्वात्। यदत्र प्रभायां हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्तिवृत्तित्वस्याभावे निवेशाद्दर्शितस्थलेऽव्याप्तिवारणं सम्भवतीत्युक्तम्, तत् धूमवान् वह्नेरित्यादावयःपिण्डीयवह्न्यादेर्हेतुत्व एव व्यभिचारित्वमिष्यत इति मतावलम्बनेन सङ्गमनीयम्, अन्यथा तत्रातिव्याप्त्यनिरासस्य स्पष्टत्वात्। अत्र रूपत्वव्याप्यजातिमत्त्वानित्यादौ यथा रूपत्वव्याप्यजातित्वमेव साध्यतावच्छेदकं स्वीक्रियते, तथा वह्निमान् गुणवानित्यादिस्थलेषु वह्नित्वगुणत्वादिकमेव परम्परया साध्यमस्तु, तथाच नाव्याप्तिरिति चेन्न, वह्निमानित्याद्यनुमित्यनन्तरं वह्न्यादिविषयकेच्छाप्रवृत्त्योरनुपपत्तेः वह्न्याद्युद्देश्यकेच्छाप्रवृत्ती प्रति वह्नित्वादिविशिष्टवह्निज्ञानस्यैव हेतुत्वात्, अत्र च तदभावात्। **तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति।** तदवच्छिन्नयत्किञ्चिन्निरूपितसामानाधिकरण्यं तद्धर्मावच्छिन्नयावन्निरूपिता व्याप्तिरित्यर्थः। धूमव्यापकवह्निसामानाधिकरण्यस्य रासभादावपि सत्त्वादतिप्रसङ्गवारणाय तादृशसामानाधिकरण्यवद्वृत्तिधूमत्वादिकमेव व्याप्तिरिति दीधित्यां स्पष्टम् ॥

**यावद्द्रव्यगतसंख्याया इति।** अभावे प्रतियोगिवैयधिकरण्यरूपविशेषणसत्त्वादपेक्षाबुद्धिजन्यायास्संख्यायास्त्रिक्षणमात्रावस्थायित्वेपि न क्षतिः ॥

**त—तथाचेति।** एतत्पूर्वम् 'एकसत्त्वेपीति' इति प्रतीकपाठो भ्रष्टः। **प्रतियोगितावच्छेदकावच्छिन्नेति।** 'प्रतियोगितावच्छेदकत्वावच्छिन्न' इति पाठः। **द्वित्वपर्याप्त्यनवच्छेदकत्वस्येति।** 'द्वित्वपर्याप्त्यवच्छेदकत्वस्य' इति पाठः। **परमरहस्यमिति।** नन्वत्रापि वक्ष्यमाणरीत्या तद्वह्नित्वविशिष्टवह्नित्ववान्नास्तीति प्रतीतिविषयाभावमादायाव्याप्तिरिति चेन्न, विशिष्टनिष्ठप्रतियोगितावच्छेदकता विशेषण विशेष्योभयपर्याप्ता, सिद्धान्तितञ्चेदं सिद्धान्तलक्षणगादाधर्याम्, इत्थञ्च प्रतियोगिताव च्छेदकतापर्याप्त्यवच्छेदकत्वमुभयत्वस्यैवेति तदनवच्छेदकत्वस्य साध्यतावच्छेदकतापर्या प्त्यवच्छेदके सत्त्वात्। **नचैवमपीति।** एतदुत्तरं 'वह्नित्वत्वावच्छिन्न' इत्यादिपाठः। **साध्यतावच्छेदककस्थलीयेति।** 'साध्यतावच्छेदकताकस्थलीय' इत्यादिपाठः। **साध्यता वच्छेदकतदितरेति।** 'साध्यतावच्छेदकेतर' इत्यादिपाठः। **तद्वह्नित्वत्वेनेति।** अत्र 'तत्' इति नावश्यकम्। 'वह्नित्वत्वेन' इति पाठः॥

**मु—रूपत्वव्याप्यजातिमान्नास्तीति।** समवायेन जातौ प्रतियोगिताव च्छेदकत्ववत् जातिघटितपरम्परया जातित्वे तथात्वस्य विवक्षणेप्येवंरूप एवोल्लेख इत्यभिप्रायोऽवसेयः॥

**दि—तद्व्यक्तित्वहेतुक इति।** इदञ्च शुक्लरूपवत्त्वादिहेतुकस्थलोप लक्षणम्, तत्र शुक्लत्वादिजातिमादाय लक्षणसमन्वयसम्भवात्॥

**त—नीलत्वादिजातौ बाधितत्वादिति।** 'नीलत्वादिजातावबाधितत्वात्' इति पाठः॥

**मु—हेतुतावच्छेदकसम्बन्धेनेति।** हेतुतावच्छेदकवैशिष्ट्यमपि हेतुताव च्छेदकतावच्छेदकसम्बन्धेन बोध्यम्, तेन वह्निमान् धूमादित्यादौ कालिकादिना धूमत्वादिविशिष्टघटाधिकरणमादाय न वह्न्यभावादेर्लक्षणघटकत्वापत्तिः। यद्यप्येतादृश दोषवारणं हेतुतावच्छेदकावच्छिन्नाधेयतायां हेतुनिष्ठत्वविशेषणेनापि भवति, तथापि पृथिवी रूपानुष्णाशीतस्पर्शोभयवत्त्वादित्यादौ कालिकसम्बन्धेनोभयत्वावच्छिन्ना रूपात्मक हेतुनिष्ठा या आधेयता तन्निरूपिताधिकरणताया जलादावपि सत्त्वादव्याप्तिरिति ध्येयम्।

---

शुक्लरूपवत्त्वादीति। पृथिव्या मूलोक्तपक्षत्वनिर्वाहार्थं शुक्लरूपवत्त्वस्य हेतुत्वोक्तिः, अन्यथा जलत्वादिपरित्यागस्य निर्बीजत्वापातात्॥



**नच प्रतियोगिव्यधिकरणत्वं यदीति।** अत्र विपदं भेदवदर्थकम्। प्रतियोगि पदञ्च प्रतियोग्यधिकरणे निरूढलाक्षणिकम्। वि भिन्नम् अधिकरणं यस्येति व्यधिकरण पदविग्रहः। तथाच समासपदात् प्रतियोग्यधिकरणभिन्नाधिकरणवृत्तिरिति बोधः। लक्षणे च द्वितीयाधिकरणांशनिवेशे प्रयोजनाभावेन तत्परित्यागे प्रतियोग्यनधिकरण वृत्तिलाभः। भावप्रत्ययसहकृतेन च तेन प्रतियोग्यनधिकणवृत्तित्वलाभः॥

**दि—सत्त्वादेवेति।** 'सत्त्वादेवम्' इति पाठः॥

**मु—यदि तु प्रतियोगीति।** एतत्कल्पे विपदस्य भेदप्रतियोगीत्यर्थः। तथाच प्रतियोग्यधिकरणनिष्ठभेदप्रतियोगि यदधिकरणमिति विग्रहवाक्याद्बोधः। एवञ्च प्रतियोग्यधिकरणे यदधिकरणभेदलाभात् अर्थात् प्रतियोग्यधिकरणावृत्तित्वस्य लाभः। यद्वा, विपदस्य भेदप्रतियोगितावच्छेदकाधेयतानिरूपकमर्थः। विग्रहवाक्यघटकयत्पदो त्तरषष्ठ्या आधेयत्वमर्थः। तस्य च भेदे अन्वयः। तथाच यन्निष्ठभेदप्रतियोगितावच्छे दकाधेयतानिरूपकाभिन्नमधिकरणमिति बोधः। प्रतियोगिनो व्यधिकरणमिति षष्ठी तत्पुरुषः। षष्ठ्यर्थनिरूपितत्वस्याधिकरणतायामन्वयः। एवञ्च विशिष्टसमासात् प्रतियो ग्यधिकरणनिरूपिताधेयतावद्भिन्नमित्यर्थो लभ्यते। शेषं पूर्ववत्। **बोध्यमिति।** 'वाच्यम्' इति पाठः स्वरसः॥

**दि—प्रतियोग्यधिकरणवृत्तिभिन्नत्वमिति।** सार्वभौममते कपिसंयोगा भावे गुणे न कपिसंयोगसामानाधिकरण्यमिति प्रतीतिबलात् अव्याप्यवृत्तिकपिसंयोग सामानाधिकरण्यस्याभावोपि कपिसंयोगाभावे सम्भवतीति प्रतियोग्यधिकरणवृत्तित्वाभाव रूपप्रतियोगिवैयधिकरण्यनिवेशेपि नोक्ताव्याप्तिपरिहार इति भेदघटितपरिष्कारादरणम्। भेदस्य चाव्याप्यवृत्तित्वाभावान्न तन्मतानुसारेपि दोष इति भावः। **अभावान्तेति।** 'अभावेत्यन्तस्य निष्कर्ष इत्यर्थः' इति पाठः। **विशेषणवलादेवेति।** घटो जाति मान्, वह्न्यभाववद्भ्रदो दोषः इत्यादाविव प्रकृते विधेयतावच्छेदकहेत्वधिकरणवृत्तित्वे उद्देश्यतावच्छेदकप्रतियोग्यनधिकरणवृत्तित्वस्याभेदसम्बन्धेनान्वयात् वृत्तित्वयोरैक्यलाभे तन्निरूपकयोरपि तल्लाभ इति भावः। **इत्यतिव्याप्तिरिति।** 'इत्यतिव्याप्तिरिति भावः' इति पाठः॥

**त—भावो मूलकारस्येति।** तर्हि 'हेतुश्च' इत्यनुक्त्वा 'अभावश्च' इत्युक्तेर्बीजं चिन्त्यम्। **अधिकरणाप्रसिद्धेरितीति।** 'अधिकरणप्रसिद्धेरिति' इति पाठः॥

त—**प्राचाम्मते द्रव्य इति ।** वृक्षादौ संयोगसामान्याभावस्य न प्रत्यक्षम्, तस्यातीन्द्रियप्रतियोगिकत्वेनातीन्द्रियत्वात् । संयोगीययावद्विशेषाभाववत्त्वरूपहेतुश्च सोपाधिकोऽप्रयोजकश्चेति सिद्धान्तलक्षणदीधित्यादौ स्पष्टम् । अथ द्रव्ये संयोगध्वंसप्रागभावसत्त्वादेव संयोगसामान्याभावः प्राचीनैस्तत्र नाङ्गीक्रियते । इत्थञ्च कपिसंयोगाभावस्यापि विभावात्मनि सत्त्वं दुरुपपादमिति चेन्न, संयोगसामान्याभावपदस्य संयोगत्वरूपसामान्यधर्मावच्छिन्नाभावपरत्वेन आत्मनिष्ठसंयोगध्वंसादेरपि संयोगत्वावच्छिन्नप्रतियोगिताकत्वासम्भवेनात्मनि तदभावासम्भवात् । घटादौ श्यामतादशायां रक्तं रूपं नास्तीति प्रतीतिर्हि रक्तध्वंसप्रागभावयोस्सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे मानम् । रक्ततादशायाञ्च पूर्वरक्तध्वंसमादाय रक्तं नास्तीति प्रतीतिवारणाय प्रतियोग्यनधिकरणकाल एव ध्वंसादेः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं स्वीक्रियते । आत्मनि च संयोगो नास्तीति प्रतीतिः खण्डप्रलयावच्छेदेनापि न सम्भवतीति तत्र संयोगसामान्याभावसत्त्वे प्रमाणाभावः, कपिसंयोगाभावो नास्तीति चात्मनि तदानीं प्रतीतिसम्भवात् कपिसंयोगत्वावच्छिन्नाभावश्च वर्तते, महाप्रलयश्च नास्तीत्याशयः । नच ब्रह्माण्डान्तरे कपेः सत्त्वात्तद्ध्वंसो न सामान्यधर्मावच्छिन्नप्रतियोगिताक इति वाच्यम्, कपिपदस्य कपिविशेषपरत्वात् । वस्तुतस्तु, अत्रत्यस्य प्राचामित्यस्य ध्वंसप्रागभावयोरत्यन्ताभावेन सह विरोधित्वं ये अभ्युपगच्छन्ति तेषामिति नार्थः । एवञ्च शङ्काया एव नावोत्थितिः । अत एव संयोगसामान्याभावस्य तैरस्वीकारे प्रत्यक्षादिप्रमाणाभाव एवोद्घाटितो दीधितिकारैरिति ध्येयम् । घटत्वहेतुकस्थले गुणसामान्याभावाधिकरणत्वं घटे यदुक्तम्, तत् स्वमतानुसारेण । उक्तञ्चेदं गदाधरभट्टाचार्यैः कण्ठत एव ॥

मु—**यादृशप्रतियोगितेति ।** प्रतियोगिताविशिष्टप्रतियोगितानवच्छेदकत्वम् । वैशिष्ट्यञ्च तादात्म्य,स्ववद्भिन्नहेत्वधिकरणकत्वोभयसम्बन्धेन । स्ववत्त्वं स्वाव

---

दिनकरोक्तं कपीत्यस्य प्रयोजनं न घटत इति प्रभाकाराक्षेपमाशङ्क्य परिहरति—अथेति । तदभावासम्भवादिति । संयोगसामान्याभावासम्भवादित्यर्थः । आत्मनिष्ठसंयोगध्वंसादेः संयोगत्वरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वासम्भवमुपपादयति – घटादाविति । न सम्भवतीति । आत्मपरमाणुसंयोगस्य प्रतियोगिनः सत्त्वादिति भावः ॥

तादात्म्येति । हेत्वधिकरणकत्वं येन केनापि सम्बन्धेन । एवञ्च वह्निमान् धूमादि



च्छेदकावच्छिन्नवत्त्वसम्बन्धेनेति निष्कर्षः । अन्यादृशानुगमप्रकारोन्यत्रानुसन्धेयः ॥

दि—**निर्दुष्टत्वेति ।** 'निर्दुष्टस्य' इति पाठः । **वैयर्थ्यमिति भाव इति ।** 'वैयर्थ्यमिति बोध्यम्' इति पाठः । **अभावीयविशेषणतेति ।** 'अभावीयविशेषणताकालिक' इति पाठः । **विशेषणतासम्बन्धेनेति ।** 'विशेषणताविशेषेण' इति ताळीग्रन्थपाठः ॥

त—नतु सम्बन्धस्य द्विनिष्ठत्वान्महाकालमात्रवृत्तीत्यसङ्गतमतस्तदर्थमाह—**महाकालानुयोगिकेति । तथापि गगनादेरपीति ।** नच गगनाभावोपादानासम्भवेपि महाकालान्यत्वविशिष्टघटाभावस्य प्रतियोगिवैयधिकरण्यं कुतो न सम्भवतीति वाच्यम्, क्रियादीनां महाकालनिष्ठघटाद्याधारतावच्छेदकत्वरूपं कालोपाधित्वमेव, न तु घटाद्यधिकरणत्वमिति मते अभावीयविशेषणताकालिकोभयघटितसामानाधिकरण्यसम्बन्धेन महाकालान्यत्ववैशिष्ट्यस्याप्रसिद्ध्या तद्विशिष्टघटाभावस्याप्रसिद्धत्वात् । अभावीयविशेषणतासमवायोभयघटितसामानाधिकरण्यसम्बन्धेन महाकालान्यत्वविशिष्टघटस्य कपालादौ प्रसिद्धावपि इदानीं कपाले महाकालान्यत्वविशिष्टघटः इति प्रतीत्यनुरोधेन महाकालस्य तदाधारताया अवश्याभ्युपेयत्वात्साध्यतावच्छेदकसम्बन्धे निरुक्तोभयमेवेति तदभावस्य व्यापकताघटकत्वासम्भवाच्च । सर्वाधारतानियामकसम्बन्धातिरिक्तस्थल एव विशेषणसम्बन्धेन विशेषणसत्त्वस्य विशिष्टाधारतानियामकत्वस्वीकारात् । नन्वेवं सति महाकालमात्रवृत्तिविशेषणताविशेषेण साध्यतास्थलानुधावनं व्यर्थमिति चेन्न, उभयाभावाघटितप्रतियोगिवैयधिकरण्यनिवेशं सर्वत्र विशिष्टाधिकरणतायां विशेषणाधिकरणतायास्तन्त्रत्वञ्चाभिसन्धायैव दिनकरभट्टेन तादृशस्थलानुसरणात् ॥

दि—**वाक्यस्य प्रामाण्यापत्तिरिति ।** यदि चात्र प्रतियोग्यविशेषणीभूतघटत्वघटिता घटत्वावच्छिन्नप्रतियोगितैव संसर्गतया भासत इति न तदापत्तिरित्युच्यते, तदा द्रव्यं नास्तीत्यादावपि घटत्वावच्छिन्नप्रतियोगितायास्तथा भानेन पटादिमत्यपि तत्प्रतीतिव्यवहारयोः प्रामाण्यापत्तिः । यदि च यावद्विशेषाभावकूट एव

---

त्वत्र घटत्वावच्छिन्नप्रतियोगितायाः स्वपदेन ग्रहणे स्ववद्भिन्नहेत्वधिकरणकत्वसम्बन्धेन तादृशप्रतियोगिताविशिष्टत्वं वह्नित्वावच्छिन्नप्रतियोगिताया इत्यसम्भवः, तद्वारणाय तादात्म्यप्रवेशः । अन्यादृशेति । हेत्वधिकरणविशिष्टप्रतियोगितानवच्छेदकत्वरूपेत्यर्थः । वैशिष्ट्यं स्वनिष्ठप्रतियोगिताविशिष्टत्वसम्बन्धेन । निष्ठत्वं स्वावच्छेदकावच्छिन्नानधिकरणत्वसम्बन्धेन । विशिष्टत्वं तादात्म्येनेति ॥

**नतु घटाद्यधिकरणत्वमिति ।** कालग्रन्थे तरङ्गिणीकारैः प्रदर्शिता युक्तिरत्रावसेया ॥

तत्र विषय इति न तदापत्तिरिति विभाव्यते, तदा घटो नास्तीत्यत्रापि तथेति घटत्वेपि प्रतियोगितावच्छेदकत्वं न स्यात्। घटो नास्तीति निश्चयस्य घटवत्ताबुद्धि प्रतिबन्धकत्वसिद्धये घटत्वस्य तत्त्वमावश्यकमिति चेत्, प्रकृतेपि समानम्। अत्र प्रभापि द्रष्टव्या ॥

त—**तथात्वमिति**। 'तथाच' इति पाठः। **निरुक्तावच्छेदकत्वेति**। पारिभाषिकावच्छेदकत्वेत्यर्थः। **अनवगाहनादिति**। अन्यथा घटत्वेपि तादृशावच्छेदकत्वमेव भासत इति स्वरूपसम्बन्धरूपावच्छेदकत्वहान्यापत्तेरिति भावः ॥

भा—**सिषाधयिषयेत्यादि**। यत्र अनुमित्युद्देश्यतावच्छेदकपर्वतत्वादिरूपयद्धर्मावच्छिन्ने। **सः** तादृशसिद्ध्यभाववांस्तद्धर्मावच्छिन्नः। इत्थञ्च धान्यवान् धनवान्, वह्न्यभाववद्ध्रदो दोषः इत्यादाविव उद्देश्यतावच्छेदकविधेयतावच्छेदकयोरभेदभानात् तादृशसिद्ध्यभावस्य पक्षतात्वसिद्धिः। **पक्षः** वस्तुतः पक्षताश्रयः। **तत्र** तादृशे तद्धर्मावच्छिन्ने। एवमुक्त्या पक्षताया न परामर्शविषयत्वम्, किन्तु स्वातन्त्र्येणैवानुमितिहेतुत्वमिति बोधितम् ॥

त—**पक्षवृत्तित्वस्य स्मरण इति**। स्मृतत्वेन तस्यापि प्रकृतत्वाविशेषादित्याशयः। **वृत्तित्वघटकमिति**। 'पक्षवृत्तित्वघटकम्' इति पाठः ॥

दि—ननु पक्षलक्षणप्रस्तावे 'विनापि सिषाधयिषाम्' इत्यादिना पक्षतानुमित्योर्हेतुहेतुमद्भावे व्यभिचारप्रदर्शनमनुचितमित्याशङ्कां तस्याव्याप्त्युपपादकत्वेनापनुदति—**घनगर्जितेनेति**। यत्र सिद्धिर्नास्ति तत्र सिषाधयिषायास्सर्वथाऽनुपयोगे 'सत्यामसत्यामपि' इत्युक्तेर्विफलत्वशङ्कां विशिष्टाभावसत्त्वे प्रयोजकवैलक्षण्यं दर्शयन्निरस्यति—**सत्यामुभयेत्यादिना**। **एककालावच्छेदेनैकात्मवृत्तित्वमिति**। सिषाधयिषायां सत्यामपि घटादौ तत्काले आत्मनि च पूर्वकालावच्छेदेन सिषाधयिषाविरहस्य सत्त्वात् एककालिकत्वैकात्मवृत्तित्वोभयवत्त्वरूपवैशिष्ट्यं सिद्धौ सम्भवतीत्यनुमित्यनुत्पत्तिप्रसङ्गात् तदुपेक्ष्य एकात्मवृत्तितायामेककालावच्छिन्नत्वमुपात्तम्। नचैवमपि घटावच्छेदेन तदानीमात्मनि सिषाधयिषाविरहसत्त्वात्तद्दोषस्तदवस्थ एवेति वाच्यम्, वैशिष्ट्यघटकसिषाधयिषाविरहाधिकरणतायां देशनिष्ठावच्छेदकत्वानिरूपकत्वस्य निवेशात्। नचैवमात्मनि सिषाधयिषाविरहस्य शरीरावच्छिन्नत्वादिदमसङ्गतमिति वाच्यम्, शरीरस्यापि तत्रा-



वच्छेदकत्वाङ्गीकारे प्रमाणाभावात्। सर्वस्यैवावच्छेदकत्वापाते तदभावाधिकरणताया निरवच्छिन्नत्वस्यैव युक्तत्वात्। **सिद्ध्यश्चेति**। 'सिद्ध्यश्च तत्र' इति पाठः।' यत्र सिषाधयिषा सिद्धिपरामर्शयोर्मध्ये जायते, तत्र सिद्धिकाले परामर्शकाले च सिषाधयिषायाः सत्त्वात् 'न सिषाधयिषा' इत्युक्तिरसङ्गतेत्याक्षेपं वारयति—**सिद्धिपरामर्शोभयक्षण इति**। तथाच सिद्धिकाल इत्येतत् परामर्शकाल इत्यस्य विशेषणम्। चकारश्चावधारणार्थको नेत्युत्तरं योज्यः। वस्तुतस्तु, ननु सिषाधयिषा सिद्ध्या परामर्शेन वा सह जायताम्, इत्थञ्च तेषां त्रयाणां सहावस्थानसम्भव इत्यत आह—**सिद्धिकाल इति**। सिद्ध्युत्पत्तिकाले चेत्यर्थः। अत्र हेतुमाह—**योग्येति** इति व्याख्या साधीयसी ॥

दि—[illegible]। चक्षुरादेरनुमितिविशेष्यकेष्टसाधनत्वप्रकारकप्रत्यक्षाजनकत्वात् चाक्षुषादिपरामर्शस्यानुमितौ इष्टसाधनत्वविषयकत्वं न सम्भवतीत्यत आह—**स्मरणं वेति**। यत्र तु पूर्वमनुमित्सा ततः सिद्ध्यात्मकपरामर्शः, तत्र प्रत्यक्षमपि सम्भवतीति ध्येयम् ॥

दि—**इच्छादीति**। आदीति प्रक्षिप्तम्। **परिचायकमिति**। 'परिचायकं रूपम्' इति पाठः ॥

त—**आशङ्कानिरासाय पूरयतीति**। यद्यपि प्रत्यक्षात्मकपरामर्शकाले इच्छाकाले वा पदार्थस्मरणादिघटितशाब्दसामग्र्या असम्भव एवेति पूरणमनावश्यकं केचिदाहुः, तथापि मुक्तावल्यां 'प्रत्यक्षसत्त्वे' इत्यस्यानुपदर्शितदिशा तादृशस्मरणोपलक्षकत्वेन स्मरणात्मकपरामर्शस्थले शाब्दसामग्रीसम्भवेन च पूरणस्यावश्यकता बोध्या। नच यत्र प्रत्यक्षातिरिक्तं ज्ञानं जायतामितीच्छैवोद्बोधिका भवति, तत्र स्मृत्यापीच्छाविषयसिद्धिसम्भवान्नानुमितिरिति वाच्यम्, तस्या उद्बोधकत्वाप्रसिद्धेः, शाब्दपदस्यात्र प्रत्यक्षानुमित्यन्यज्ञानोपलक्षकत्वस्य वा स्वीकारात्। **अनुमितित्वावच्छिन्नविधेयकेत्युक्ताविति**। अत्र विधेयकेति स्थाने विषयकेति पाठः। **प्रत्यक्षादिसामग्रीति**। आदिपदं प्रक्षिप्तम्। **अप्रमाणकत्वादिति**। 'अप्रामाणिकत्वात्' इति पाठः। **वह्निविधेयकेति**। उभयत्रापि वह्निमद्विधेयकेत्यादिपाठः। **निरूपिता तद्धर्मेति**। 'निरूपिततद्धर्म' इति पाठः। **इच्छाबलादिति**। एतदुत्तरं 'तादृशवह्न्यनुमितौ'

इति पाठः । **अथवा किञ्चिदिति ।** कार्यतावच्छेदककोटौ धूममात्रलिङ्गकत्वप्रवेशेऽपि धूमपरामर्शमात्रदशायां धूमालोकान्यतरलिङ्गकानुमितिर्जायतामितीच्छायामनुमितिर्न स्यात्, तत्रानुमितिनिष्ठविशेष्यताया धूमत्वान्यधर्मावच्छिन्नलिङ्गकत्वप्रकारकत्वानिरूपितत्वाभावादिति पक्षान्तरमत्रानुसृतम् । **कृतं पल्लवितेनेति ।** स्वस्य सिद्ध्यात्मकपरामर्शसत्त्वे पर्वते वह्न्यनुमितिः परस्य जायतामितीच्छावारणाय इच्छाशून्यो यः, तद्वृत्तित्वप्रकारत्वानिरूपितत्वमप्यनुमितिविषयतायां देयमित्यादिकमूह्यमिति सूचयितुमिदम् ॥

**दि—इत्यनुमिताविति ।** 'इत्याद्यनुमितौ' इति पाठः । एवं पर्वतत्व, वह्नित्वेत्यत्राप्यादिपदघटितः पाठो बोध्यः ॥

**मु—इति ज्ञानसत्त्वेपीति ।** सिद्धिप्रतिबन्धकतावच्छेदककोटौ विषयतयोर्निरूप्यनिरूपकभावनिवेशप्रयोजनं दर्शयितुं समूहालम्बनानुधावनम् ॥

दि—पक्षतानिरूपणे सामग्रीप्रतिबन्धकताविचारोऽसङ्गत इत्याक्षेपमवतारिकया निरस्यति—**उपाध्यायास्त्विति । संशयोत्तरप्रत्यक्षं प्रतीति ।** एतत्पूर्वं 'भवतीति' इति प्रतीकपाठो बोध्यः ॥

**मु—प्रत्यक्षसामग्रीति ।** प्रत्यक्षपदमत्र शाब्दस्याप्युपलक्षणम् । अनुमानातिरिक्तप्रकृतसाध्यसाधकमानत्वेन चानुगम इत्यनुपदं स्पष्टीभविष्यति । इत्थञ्च गुरुत्वादिसाध्यकस्थले तत्प्रत्यक्षसामग्र्यप्रसिद्ध्या अन्यतराभावस्य पक्षतात्वकथनमसङ्गतमिति केषाञ्चिदाक्षेपो निरस्तः । अत्र 'प्रत्यक्ष'पदात् पूर्वं 'समानविषयक' इति पदं क्वचित् दृश्यते । तत् प्रक्षिप्तमुत्तरग्रन्थानुत्थितेः ॥

**त—वाच्यत्वादित्याहेति ।** एतदुत्तरं 'शाब्देत्यादिना । स इत्यादिवाक्यजन्यशाब्देत्यर्थः' इति पाठः साधुः । संयोगेन वह्निविशिष्टपर्वतबोधकतच्छब्दघटितवाक्यजन्यशाब्देत्यर्थः । **अप्रतिबन्धकत्वादिति बोध्यमिति ।** तत्र तादात्म्येन वह्निमत एव प्रकारत्वेनेति भावः ॥

**दि—उत्तेजकत्वासम्भवादिति ।** ननु साध्यवत्पक्षविषयकानुमितिगोचरेच्छात्वेनानुमितित्वप्रकारकेच्छासाधारणरूपेणैवोत्तेजकत्वम् । अनुमित्यन्यो यः स्वविषयः, तत्सामग्रीसमवहितान्यत्वमपीच्छायां विशेषणम् । इत्थञ्च प्रत्यक्षसामग्रीकाले



अशाब्दज्ञानं जायतामितीच्छाया न संग्रहः । स्वमुत्तेजकत्वेनाभिमतेच्छा । अनुमित्यन्यतद्विषयः प्रत्यक्षम्, तत्सामग्रीसमवहितत्वमेव प्रत्यक्षसामग्रीकाले इच्छाया इति तदन्यत्वाभावान्न तत्र पक्षता । स्वविषयानुमितिसामग्रीसमवहितसिषाधयिषासंग्रहाय स्वविषये अनुमित्यन्यत्वनिवेशः । प्रत्यक्षसामग्रीसत्त्वेऽप्यनुमितिर्जायतामितीच्छासंग्रहाय स्वविषयेति । अधिकं पक्षतागादाधर्यादितोऽवगन्तव्यम् । इत्थञ्च दर्शितरूपेणेच्छायानिवेशे न कोपि दोष इत्यत आह—**एवमुभयत्रेति ।** नन्वत्र प्रत्यक्षसामग्र्या न स्वेतरकारणविशिष्टचक्षुस्संयोगत्वेन प्रवेशः, किन्तु चक्षुस्संयोगादिविशिष्टविशेषणज्ञानत्वेन, तद्विशिष्टविजातीयमनस्संयोगत्वेन वा । एवञ्च न सम्बन्धभेद इति चेन्न, विशेषणज्ञानमनोयोगयोरनुमितावपि हेतुत्वात्तयोः प्रतिबन्धकसामग्रीकुक्षौ घटनस्यानुचितत्वात् । विशिष्टज्ञानसामान्यकारणभिन्नानां चाक्षुषादिकारणानाञ्च समवायेनात्मन्यवृत्तेरेकसम्बन्धेन विशेषणत्वासम्भवात् । एतद्द्योतनाय दिगित्युक्तम् । एवं परामर्शेत्यादिग्रन्थस्य प्रकृतोपयोगितां दर्शयति—**नन्वित्यादिना ॥**

त— संशयोत्तरप्रत्यक्षस्थले विशेषदर्शनस्यानुमितिस्वरूपयोग्यत्वाच्छानुमानातिरिक्तत्वमिति तस्य प्रतिबन्धकत्वं न स्यादत उक्तम्—**अनुमित्युपधायकातिरिक्तेति । सचक्षुषोऽनुमित्यनुपपत्तेरिति ।** चक्षुरादेः प्रत्यक्षात्मकसाध्यसिद्धिस्वरूपयोग्यत्वेन प्रतिबन्धकत्वापातादिति भावः ॥

**[७]दि—समानविषयकानुमितिं प्रतीति ।** अथ किमिदमनुमितौ प्रत्यक्षसमानविषयकत्वम् । न तावत् प्रत्यक्षविषयविषयकत्वम्, पर्वतप्रत्यक्षसामग्र्याः पर्वतो वह्निमानित्यनुमितिप्रतिबन्धकत्वापत्तेः । नापि प्रत्यक्षविषयताशून्याविषयकत्वम्, पर्वतः पाषाणमयः महानसो वह्निमानिति समूहालम्बनात्मकस्य वह्निमद्विशेष्यकपर्वतत्वप्रकारकस्य वा प्रत्यक्षस्य सामग्रीदशायां पर्वते वह्न्यनुमित्यनुपपत्तेरिति चेन्न, प्रत्यक्षीयविशेष्यतावच्छेदकावच्छिन्नोद्देश्यतानिरूपिततदीयप्रकारतावच्छेदकावच्छिन्नविधेयताकत्वरूपत्वेनादोषादिति दिक् ॥

---

[७] **अदोषादिति ।** पर्वते वह्निमानिति प्रत्यक्षसामग्र्या नीलपर्वतो वह्निमान्, पर्वतो महानसीयवह्निमानित्याद्यनुमितिं प्रत्यप्रतिबन्धकत्वोपपत्तये विशेष्यतावच्छेदकोद्देश्यतावच्छेदकत्वयोः प्रकारतावच्छेदकविधेयतावच्छेदकत्वयोश्च पर्याप्त्यैक्यं विवक्षणीयम् । एवं भिन्नसम्बन्धावच्छिन्न–

**मु—संक्षेप इति ।** नन्वनुमितिसामान्यं प्रति दर्शितसिद्ध्यभावस्य हेतुता मास्तु, सिद्ध्युत्तरमनुमितिवारणाय सिद्ध्युत्तरानुमितौ सिषाधयिषायाः कारणत्वमेव स्वीक्रियतामिति चेन्न, उक्तरीत्या सिषाधयिषाया अनुगमासम्भवान्नानाकारणताकल्पनापत्तेः । सिद्धान्ते तु तत्तदिच्छाभावकूटस्य विशेषणत्वेनानुगमसम्भवात् । एतत्सूचनाय संक्षेप इत्यमिहितम् ॥

'हेतुप्रसङ्गात् हेत्वाभासान्' इति क्वचित् दृश्यते। तत्र हेतुप्रसङ्गात् इति भागो न दिनकरभट्टादिसम्मतः । क्वचित् 'विभजते' इत्यत्र निरूपयतीति पाठः ॥

**दि—तृतीयार्थोऽवच्छेदकत्वमिति ।** पर्वतो वह्निमानित्यादौ पर्वतो वह्न्यभाववान्, भूतलञ्च घटवदिति समूहालम्बनमादाय घटवद्भूतलादावतिव्याप्त्यापत्त्या वैशिष्ट्यस्य तृतीयार्थत्वत्यागः । अवच्छेदकत्वार्थे तृतीया 'प्रकृत्यादिभ्य उपसंख्यानम्' इति शास्त्रसिद्धा, तस्याकृतिगणत्वादिति तर्कालङ्काराः ॥

**त—**'विशिष्टविषयकत्वादिसमुदायस्य न्यूनवृत्तितया पर्याप्त्यनधिकरणत्वात्' इति पाठः साधुः । एवम् 'आवश्यकतया' इत्यनन्तरं 'यादृशविशिष्टविषयितात्वे पर्याप्त्यवच्छेदकत्वस्य कथञ्चित्' इति साधुः ॥

**मु—तत्रेति ।** एतदुत्तरं 'पर्वतो वह्न्यभाववानिति' इति भागः प्रक्षिप्तः । एवमुत्तरत्र 'वह्न्यभावव्याप्यवान् पक्ष इति' इत्यंशोपि । एवं 'तसात्तत्र' इत्यनन्तरं 'नाभासत्त्वम्' इत्यन्तभागोपि ॥

**दि—बाधभ्रमस्येति ।** अवच्छेदकत्वार्थकत्वविवक्षणेप्यतिव्याप्तिः सम्भवतीति सूचयितुं व्याचष्टे—**बाधभ्रमसाधारणस्येति ।** 'पर्वतविशेष्यकवह्न्यभावप्रकारकनिश्चयत्वादेः' इति पाठः ॥

**त—तथाचासम्भव एवेति ।** घटोऽवृत्तिरित्यत्र घटवति बाधे लक्षणसत्त्वादियमुक्तिश्चिन्त्या । नच प्रमेयत्वेन घटवन्तमवगाहमानं प्रमेय इति ज्ञानमादाय तत्रा

---

प्रकारताशालिप्रत्यक्षमादायातिप्रसङ्गवारणाय प्रकारतावच्छेदकविधेयतावच्छेदकसम्बन्धयोरैक्यञ्च विवक्षणीयमिति द्योतयितुं दिगित्युक्तम् ॥

वैशिष्ट्यस्य सामानाधिकरण्यादिरूपवैशिष्ट्यस्य ॥



प्यव्याप्तिरिति वाच्यम्, वक्ष्यमाणाव्यापकविषयिताशून्यत्वदलेन तज्ज्ञानव्यावृत्तेः । **प्रतिबन्धकीभूतज्ञान इति ।** 'प्रतिबन्धकीभूते' इति पाठः । **निरूप्यनिरूपकभावत्वदिति ।** अनयोरवच्छेद्यावच्छेदकभावमेव बहवो ग्रन्थकारा अभ्युपगच्छन्तीत्यवधेयम् । अव्यापकविषयिताशून्यघटवद्रूपबाधविषयकज्ञानस्य धर्मितावच्छेदकाप्रसिद्ध्या तत्र यद्रूपपदेन केवलघटत्वविशिष्ट एव धर्तव्य इति च बोध्यम् । **केचित्तु वह्न्यभावेति ।** वह्न्यभाववह्रदत्ववानिति ज्ञाने उभयप्रकारतानिरूपितविशेष्यताया अभेदे यद्रूपावच्छिन्नविषयितासत्त्वात् निर्धर्मितावच्छेदकत्वेनाप्रतिबन्धकत्वाच्च वक्ष्यमाणविशेषणदानेपि न तद्व्यावृत्तिरतः समूहालम्बनत्वकथनम् । **एकविशेष्यतासत्त्वेपीति ।** एतदनन्तरं 'तस्या वह्न्यभाववान् न ह्रद इति ज्ञाननिरूपित' इति साधुः पाठः । **यद्रूपावच्छिन्नविषयितात्वमिति ।** नच यादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगिविषयिताशून्यज्ञानीयत्वं तादृशप्रतियोगितावच्छेदकधर्मवद्विषयिताशून्यज्ञानीयत्वमेव वा लाघवादस्तु विशेषणमिति वाच्यम्, जातिमान् वह्न्यभाववानिति ज्ञानस्यापि यादृशविशिष्टविषयकत्वात्तन्निष्ठाभावो ह्रदो वह्न्यभाववानिति ज्ञानीयविषयित्वाभावः तत्प्रतियोगिन्या तत्प्रतियोगितावच्छेदकतद्व्यक्तित्वादिधर्मवत्या वा विषयितया शून्यत्वस्य दोषज्ञानेऽसम्भवादसम्भवापत्तेः । **संयोगवत्संयोगाप्रसिद्ध्येति ।** 'संयोगवत्संयोगत्वाप्रसिध्या' इति, एवं उत्तरवाक्ये 'विषयिता संयोगत्वविशिष्ट' इति, 'संयोगवतस्तत्राविषयत्वेपि' इति च पाठः । **संयोगप्रकारकोक्तभ्रम इति ।** 'संयोगत्वप्रकारकोक्ताकारभ्रम' इति पाठः । **लक्षणतावच्छेदकेति ।** लक्ष्यतावच्छेदकीभूत' इति पाठः साधुः । यद्रूपस्य चैतद्विशेषणम् । **संसर्गत्वावच्छिन्नेति ।** 'संयोगत्वावच्छिन्न' इति साधुः पाठः । **यो यत्रेति ।** एतदुत्तरं 'यादृशोपि' इति प्रक्षिप्तम् । **नच ज्ञानवैशिष्ट्येति ।** वैशिष्ट्यञ्चैककालावच्छेदेनैकात्मवृत्तित्वरूपं सामानाधिकरण्यम् । तादृशसामानाधिकरण्यसम्बन्धावच्छिन्नज्ञाननिष्ठावच्छेदकताकान्येति यावत् । नच ज्ञानानवच्छिन्नत्वेनेत्येव कुतो नोक्तमिति शङ्क्यम्, ज्ञानत्वावच्छेदेनाङ्कुरविशेषविषयकत्वाभावसाध्यकस्थले यत्राङ्कुरविशेषविषयकत्वविशिष्टज्ञानरूपबाधविषयकं ज्ञानं प्रमैवासीत्

---

तज्ज्ञानव्यावृत्तेरिति । यद्यपि घटत्वेन घटवन्तमवगाहमाने अव्यापकविषयिताशून्ये घट इति भ्रमे यद्विषयकत्वं वर्तते, प्रतिबन्धकत्वं च नास्तीत्यसम्भवोक्तिरसङ्गता, तथापि यत्र यद्घटोऽवृत्तिरित्यादौ तादृशभ्रमः कस्यापि न जातः, तत्र लक्षणसमन्वयसम्भवात्तदुक्तिरसङ्गतैवेति ध्येयम् । ननु सामानाधिकरण्यसम्बन्धेन ज्ञानविशिष्टज्ञानस्य प्रतिबन्धकतया वैशिष्ट्यस्य न प्रतिबन्धकतावच्छेदकत्वम्, किन्तु अवच्छेदकतावच्छेदकसंसर्गत्वमेवेत्यत आह—**तादृशेति ।**

तत्र लाघवाद्बाधज्ञानस्य विषयितासम्बन्धेन तादृशज्ञानविशिष्टनिश्चयत्वेनैव प्रतिबन्धकत्वात् ज्ञानानवच्छिन्नप्रतिबन्धकत्वाभावेनाव्याप्त्यापत्तेः । ज्ञानवैशिष्ट्येत्युक्तौ च ज्ञानसामानाधिकरण्यरूपस्य तस्यानवच्छेदकत्वाददोषात् । एवमपि सामानाधिकरण्यसम्बन्धेन ज्ञानविशिष्टपक्षके अङ्कुरविशेषविषयकत्वाभावसाध्यके दर्शितदिशा बाधेऽव्याप्तिः । प्रकारान्तरेण विषयविधयाऽवच्छेदकताकप्रतिबन्धकताकतायास्संग्रहोपपादने ज्ञानानवच्छिन्नत्वमेवालमिति प्रतिभाति । वस्तुतस्तु, कोटिप्रविष्टानामप्यवच्छेदकत्वाद् प्रामाण्यज्ञानस्य च सर्वत्र प्रतिबन्धकतावच्छेदककोटिप्रविष्टत्वात् ज्ञानानवच्छिन्नप्रतिबन्धकत्वाप्रसिद्ध्या ज्ञानवैशिष्ट्यानवच्छिन्नत्वं दत्तमिति । **पक्षावृत्तित्वादिति** । 'तस्य पक्षावृत्तित्वात्' इति पाठः । **अनुमित्यप्रतिबन्धकत्वेति** । नन्वेवमपि साध्याभावस्यान्वयव्याप्तिघटिते साध्याभावाभाववद्वृत्तिहेतावतिव्याप्तिरिति चेन्न, तस्यासाधारण्यत्वेन लक्ष्यत्वात्, साध्याभावाभावस्य साध्यरूपत्वेन तस्यापि साध्यसामानाधिकरण्यग्रहविरोधित्वात् । परेतु, दर्शितविरोधित्वे मानाभावात् हेतुव्यापकसाध्याभाव इव पक्षधर्मताज्ञानसहकारेणानुमितिप्रतिबन्धकज्ञानविषयत्वेनायमपि विरोधविशेष एवेति वदन्ति । **इत्युपगमादिति** । 'इत्युपगमात्, इतिचेत्' इति पाठः । **एकदेशविषयकतादृशनिश्चयस्याप्रसिद्धेरिति** । ह्रदो वह्न्यभाववानित्यादिप्रतिबन्धकज्ञानीयैकदेशविषयिताया यद्रूपावच्छिन्नविषयित्वाघटकह्रदत्वावच्छिन्नविषयिताशून्यज्ञानीयत्वाभावात् वह्न्यभाव इत्याद्यप्रतिबन्धकज्ञानीयविषयितायाश्च प्रतिबन्धकतानवच्छेदकत्वादिति भावः । एवं संयोगः संयोगवानिति बाधभ्रमेपि संयोगत्वावच्छिन्नविषयित्वाघटकसंयोगत्वावच्छिन्नसंयोगत्वनिष्ठविषयितायाः सत्त्वान्न तादृशनिश्चयस्यापि ग्रहणं सम्भवतीति बोध्यम् । **तदघटकमिति** । 'तदघटकत्वम्' इति पाठः । **गुरुतरविशेषणमपि न देयमेवेति** । इदमत्र चिन्त्यम्—ह्रदो वह्निमानित्यादौ यद्रूपपदेन वह्न्यभाव,ह्रदत्वयोर्धरणे यद्रूपावच्छिन्नविषयकत्वाधिकरणं जातिमान् वह्न्यभाववानिति ज्ञानमपि । तन्निष्ठो यो भेदः दोषज्ञानीयविषयितारूपतद्व्यक्तिभद्भेदः, तत्प्रतियोगितावच्छेदकविषयिताशून्यत्वं न दोषज्ञानस्येति दर्शितयद्रूपावच्छिन्नविषयितात्वघटिता

---

**प्रकारान्तरेणेति** । ज्ञानवैशिष्ट्यानवच्छिन्नत्वं नाम ज्ञानवैशिष्ट्यनिष्ठावच्छेदकताकत्वविषयितासम्बन्धावच्छिन्नावच्छेदकत्वानिरूपकत्वोभयाभाव इति परिष्कारेणेत्यर्थः । **मानाभावादिति** । साध्याभावाभावत्वेनैव भानात् ग्राह्याभावानवगाहित्वादिति भावः ॥



व्यापकविषयिताशून्यत्वमेव देयमिति । **नोपादेय एवेति** । नन्वेवं ह्रदो वह्निमानित्यादौ वह्न्यभाववद्ध्रदवत्यतिव्याप्तिः, तद्विषयताया निरवच्छिन्नत्वेनोक्तविशेषणविशिष्टनिश्चयीयत्वात् । अतो विशिष्टान्तराघटितत्वविशेषणमावश्यकमिति चेन्न, वह्न्यभाववद्ध्रदवानिति निश्चये प्रतिबन्धकतानवच्छेदकवह्न्यभाववद्ध्रदत्वावच्छिन्नप्रकारतायाः सत्त्वेन तदसंग्रहात् । **सम्पत्तेरितीति** । पाषाणमयत्वविशिष्टपर्वते एवमप्यतिव्याप्तेराह—**वस्तुत इति** । इयमेवातिव्याप्तिरनुपदवर्तिनि 'एकदेशादावतिव्याप्तिवारणाय' इत्यत्रादिपदग्राह्या बोध्या । अत्र यद्यपि विशेष्यदलघटकनिश्चये एव दर्शितसावच्छिन्नविषयिताशून्यत्वनिवेशेप्येतदतिव्याप्तिपरिहारायानतिरिक्तवृत्तित्वघटनाया आवश्यकत्वात् 'स्वातन्त्र्येणैव' इत्युक्तिरसङ्गतेव भाति, तथापि निश्चयत्वाद्यंशस्यापि प्रयोजनं सम्पादयितुमेवमुक्तम् । **दिगिति** । महाविशिष्टस्य वस्तुतो दोषानतिरेकाद्दर्शितविषयिताशून्यदोषज्ञानविषयत्वादतिव्याप्तिवारणाय तद्रूपे विषयतावच्छेदकत्वं देयमिति सूचयितुं दिगित्युक्तम् । **ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकेति** । ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभाववान् धूमाभाववानिति निश्चयविशिष्टस्य वह्न्यभाववान् ह्रद इति निश्चयस्य पक्षधर्मताग्रहप्रतिबन्धकत्वात् ज्ञानवैशिष्ट्यावच्छिन्नतत्प्रतिबन्धकतावच्छेदकीभूतवह्न्यभावत्वविशिष्टवह्न्यभाववद्ध्रदत्वविशिष्टविषयिताद्वयशून्यत्वस्य ह्रदो वह्न्यभाववानिति ज्ञानेप्यसत्त्वाद्बाधाद्यसंग्रह इति ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकत्वमुपेक्ष्य नञ्द्वयघटितनिवेशः । **आहुरिति** । अनेन सूचितोऽस्वरसो गौरवमेवेति बोध्यम् ॥

दि—**तद्वत्त्वं चेतीति** । एतदुत्तरं 'नच वह्निव्यभिचारविशिष्टद्रव्यत्वस्य' इति आदिपदरहितः पाठः । **तद्धेतुत्वस्यैवेति** । 'तद्धेतोरेव' इति पाठः । एतदनुरोधेन तरङ्गिण्यामपि प्रतीके 'तद्धेतोः' इत्येव पाठो बोध्यः । **नच वह्न्यभावेति** । 'ननु वह्न्यभाव' इति पाठः । **बाधकालीनेति** । 'बाधभ्रमकालीने' इति पाठः ।

---

**निश्चयत्वाद्यंशस्येति** । आदिना अनाहार्यत्वपरिग्रहः । नचाव्यापकविषयिताशून्यत्वनिवेशे अनियताहार्यवारणाय अनाहार्यत्वनिवेशस्यावश्यकत्वेपि निश्चयत्वांशनिवेशो व्यर्थ इति वाच्यम्, घटो जलमित्यत्र जलभिन्नघटादिरूपबाधसंग्रहाय तदावश्यकत्वात् । अन्यथा घटो जलं नवेत्यादिसंशयस्य जलत्वजलभेदोभयकोटिकस्य निरुक्ताव्यापकविषयताशून्यत्वविशेषणेनाव्यावर्तनात् । एवम भावो भेदो वा जलमित्यादौ अभावो भेदो वा जलं नवेति संशयवारणाय च तन्निवेशावश्यकत्वात् ॥

**तत्रेतीति।** एतदुत्तरं 'बाधभ्रमकालीने धूमादिसद्धेतौ' इति पाठः। **तादृशव्यवहारयोरिति।** 'तादृशव्यवहाराव्यवहारयोः' इति पाठः। **इत्यस्वरसबीजमिति।** केचित्तु, इद्मुपलक्षणम्। ज्ञानस्य सम्बन्धत्वकल्पनाकल्पनाभ्यामेव दुष्टत्वव्यवहाराव्यवहारयोरुपपत्तिवर्णने लघोर्ज्ञेयत्वादेरपि दुष्टलक्षणत्वसम्भवात्तत्त्यागोऽनुचित इत्याहुः। तन्न मनोरमम्, दुष्टलक्षणस्य दोषघटितत्वानुरोधेन तस्य लक्षणत्वासम्भवात्, ह्रदो वह्निमानित्यादौ वह्न्यादेर्दोषत्वस्येष्टत्वात् ॥

मु—'अन्यतरविरोधित्वम्' इत्यनन्तरं 'तेन' इत्यारभ्य 'प्रतिबन्धकम्' इत्यन्तं प्रक्षिप्तम्। **तदभावेति।** 'तदभावाद्यनवगाहित्वाच्च' इति पाठः ॥

त—**तेन रूपेणेति।** विशिष्टान्तराघटितत्वघटितप्रतिबन्धकतानतिरिक्तवृत्तिविषयितानिरूपकतावच्छेदकत्वेन रूपेणेत्यर्थः। **धर्मबोधकत्वनियमोपगमादिति।** उद्देश्यतावच्छेदकस्याभेदेन विधेयतावच्छेदके भाने दोषपदसमभिव्याहारस्य हेतुत्वादिति भावः। नन्वेवं प्रमेयत्वविशिष्टव्यभिचारो न दोष इत्यस्याप्रामाण्यापत्तिरिति चेन्न, तत्र लक्षणया प्रमेयत्वविशिष्टव्यभिचारत्वे दोषपदार्थतावच्छेदकभेदस्यैव बोधोपगमात्। यदि च व्यभिचारत्वे दोषपदार्थतावच्छेदकत्वसत्त्वात् प्रमेयत्वविशिष्टे तस्मिन् तद्घटितोभयस्मिन् वा न दोषपदार्थतावच्छेदकभेदः सम्भवतीति सूक्ष्ममीक्ष्यते, तदा विशिष्टान्तरविषयित्वाव्यापकस्वावच्छिन्नविषयिताव्यापकप्रतिबन्धकताकधर्मवान् दोषपदार्थः। तत्र स्वावच्छिन्नविषयितायां प्रमेयत्वविशिष्टव्यभिचारत्वाद्युद्देश्यतावच्छेदकस्य स्वावच्छिन्ननिरूपकताकत्वेनान्वयः। इत्थञ्चोद्देश्यतावच्छेदकस्यैव विधेयतावच्छेदकधर्मत्वेन भाननियमः सुरक्षितो भवति। तयोर्भेदे एकधर्मावच्छिन्नविषयितायामपरधर्मावच्छिन्ननिरूपकताकत्वासम्भवात् प्रमेयत्वविशिष्टव्यभिचारत्वावच्छिन्नविषयिताव्यापकप्रतिबन्धकतायाञ्च न विशिष्टान्तरविषयित्वाव्यापकत्वमिति प्रमेयत्वविशिष्टव्यभिचारो दोष इति न प्रयोगापत्तिः। नञ्समभिव्याहारस्थले च व्युत्पत्तिवैचित्र्यात् उद्देश्यतावच्छेदकस्य शुद्धवह्नित्वप्रमेयत्वविशिष्टव्यभिचारत्वादेः स्वावच्छिन्ननिरूपकताकभेदसम्बन्धेनोक्तविषयितायां भानात् वह्निर्न दोषः, प्रमेयत्वविशिष्टव्यभिचारो न दोष इत्यादेश्चोपपत्तिरिति मन्तव्यम्। एवमपि पर्वतो वह्निमान् धूमादित्यादिसद्धेतौ वह्न्यभावादिः कोपि न दोष इति व्यवहारस्यानुपपत्तिः, तत्र पूर्वोपवर्णितदोषपदार्थाप्रसिद्धेः। अतस्तत्र



वह्न्यभावादिपदानां तत्तद्धर्मावच्छिन्नविषयकत्वविशिष्टनिश्चये लक्षणा, दोषपदार्थश्च प्रकृतानुमितिप्रतिबन्धकतावान्। तदन्योन्याभावश्च नञा बोध्यत इत्यङ्गीकारान्न काप्यनुपपत्तिरिति सुधियो विदाङ्कुर्वन्तु। केचित्तु, प्रमेयत्व,व्यभिचारत्वोभयं प्रमेयत्वविशिष्टव्यभिचारपदार्थः। तद्भेदो दोषपदार्थतावच्छेदके भासते। इत्थञ्च शुद्धव्यभिचारत्वे उभयभेदसत्त्वाद्वाक्यस्य प्रामाण्यमित्याहुः। परे तु, प्रमेयत्वविशिष्टव्यभिचारो दोष इति वाक्यं प्रमाणम्। न दोष इति चाप्रमाणम्। अत एव बहुभिर्व्यभिचारवृत्तिमेयत्वादावेवातिव्याप्तिर्दर्शितेति वदन्ति। **तद्धूमेति।** तच्छब्दः प्रक्षिप्तः ॥

दि—**सम्भवेतीति।** 'तत्सम्भवेति' इति प्रतीकपाठो बोध्यः ॥

त—**किमुद्दिश्येति।** 'किमप्युद्दिश्य' इति पाठः ॥

मु—**एवं साधारणेति।** तथाच मूलस्थानैकान्तपदं पारिभाषिकमिति भावः। एकः अन्तः सपक्षो विपक्षो वा यस्य स एकान्तः, स न भवतीत्यनेकान्तः। एकस्मिन्नन्ते भवः ऐकान्तिकः, स न भवतीत्यनैकान्तिकः इत्यनेकान्तानैकान्तिकपदयोर्व्युत्पत्तिर्बोध्या। **तत्र हेतोर्निश्चयादिति।** वृत्तित्वादित्यनुक्त्वा निश्चयादित्युक्तिर्वृत्तित्वे प्रमाणोपन्यासरूपा बोध्या ॥

दि—**क्वचिद्दोषमिति।** अत्र 'क्वचित् क्वचित्' इति पाठः ॥

त—**स्वसमानाधिकरणेत्यादि।** अत्र 'स्वसमानाधिकरणाभावप्रतियोगितावच्छेदकसाध्यतावच्छेदक' इत्यादिपाठः। **एकहेत्वाभासत्वानुपपत्तिरिति।** अनैकपदं नावश्यकमिति बोधयितुं निश्चितेत्यादिभाववर्णनम्। वस्तुतस्तु, हेत्वाभासत्वपदमत्र हेत्वाभासविभाजकधर्मपरम्। स च धर्मः साध्यसाधनग्रहाविरोधित्वे सति व्याप्तिज्ञानप्रतिबन्धकत्वरूपः। तस्य च दर्शितासाधारण्ये विरह इति भावः ॥

मु—**अत्यन्ताभावाप्रतियोगिसाध्यकादिरिति।** अत्र दोषाणामेव प्रकृतत्वात् ककारः प्रक्षिप्त इति भाति। **व्यतिरेकव्याप्तिज्ञानप्रतिबन्ध इति।** नचैवं साध्याभावाव्यापकहेत्वभावेऽतिव्याप्तिरिति वाच्यम्, तस्यापि लक्ष्यत्वात्। नच कालवान् गगनादित्यादौ साध्यानिरूपिताधिकरणत्वादिरनुपसंहारिलक्ष्यतया मणिमथुरानाथीयोक्तमसङ्गतं

यस्येति। षष्ठ्यर्थः अधिकरणत्वरूपः सम्बन्धः ॥

स्यात्, तस्य व्यतिरेकव्याप्तिज्ञानाविरोधित्वादिति वाच्यम्, तद्ग्रन्थस्य मतान्तरानुसारित्वात्। स्वमते सामानाधिकरण्यग्रहविरोधित्वेन साध्यानिरूपिताधिकरणत्वादेरसाधारण्य एवान्तर्भावात् ॥

त—**आशङ्क्याहेति**। एतदुत्तरं 'केवलान्वयीति। केवलान्वयिसाध्यके अत्यन्ताभावाप्रतियोगिसाध्यके। मूले प्रतिबन्धकपदं प्रतिबन्धकग्रहविषयार्थकम्' इति साधुः पाठः ॥

मु—**अयञ्चेति**। साध्याभावग्रहः साध्याभावानुमितिः, तत्सामग्रीत्वेन तत्कारणव्यतिरेकिपरामर्शविषयत्वेन। प्रतिबन्धकः प्रतिबन्धकज्ञानविषयः। प्रतिबन्धकतावच्छेदकरूपन्तु पक्षधर्मताज्ञानविशिष्टविरोधविषयकनिश्चयत्वमिति हेत्वाभाससामान्यलक्षणतरङ्गिण्यां स्पष्टम् ॥

दि—**द्वितीयो हेतुरिति**। एतदुत्तरम् 'इति विशेष इत्यनयोर्भेदः' इत्यपि पाठः ॥

त—**व्यतिरेकव्याप्तिमतेति**। अशक्तीतीत्यारभ्य भाव इत्यन्तं प्रक्षिप्तम्। **प्रथमोपस्थितीति**। अत्र 'प्रथमोपस्थितिविशेषणमिति। इदञ्च विशेषणमनाहार्यत्वादेरप्युपलक्षणम्' इति पाठः। ननु रत्नेत्यतः प्राक् 'सूचयतीति' इति प्रक्षिप्तम् ॥

मु—**अत्र केचिदिति**। तदभावव्याप्यवत्ताज्ञानस्य तद्वत्ताज्ञाने प्रतिबन्धकत्वासम्भवं दर्शयति—**यथेति**। प्रतिबध्यकोटौ लौकिकसन्निकर्षाजन्यत्वनिवेशेपि नोपपत्तिरित्याह—**यथा चेति**। दोषविशेषाजन्यत्वनिवेशेपि न सामञ्जस्यमिति दर्शयति—**एवमिति**। **प्रत्यक्षरूप इति**। नच धर्म्यंशे लौकिकसन्निकर्षजन्यमेवेदं प्रत्यक्षमिति नास्य प्रतिबध्यत्वापत्तिरिति वाच्यम्, घटचक्षुस्संयोगादिकाले घटो वायुमानित्युपनीतभानानन्तरं घटो न वायुमानिति ज्ञानवारणाय तन्निष्ठप्रकारितायां लौकिकसन्निकर्षाप्रयोज्यत्वनिवेशस्यावश्यकतया प्रतिबध्यतावच्छेदकाक्रान्तत्वसम्भवात्। यथा च संशयीयप्रकारिताया न लौकिकसन्निकर्षप्रयोज्यत्वम्, तथाग्रे दिनकरीये स्फुटी भविष्यति। ननु तद्वत्ताज्ञाने अनुमितिभिन्नत्वमपि दीयत इत्यत आह—**न हि लौकिकेति**। प्रामाणिकी उभयवादिसिद्धा। **परामर्शप्रतिबन्धः फलमिति**। यद्यप्याश्रयासिद्धिज्ञानमनुमितिमपि प्रतिबध्नाति, तथाप्यसिद्धीनां दूषकताबीजैक्यप्रकाशनायैव



मुक्तिः। **व्याप्यत्वाभिमतस्याभाव इति**। व्याप्याभाव इत्युक्तौ घटो द्रव्यं गुणत्वादित्यादौ सर्वव्यवहारसिद्धस्वरूपासिद्धेरभावप्रसङ्ग इति तत्त्यागः। व्याप्याभाववत् हेतुतावच्छेदकावच्छिन्नाभावस्यापि लक्ष्यत्वमेवेति भावः। अत एव पक्षे हेतुमत्ताज्ञान रूपस्येत्यभिधानम्। परे तु, पक्षे साध्यव्याप्याभावादिर्व्याप्यत्वासिद्धिविशेष एव, स्वरूपासिद्धिलक्षणं तु विशिष्टहेतुग्रहाविरोधित्वे सति हेतुमत्ताग्रहविरोधित्वमिति वदन्ति। तत् व्याप्यत्वासिद्धिपदस्वारस्यभङ्गात् ग्रन्थकारानुमतं वेदितव्यम्। **व्याप्यत्वासिद्धिमध्येऽन्तर्भूता इति**। यद्यप्यमुमेव पाठमनुसृत्य दिनकरभट्टैर्व्याख्यातम्, तथापि व्याप्यत्वासिद्धिनिरूपणस्यैवात्र क्रमप्राप्ततया तत्स्वरूपादिकमजानतां साध्याप्रसिद्ध्यादीनामाधिक्यशङ्काया एवानुदयात् नीलधूमादित्यादौ च व्याप्यत्वासिद्धेर्ग्रन्थकृदनभिमतत्वात् 'साध्याप्रसिद्ध्यादयस्तु व्याप्यत्वासिद्धिः, इत्येतद्देशीयपाठ एव वरीयानिति प्रतिभाति। एकवचनञ्च वेदाः प्रमाणमितिवत् सङ्गमनीयम्। यदि पाठान्तर प्रामाण्येप्याग्रहः, तदा व्याप्यत्वासिद्धिशब्दादेवाव्यभिचरितसाध्यसामानाधिकरण्याभाव बोधसम्भवादितरेषां तदन्तर्भावकथनमेवावशिष्यत इत्यभिप्रायवर्णनेन स पूरणीयः ॥

त—**धूमव्याप्तिविरहादिति**। 'धूमव्याप्तिसत्त्वात्' इति पाठः। **नान्यथेति भाव इति**। गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्यैवानुमितिजनकत्वं मीमांसकमत इति परामर्शग्रन्थे प्रतिपादितं स्मर्तव्यम् ॥

दि—**अनुमित्यापत्तिवारणायेति**। नचालेष्टापत्तिस्सम्भवति, तल्लिङ्गकव्यभिचारनिश्चयानन्तरं तल्लिङ्गकपरामर्शेनानुमितेस्सर्वतान्त्रिकाननुमतत्वात्। धूमवान् वह्नेरिति प्रसिद्धस्थलपरित्यागबीजमत्रान्वेष्टव्यम्। **तावतापीति**। साध्यवदन्यत्वादिघटितव्याप्तिज्ञानकारणतापक्षे हेतुतावच्छेदके व्याप्यवच्छेदकत्वभानावश्यकत्वेपीत्यर्थः। व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानस्यैव सिद्धान्ते अनुमितिं प्रति हेतुत्वात्तद्भानानङ्गीकारेपि न क्षतिरित्यपिशब्देन सूचितम् ॥ **अनतिरिक्तवृत्तीति**। 'अनतिरिक्तवृत्तित्व' इति पाठः ॥

त—'व्यर्थविशेषणस्थले' इत्यभिधानस्यै सार्थकतामवतारिकया दर्शयति—**गुरुधर्मस्येति**। पूर्वम् 'अस्तु वा' इति ग्रन्थावतरणकाले गुरुधर्मस्य हेतुतावच्छेदकत्वस्थले सर्वत्र व्याप्यत्वासिद्धिरिष्टैवेति वचनं प्रौढिवादमात्रमवसेयम् ॥

दि—**अधिकेन निगृह्यत इति ।** अनेन 'हेतौ व्यर्थविशेषणत्वं निग्रहस्थानविभाजकसूत्रस्यानुक्तसमुच्चयपरेण चकारेण समुचितं पृथगेव निग्रहस्थानम्' इति वदन्तो दीधितिकाराः कटाक्षिताः । **प्रतिबन्धकत्वोपगमादिति ।** प्रतिबन्धकत्वान्तरोपगमादित्यर्थः । पूर्वोपदर्शितप्रतिबन्धकत्वस्यानुमित्यादिसाधारणनिरूपकताकस्यावश्यकता स्पष्टा । **प्रतियोगिप्रत्यक्षापादनादिति ।** यद्यविनश्यदवस्थदोषस्यैव भ्रमजनकत्वमतो नोक्तापादनसम्भव इत्युच्यते, तदाप्याह—**यत्राभावेति ।** अभावप्रमासमकालं प्रतियोगिज्ञानजनकदोषोत्पत्तिर्न सम्भवति, दोषरूपप्रतिबन्धकवशात् प्रमाया अनुत्पादात् प्रतिबन्धकाभावस्य कार्यकालवृत्तित्वावश्यकत्वादत आह—**तद्द्वितीयक्षणेवेति । इन्द्रियभेदेन तथाविधेति ।** अत्र केचित्, घटान्तर्भावेण महत्त्वावच्छिन्नचक्षुस्संयुक्तसमवायेन परमाणौ पृथिवीत्वप्रत्यक्षापत्तिभिया यद्घटितः सन्निकर्षो यत्र, तत्रैव तत्प्रत्यक्षमिति नियमस्यावश्यकतया धर्म्यन्तरघटितसन्निकर्षमादाय कुतेयमापत्तिर्न सम्भवत्येवेति तत्तदिन्द्रियभेदेन प्रतिबध्यप्रतिबन्धकभावकल्पनं व्यर्थमित्याहुः । तन्न रमणीयम्, यतः परमाणौ महत्त्वाभावान्न तद्विशेष्यकप्रत्यक्षापत्तिः । घटादौ पृथिवीत्वप्रत्यक्षे सति ज्ञानलक्षणया पृथिवीत्वविशेष्यकपरमाणुवृत्तित्वप्रकारकप्रत्यक्षञ्चेष्टमिति न तादृशनियमावश्यकता । एवमेवान्धकारे घटाभावप्रत्यक्षापादनमपि तत्कृतं परास्तम् । अभावप्रमोत्तरं दोषात् प्रतियोग्यारोप इष्ट इत्यपि न चारु, पित्तादिदोषविशेषस्थल एव तदनुभवात् धर्म्यन्तरघटितसन्निकर्षेणारोपस्थले सर्वत्रेष्टापत्त्यसम्भवात् । एवं समुच्चयदृष्टान्तोपि तद्दर्शितो न समञ्जसः, तत्रापि विरोधिवज्ञानरूपो त्तेजकसत्त्वेन प्रतिबन्धकस्यैवाभावादिति । **पित्तद्रव्यात्मकेति ।** वंशोरगभ्रमस्थले प्राचीनैरप्यलौकिकस्यैव प्रत्यक्षस्याङ्गीकारात्तत्रत्यदोषाजन्यत्वं सर्वेषामपि देयमिति भावः । **तद्व्यञ्जकलौकिकविषयिताया इति ।** घटो वायुमानित्यादिचाक्षुषानन्तरं घटं साक्षात्करोमीति प्रत्ययात् वायुं साक्षात्करोमीत्यप्रत्ययाच्च तत्साक्षात्कारत्वप्रत्यक्षे तल्लौकिकविषयतायाः प्रयोजकत्वावश्यकता बोध्या । **लौकिकप्रत्यक्षोत्पत्तिकाल इति ।** अथ घटलौकिकचाक्षुषे कथञ्चिदुपस्थितघटाभावस्यापि भाने तदंशे तस्य भ्रमत्वं नियतम् ।

---

**एवमेवेति ।** भूतले आलोकसंयोगाभावेन न तद्विशेष्यकघटाभावप्रकारकप्रत्यक्षापत्तिः । अत एव न लौकिकतत्प्रकारकप्रत्यक्षापत्तिरपि । ज्ञानलक्षणया भूतलप्रकारकप्रत्यक्षन्तु इष्यत एवेति भावः ।।



अतो दोषेण तत्कारणेनावश्यं भाव्यम् । तस्य दूरत्वादिरूपस्य सत्त्वे तेन प्रतिबन्धात् घटलौकिकमेव न सम्भवति । तदभावे च भ्रमकारणाभावान्न तदापत्तिः । एवञ्च समानधर्मितावच्छेदकेत्यादिना दर्शितप्रतिबन्धकत्वकल्पनं किमर्थमिति चेन्न, विपरीतनिश्चये दोषस्य प्रतिबन्धकत्वेपि तत्संशये तस्यानुकूलत्वमेवेति दर्शितापत्तिवारणायोक्तप्रतिबन्धकत्वस्यावश्यमङ्गीकरणीयत्वात् । **अन्यत्र विस्तर इति ।** तद्धर्मिकतदभावनिश्चय इत्युक्तिः समानविषयकत्वेन प्रतिबन्धकतावादिप्राचीनमतानुसारेण । नवीनमते तु तद्धर्मावच्छिन्नधर्मिकतद्धर्मावच्छिन्नाभावत्वावच्छिन्नप्रकारकनिश्चयत्वेन प्रतिबन्धकता । एवमनाहार्यत्वादिकमपि मतद्वये निवेश्यमित्यभिप्रायेणोक्तमन्यत्र विस्तर इति ॥

त—**न लौकिकसन्निकर्षजन्यत्वमिति ।** एतदुत्तरं भाव इत्यन्तं प्रक्षिप्तम् । **उभयोपपत्तेरितीति ।** 'संशये लौकिकसन्निकर्षाजन्यत्वस्य' इति पाठः । **साध्यसंसर्गज्ञानत्वेनैवेति ।** नचैवं सिषाधयिषाविरहविशिष्टसिद्धिकाले अनुमित्यापत्तिरिति वाच्यम्, तस्याः स्वातन्त्र्येणानुमितिप्रतिबन्धकत्वात् । अथ साध्यसंसर्गज्ञानत्वेन कारणत्वे अनुमितेरपि तादृशज्ञानत्वेन बाधबुद्धिप्रतिबध्यत्वात् 'नानुमितिविरोधित्वम्' इत्युक्तिरसङ्गतेति चेन्न, विरोधित्वस्यात्र साक्षादनुमित्यभावप्रयोजकत्वरूपत्वात् । इत्थञ्च अनुमितिकारणविरोधित्वमेव हेत्वाभासलक्षणवटकम्, न त्वनुमितितत्करणान्यतरविरोधित्वम्, गौरवादित्यभिप्रायः ॥

दि—ननु बाधग्रन्थे साध्याभावज्ञानविशेष्यकप्रमात्वज्ञानस्य प्रतिबन्धकत्वाभावकथनमनुपयोगीति शङ्कामवतारिकया निरस्यति—**पक्षविशेष्यकेति । विरोधादिपरिग्रह इति ।** 'असिद्ध्यादिपरिग्रहः' इत्येतद्देशीयपाठः । मूले सत्प्रतिपक्षाव्यवधाने नासिद्धस्यैव पाठादयं साधुतरः ॥

त—**संशयोत्पत्त्यैवेति पाठ इति ।** एवकारेण 'संशयान्तरोत्पत्त्यैव' इति पाठो व्यवच्छिद्यते । **नच साध्याभावज्ञानस्येति ।** एतत्पूर्वं 'प्रमात्वनिश्चयोपीति' इति प्रतीकपाठो भ्रष्टः । **प्रमात्मकज्ञानस्येति ।** 'प्रमात्वज्ञानस्य' इति साधुः पाठः ॥

---

**प्रयोजकत्वरूपत्वादिति ।** बाधनिश्चयस्य सर्वत्र अनुमितिकारणाभावसम्पादकत्वमेव । अनुमित्यभावस्तु कारणीभूतसाध्यसंसर्गज्ञानाभावादेव, यत्र सत्यपि कारणे कार्यानुत्पादः, तत्रैव प्रतिबन्धकस्य साक्षात् कार्याभावप्रयोजकत्वव्यवहारादिति भावः ॥

**दि—एकनिश्चयासम्भवादिति** । अनाहार्यतादृशैकनिश्चयासम्भवादित्यर्थः । आहार्यस्य च न प्रतिबन्धकत्वमिति भावः ॥

**त—अयोगोळकधर्मिकपरामर्शोत्तरमपीति** । एतदुत्तरं 'तद्धर्मिकबाधबुद्धिरिव वह्निधर्मिक' इत्यादिः पाठः । **बाधितत्वापत्तीति** । स्वरूपसम्बन्धेन केवलं साध्याभावमवगाहमानस्य साध्याभाववान् पक्ष इति ज्ञानस्यापि साध्याभावेऽव्याप्यवृत्तित्वग्रहाभावकाले प्रकृतानुमितिप्रतिबन्धकत्वाद्बाधितत्वापत्तिरित्याशयः । **वारणायेति** । अव्याप्यवृत्तित्वज्ञानस्य नोत्तेजकत्वम्, तद्वत्ताबुद्धिं प्रति प्रतियोगिव्यधिकरणतदभाववत्ताबुद्धेरेव प्रतिबन्धकत्वमिति भावः । **प्रतियोगिव्यधिकरणेति** । प्रतियोग्यनधिकरणवृत्तित्वविशिष्टेत्यर्थः । प्रतियोग्यसमानाधिकरणार्थकत्वे गुणः संयोगी मेयत्वादित्यादौ साध्याभावस्य प्रतियोग्यसमानाधिकरणत्वासम्भवात् तादृशसाध्याभाववत्पक्षस्य बाधत्वानापत्तिः । निरवच्छिन्नदैशिकविशेषणतासम्बन्धेन साध्याभाववत्पक्षादिरेवात्र बाध इति परे । प्रसङ्गादाह—**एवमिति** । अत्रापि केवलस्य कपिसंयोगाभावस्य प्रतियोगिवैयधिकरण्यघटितद्रव्यत्वादिव्यापकत्वात् कपिसंयोगाभावव्याप्यद्रव्यत्ववत्पक्षस्य सत्प्रतिपक्षत्वादुक्तहेतोः सत्प्रतिपक्षितत्वापत्तिः तद्वारणप्रकारश्च पूर्ववद्बोध्यौ । शुद्धसाध्याभावघटितस्य सत्प्रतिपक्षत्वापत्तिरेव न सम्भवति, तत् साध्याभावे प्रतियोगिवैयधिकरण्यनिवेशो व्यर्थ इति वदतां मतमुपन्यस्य दूषयति—**यत्त्वित्यादिना उचितमित्यन्तेन** । वस्तुतस्तु, ग्रन्थोऽयं 'सत्प्रतिपक्षसङ्कीर्णतैव' इत्युत्तरम् 'इति वाच्यम्' इत्यतः प्राग्योजनीयः । इत्थञ्च न सन्दर्भासङ्गतिलेशोपि । **ग्रन्थकारोक्तस्येति** । ननु कथं कस्यचिदुक्तिमात्रेण प्रतिबन्धकत्वसम्भव इति चेन्न, युक्तेरपि सत्त्वात् । सा च संशये कोट्योः परस्परविरोधावगाहननियमेन प्रतियोगिवैयधिकरण्यघटितव्याप्त्यवगाहिपरामर्शस्यापि प्रतिबन्धकत्वमनिवार्यमिति । **सत्प्रतिपक्षसङ्कीर्णतैवेति** । नच कपिसंयोगी एतद्वृक्षत्वादित्यादावतिव्याप्तिवारणाय प्रतियोगिव्यधिकरणसाध्याभावव्याप्यवत्पक्षस्यैव सत्प्रतिपक्षत्वमिति पूर्वमेवोक्तम्, तत् कथं तदघटितस्य तत्त्वोक्तिरिति वाच्यम्, दर्शितसद्धेतुस्थले प्रतियोगिवैयधिकरण्यनिवेशावश्यकत्वेपि गन्धसाध्यकस्थले तदावश्यकता नास्तीत्यभिप्रायात् । अलं **पल्लवितेनेति** ।

---

**तदावश्यकता नास्तीति** । उत्पत्तिक्षणावच्छिन्नो 'घटो गन्धवान् पृथिवीत्वादित्यत्र हेतोस्सत्प्रतिपक्षितत्वव्यवहारापत्तौ इष्टापत्तिसम्भवादिति भावः ॥



शुद्धस्वरूपसम्बन्धेन केवलसाध्याभाववत्पक्ष एव बाधः, तद्वत्ताबुद्धिप्रतिबन्धकतायाञ्चाव्याप्यवृत्तित्वज्ञानमुत्तेजकमिति मते कपिसंयोगादिसाध्यकसद्धेतोरपि बाधितत्वमिष्टमेव । परन्तु दुष्टताव्यवहारनियामके बाधे निरवच्छिन्नविशेषणतासम्बन्धेन साध्याभाववत्त्वमेव घटकम् । अतो नोक्तसद्धेतोर्दुष्टत्वापत्तिः । इयमेव रीतिस्सत्प्रतिपक्षितत्वेपि । व्यभिचारशरीरे तु निरवच्छिन्नविशेषणतासम्बन्धेन साध्याभाववत्त्वमेव घटकमिति नास्य व्यभिचारसङ्कीर्णता । 'बाधितोऽयमपक्षधर्मो हेतुरनैकान्तिको वा' इति प्रवादश्च व्याप्यवृत्तिसाध्यकस्थलीय इति विभावनीयम् । स्पष्टञ्चेदं बाधग्रन्थे मथुरानाथीये । 'बाधोऽस्ति, दुष्टत्वव्यवहारश्च नास्ति' इति वचनं निर्युक्तिकत्वादश्रद्धेयमिति मुक्तावलीकाराद्यभिप्रायः । एतत्सर्वं सूचयितुमेव 'अलं पल्लवितेन' इत्युक्तम् ॥

**मु—पक्षतावच्छेदकेति** । 'पक्षतावच्छेदकदेशकालावच्छेदेनाभावस्य' इति पाठः । **प्रघट्टकार्थ इति** । प्रक्षिप्तमेतत् ।

**दि—व्यभिचारविरुद्धासिद्धा इति** । अत्र विरुद्धासिद्धपदे भावप्रधाने । इदमत्रावधेयम्—विरोधस्य साध्याभावनिरूपितव्यतिरेकव्याप्तिघटिततया तद्व्याप्यज्ञानस्य सत्प्रतिपक्षव्याप्यज्ञानवन्न विरोधित्वमिति विरुद्धग्रहणमत्रासङ्गतमिति । मुक्तावल्यान्तु तद्व्याप्यपदाद्विरोधस्यापि संग्रहः । 'बाधव्याप्यसत्प्रतिपक्ष' इत्यत्र सत्प्रतिपक्षपदं विरोधस्याप्युपलक्षणमिति कथञ्चित्तद्ग्रन्थघटना बोध्या ॥

**मु—सपक्ष इति** । 'सपक्षः साध्यवान्' इति पाठः । **विपक्षत्वञ्चेति** । यथासम्भवमिति शेषः । घटादीनामित्यादिपदादाकाशादेः परिग्रहः । एवकारेण शब्दत्वाश्रयस्य व्यवच्छेदः । **इदन्तु प्राचीनमते इति** । 'इदञ्च प्राचाम्मतम्' इति ताळीग्रन्थपाठः । प्राचीनानामयमभिसन्धिः—साध्यतदभावादिकोटिद्वयसहचरितधर्मज्ञानं तद्व्यावृत्तधर्मज्ञानञ्च साध्यादिसंशयजनकम् । वक्ष्यते च कारिकावल्यां 'साधारणादिधर्मस्य ज्ञानं संशयकारणम्' इति । इत्थञ्च साध्यनिश्चयविरोधिसंशयसामग्रीत्वेन साधारणादिज्ञानमनुमितिविरोधीति साधारणादेर्हेत्वाभासत्वम् । साध्याभाववद्वृत्तित्वादिकन्तु व्याप्त्यासिद्धिरेवेति । संशयस्य न निश्चयविरोधित्वम्, संशयात्मकपक्षतायास्तन्मतेऽनुमिति

---

**इति ताळीग्रन्थपाठ इति** । उत्तरग्रन्थानुरोधेनायमेव ज्यायानिति बोध्यम् ॥

जनकत्वादित्यनुमितिविरोधिसामग्रीत्वं साधारणादिज्ञानस्य न सम्भवतीति नवीनाना माशयः। अधिकमसाधारणदीधित्यादितोऽवसेयम् ॥

दि—**सिद्धयभावविशिष्टस्य पक्षस्येति**। अत्र 'सिद्धयभावस्य' इति क्वचित् पाठः। परन्तु स न तरङ्गिण्यनुसारी। **प्रयोजनकत्वाभावादिति**। 'प्रयो जकत्वाभावात्' इति पाठः॥

मु—**एवकारेणेति**। शङ्खः पाण्डरत्वमेवेत्यादाविव धर्मसङ्गतैवकारस्याभाव प्रतियोगित्वमभावश्चार्थः। प्रथमाभावे साध्यवत्पदोत्तरसप्तम्यर्थस्य वृत्तित्वस्याश्रयतया अन्वयः। प्रतियोगित्वस्य द्वितीयाभावे। तथाच साध्यवन्निष्ठाभावाप्रतियोगित्वरूपसाध्य व्यापकत्वलाभः। तस्य नञर्थाभावे आश्रयतासम्बन्धेनान्वयः। तस्य च प्रतियोगित्व सम्बन्धेन प्रथमान्तार्थेऽन्वयः। तथाच साध्यव्यापकीभूताभावप्रतियोगी हेतुरित्यर्थलाभोऽ वसेयः ॥

दि—**तेनासाधारण इति**। साध्यासमानाधिकरणहेतुरूपासाधारण इत्यर्थः। एवकाराभावे साध्यवन्निरूपितवृत्तित्वाभावस्यैव यच्छब्दार्थहेतौ भानादिति भावः॥

मु—**न हेतुतावच्छेदकमिति**। न व्याप्यतावच्छेदकमित्यर्थः। साध्यसम्ब न्धितानवच्छेदकहेतुतावच्छेदकमेव व्याप्यत्वासिद्धिरिति भावः। ननु गुरुतयेति हेतु प्रदर्शनमसङ्गतम्, इयं पृथिवी घ्राणग्राह्यगुणवत्त्वादित्यत्रातिव्याप्तेः। घ्राणग्राह्यगुणत्वस्य स्वसमनियतगन्धत्वापेक्षया गुरुत्वात्। अतो व्याप्यतानवच्छेदकत्वप्रयोजकं गुरुत्वस्वरूपं दर्शयति—**स्वसमानाधिकरणेति**। व्याप्यतावच्छेदकत्वांशानुपादाने धूमप्रागभावत्व स्याभावत्वरूपधर्मघटितत्वेन तदसंग्रहतादवस्थ्यं बोध्यम् ॥

दि—**स्वपर्याप्तावच्छेदकतेति**। यद्यप्यत्र स्वपर्याप्तावच्छेदकतापर्याप्त्यनधि करणत्वमित्येवालम्, तथापि नीलधूमत्वादौ गुरुतया प्रतियोगिताकारणताद्यवच्छेदकताया अप्रसिद्धया विषयतावच्छेदकतैव ग्राह्येति बोधनायैवमभिहितम्। **वह्नित्वरूपतादृश धर्मेति**। वह्निमदन्यावृत्तित्वस्याखण्डाभावरूपतया न वस्त्वन्तरघटितत्वमिति नेदं युक्त मिति प्रभाकृतः। वस्तुतस्तु, तस्याखण्डाभावरूपत्वेपि घटाभावादेरिव न स्वरूपतो भानम्। इत्थञ्च वह्निमदन्यावृत्तित्वत्वेनैव तस्य हेतुतावच्छेदकत्वमिति हेतुतावच्छेदकताव



च्छेदकविशिष्टस्यात्र वह्नित्वघटितत्वमनपायम्। अत एव वह्निमांस्तादात्म्येन धूमवत इत्यादौ व्याप्यत्वासिद्ध्युपपत्तिः। एवं धूमान्यान्यत्वेन हेतुतावच्छेदकतायामपि सेत्यवधेयम्। **स्वघटकेति**। धूमालोकान्यतरत्वाधिकरणे स्वघटकसाध्यसम्बन्धितावच्छेदकं नास्तीति प्रतीतिसाक्षिकाभावस्याभावात् स्वघटकसाध्यसम्बन्धितावच्छेदकत्वस्य स्वव्यापकतावच्छे दकत्वमिति तद्विशिष्टधूमत्वादिघटितत्वान्नोक्तान्यतरत्वस्य हेतुतावच्छेदकत्वम्। वह्निम दन्यावृत्तेरित्यादौ वह्नित्वस्य व्युदासाय स्वघटकेति। अन्यथा वह्निमदन्यावृत्तौ धूमादौ सर्वत्र साध्यसम्बन्धितावच्छेदकसत्त्वात्तेन रूपेण वह्नित्वस्यापि व्यापकत्वप्रसङ्गात्। तन्निवेशे तु धूमादौ धूमत्वादिरूपसाध्यसम्बन्धितावच्छेदकस्य सत्त्वेपि तस्य स्वघटकत्वा भावाददोषः। इत्थञ्च धर्मान्तरे व्याप्यतावच्छेदकत्वं नोपादेयम्, प्रयोजनविरहात् ॥

त—**साध्यसम्बन्धितावच्छेदकत्वेनेति**। एतदुत्तरं 'साध्यव्याप्यतावच्छे दकत्वेन' इति साधुः पाठः। स्वेत्याद्यनवच्छेदकत्वेनेत्यन्तभागः प्रक्षिप्तः। **तादृश धर्मवत्त्वमिति**। स्वघटकसाध्यव्याप्यतावच्छेदकधर्मवत्त्वमित्यर्थः ॥

दि—**इति भ्रमेति**। विरुद्धाभिन्नहेत्वोः परामर्शे इत्यर्थो विवक्षित इति भ्रमेत्यर्थः। इत्याकारकभ्रमवारणायेति तु नार्थः, सत्प्रतिपक्षितस्थले विरुद्धधूमजलरूपहेतु विषयकत्वस्य परामर्शे सत्त्वात् भ्रमत्वासम्भवात्। तथाच विरुद्धयोरिति न समानाधिकरणं विशेषणम्। विरुद्धयोः साध्यतदभावयोर्यौ हेतू तयोः परामर्शे इत्यर्थ इति भावः ॥

प्र—**यथार्थत्व इति**। दर्शितविवक्षितत्वज्ञानस्य यथार्थत्व इत्यर्थः ॥

मु—**परामर्शकालीनेति**। अनेन 'विरुद्धयोः परामर्शे' इति मूले परा मर्शैक्यं न विवक्षितम्, अव्याप्त्यापत्तेरिति प्रकृतसाध्यसाधकहेतोरेव सत्प्रतिपक्षितत्व व्यवहारः, न प्रतिहेतोरिति च सूचितम्। दुष्टे लक्षणं सम्पादयितुं विषयपदपूरणम् ॥

भा—**साध्यशून्य इति**। यत्रेत्यस्य यादृशन्यायप्रयोगे ह्रदो वह्निमान् धूमादित्यादावित्यर्थः। यत्र तु पक्षः साध्यशून्य इति योजना। तत्रेति शेषः।

---

**इत्थञ्चेति**। साध्यसम्बन्धितावच्छेदकत्वेन व्यापकत्वनिवेशे चेत्यर्थः ॥

**परामर्शैक्यमिति**। एकवचनेन तथा भ्रमसम्भवादिति भावः। **अव्याप्त्यापत्ते रिति**। यत्र द्वयोः परामर्शः क्रमेण जातः, तत्राव्याप्त्यापत्तेरित्यर्थः ॥

असौ साध्यशून्यपक्षः। एवं, यत्र साध्यते इत्यनन्तरं तत्र गन्धाभाववदुत्पत्तिकालीन घटो बाध उदाहृतः इत्यस्याध्याहारोऽवसेयः॥

**मु—घटे गन्धसत्त्वेपीति।** घटे गन्धस्याव्याप्यवृत्तित्वात्तत्र तदभावज्ञान स्यानुमित्यविरोधित्वेपीत्यर्थः। समानविषयकत्वेन प्रतिबन्धकत्ववादिमते पक्षतावच्छेदक विशिष्टत्वनिवेशप्रयोजनं न ह्रदो वह्निमानित्यादौ सम्भवतीत्यभिप्रायेण स्थलविशेषा नुसरणं बोध्यम्॥

**त—बाध इति भात्र इति।** घटनिरूपितगन्धाभावनिष्ठाधेयताया द्वैविध्या नङ्गीकारे त्वाह—**अथवेति**॥

इति महामहिमश्रीरामवर्मपरीक्षिद्वोश्रीमहाराजविरचितायां
सुबोधिन्याम्
अनुमानपरिच्छेदः॥

# उपमानपरिच्छेदः

**मु—दर्शनमिति।** एतत्स्थाने 'ज्ञानम्' इति पाठः। दिनकरीयेप्येवम्। अत एव तरङ्गिण्यां सादृश्यज्ञानस्येत्युक्तिः॥

**दि—सहकारितयाऽवश्यकेति।** साम्प्रदायिकमते अतिदेशवाक्यार्थस्मृतावेव पिण्डदर्शनस्य सहकारिता, न तूपमिताविति युक्तिरियमसतीति केचित्। तन्न समञ्जसम्, उद्बोधकान्तरेण वाक्यार्थस्मृतावप्युपमित्यापत्तेरुपमितावेव तत्सहकारावश्यकताया वक्तव्यत्वात्। पिण्डदर्शनजन्यतादृशस्मृतित्वेन हेतुता तु गौरवपराहता। **तदुत्तरमेवोपमितिरिति।** उपमितिकारणस्मृतिकारणशाब्दबोधस्यान्यथासिद्धत्वमेवोचितम्, क्षणद्वयविलम्बादिकल्पनागौरवन्तु फलमुखत्वान्न दोषायेति भावः॥

त—'तदवच्छिन्नधर्मिकमेव गोसादृश्यज्ञानम्। अतस्तद्धर्मावच्छिन्ने गवय पदवाच्यत्व' इत्यादिः साधुः पाठः। 'यत्तु' इति स्थाने 'यस्तु' इति च पाठः। एवं 'तदवच्छिन्नधर्मिकगवयपद' इति च। **शाब्दबोधात्मकग्रहादित्यर्थ इति।** 'नच द्रव्यत्वविशिष्टे' इत्यादिवाक्यस्थाने 'नच यदा गवयत्वादिजात्यनुपस्थितिः, तदा सादृश्य संस्थानादिगुरुधर्मरूपस्य ग्रहात्तदवच्छेदेन' इत्यादिः पाठः तरङ्गिणीकृत्सम्मतः, ननु 'द्रव्यत्वविशिष्ट' इत्यादिः 'तथाच' इत्यन्तः, अव्याख्यानात्, कृतस्य व्याख्यानस्य तदननुसाराच्च। इत्थञ्च 'ग्रहात्' इत्यस्य गोसदृशो गवय इति वाक्यजन्यबोधादित्यर्थः। तदवच्छेदेनेत्यस्य च सादृश्यावच्छेदेनेत्यर्थः। सम्प्रदायसिद्धदिनकरीयपाठे तु 'ग्रहात्' इत्यस्य चाक्षुषादित्येवार्थः। तदुत्तरतच्छब्दस्य च संस्थानादिरर्थ इति सुधियो विदाङ्कुर्वन्तु॥

**दि—अनुमितेरपि मानसत्वापत्तेरिति।** अथालेष्टापत्तिरिति चेन्न, घट लौकिकप्रत्यक्षसामग्रीकाले वह्न्याद्यनुमितेरनुपपत्तेः। लौकिकचाक्षुषादिसामग्र्या मानस प्रतिबन्धकत्वात्। प्रतिबध्यकोटावनुमित्यन्यत्वनिवेशे च गौरवम्। एवं शाब्दादेरपि। एतदपि संक्षेप इत्यनेनासूचितम्॥

इति महामहिमश्रीरामवर्मपरीक्षिद्वोश्रीमहाराजविरचितायां सुबोधिन्याम्
उपमानपरिच्छेदः॥

# शब्दपरिच्छेदः

**मु—शाब्दबोधप्रकारमिति ।** शाब्दबोधोत्पत्तिप्रकारमित्यर्थः । तत्सामग्रीमिति यावत् । **पदज्ञानन्त्विति ।** अत्र पदत्वं न शक्तत्वम्, अपभ्रंशाच्छाब्दबोधानुपपत्तेः । किन्तु ध्वनिव्यावृत्तं वर्णत्वमेव । यद्वा, श्रमसाधारणवृत्तिप्रकारकज्ञानविषयत्वमत्र पदत्वम् ॥

**त—शब्दस्यार्थज्ञानेति ।** अतिदेशवाक्यजन्यशाब्दबोधस्यार्थज्ञानविधया गोसदृशो गवय इति शब्दप्रयोगहेतुत्वात्तादृशशब्दस्योपमानजन्यत्वेनेत्यर्थः । **उपमानखण्ड इति ।** 'अनुमानखण्डे' इति पाठः ॥

**दि—हस्तचेष्टादेरिति ।** आदिना नयनचेष्टायाः, संग्रहः ॥

**मु—पदज्ञानवत इति ।** अनेन करणसत्त्वं बोधितम् । प्रत्यक्षादिनेत्यभेदे तृतीया । यद्वा, प्रत्यक्षमिन्द्रियम्, हेतौ तृतीया । आदिना अनुमानादि गृह्यते । पदजन्यत्वनिवेशस्यापि प्रयोजनमनेनैव दर्शितम्, प्रत्यक्षादिनेत्यस्य पदज्ञानभिन्नसम्बन्धिज्ञानेनेत्यर्थकत्वात् ॥

त—स्मरणत्वेन निवेशस्य प्रयोजनमाक्षिप्य तं परिहरति—**यद्यपीत्यादिना ।** 'प्रत्यक्षादिरूपघटादिज्ञाने' इति ताळीग्रन्थपाठः । एवमुत्तरत्र 'घटपदबोध्योऽयं घट इति प्रत्यक्षस्य' इत्यपि । **शक्तिज्ञानाभावेपीति ।** अपिः प्रक्षिप्तः ॥

**मु—**ननु स्तन्यपानोपयोगीष्टसाधनतास्मरणे जीवनादृष्टस्येव पदज्ञानस्यार्थस्मृतिहेतुत्वमस्तु, किं पदतदर्थयोः सम्बन्धकल्पनेनेत्यत आह—**पदज्ञानस्य हीति ।**

---

पदज्ञानभिन्नसम्बन्धिज्ञानेनेति । नच तज्जन्योपस्थितेः पदज्ञानव्यापारत्वं कथमिति वाच्यम्, कालविधया पदज्ञाननिष्ठजनकताकत्वस्य तत्र सत्त्वात् । अथैवं पदज्ञानजन्यत्वनिवेशेप्यनिस्तार इति चेन्न, पदज्ञानत्वावच्छिन्नजनकताकत्वस्य विवक्षितत्वात् ॥



'पदज्ञानं हि सम्बन्धिज्ञानविधयार्थस्मारकम्' इत्येतद्देशीयपाठः । हि यतः । तथाच प्रसिद्धकार्यकारणभावेनैवोपपत्तये सम्बन्धकल्पनम्, गत्यन्तराभाव एवादृष्टकल्पनादिति भावः । **सा चेति ।** 'स च' इति पाठः । उत्तरत्र 'ईश्वरेच्छारूपः' इति च । दिनकरीयेपि 'स चेति' इति प्रतीकपाठः ॥

दि—निरूप्यनिरूपकभावापन्नविषयतानिवेशेपि दोषं दर्शयति—**एवमिति ॥**

त—**पटेपीति**—'पटे सत्त्वेन तत्रापि' इति ताळीग्रन्थपाठः । **तद्विषयत्वस्येति ।** 'तद्विषयकत्वस्य' इति पठनीयम् । **तत्पदशक्यत्वेति ।** 'तत्पदशक्तित्व' इति पाठः । **विशकलितव्यपदेशेनेति ।** समूहालम्बनेच्छाबोधकव्यवहारेणेत्यर्थः । तृतीयार्थो ज्ञाप्यत्वमवगाहनान्वयि । 'विशकलितो व्यपदेशः, तेन' इति पाठस्वीकारे 'अपितु' इत्यस्य योजना समञ्जसा भवति । 'भगवदिच्छायामवगाहनात्' इति पाठः । 'विशेष्यतासम्बन्धेन नेश्वरेच्छावत्त्वम्' इति साधुः पाठः । **इत्यनन्तरमिति ।** 'इतीत्यनन्तरम्' इति पाठः । **तद्रूपेणेति ।** 'तद्रूपेण भगवदिच्छायाम्' इति पाठः ॥

दि—**पित्रादिभिरिति ।** पित्रभावेऽन्यग्राहकमादिपदम् । **एकादशाहकालीनेति ।** अत्र यं कञ्चिद्दिवसमादायैकादशत्वस्य प्रायशस्सर्वदिवसेषु, यत्किञ्चिन्निरूपितपितृत्वस्य बहुत्र च सत्त्वादतिप्रसङ्गवारणाय स्वजन्मावधिकत्वस्य एकादशत्वे, स्वनिरूपितत्वस्य पितृत्वे च निवेशावश्यकतया यद्यप्यननुगमः, तथापि स्वाश्रयनिष्ठत्व, स्वविशिष्टोच्चारणजन्यनामजन्यबोधीयत्वोभयसम्बन्धेन जन्मविशिष्टविषयतावान् भवत्वितीच्छानुगमसम्भवान्नातिप्रसङ्गः । उच्चारणे स्ववैशिष्ट्यञ्च स्वाधिकरणैकादशाहनिष्ठत्व,स्वाश्रयनिरूपितपितृतावत्कृतिजन्यत्वोभयसम्बन्धेन । न च चैत्रपदत्वादिविशेषरूपेणैवेश्वरेच्छा कुतो नाङ्गीक्रियत इति शङ्क्यम्, ईश्वरेच्छायामनन्तविषयिताङ्गीकारे प्रमाणाभावात्, निर्दिष्टपितुचरितत्वाज्ञानेपि चैत्रादिपदे चैत्रादिनामत्वव्यवहारापत्तेश्च ॥

त—**पित्रादिसङ्केतितेति ।** 'पित्रादिसङ्केत' इति पाठः । **इत्याकारकमेवेति ।** 'इत्याकारिकाया एव भगवदिच्छायाः कल्पनम्' इति साधुः पाठः ॥

दि—**गगर्यादिपद इति ।** घटबोधकोऽयमपभ्रंशः । नचापभ्रंशेपि शक्तिरस्तु, किं बाधकमिति वाच्यम्, यज्ञे अपभ्रंशोच्चारणस्य 'नापभ्रंशितवै' इति

श्रुत्या निषेधेन तस्य साधुपदत्वानङ्गीकारस्यावश्यकत्वात् । अन्यथा तदुच्चारणस्य पापाजनकत्वेन निषेधानुपपत्तेः । नचैवं विशेषदर्शिनामपभ्रंशाच्छाब्दबोधो न स्यादिति वाच्यम्, बालकृताव्यक्तोच्चारण इवात्रापि विशेषदर्शिनः श्रोतुः साधुपदस्मरणेनैव शाब्दसम्भवात् । म्लेच्छानां तदीयभाषया शाब्दानुभवान्नव्यमते म्लेच्छपदेषु शक्तिरस्त्येव । 'न म्लेच्छितवै' इति निषेधबलादेव यज्ञे तदुच्चारणे पापमिति ज्ञेयम् । इदमत्रावधेयम्—यदि केनचिदाधुनिकेन गगरीत्यादिपदं नदीवृद्ध्यादिपदवदर्थविशेषे परिभाष्यते, तर्हि तस्मिन्नर्थे तत्पदं नव्यमते शक्तमेवेति ॥

त—**इत्यपि द्रष्टव्यमिति** । अत्र दर्शितामेवानुपपत्तिमाशङ्क्य तर्कमञ्जर्यां 'न तावदीश्वरसङ्केतत्वेन तद्ग्रहः कारणम्, किन्तु सङ्केतत्वेन । अस्ति च तेषामपि तथात्वेन ज्ञानम्' इति समाहितम् । **तदुत्तरेति** । 'तदुत्तरकृत्प्रत्ययस्य कर्तर्थकत्वस्य' इति साधुः पाठः । **वस्तुतो धात्विति** । अत एव दिनकरभट्टैर्धातुप्रत्यययोरेवोदाहरणं दत्तम् । आदिपदान्निपातस्यापि संग्रहः । **सङ्गच्छत इति** । एतदुत्तरम् 'अन्यथा तेषामपि प्रातिपदिकत्वान्मूलस्थादिपदासाङ्गत्यापत्तेरिति सारम्' इति पाठः । **मूलभूतसूत्रेति** । 'कर्तरि' इत्यस्या **स्वरूपमानेति** । 'स्वरूपतो भान' इति पाठः । **मूलभूत**... 'लः कर्मणीति मूलभूत' इति पाठः । **पर्यत्र**नुकर्षादिति भावः । ताळीग्रन्थे तु 'लः कर्मणीति मूलभूत' इति पाठः । प्रथमान्तपदोपस्थाप्येति **सितार्थ इति** । एतदुत्तरं 'कर्मत्वाद्यनवरुद्ध इतीति । प्रथमान्तपदोपस्थाप्येति पदस्य तु' इत्यादिपाठः । **इवार्थसादृश्य एवेति** । एवकारः प्रक्षिप्तः । **चैत्रेण्यन्वयः स्यादिति** । एतदुत्तरम् 'अतः' इत्यस्य पूर्वम् 'एवं कर्मत्वाद्यनवरुद्धत्वम्' इत्यारभ्य 'न स्यात्' इत्यन्तो ग्रन्थो योजनीयः । 'न स्यात्' इत्युत्तरं 'ध्येयम्' इत्यन्तभागः प्रक्षिप्तः ॥

दि—**तथाच कर्मत्वपदमिति** । 'तथाच कर्मत्वादिपदम्' इति पाठः ॥

त—**नन्वितरार्थकेति** । एतदुत्तरं 'कर्मत्वादिपदम्' इति पाठः । **तात्पर्यविषयत्वार्थकेति** । एतदुत्तरम् 'अनवरुद्धत्वपदोपादानेनैव' इति पाठः । **अत्यन्तायोगव्यवच्छेदश्चेतीति** । एतदुत्तरं 'यत्र विशेष्यसङ्गतैवकारः, तत्र अन्ययोगव्यवच्छेदः' इति पाठः । **तथाच चैत्र इति** । अत्र चैत्रान्यावृत्तिपाककृतिमांश्चैत्र इति विशिष्टबोध इति परे । **अयोगव्यवच्छेदोर्थ इति** । अन्वयितावच्छेदकव्यापकत्वं विधेये



बोध्यत इति सारम् । **नीलभवनस्येति** । 'नीलभवनस्य नीलत्वस्य' इति पाठः । **नन्वेवकारेति** । 'नन्वेवकारार्थातिरिक्त' इति पाठः ॥

दि—**कर्मादौ चेति** । 'कर्मत्वादौ च' इति पाठः ॥ **न विशेषणत्वमिति** । 'न विशेषणत्वतात्पर्यविषयत्वम्' इति पाठः ॥

त—**नचैवमपीति** । एतदुत्तरं 'यत्र चैत्रः' इत्यादिपाठः । **तदानीमसत्त्वादिति** । 'तदानीं सत्त्वादिति' साधुः । **यत्र यत्प्रथमान्तेति** । 'यत्र' इति प्रक्षिप्तम् । **अतस्तत्पदमपीति** । 'अत एव तत्तत्पदमपि' इति पाठः । **साधु संगच्छत इतीति** । नच चैत्रः पचतीत्यादौ विशेषणत्वमात्रप्रयोजकतत्प्रथमान्तपदाभावात् तदनुपस्थाप्यत्वमप्रसिद्धमिति वाच्यम्, विशेषणत्वमात्रप्रयोजकतत्तत्प्रथमान्तपदोपस्थाप्यं यद्यत् तत्तद्भिन्नत्वस्य तदर्थत्वात् । विशेषणत्वमात्रप्रयोजकत्वं च मुख्यविशेष्यत्वाप्रयोजकत्वम् । नन्वेवमपि चैत्र इव मैत्र इत्यादौ विशेषणत्वमात्रप्रयोजकप्रथमान्तचैत्रपदोपस्थाप्यत्वात् चैत्रस्य तदन्यत्वासम्भवात् चैत्रः पचतीत्यत्रापि चैत्रे संख्यान्वयो न स्यादिति चेन्न, आख्यातार्थसंख्यानिष्ठप्रकारतानिरूपितविशेष्यताप्रयोजकोपस्थितीयविशेष्यतात्वसम्बन्धेन शाब्दं प्रति स्वनिरूपितविशेष्यतात्वसम्बन्धेन मुख्यविशेष्यताप्रयोजकप्रथमान्तपदजन्योपस्थितिः, आख्यातार्थसंख्यानिष्ठप्रकारतानिरूपितविशेष्यताप्रयोजकपदत्वसम्बन्धेन शाब्दं प्रति तादृशप्रथमान्तता वा प्रयोजिकेत्यत्रैव तात्पर्यात् । **कर्मत्वांशे इति** । एतदुत्तरं 'प्रकृत्यर्थस्य' इति पाठः । **प्रयोजनमपीति** । 'प्रयोजनद्वयमपि' इति पाठः ॥

दि—**प्रकारान्तरेण प्रयोजनमिति** । इदमुपलक्षणम् । अथ दर्शितप्रथमान्तपदोपस्थाप्यत्वस्य तन्त्रत्वे पश्य मृगो धावतीत्यादौ मृगे धावतीत्याख्यातार्थसंख्यान्वयो न स्यात्, तत्र वाक्यभेदवारणाय धावनकर्तृमृगस्य कर्मतासम्बन्धेन दर्शनान्वयस्याङ्गीकृततया मृगपदस्य विशेषणत्वमात्रप्रयोजकत्वात् । यदि च तत्र

---

**परे इति** । अस्मिन् पक्षे चैत्र एव पचतीति वाक्यजन्यबोधस्य चैत्रान्यः पचतीति बोधं प्रति प्रतिबन्धकत्वं दुर्घटम्, ग्राह्याभावानवगाहित्वात् । एवं जातिमत्येव सत्ता समवायेन वर्तत इत्यत्र जातिमदन्यनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्या वाक्यार्थाप्रसिद्धिरित्यस्वरसः परे इत्यनेन सूचितः ॥

खण्डवाक्यार्थमादायोपपत्तिरित्युच्यते, तदा सभृङ्गं कमलमिव सालकं मुखं शोभत इत्यादौ कमलेपि संख्यान्वयापत्तिरित्यत आह—**यद्वेति** । एतेन प्रकारान्तरानुसरणं गौरवग्रस्तत्वाद्दोषसम्पादनमात्रार्थत्वाच्चाश्रद्धेयमित्याक्षेपो निरस्तः । **अन्यथा प्रथमदलार्थमिति** । इदञ्च यथाश्रुतमुक्तावल्यनुसारेण । विशेषणत्वमात्रप्रयोजकप्रथमान्तपदानुपस्थाप्यत्वनिवेशपक्षे अर्थान्तरकरणं विनापि स्तोकं पचतीत्यादौ द्वितीयदलप्रयोजनं सम्भवतीति केचित् । वस्तुतस्तु, अस्मद्दर्शितनिष्कर्षे प्रकारान्तरानुसरणं विना न तत्प्रयोजनसम्भव इत्यवधेयम् । नच धात्वर्थातिरिक्तेत्यादिविवक्षणे तण्डुलं पचतीत्यादौ द्वितीयार्थकर्मत्वादावेव संख्यान्वयवारणं द्वितीयदलप्रयोजनं भवतीति स्थलविशेषानुधावनं व्यर्थमिति वाच्यम्, एकविभक्त्यर्थे अपरविभक्त्यर्थान्वयस्याव्युत्पन्नत्वात्, नामपदोपस्थाप्यत्वनिवेशेनैव तद्वारणाच्च ॥

त—**तथा चैत्रश्चैत्रमिति** । 'तथा' इति स्थाने 'तथाच' इति पाठः । **उक्तमित्यर्थ इति** । एतदुत्तरं 'भावनात्वं कर्तृत्वकर्मत्वान्यतरत्वम्' इत्यग्रेतनस्य प्रक्षेपः । एवम् अपादानमित्याद्यवधेयमित्यन्तस्यापि । **धात्वर्थातिरिक्तविशेषणत्वमात्रेणेति** । मुख्यविशेष्यत्वाभावविशिष्टं यद्धात्वर्थातिरिक्तविशेषणत्वम्, तेनेत्यर्थः । अत्रेदं चिन्त्यम्—घटो नीलो भवतीत्यादौ नीलस्य वृत्तितासम्बन्धेन धात्वर्थभवन एवान्वयात्तत्र संख्यान्वयापत्तिः । नच धात्वर्थातिरिक्ताविशेषणत्वमित्यस्य धात्वर्थातिरिक्तविशेषणत्व, तादात्म्यातिरिक्तसम्बन्धावच्छिन्नधात्वर्थविशेषणत्वैतदन्यतराभावार्थकत्वान्न दोष इति वाच्यम्, एवं सति पश्य मृगो धावतीत्यत्र दर्शितानुपपत्तेरपरिहारात् । यदि तत्परिहारायागत्या तत्र तमित्यस्याध्याहारेण वाक्यभेदः स्वीक्रियते, तर्हि लाघवात् प्रथमपक्ष एव वरीयानिति । अधिकं स्वयमूह्यम् । **बाधितत्वादिति भाव इति** । एतदनन्तरं 'भावनान्वयबोधस्येति । भावनात्वं कर्तृत्वकर्मत्वान्यतरत्वम् । तथाच' इत्यादिपाठः । **एवञ्चेति** । अत्र चकारः प्रक्षिप्तः । **करणत्वञ्चेति** । चस्थाने 'वा' इति पाठः । 'कर्मणि द्वितीया' इत्यत्र 'कर्मणि द्वितीयेत्यादि' इति च । अथापि प्रथमैवेत्यत्र किं नियामकमिति चेदाह—**प्रातिपदिकार्थस्येति** । **विवक्षायामिति** । विवक्षास्थलमेवोदाहरति—**सम्बोधने लकाराद्यभिहितकर्तृत्वाद्याश्रये चेति** । बोध्ये इति शेषः । नन्वेवं चैत्र मैत्रो गच्छतीत्यत्र चैत्रे भावनान्वयापत्तिः, निरुक्तस्य तत्प्रयोजकस्य तत्र सत्त्वादिति चेन्न, तद्घटकप्रथमायाः सम्बोध्य



त्वानुपस्थापकत्वेन विशेषणीयत्वात् । प्रत्ययार्थसम्बोध्यत्वे प्रकृत्यर्थस्य विशेषणतया भानमते आक्षेप एव नावतरतीति ध्येयम् ॥

दि—दीधितिकारमतं दर्शयति—**इदन्त्ववधेयमिति** । अत्र प्राचीनानुयायिनः, जानातीत्यादावाख्यातार्थकृतिबोधे बाधादाख्यातं तत्राकाङ्क्षासम्पादकमेव । इत्थञ्चाश्रयतासम्बन्धेन ज्ञानादेरेवान्वयान्न भावनान्वयबोधत्वस्य संख्यान्वयबोधत्वव्यापकत्वम् । नच तत्राख्यातस्याश्रयत्वे लक्षणेति न व्यापकत्वभङ्ग इति वाच्यम्, अनुपपत्तिप्रतिसन्धानं विनापि बोधो भवतीति तत्र लक्षणादरासम्भवादिति । अधिकं गदाधरभट्टकृतव्युत्पत्तिवादे द्रष्टव्यम् । **भावनान्वयबोधत्वस्येति** । भावनान्वयश्चात्र साक्षान्निपातद्वारा वा बोध्यः, तेन चैत्रो न पचति, मैत्रः पचतीवेत्यादौ चैत्रादौ न संख्यान्वयानुपपत्तिः । एतदुत्तरं 'जन्यतावच्छेदकत्वावश्यकत्वेन' इति ताळीग्रन्थपाठः । **जन्यत्वादिघटितस्येति** । आदिना जनकत्वस्य संग्रहः । **आदिना इच्छतीति** । मन इच्छति, चेतो नलङ्कामयते इत्यादिप्रयोगादत्रापि जनकत्वे लक्षणेति नेयमवतारिका समञ्जसेति केचित् । चक्षुरादिवन्मनसो ज्ञानकारणत्वेपि इच्छादावात्ममनस्संयोगकारणतयैव निर्वाहान्न तत्र मनसो हेतुत्वम् । इत्थञ्च मन इच्छतीत्यादौ मनःपदमात्मपरमित्याशयो दिनकरभट्टानामिति ज्ञेयम् ॥

त—**लक्षणानियामकाभावेपीति** । 'लक्षणानियमाभावेपि' इति सङ्गततरः पाठः । 'शाब्दबोधप्रकारमाह—इदमत्रेति' इति पाठः ॥

दि—**तण्डुलस्याधेयतयाऽन्वय इति** । इदञ्च कर्मत्वं क्रियाजन्यफलरूपम्, व्यापारमात्रं धात्वर्थः इति प्राचीनमतेन । 'फलव्यापारयोर्धातुः' इति नवीनमते तु वृत्तित्वरूपकर्मत्वे निरूपितत्वसम्बन्धेनैव तण्डुलस्यान्वयः ॥

त—**कल्पनस्यैवोचितत्वादिति** । इदमुपलक्षणम् । पक्त्वा पश्यतीत्यादौ पाककर्तृबोधं विना आख्यातार्थान्वयासम्भवात्तद्बोधनिर्वाहाय क्त्वां कर्त्राद्यर्थकत्वमावश्यकमिति । यत्तु क्त्वां कृतावेव शक्तिः कर्तरि च लक्षणैवेति तन्न, आकाशादिपदानामपि शब्दादावेव शक्त्यापत्तेः, लक्षणयैव तदाश्रयबोधसम्भवात् । तत्रानुपपत्तिप्रतिसन्धानं विनापि आश्रयबोधान्न तथेति चेत्, प्रकृतेपि समानम् ॥

मु—नीलविशिष्टे इति। 'नीलादिविशिष्टे' इति पाठः। आप्तवाक्यादपीति। काकः पिकपदवाच्य इत्यनाप्तवाक्यात् ग्रहसम्भवेपि न तस्य शक्तिविषयकप्रमात्वमिति तत्परिहाराय आप्तेति। शब्दप्रयोज्यमिति। नच शब्दजन्यत्वमेव बालेन कुतो न गृह्यत इति शङ्क्यम्, स्वप्रवृत्तावेव व्यभिचारावधारणात्। गां बधानेति। 'गामानय' इति ताळीग्रन्थपाठः। आवापोद्वापाभ्यामिति। अन्वयव्यतिरेकाभ्यामित्यर्थः। व्याख्यान्तरं प्रमायां द्रष्टव्यम्। कार्यान्वितेति। ननु लिङादेः कार्ये शक्तिः कथम्, तत्र तदन्वितत्वासम्भवादिति चेन्न, अन्वितपदस्य प्रतियोगितानुयोगितान्यतरसम्बन्धेनान्वयवदर्थकतया कार्ये तदन्वितत्वसम्भवात्। कार्यान्वितेत्यस्य लौकिकवाक्यसाधारण्याय कार्यत्वान्वितेत्यर्थः। कार्यत्वान्वयश्च क्वचित् साक्षात्, यथा धात्वर्थे। क्वचित् परम्परया, यथा नामार्थे। विधिनिषेधशेषीभूतार्थवादानां प्राशस्त्याप्राशस्त्यलाक्षणिकानां विध्येकवाक्यत्वाद्बोधकत्वरूपं प्रामाण्यम्। पुराणभारतादीनामपि अर्थवादकल्पितविधिशेषत्वेन प्रवृत्तिपरत्वान्नाबोधकत्वम्। काव्यादौ तु पदार्थानामसंसर्गाग्रहमात्रमित्यादिकं चिन्तामण्यादितोऽवगन्तव्यम्॥

दि—घटानयनादिकार्यं शब्दप्रयोज्यमित्युक्तम्। तत्र साक्षात्कारणं प्रदर्शयन् शक्तिग्रहप्रकारञ्च विशदीकुर्वन् 'इत्थञ्च भूतले नीलो घट इत्यादिवाक्यान्न शाब्दबोधः' इति वाक्यस्य बाधितार्थकत्वशङ्कां वारयितुं तद्वाक्यमवतारयति—ननु व्यवहारेणेति। अनुमितेति। प्रयोज्यवृद्धकृतं घटानयनं कृतिद्वारा कार्यताज्ञानजन्यं चेष्टात्वात् मच्चेष्टावदिति, अयं प्रयोज्यवृद्धः घटानयनधर्मिककार्यताज्ञानवान्, स्वानुकूलकृतिमत्त्वसम्बन्धेन घटानयनवत्त्वात्, यत्तादृशसम्बन्धेन यत्क्रियावान् स तद्धर्मिककार्यताज्ञानवान् यथाहम् इति वा अनुमानाकारो बोध्यः। कार्यज्ञान इति। अयञ्च तरङ्गिणीकारानुमतः पाठः। 'कार्यताज्ञाने' इति साम्प्रदायिकः ताळीग्रन्थपाठः। गृहीतमिति। प्रयोज्यवृद्धस्य कार्यताज्ञानं पदज्ञानजन्यं पदज्ञानान्वयव्यतिरेकशालित्वात् इति ग्रहणाकारः। अत्रापि सामान्यमुखी व्याप्तिः। कार्यत्वान्वितेति। 'कार्यान्वित' इति तरङ्गिणीकारसम्मतः पाठः॥

त—अपूर्वविषयकः शाब्दबोध इति। यद्यप्यानयनादिक्रियाविशेष्यककार्यत्वप्रकारकज्ञानमेव प्रवर्तकम्। वक्ष्यति च मुक्तावल्यां 'कार्यताज्ञानं प्रवर्तक

---

दिनकरीयोक्तमानयनस्य हेतुत्वं सम्पादयितुमनुमानान्तरमाह—अयमिति॥



मिति गुरवः' इति। एवञ्च यजेतेत्यादावपि यागादौ कार्यताज्ञानेनैव प्रवृत्त्युपपत्तौ लिङादिना अपूर्वमानं किमर्थमित्याशङ्का स्यात्, तथापि गुरुमते अन्वयप्रयोजकरूपवत्त्वमेव शाब्दोपयोगिनी योग्यता। सा च जलाहरणार्थे घटे छिद्रेतरत्ववत् कार्ये यागादौ स्वर्गादिरूपेष्टसाधनत्वम्। तच्च साधनत्वं साक्षाद्वा परम्परया वा। न साक्षात्, कालान्तरभाविस्वर्गे आशुविनाशिन इच्छाविशेषरूपस्य क्रियाविशेषरूपस्य वा यागस्या व्यवहितपूर्ववृत्तित्वासम्भवात्। परम्पराघटकापूर्वानुपस्थितेश्च न परम्परया। अतो यागकार्यतानिर्वाहकं स्वर्गसाधकं किञ्चिदेव लिङाद्यर्थतया कल्प्यमित्याशयः। नन्वेवमपूर्वकामनाप्यावश्यकीति चेदिष्टमेवैतत्तेषाम्। इदन्त्ववसेयम्—वेदानुसारेण लिङादेः कार्ये शक्तत्वेपि घटमानयेत्यादिलौकिकवाक्ये लिङादेः कार्यत्वे निरूढलक्षणा। अभेदेन कार्यविशिष्टज्ञानस्य गौरवेण प्रवृत्तौ साक्षात्प्रयोजकत्वासम्भवात्। उक्तञ्च चिन्तामणौ 'लोके लिङ् लाक्षणिकी, क्रियाभिन्ने धर्मिणि वेदे शक्तिकल्पनात्' इति। इत्थञ्च कार्यान्वित इत्यत्र कार्यपदं भावप्रधानमिति सुगमः पन्थाः। मूले कार्यताबोधं प्रतीत्युक्तिरप्येवं सङ्गता भवतीति। गृहीतशक्तिकत्वादिति। 'गृहीतशक्तिकात्' इति पठनीयम्। तदन्तरेति। तदन्तरशक्यतावच्छेदकपदे जातिभिन्नधनलोमवलाङ्गूलादिः शक्यतावच्छेदको यस्य तस्मिन् आव्यपश्वादिपदे। विशिष्टे धनलाङ्गूलादिविशिष्टे। एवकारेण विशेषणीभूतधनादिव्यवच्छेदः। अत्र हेतुं दर्शयति—तत्र शक्त्या इति। तत्र जातिभिन्ने विशेषणधनादौ। इत्थं चाग्रे इति। तदुत्तरं 'कार्यताबोधं प्रतीति मूलस्य कार्यत्वावच्छिन्नबोधं प्रतीत्येवार्थो बोध्यः' इति सङ्गतः पाठः॥

मु—परित्यागौचित्यादिति। नन्वेवं शक्यतावच्छेदककोटौ कार्यत्वाप्रवेशेपि कार्यत्वाविषयकशाब्दाप्रसिद्ध्या घटादिविषयकशाब्दत्वव्यापकमेव कार्यताविषयकशाब्दत्वमिति नीलो घट इत्यादौ लिङाद्यभावान्न शाब्दसम्भव इत्यत आह—अत एवेति। तदभावाच्चेति। अत्रापि धीरो भव, शोकं मा कृथा इत्याद्यध्याहारसम्भवात् सर्वत्राध्याहारनियमे प्रमाणाभावरूपप्रथमदोष एव निर्भरोऽवसेयः। नचैतादृशस्थलेष्वसंसर्गाग्रह एवेति वाच्यम्, वाक्यप्रयोगात् पूर्वमपि तस्य सत्त्वेन मुखप्रसादाद्यापत्तेः। अन्वितघट इति। शाब्दे क्वचित् कार्यत्वाविषयकत्वेपि अन्वयविषयकत्वस्य नियतत्वात्, शक्तिव्याप्यत्वाच्च शाब्दविषयिताया अन्वितघटादावेव पदानामानुभाविकी

शक्तिरिति भाट्टसिद्धान्तः। अनुभावकत्वरूपसम्बन्धादेव घटादिपदानां घटत्वादिजाति स्मारकत्वमिति तूभयमतेपि समानम्। **शक्तिं त्यक्त्वेति**। ननु लाघवमात्रं न शक्ति निर्णायकम्, कृदादीनां कर्त्रादिशक्तत्वाभावप्रसङ्गात्। अतस्तत्र यथा नामार्थान्वय बोधानुरोधेन कर्त्रादौ गुरुभूतेपि शक्तिः, तथात्र संसर्गबोधनिर्वाहाय घटादिपदानामपि गुरावप्यन्वितघटे शक्तिः कल्प्येति चेन्न, यतो घटाम्पदादितो घटत्वकर्मत्वादिमात्र स्मृत्युपपत्तये घटादिपदशक्तिग्रहे अन्वितघटाद्यनुभावकतात्वेन न घटाद्यनुभावकताया विषयत्वम्, किन्तु शुद्धघटाद्यनुभावकतात्वेनेति भाट्टैरपि स्वीकार्यम्, 'अनुभावकत्व रूपशक्तेर्यदीयतया ग्रहणं यत्र पदे भवति, ततस्तस्यैव स्मरणम्' इति नियमात्। प्रतिपादितञ्चैवमेवान्वितशक्तिविचारे न्यायरत्नावल्यां ब्रह्मानन्दसरस्वतीभिः। शक्तिं विनापि शाब्दे संसर्गभाननियमश्चोपपादितस्तरङ्गिण्याम्। एवञ्चात्र लाघवस्य शक्तिनिर्णाय कत्वमुपपन्नमेवेति ॥

**त—पदानामितीति**। एतदुत्तरं 'घटादिपदानामित्यर्थः। व्यभिचारित्वा दिति। तत्र लिङ्गादिना स्वजन्यकार्यत्वोपस्थित्यभावादिति मन्तव्यम्' इति पाठः। 'मूले प्रथमत इति' इत्यारभ्य 'पूर्वमित्यर्थः' इत्यन्तो ग्रन्थः 'पदानामिति' इति प्रतीकात् पूर्वं योज्यः। **संसर्गताभिन्नेति**। नच तन्निवेशो गौरवपराहत इति वाच्यम्, अन्वये शक्त्य कल्पनाप्रयुक्तलाघवसत्त्वात्। नचैवं विनिगमकाभाव इति वाच्यम्, तत्र तत्र तत्संसर्गविशेषभानस्याकाङ्क्षाविशेषाधीनस्योभयवादिसिद्धतया तच्छाब्दबोधे व्यभिचार वारणाय मतद्वयेपि संसर्गताभिन्नत्वनिवेशावश्यकतया विनिगमकसत्त्वात्। अथानु भावकत्वमेव पदपदार्थयोस्सम्बन्धोऽस्तु, किं सिद्धान्ते तत्प्रकारकेश्वरेच्छापर्यन्तानु धावनेनेति चेन्न, अपभ्रंशस्य, स्वमते लाक्षणिकस्य च बोधकत्वात्तद्व्युदासार्थत्वात्। **विशेषाकाङ्क्षेति**। 'आकाङ्क्षाविशेष' इति पठनीयम् ॥

**मु—तत्र हीति**। एतदुत्तरं यत्रेत्यादिः तिष्ठन्तीत्यन्तो ग्रन्थः कुत्रचिन्नास्ति ॥

दि—'यवपदस्य इति वाक्यशेषात्' इति पाठः ॥

---

**तद्व्युदासार्थत्वादिति**। अपभ्रंशलाक्षणिकपदानां तत्तदर्थे शक्तत्वव्यवहारव्युदासार्थत्वादित्यर्थः ॥



**त—चरुर्भवतीति**। तिबत्र लेटि बोध्यः। तथाच यवविकारचरु भवनं कार्यमिति बोधः ॥

**दि—वाक्यशेषस्यैवेति**। ननु वाक्यशेषादस्माभिर्यवपदस्य दीर्घशूक विशिष्टे अनादितात्पर्यमेवावधार्यते, ननु यवपदं तत्र शक्तमिति, तत् कथमस्य शक्तिग्राहकत्वमिति चेन्न, अनादितात्पर्यस्य शक्तिनिरूढलक्षणान्यतरव्याप्यत्वात् प्रकृते चानुपपत्तिप्रतिसन्धानं विनापि बोधात् यवपदं दीर्घशूकविशिष्टशक्तम् अलाक्षणिकत्वे सति तदर्थे अनादितात्पर्यविषयत्वादित्यनुमानेन तत्र शक्तिसिद्धेः। वेदवचनादि तात्पर्यग्राहकं किमपि कङ्गौ नास्ति, प्रमाणं विना तत्कल्पनञ्च गौरवदुष्टमिति भावः। स्पष्टञ्चेदं चिन्तामणौ ॥

मु—विवरणेन नामपदस्य शक्तिग्रहप्रकारं दर्शयित्वा धातूत्तरप्रत्ययस्य तमाह—**एवं पचतीति** ॥

**दि—तिङर्थधर्मिणीति**। अन्वयानुपपत्त्या रौतीत्यत्र लिङः कर्तरि लक्षणेति भावः। **तथा अन्वयदर्शनेनेति**। इदञ्च शूद्रस्यान्नं पचति यो यो द्विजः इति योजनामनुचिन्त्य। यद्वा यो यो धूमवान्, सोऽग्निमानित्यादौ धूमवान् धूमव्यापकवह्निमानिति बोधः, यत्तच्छब्दौ तात्पर्यग्राहकाविति मतेन यच्छब्दार्थबुद्धिस्थाभिन्नद्विज एवाख्यातार्थान्वयः, शूद्रान्नपाककर्तृद्विजरूपतच्छब्दार्थे चातिनिन्दितान्वय इति मते दृष्टान्तत्वासम्भवात्। अस्मिन्मतेऽत्रापि यत्त त्पदाध्याहारादेव बोधः। वस्तुतस्तु, तिङर्थधर्मिणि नामार्थान्वयोऽव्युत्पन्न एव, अन्यथा पश्यन् गमनकर्तेत्यर्थे पश्यति गच्छन्निति, हन्ता दण्ड्य इत्यर्थे हन्ति दण्ड्य इति च प्रयोगापत्तेः ॥

**मु—शक्तिग्रह इतीति**। एतदुत्तरं 'जातावेव शक्तिः' इति पाठः ॥

**दि—इति भाव इति**। 'इतीति भावः' इति पाठः। **शक्त्यान न्त्यमिति**। 'शक्त्यानन्त्यं स्यादित्यर्थः' इति पाठः ॥

---

**तत्कल्पनम्** तत्र शक्तिकल्पनम् ॥
नामोत्तरप्रत्ययस्य प्रायशो विवरणाभावात् धातूत्तरेति ॥

**त—सदितीति**। 'यदिति' इति पाठः। 'गतेति' इति ताळीग्रन्थपाठः। **तयोस्सङ्गमनीयमिति**। 'तयोस्सङ्गमनाय विकल्पं दर्शयति' इति पाठः ॥

**दि—इदमेव कथमितीति**। जातिविषयकशक्तिज्ञानकार्यतावच्छेदकं जातिविषयकशाब्दत्वमेव। एवञ्च व्यक्तिविषयकत्वे तस्य न प्रयोजकत्वसम्भवः, सामग्रयाः कार्यतावच्छेदक एव प्रयोजकत्वात्, अन्यथा अतिप्रसङ्गादिति भावः। **शाब्दबोधं प्रतीति**। समभिव्याहारप्रयोज्यसंसर्गतान्यविषयतासम्बन्धेन शाब्दबोध प्रतीत्यर्थः ॥

**मु—व्यक्तौ लक्षणेति**। नच वृत्तिद्वयविरोध इति वाच्यम्, फल बलेन तद्विरोधानङ्गीकारात्, तात्पर्यविशेषेण गङ्गायां घोषमत्स्याविति प्रयोगदर्शना दित्याशयः ॥

**दि—अन्वयानुपपत्तेरिति**। तात्पर्यानुपपत्तेरप्युपलक्षणमिदम्। अत एव मुक्तावल्याम् 'अनुपपत्तिप्रतिसन्धानं विनापि' इत्येवाभिहितम् ॥

**त—अननुगततयेतीति**। एतदुत्तरम् 'अनुगतानतिप्रसक्तधर्मानवच्छिन्न तयेत्यर्थः' इति पाठः। **शक्तेरेवेति**। 'व्यक्तेरेव' इति पाठः ॥

**दि—मानाभाव इति**। नन्वन्वयव्यतिरेकावेव मानमित्याशङ्कां व्यभि चारप्रदर्शनेन परिहरति—**कथमन्यथेति**। **गोत्वशक्तिज्ञानत्वेन हेतुत्वेति**। गोत्वपदनिरूपितगोत्वशक्तिज्ञानादपि गोविशेष्यकशाब्दबोधापत्त्या गोपदनिरूपितत्वं शक्तौ विशेषणं देयम्। इत्थञ्च वृषादिपदजन्यशाब्दे व्यतिरेकव्यभिचार इति न दर्शितावतारिका युक्तेति केचित्। तन्न, घटकलशादिपदशक्तिज्ञानस्यापि घटादिस्मरणशाब्दौ प्रत्येतादृशव्यभिचारप्रसक्त्या तत्तदव्यवहितोत्तरत्वस्य कार्यताव च्छेदककोटाववश्यमुभयोरपि निवेश्यतया व्यतिरेकव्यभिचाराभावात् ॥

---

**समभिव्याहारप्रयोज्येति**। इदञ्च संसर्गताविशेषणं संसर्गभानस्याकस्मिकत्वशङ्का वारणाय ॥

**गतेतीति**। गतेति पूरणाभावे विशेषण इति सप्तम्यर्थस्यानन्वयात् ताळीग्रन्थपाठोऽत्र वरीयानवसेयः ॥



**त—तथाच घटत्वेनेति**। अत्र 'घटत्वे' इति साधुः पाठः। तेनेत्या दिवाक्ये 'शक्तिज्ञानाभावेपि' इति पाठः। एवं 'किञ्चेतीति' इति स्थाने 'शक्तिरितीति' इति च पाठः ॥

**दि—विशिष्टज्ञानमिति**। 'विशिष्टवैशिष्ट्यज्ञानम्' इति पाठः। **अत एवेति**। यदंश इत्यादिदर्शितसनानप्रकारकत्वेन हेतुत्वादेवेत्यर्थः। यदंश इत्यस्या घटने लिङादिकं कार्यत्वे शक्तमिति कार्यत्वप्रकारकशक्तिज्ञानादेव कार्यत्वेनापूर्वस्मृति शाब्दयोर्निर्वाहात् कार्ये शक्तमिति शक्तिग्रहाङ्गीकारस्य व्यर्थता स्यादिति भावः। 'स्वर्गकामो यजेत' इत्यादौ लिङा स्वशक्यकार्यत्वविशिष्टोपस्थितिः। यागरूपधात्व र्थस्य विषयितासम्बन्धेन कार्येऽन्वयः। तथाच स्वर्गकामीयं यागविषयकं कार्यम्। यागविषयककार्यवान् स्वर्गकाम इति वा बोधः। विषयित्वञ्च जन्यवृत्तिस्वरूपसम्ब न्धविशेषः। यागविषयकत्वस्वर्गकामीयत्वयोर्घटादौ बाधात् योग्यतया अपूर्वभानम्। पचेत्यादिलौकिकप्रयोगेष्वपूर्वे तात्पर्यासम्भवात् कृतिसाध्यत्वे लक्षणा। धात्वर्थे चास्या न्वय इति प्राभाकरसिद्धान्तोऽवसेयः। अधिकं चिन्तामणितर्कमञ्जर्यादितोऽवगन्तव्यम् ॥

**त—गोत्वबोधस्यैव स्मरणत्वमिति**। एतत्स्थाने 'गोत्वस्यैव स्मरणम्' इति पाठः। एवं 'तत्पदद्वयम्' इति स्थाने 'यत्तत्पदद्वयम्' इति। **एकधर्मपरमिति**। न त्वन्यस्थलेष्विव धर्मिणोप्यैक्यविवक्षेति भावः। एवं 'स्वाश्रयगोत्वादि' इत्यत्र 'स्वाश्रये गोत्वादि' इति पाठः। एवं 'शक्तेर्गोत्वानाश्रयत्वादित्यर्थः' इति च। **घटादेरिति**। 'घटादौ' इति पाठः। **बाधबुद्धिप्रतिबध्यत्वादिति**। 'बाधबुद्धिप्रतिबध्य त्ववत्' इति पाठः। एवमनुपदं 'गोत्वप्रकारकमपि' इत्यत्र 'गोत्वप्रकारक स्यापि' इति 'प्रतिबध्यम्' इत्यत्र 'प्रतिबध्यत्वम्' इति च। **विषयतया इति**। 'विषयितया' इति साधुः पाठः। एवं 'इत्यर्थः' इत्यत्र 'इत्य स्यार्थः' इति च। **पारतन्त्र्येणेति**। एतदनन्तरं 'विशेषणविशेष्यविशेषणयोः' इति पाठः। गोपदं गोत्वत्वविशिष्टशक्तमिति विशिष्टस्य वैशिष्ट्यावगाहिप्रतीतौ विशेषणतावच्छेदकगोत्वत्वस्य विशेषणगोत्वविशेष्ये शक्तौ, गोत्वत्वविशिष्टं गोपदशक्यमिति विशिष्टे वैशिष्ट्यावगाहिबोधे विशेष्यतावच्छेदकस्य गोत्वत्वस्य

विशेषणे शक्तौ च भानमिति भावः। 'ननूत्सर्गो बाधकबाध्यनियम एव' इति 'ननूत्सर्गे बाधनियम एव' इति वा पठनीयम्। एवं 'विशेष्यावगाहितायाम्' इति स्थाने 'विशिष्टवैशिष्ट्यावगाहितायाम्' इति च। **ननूत्सर्ग इति**। पदार्थः पदार्थे नान्वेतीत्याद्युत्सर्गस्य चैत्रस्य गुरुकुलमित्यादिससम्बन्धिकस्थले बाधदर्शनादिति भावः। **जागर्त्त्येवेति**। तथाच शक्तिज्ञानं विशेष्ये विशेषणमित्यादिरीत्यैव जायते, तच्च न शक्यतावच्छेदकत्वं गोत्वत्वे बोधयतीति भावः। अनन्तव्यक्तीनां शक्यताव च्छेदककोटिप्रवेशस्थले शक्तिज्ञानस्य विशिष्टवैशिष्ट्यानवगाहित्वे पशुपदादिशक्तिज्ञान मपि तादृशमेवेति लोमवल्लाङ्गूलादौ शक्यतावच्छेदकत्वसिद्ध्यभावप्रसङ्गेन शक्ति ज्ञानस्य विशिष्टवैशिष्ट्यावगाहित्वनियमोपगमेपि तस्य न कुत्रापि शक्यतावच्छेदकत्वाव गाहित्वसम्भव इत्यभिप्रायेणाह—**वस्तुत इति**। **बाध इति**। 'बोधः' इति साधुः पाठः। **प्रतीतेर्भिन्नाकारकत्वेति**। विशेष्ये विशेषणमिति रीत्या जायमानप्रतीत्यपेक्षया भिन्नाकारकत्वेत्यर्थः। तत्र विशेषणतावच्छेदके एकैव प्रकारता। विशिष्टवैशिष्ट्य बोधे तु उभे इत्याशयः। विशिष्टवैशिष्ट्यावगाहिबोध इति व्यवहारोपि वैशिष्ट्यांश एव वैलक्षण्यं प्रतिपादयति, न तु प्रकारतांशे इति बोध्यम्। तथाच प्रतीत्या गोत्वत्वे संसर्गप्रतियोगितावच्छेदकत्वादिकमेव विषयीक्रियते, न तु शक्यतावच्छेदकत्वमिति भावः। नचैवं दण्डो घटकारणमिति प्रतीत्या घटत्वदण्डत्वयोः कार्यतावच्छेदकत्वकारणताव च्छेदकत्वे अपि न सिद्ध्येतामिति वाच्यम्, तत्र कार्यताकारणतयोरनुगमकाकाङ्क्षायां संसर्गप्रतियोगितानुयोगितावच्छेदकयोरेव लाघवतर्कसहकारेण कार्यताकारणतावच्छेद कत्वानुमानात्। अत्र तु शक्तेरेकमात्रनिष्ठत्वेन तदवच्छेदककल्पनाया वैयर्थ्येनासम्भवात्। अथैवं शब्दसमवायिकारणता निरवच्छिन्ना स्यादिति चेन्न, गुरुमते तत्रेष्टापत्तिसम्भवात्। **व्युत्पत्तिवैचित्र्येणेति**। घटादिपदशक्तिज्ञानं जात्याकृतिप्रकारकघटादिविशेष्यक बोधं जनयतीति कार्यकारणभावेनेत्यर्थः। **पदार्थतावच्छेदके शक्तिसत्त्व इति**। **उपलक्षणतयेतीति**। एतद्व्याख्यानेन 'पदार्थत्वे शक्तिरूपे' इति पाठः साधुः।

---

**बाधकेति**। बाधकेन बाध्यो नियम इत्यर्थः। **बाधनियम इति**। नियमेन बाध इत्यर्थः॥

**प्रतियोगितावच्छेदकत्वादिकमिति**। आदिना अनुयोगितावच्छेदकत्वपरिग्रहः। इदञ्च गोत्वे शक्तं गोत्वं शक्यमित्युभयविधशक्तिज्ञानसंग्रहाय॥



दिनकरीये 'विशेषणत्वञ्च' इत्यादिः 'शक्यविषयत्वमिति' इत्यन्तो भागः प्रक्षिप्त इति भाति। 'अविषयत्वे सति' इत्यनन्तरं 'तत्पदशक्यतावच्छेदकानुगमकत्वमुपलक्षण तया तत्पदशक्यतावच्छेदकतावच्छेदकत्वम्। वक्तृबुद्धिविषयतावच्छेदका ये धर्मास्त दवच्छिन्नाः तत्पदजन्यबोधविषया भवन्तु इत्याकारकभगवदिच्छायां बुद्धिविषयता वच्छेदकत्वस्य तत्पदजन्यबोधविषयत्वेनाविषयत्वात्' इति पाठः साधुः। एवं 'यद्यपि बोध' इत्यादावपि 'बोध' इति स्थाने 'बुद्धि' इति पठितव्यम्। तत्पदशक्यता वच्छेदकतावच्छेदकस्य तत्पदजन्यबोधविषयत्वेन इच्छायां न भानम्, शक्यतावच्छेदक चैत्रत्वादेश्च तथा भानमिति कुत इति शङ्कां निरस्यति—**वक्तृबुद्धीति**। **शक्य मिति शेष इति**। इदमः शक्यं प्रत्यक्षगतं रूपमित्याद्यन्वयः। **रूपम्** स्वरूपम्। वस्त्विति यावत्। वस्तुतो रूप्यते बोध्यते इति रूपम्, शक्यमित्यर्थः। एवञ्च नाध्याहारक्लेशो रूपपदवैयर्थ्यञ्च। **विप्रकृष्टं तदितीति**। 'विप्रकृष्टमिति। प्रत्यक्षगत मित्यस्यानुकर्षः' इति पाठः। 'तथाचादसः' इति स्थाने 'तथाच तदः' इति च॥

दि—**सर्वपदस्य व्यापकत्व इति**। अनेकस्मिन्नपि शक्तिर्बोध्या। अन्यथा सर्व आकाशः शब्दवानिति व्यवहारापत्तेः। सर्वपदार्थस्य अनेकत्वविशिष्टस्य तादात्म्येन समभिव्याहृतघटादिपदार्थेऽन्वयः। इत्थञ्च सर्वपदस्य विशेष्यवाचकपदसमान वचनत्वाद्युपपत्तिः। गदाधरभट्टाचार्याद्यनुसृता रीतिस्तद्ग्रन्थेभ्योऽवसेया॥

त—**इति बोध्यमिति**। नामार्थयोर्भेदेन नान्वय इति व्युत्पत्तेरत्र सङ्कोच इत्याशयः। 'एवञ्च युष्मदस्मच्छब्द' इति स्थाने 'एवं युष्मच्छब्द' इति पाठः। **भर्ज इति**। 'गर्ज' इति पठनीयम्। 'मूढपदोत्तर' इत्यनन्तरं 'मया त्वयि हतेऽत्रैवेत्यादौ तद्वाक्यजन्य' इत्यादिपाठः। 'न मेधामहर्षिणा' इत्यत्र 'न सुमेधोमहर्षिणा' इति च। इति **मन्तव्यमिति**। इदमुपलक्षणम्। किंशब्दार्थघटकजिज्ञासापि स्वतन्त्रोच्चा रयितृनिष्ठा ग्राह्या। अतः 'कः पौरवे वसुमतीम्' इत्यादौ राजादिजिज्ञासाया एव बोध इति॥

त—**पदं विभजत इतीति**। 'शुक्लम्' इति पदं विहाय तरङ्गिणीकार पक्षे दिनकरीयपाठ इति प्रतिभाति। **पदलक्षणमिति**। 'शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः' इति ग्रन्थेनैव शक्तिप्रतियोगित्वरूपपदलक्षणस्य लाभात् पुनस्तत्कथना

वश्यकता चिन्त्या। दिनकरभट्टाशयस्तु पूर्वमुक्तस्य शक्तत्वस्यातानुवादः; स चापभ्रंशस्य विभागविषयत्वं नास्तीति बोधनायेति। मुक्तावलीपाठश्च 'शक्तं पदं क्वचिद्यौगिकम्' इत्यादिः। **बाधकाभावादिति**। नचैवं 'घटम्' इत्यादिवाक्येऽतिव्याप्तिरिति वाच्यम्, विभक्त्यन्तभिन्नत्वेन विशेषणीयत्वात्। मूले क्वचिदित्यस्य कस्मिंश्चिदर्थविशेषे इत्यर्थकताभ्रमनिवारणं व्याख्याफलतया दर्शयति—**एकस्यैवेति**। इदमुपलक्षणम्। क्वचिदित्यस्य वाक्यविशेषे इत्यर्थकतापि न सम्भवति, पाचकादिपदानां वाक्यान्तरेषु रूढत्वादिशङ्काया अनिरासादिति। **स्यादित्याहेति**। 'स्यादित्यत आह'—इति पाठः। **रूढलक्षणमुक्तमिति**। नन्वेवम् 'अवयवार्थ एव बुध्यते' इत्यत्रैवकारानर्थक्यमित्यत आह—**तत्र यौगिकेति**। **यौगिकत्ववारणायेति**। पङ्कजपदाद्यत्र पङ्कजनिकर्तृपद्मबोधः, तत्रापि पङ्कजपदं यौगिकमिति प्रामाणिकव्यवहाराभावात् विभागस्य चालव्यवहारमात्रोपयोगित्वात् तद्वारणस्यावश्यकतेति भावः। व्यवहारमात्रोपयोगितामेव स्पष्टयति—**नचैवमपीत्यादिशङ्कासमाधानाभ्याम्**। 'गृह्यते इत्यस्यानन्तरम् 'अर्थः' इति प्रक्षिप्तम्। मूले 'बुध्यते' इत्यत्र 'गृह्यते' इति पाठः। ननु विभाजकधर्माणां प्रकारान्तरेण व्यावर्तकत्वसम्भवे तत्परित्यागोऽनुचित इत्याक्षिपति—**नचेति**। 'रूढत्वानुपपत्तिः' इत्यपपाठः। 'रूढत्वापत्तिः' इति साधुः। अथैवमिष्टापत्तौ 'पदं त्रिविधम्, यौगिकं, रूढं, योगरूढञ्चेति' इत्येव विभाग आस्तामित्यत आह—**यौगिकरूढभिन्नयोरपीति**। तर्हि व्यावर्तकत्वमेव विभाजकानामायातमिति चेदाह—**एकादश इति**। 'यौगिकत्वानुपपत्तेः' इति पाठः। ननु येषां कृदन्तादीनां पिता सङ्केतितत्वं न भवेत्, तेषामेवास्तु यौगिकोदाहरणत्वम्, मूले पाचकादिपदप्रदर्शनञ्च तेषां न सङ्केतितत्वमित्यभिप्रायेणेति यदि ब्रूयात्, तदापि दोषं दर्शयति—**रूढलक्षण इति**। नन्ववयवशक्तिरहितत्वमेव लक्षणघटकत्वेनाभिमतम्, अवयवशक्तिराहित्ये प्रमाणप्रदर्शनायैवावयवशक्तिनैरपेक्ष्येण बुध्यत इति मूलोक्तिरित्यभिप्रायवानाह—**वस्तुत इति**। **मण्डपास्त्विति** अत्र। 'मण्डपोऽस्त्री जनाश्रयः' इति ताळीग्रन्थपाठः। **पाठदर्शनादिति**। 'पाठदर्शनेपि' इति पाठः। सप्तम्यर्थस्य अभिहितमित्यनेनान्वयः। 'मण्डपस्थाने मण्डलेत्येव' इति पाठः। **तत्** 'मण्डपादीति' इति पाठस्य प्रामादिकत्वम्। इदमत्र चिन्त्यम्। गौडप्रधानैर्जगदीशतर्कालङ्कारैर्मण्डपपदस्यैव गूढार्थकत्वं स्पष्टमुक्तं शब्दशक्तिप्रकाशिकायां पदविभागप्रकरण इति गौडानां पाठभेदमाश्रित्य पाठस्यासमीचीनतासम्पादनमयुक्तमिति। मण्डपान् भोजयतीति प्रयोगस्यापि तत्र दर्शितत्वान्मण्डपपदस्य यौगिकरूढत्वमेव गौडैरङ्गीकृतम्। इत्थञ्च केवलरूढोदाहरणत्वं मण्डपपदस्य न सम्भवतीत्येव दिनकरभट्टाशय इति च बोध्यम्॥



दि—**पद्मत्वावच्छिन्नविशेष्यत्वेति**। पङ्कजपदस्य पद्मत्वावच्छिन्ने रूढिज्ञानकालेपि कर्दमजादिपदात् योगजन्यपङ्कजनिकर्तृबोधोदयाद्व्यभिचारवारणायाह—**पङ्कजपदेति**। पद्मे रूढिज्ञानदशायामपि लक्षणया तादृशबोधजननादाह—**योगेति**। कुमुदेपि पद्मत्वभ्रमवतः कुमुदविशेष्यकतादृशबोधदर्शनात् पद्मवृत्तिविशेष्यत्वानिरूपितत्वं, पद्मान्यविशेष्यतानिरूपितत्वं वापहाय पद्मत्वावच्छिन्नविशेष्यत्वानिरूपितत्वप्रवेशः। अत्र पङ्कजपदं योगरूढोपलक्षकम्, तेन यौगिकरूढस्थले एकत्र रूढिज्ञाने सत्यपि योगजस्यापरबोधस्य नानुपपत्तिः। यत्र योगरूढिभ्यामेकार्थबोधः, तत्रैव रूढिज्ञानस्य प्रतिबन्धकतामभ्युपगच्छन्ति प्राचीनाः। अत्र योगजन्येत्यस्य योगप्रयोज्येत्यर्थः। अन्वयश्चास्य विषयतायाम्। यथाश्रुतार्थमाश्रित्य बोधेऽन्वये अनिरूपितविषयतापदयोरासत्तिर्न स्यात्, विशेष्यान्तरान्वयिबोधकपदान्तरेण व्यवधानात्, कर्दमजातकुमुदतोपि सुन्दरतरं पङ्कजमित्यादौ कुमुदान्तभागेन तादृशबोधानुपपत्तेश्च॥

त—कस्यचित् पिता पाचकेति नाम कृतम्। स च पाकं कृतवान्। एवञ्च पाचकपदयोगरूढयोरेकविषयकत्वसम्भवात् पाचकपदमपि योगरूढं स्यादित्याक्षेपो यथा न स्यात्तथा मूलं विवृणोति—**अवयवशक्तीत्यादिना**। **शाब्दबोधाविषय इत्यर्थ इति**। 'शाब्दबोधे इत्यर्थः' इति पाठः। दृश्यते चैवमेव केषुचिन्मुद्रितपुस्तकेषु। अथवा 'शाब्दबोधविषय इत्यर्थः'। समुदायशक्तिरप्यस्तीत्यस्य समुदायशक्तिस्मारितार्थान्वय इत्यर्थः' इति पाठः। **तेनेति**। एतदनन्तरम् 'अनुमितौ' इत्यसाधुः। **नानियमेति**। 'न नियम' इति साधुः॥

दि—**विरोधिविषयकेति**। 'विरोध्यविषयक' इति साधुः पाठः॥

आसत्तेः कारणत्वानङ्गीकारेपि दोषमाह—कर्दमेति॥

अथवेति। अयमेव पाठः साधीयान्। पूर्वकल्पे समूहालम्बनावारणादिति बोध्यम्॥

**त—पद्मकुमुदातिरिक्तेति।** एतदुत्तरं 'पङ्कजनिकर्तृपदार्थबोधे, तात्पर्यम्, पङ्कजनिकर्तृत्वमात्रेण कुमुदस्यैव वा' इत्यादिः साधुः पाठः ॥

**दि—**व्यक्तिवचनानां किञ्चिदित्यादिः इत्यर्थ इत्यन्तो ग्रन्थः प्रक्षिप्तः, अन्यथा तरङ्गिण्यामेतद्व्याख्यानस्य निरुपयोगत्वापत्तेः। **एवं रूढ्यर्थेति।** 'एवञ्च रूढ्यर्थ' इति पाठः। **परस्परेति।** एतत् बाधप्रतिसन्धानवचनम् ॥

**त—**'सामग्रीपदम्' इत्यस्य पूर्वं 'वस्तुतः' इत्यपि योज्यम् ॥

**मु—पद्मस्य चेति।** 'पद्मत्वस्य च' इति ताळीग्रन्थपाठः। **तत्र चाव यवेति।** प्रचां मतेऽत्र लक्षणयैव निर्वाह इत्यवसेयम्। तेषामयमभिसन्धिः—पङ्कजपदस्य पद्मे रूढिज्ञानकाले पद्मान्वयानुपपत्तिप्रतिसन्धानपुरस्सरमेव पङ्कजमत्रा स्तीत्यादिवाक्यात् कुमुदधीरनुभवसिद्धेति लक्षणाकल्पकसत्त्वाल्लक्षणयैव सा धीः। विरोध्यविषयकत्वेपि सिद्धेरिवानुमितौ रूढिज्ञानस्य योगमात्रार्थविषयकबोधे प्रतिबन्धकत्वं सुवचमिति। मणिकारस्तु पूर्वोक्तानुभव एव विवदते। अधिकमन्यतोऽवगन्तव्यम्। पङ्कजपदघटककर्तृवाचकडप्रत्ययस्य पद्मत्वावच्छिन्ने लक्षणेति यन्मतम्, तदसारम्, युगपद्वृत्तिद्वयविरोधादनुपपत्तिप्रतिसन्धानं विना पद्मत्वावच्छिन्नबोधोदयाच्च ॥

**त—एकेति।** 'एकपदोपस्थाप्ययो रूढ्यर्थयोर्भेदेनान्वयबोधे' इति पाठः। एकपदोपस्थाप्ययोः एवकारेण सकर्मकधातुना वा एकपदेनोपस्थाप्यार्थौः अर्थयोः अन्ययोगाद्योः फलव्यापारयोर्वा। नव्यमते गवादिपदाद्भिन्नशक्त्युपस्थाप्ययोराकृति व्यक्त्योश्च। यदि यथास्थितपाठप्रामाण्येप्याग्रहः, तदा योगरूढस्थले अभेदेनान्वयः पूर्वपक्षिणा स्वीकृतः, पदेनैकेनार्थद्वयबोध एवाक्षेप इति प्रकल्प्य कथञ्चित्स योजनीयः। **मूले यत्र त्वितीति।** उच्चारणभेदेन पदभेदादेकस्या एव पदव्यक्तेरुभयार्थकत्वासम्भवाद्यौगिकरूढस्य लक्ष्याप्रसिद्धेराह—**यादृशानुपूर्व्यवच्छिन्न इत्यर्थ इति।** अथैवं पङ्कजेत्यानुपूर्व्यवच्छिन्नस्यावयवशक्तिमात्रेण कुमुदबोधकत्वात् रूढिमात्रेण स्थलपद्मबोधकत्वाच्च यौगिकरूढत्वापत्तिरिति चेदिष्टमेवैतत्। पङ्कजनिकर्तृपद्मबोधकपदव्यक्तावेव यौगिकरूढत्वव्यवहारस्यानिष्टत्वात्। इत्थञ्च तत्तद्व्यवहारमाश्रित्यैव पदचातुर्विध्योक्तिरित्यवसेयम् ॥



**भा—लक्षणेति।** तात्पर्यानुपपत्तितो लक्षणा शक्यसम्बन्ध इति योजना। पञ्चम्यर्थो ज्ञानज्ञाप्यत्वम्। लक्षणाकल्पनस्य तात्पर्यानुपपत्तिप्रतिसन्धानप्रयोज्यत्वात्। दर्शितयोजनामभिसन्धायैव मुक्तावल्यां लक्षणाकल्पकयुक्तिरेव प्रथमं विचारिता। ततश्च तत्स्वरूपम् ॥

**त—जहत् स्वार्थमिति।** 'जहति स्वार्थम्' इति ताळीग्रन्थपाठः। एवमुत्तरत्रापि। जहदिति पाठे पदमिति, जहतीति पाठे पदानीति कर्तृवाचकपदमनुसन्धेयम्। **शब्दार्थेति।** 'शक्यार्थ' इति साधुः पाठः। **अजहत्स्वार्थेति।** इदमग्रेतनलक्षणेत्यस्य विशेषणम्। **छत्रिण इत्यादाविति।** अत्र 'छत्रिण इत्यादौ छत्र्यादिपदस्य छत्रिघटितैकसमुदायत्वेन छत्रितदन्यबोधजनिका छत्रिघटितैक' इत्यादिः पाठः ॥

**मु—यष्टिधरेषु लक्षणेति।** 'यष्टिधरे लक्षणा' इति क्वचित् पाठः ॥

**त—लक्षणापदार्थे लक्ष्यतायामिति।** लक्षणापदमत्र लक्ष्यतारूपार्थे लाक्षणिकम्, छत्रिपदस्येति षष्ठ्यर्थः प्रयोज्यत्वं लक्ष्यतान्वयीति भावः। **मूले इयमेव चेति।** अत्र चकारः प्रक्षिप्तः। **दासशातनादाविति।** 'दासत्व शातनादौ चैत्रनिरूपितत्वशरकरणकत्वादि' इति पाठः। 'दासशातनादौ चैत्रस्वत्व' इति पाठे षष्ठ्यर्थः स्वत्वम्, तस्य दासे अन्वय इत्याशयः। **पदोपस्थाप्यत्वाभावादिति।** 'पदोपस्थाप्यत्वाभावादेव' इति क्वचित् पाठः। **नचेति।** 'नचैवम्' इति पाठः। **घटकजनकत्व इति।** जनकपुमान् पितृपदशक्य इति घटकेत्युक्तिः। **नियतसम्बन्धाकाङ्क्षेति।** 'नियतसम्बन्ध्याकाङ्क्षा' इति पाठः। **अभेदेनान्वयस्येति।** 'भेदेनान्वयस्य' इति साधुः। **छत्रिघटितसमुदायलक्षकत्वे इति।** 'छत्रिघटितसमुदायत्वलक्षकत्वे' इति पाठः। छत्रिघटितत्वस्यापि लक्ष्यतावच्छेदकघटकत्वमभ्युपगम्यैवमुक्तम्। एतदनुसारेण चानुपदमेव 'एतच्चापाततः' इति वक्ष्यति। मूलादिस्वारस्यन्तु समुदायत्वविशेषस्य तद्व्यक्तित्वेनैव लक्ष्यतावच्छेदकत्वलक्ष्यत्वयोः स्वीकार इति स्पष्टप्रायम्। पक्षमिमं पूर्वपक्षतया चाग्रे दर्शयिष्यति ॥

---

ज्ञानज्ञाप्यत्वमिति। एतेन कल्प्यमानेति केषाञ्चित् पूरणमनावश्यकमिति सूचितम् ॥

सु—ननु जहत्स्वार्थलक्षणास्थले अन्वयानुपपत्तिरेवास्तु लक्षणाबीजमित्याशङ्क्य परिहरति—**यदि चेति**। लक्षणाबीजं लक्षणाधीनोपस्थितेः शाब्दबोधहेतुत्वकल्पकम्। ननु लक्षणायाः शक्यसम्बन्धरूपत्वे तीरवृत्तेर्गङ्गासम्बन्धस्यैकत्वात्तीरबोधः कदाचित्तीरत्वेन कदाचिद्गङ्गातीरत्वेनेत्यत्र किं नियामकमिति शङ्कामपनयति—**इदन्तु बोध्यमिति**। ननु तीरत्वादिबोध एव कथम्, तत्र वृत्तेरभावादित्यत आह—**अत एवेति। तत्र लक्षणामिति**। 'तत्र' इति प्रक्षिप्तम् ॥

त—**छत्रिघटितसमुदायेति**। 'छत्रिघटितसमुदायत्व' इति पाठः। 'तत्राप्यजहत्स्वार्थलक्षणोपपादनमिति' इति ग्रन्थः प्रक्षिप्तः। 'अनौचित्यात्' इत्यनन्तरम् 'अत एव' इत्यस्य पूर्वं 'वस्तुतस्तु छत्रिघटितसमुदायत्वे लक्षणायामपि मुख्यविशेष्यतया शक्यार्थोपस्थित्यभावात् सा जहत्स्वार्थैवेति नैयायिकैकदेशिमतमवलम्ब्य नचेत्यादिशङ्कासङ्गतिः' इति वा, एतदर्थकमपरं वा वाक्यं योजनीयम्, अन्यथा पूर्वोपपादकत्वासम्भवात् 'अतएव' इति वाक्यस्यासाङ्गत्यापत्तेः। **लक्ष्यत इति**। 'लभ्यते' इति पाठः ॥

दि—**पदानुपस्थाप्यस्यापीति**। पदनिरूपितवृत्त्यनाश्रयस्यापीत्यर्थः ॥

त—**तीरत्वेपीति**। अपिः प्रक्षिप्तः। **तथापि युगपदिति**। इदमुपलक्षणम्। तीरत्वे लक्षणाङ्गीकारे तत्रापि लक्ष्यतावच्छेदकं वक्तव्यम्, तत्र च लक्षणान्तरमित्यनवस्थेति। यदि निरवच्छिन्नापि लक्षणा क्वचित्स्वीक्रियते, तदा नैष दोषः। **गन्धवान् वेति**। 'गन्धवद्वा' इति पाठः। **प्रवाहसंयोगस्य स्थिति**। षष्ठ्यर्थो निरूपितत्वम्। **पृथिवीत्वप्रकारकशाब्दबोध इति**। 'पृथिवीत्वप्रकारक एव शाब्दबोधः' इति पाठः। **सम्भवादितीति**। 'सम्भव इति' इति पाठः ॥

सु—**परम्परासम्बन्धरूपेति**। सादृश्य,जनकत्वादीनां परम्परासम्बन्धानां न लक्षितलक्षणात्वम्, अन्यथा गौर्वाहीकः आयुर्घृतमित्यादीनामपि तथात्वापत्तेः, किन्तु परम्पराविशेषस्यैव स्वलक्ष्यपदवाच्यत्वादिरूपस्येत्यवसेयम् ॥

त—**अवयवशक्त्या इति**। अवयवलक्षणया इति पठितव्यम्। **कटकविशेषेति**। 'कीटकविशेष' इति पाठः। **इति रीत्येति**। एतदनन्तरं 'द्विरेफपदात् साक्षात्सबन्धरूपनिरूढलक्षणासहितया शक्त्यैव भ्रमर' इति पाठः। **शक्यपरम्परेति**। 'शक्यस्य परम्परा' इति चारुः ॥



सु—अथ शक्तिवल्लक्षणाया अपि पदार्थोपस्थितावुपयोगात् शक्तमिव लाक्षणिकमपि शाब्दबोधहेतुरिति भ्रमं व्युदसितुमाह—**किन्तु लाक्षणिकमिति**। इदमत्रावधेयम्—शक्यादशक्योपस्थितिरेव लक्षणेति केचित्। तन्मते पदजन्यशक्यस्मृतेरेव लक्ष्यार्थस्मरणजनकत्वम्। तेन च स्मरणेन शाब्दबोध इति पदं तत्रान्यथासिद्धत्वान्न हेतुरिति लाक्षणिकस्याननुभावकत्वं स्फुटम्। परन्तु पदेनार्थोपस्थितेर्हेतुर्हि वृत्तिः, न तु सैव। एवञ्च लक्षणायाः स्मृतिरूपत्वे पदनिरूपितवृत्तित्वमेव तस्या न सिद्ध्येत्, तीरस्य प्रकृत्यर्थत्वाभावात् प्रत्ययानामिति नियमस्य भङ्गश्च स्यादिति नैयायिकैस्तन्मतं परित्यक्तम्। तेषु च प्राचीना 'लाक्षणिकं पदं नानुभावकम्' इति प्रवादमभ्युपगच्छन्ति। तेषामयमाशयः—शाब्दसामान्यं प्रति शक्तपदत्वेन शक्तपदज्ञानत्वेन वा हेतुत्वम्, न तु शक्तलक्षकान्यतरपदज्ञानत्वेन, गौरवात्। नच वृत्तिमत्पदज्ञानत्वेनैव हेतुत्वमस्त्विति वाच्यम्। शक्तिलक्षणान्यतरत्वादतिरिक्तस्य वृत्तित्वस्य दुर्निरूपत्वात्। एवञ्च गङ्गायां घोष इत्यादौ घोषादिपदमेव तीरादीनामप्यनुभावकम् तद्विषयकशाब्दबोधं प्रति तदन्वयिशक्तपदज्ञानत्वेन हेतुता, न तु तच्छक्तपदज्ञानत्वमात्रेण। तदन्वयित्वञ्च साक्षात्परम्परासाधारणम्। तच्चाभेदेपि। अतो न घटादिपदस्य घटाद्यनुभावकत्वानुपपत्तिः। सर्वलाक्षणिकस्थले तु पदार्थोपस्थितिमात्रम्, न शाब्दबोधः। पदार्थोपस्थित्या मानसं विशिष्टज्ञानन्त्विष्यत एवेति। स्पष्टमिदं 'लाक्षणिकस्यानुभावकत्वेपि' इति तात्पर्यग्रन्थस्थचिन्तामणिपङ्क्तिव्याख्यानावसरे मथुरानाथीये। एतन्मते च गङ्गापदात् तीरबोधो भवत्वितीच्छाया विसंवादित्वादीश्वरीयत्वासम्भवात् 'शक्त्यैव तीरबोधोपपत्तेर्लक्षणोच्छेदापत्तिः' इति पूर्वं दिनकरभट्टकृताक्षेपस्य, तत्समाधानस्य वा नावसर इत्यपि मन्तव्यम् ॥

दि—**यः स्वार्थ इति**। 'यः स्वार्थः इत्यर्थः' इति पाठः ॥

त—**स्वविषयकज्ञानेति**। अत्र 'स्वविषयकज्ञानसहितत्वरूपवैशिष्ट्यस्यान्वयः' इति पाठः। सहितत्वं सहकृतत्वम् ॥

दि—**कुमतिः पशुरित्यादि**। नन्वत्रापि एकत्वशक्तैकवचनसत्त्वात्तदेव बोधकमिति चेन्न, एकत्वबोधे तात्पर्याभावज्ञानदशायामपि तत्र शाब्दस्यानुभवात्। **इति नव्या इति**। एतन्मते पूर्वोपदर्शितप्रवादस्य लक्ष्यार्थस्य विधेयतया भानं नास्तीत्येवार्थः, 'न विधौ परः शब्दार्थः' इति न्यायादिति तर्कमञ्जरीकृतः ॥

त—**सम्पातायातमिति** । उक्तिरियं चिन्त्या, यतः चैत्रस्य गुरुरित्येताव न्मात्रोक्ते गुरुपदस्य भावप्रधानतामवलम्ब्य विनाप्येकदेशान्वयं बोधसम्भवात् गुरु पदस्य गुरुत्वविशिष्टार्थकत्वं विना यत्र न बोधः सञ्जायते, तादृशस्थलविशेषप्रदर्शनायैव गुरुकुलमित्युक्तम् । **तथा प्रयोगप्रसङ्गादिति** । नच गुरुपदसमभिव्याहारस्थले षष्ठ्यर्थः स्वनिरूपितगुरुत्ववत्त्वमेव । तस्य च गुरावन्वयः । एवञ्च बाधितार्थकत्वान्न तादृशप्रयोग प्रसङ्ग इत्येकदेशान्वयो मास्त्विति शङ्क्यम्, षष्ठ्यर्थस्य परम्परारूपत्वम्, गुरुत्वस्य संसर्गतयापि भानञ्चानुभवविरुद्धमिति गुरुत्वरूपैकदेशान्वयस्वीकारस्यावश्यकत्वात् । **तथापि विशेषणविभक्तेरिति** । ननु नदीपदस्य तात्पर्यग्राहकत्वे गभीरापदमेव विशे ष्यवाचकमिति नायं दोष इत्यत आह—**घोषपदेनेति** । ननु नव्यमते द्वारमित्या दावर्थाध्याहार इति मीमांसकमते च आसत्तेर्न शाब्दबोधोपयोगित्वम्, यद्वा श्लोकादाविव योजनयैवात्र बोध इति नोक्तानुपपत्तिरित्यत आह—**गभीरेति** । 'गभीरनद्यां घोष इत्यादौ' इति पाठः । **गङ्गापदजन्यबोधेतीति** । इदञ्च 'गङ्गापद बोध्यस्य' इति स्थाने 'गङ्गापदजन्यबोधविषयस्य' इति दिनकरीयपाठमनुसृत्य ॥

दि—**चित्राभिन्ना गौः बोध्येति** । 'एकदेशविकृतमनन्यवत्' इति न्यायेन चित्रा गौरिति वाक्यमत्रास्तीति प्रभाकारवचनमनुसन्धेयम् ॥

त—**एवञ्चेति** । 'गङ्गायामित्यानुपूर्वी न शाब्दबोध' इत्यादिः पाठः ॥

दि—**तत्त्वावच्छिन्ना या शक्त्यवच्छिन्नेति** । एतत्पदमेतदर्थे शक्त मिति शक्तिज्ञानाकारः । तद्विषयपदस्य बोधकत्वमते बोधकतायामानुपूर्व्याश्शक्तेश्च साक्षादवच्छेदकत्वं भवतीति दर्शितग्रन्थस्याधिकं सामञ्जस्यम् । एतत्पदशक्योऽयमर्थ इति शक्तिज्ञानाकारे च तरङ्गिणीदर्शितैव गतिः ॥

त—**ननु शक्त्यभावेपीति** । ननु तदानुपूर्व्यवच्छिन्ना तद्घटकपदशक्ति सहकृता या बोधकता, तन्निरूपकबोधविषयसम्बन्ध एव तदानुपूर्व्यवच्छिन्नस्य लक्षणा, एवञ्च नापभ्रंशस्य लाक्षणिकत्वापत्तिः, न वा वाक्यलक्षणानुपपत्तिरित्यत आहेति

---

अपभ्रंशस्यापि लाक्षणिकत्वापत्तौ इष्टापत्तिमसहमानः प्रकारान्तरेण वस्तुतस्तु इत्यादि ग्रन्थमवतारयति—नन्विति ॥

**तद्घटकेति** । अत्र घटकत्वं स्वसाधारणम् । तेन न पदलक्षणाया अनुपपत्तिः ॥



बालावतारिका । **ननु यत्किञ्चित्पदस्येति** । वाक्यमिदमशुद्धं भाति । अतः 'ननु यत्किञ्चित्पदस्य तात्पर्यानुपपत्त्यैव गौरवमप्यास्थीयते इति यदि ब्रूयात्, तदाप्याह' इति ताळीग्रन्थपाठ एव स्वीकर्तव्यः । तत्र **तात्पर्येति** । सार्थकत्वतात्पर्येत्यर्थः । वाक्यलक्षणानङ्गीकारे गभीरायामित्यादियत्किञ्चित्पदस्य वृत्त्या अर्थबोधजनकत्व तात्पर्यस्य वक्तृगतस्योपपत्तिर्न सम्भवतीति भावः । **बोध इति** । एतत्स्थाने 'नामार्थ त्वम्' इति पाठः । **रजनेति** । रजना नाम रजकस्य निर्णेजनशिलेति श्रीगुरूक्तिः । एतत्स्थाने 'जनाः' इत्यपि क्वचित्पठन्ति । **गभीरायां रजनेति** । 'गभीरायां नद्यां रजनेत्यत एव तादृशबोधोपगमेन' इति पाठः ॥

दि—**गभीरायां नदीति सप्तमीशून्यस्येति** । अत्र सप्तमीशून्यभागात् केनापि शास्त्रकृता बोधस्यानङ्गीकारात् गभीराभिन्ननद्यास्स्वबोध्यत्वमेव नास्ति, अन्यथा गभीरायां नदीं पश्येत्यादेरपि साधुत्वापत्तेरिति तुष्यतु दुर्जन इति न्याये नात्र शङ्कासङ्गतिर्बोध्या ॥

त—'प्रातिपदिकेत्यत एव' इति स्थाने 'प्रातिपदिकादेव' इति पाठः । सप्तमीप्रकृतित्वाभावादित्यनेनोपदर्शितदूषणे अरुचिं दर्शयति—**वस्तुत इति** । ननु वृत्त्या प्रकृतिजन्यबोधविषयत्वमित्यत्र वृत्तौ प्रकृतिनिरूपितत्वमपि दीयत इति नोक्तदोष इत्यत आह—**वृत्ताविति** । **नीलोत्पलादीति** । 'नीलोत्पलादिप्रकृतिनिरूपितवृत्त्य प्रसिद्धेः' इति पाठः । एतल्लक्षणमित्यत्र 'एतद्दूषणम्' इति च । **प्रतिभातीति** । गभीरायां नदीति भागघटकनदीपदस्यैव सप्तमीप्रकृतित्वम् । तत्प्रकृत्यर्थत्वञ्च विशिष्ट लक्ष्यगभीरनदीतीरस्यापीति यद्युच्यते, तदा तादृशतीरकर्मकदर्शनबोधेच्छया गभीरायां नदीं पश्येति प्रयोगापत्तिर्दुर्वारा, अतो गभीरायां नदीति भागस्य दर्शितदिशा अर्थाबोधकत्वान्न विभक्तिप्रकृतित्वसम्भव इत्येव दिनकरभट्टाशय इत्यापाततो रमणीयत्वो क्तिश्चिन्त्या ॥

दि—**तादृशतीरवृत्तित्वस्य घोषादावन्वयानुपपत्तेरिति** । ननु गभीरायां नद्यामित्यन्तभागस्य कथं नामत्वम् । नामघटितत्वेनेति चेत् प्रत्ययघटितत्वेन प्रत्यय त्वमप्यस्तीति भेदसम्बन्धेनान्वयोपपत्तिरिति चेन्न, 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण प्रत्ययधातुभिन्नस्यार्थवतो नामत्वं बोध्यते । भिन्नान्तस्य धातुप्रत्ययापर्यास

धर्मवदर्थकतया, अर्थवत्पदस्य वृत्तिमदर्थकतया च गभीरायां नद्यामिति भागस्य नामत्वा क्षतेरित्याशयात् । नच पश्य मृगो धावतीत्यादौ वाक्यार्थस्य कर्मतासम्बन्धेन दर्शन क्रियायामन्वयस्यानुभवसिद्धत्वात् प्रकृतेपि वाक्यार्थस्य भेदेनान्वये न बाधकमिति वाच्यम्, राजपुरुषीयधनबोधाभिप्रायेण राज्ञः पुरुषो धनमित्यादिप्रयोगापत्तेः । धात्वर्थ एव वाक्यार्थस्य भेदसम्बन्धेनान्वय इति सङ्कोचस्यावश्यकत्वात् प्रकृते भेदेनान्वयासम्भवात् । वाक्येनात्र तीरविशेषस्मरणमेवेति शाब्दविषयत्वरूपवाक्यार्थत्वाभावाच्च ॥

त—'आस्तां विस्तरः' इत्यनेन सूचितमर्थं प्रकटयति—**अथ राजपुरुष इत्यादिना** । इदमत्रावधेयम्—स्तोकं पचतीत्यादौ समानविभक्तिकत्वाभावेप्यभेदेनान्वयानुभवान्नियमसङ्कोचस्यावश्यकतया वाक्यलक्ष्यार्थस्य तथा अन्वयस्वीकारे बाधकाभावः । नच नामार्थयोरभेदेनान्वय एव समानविभक्तिकत्वं तन्त्रम्, एवञ्च स्तोकं पचतीत्यादौ न व्यभिचारः, दर्शितदिशा गभीरनदीतीरवृत्तेरत्र नामार्थत्वमेवेति व्यभिचारो भवत्येवेति वाच्यम्, वाक्यस्य नामत्वस्वीकारे मानाभावात्, तदुत्तरं विभक्त्यापत्तेश्चेति । नच 'कृत्तद्धितसमासाश्च' इति नियमान्नेयमापत्तिरिति वाच्यम्, तादृश सूत्रस्य विधायकत्वात् । इदन्तु तत्त्वम्—अभेदेनान्वयबोधं प्रति क्लृप्तकारणताक भिन्नस्य समभिव्याहारविशेषज्ञानस्यापि कारणत्वकल्पनाभिया स्वबोध्यसम्बन्धस्य लक्षणात्वे गौरवेण च यत्किञ्चित्पदस्य तात्पर्यग्राहकत्वाङ्गीकार एव युक्ततर इति । **नीलघटमिति** । 'नीलघटरूपम्' इति पाठः । अन्वयादर्शनादित्यत्र 'अन्वयदर्शनात्' इति च ॥

मु—**चित्रपदं तात्पर्यग्राहकमिति** । एतदुत्तरं 'तत्पुरुषे तु' इत्यादिरेव ताळीग्रन्थपाठः । प्रभाकृत्पक्षे 'एवमन्यत्रापि' इत्यपि वर्तते ॥

त—**घटत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनेति** । ननु नामार्थत्वात् घटस्य कथं भेदसम्बन्धेनान्वय इति शङ्क्यम्, नामार्थनिष्ठप्रकारतेत्यादिकार्यकारणभावघटकनाम्नि निपातातिरिक्तत्ववत् समासघटकातिरिक्तत्वस्यापि निवेशात् । नच घटपदस्य घटप्रतियोगिके लक्षणा, अभेदेन चान्वयोऽस्त्विति वाच्यम्, अभेदेनैकदेशान्वयस्याव्युत्पन्नत्वात् । वस्तुतस्तु, शून्यपदस्यैवात्र घटाभाववति लक्षणा, घटपदं तात्पर्यग्राहकम्, अन्यथा तत्पुरुषे पूर्वपरान्यतरपदे लक्षणेति प्रवादोपि व्याहन्येत । एतमेवाभिप्रायं दिनकरभट्टः सूचयति 'इति हृदयम्' इत्यनेन । परेतु



व्युत्पत्तिवैचित्र्येण घटप्रतियोगिकस्याभेदेनैकदेशान्वयः स्वीक्रियत इति वदन्ति । चित्रगुरित्यत्र चित्रपदं चित्रगोसम्बन्धिलाक्षणिकं गोपदं स्वामिलक्षकम् । तदर्थयोश्च तादात्म्येनान्वयः । इत्थञ्च न तात्पर्यग्राहकत्वकल्पनेति केचित् । तन्न, यतो गोसम्बन्धीत्यत्र सम्बन्धः किं यः कश्चन कालिकादिः, उत स्वामित्वम् । आद्ये गोस्वामिभिन्ने धनस्वामिन्यपि चित्रगुरिति प्रयोगापत्तिः । द्वितीये चित्रगुरित्यत्र स्वामित्वस्य द्वेधा भानं स्यात् । तच्चानुभवविरुद्धम् । गोपदमपि व्यर्थप्रायम् । शोभनचित्रगुरित्यत्र शोभनपदस्य शोभनचित्रगोसम्बन्धिलक्षकत्वं वक्तव्यम् । इत्थञ्च गवादीनामपि द्वेधा भानापत्तिः । एवमन्यत्रापीति । **पदद्वये लक्षणापत्तिरिति** । इदञ्च क्तप्रत्ययस्य कर्तर्येव शक्तिः कृतित्वजातेः शक्यतावच्छेदकतावच्छेदकत्वात्, कर्मणि च लक्षणेत्यभिप्रायेण । वानरपदार्थस्य लक्ष्यैकदेशारोहणे तादात्म्येनान्वयापत्तेरुपलक्षणमेतत् ॥

मु—**भेदेनान्वयस्येति** । 'साक्षाद्भेदेनान्वयस्य' इति पाठः ॥

त—**इत्यनुशासन इति** । 'इत्यनुशासनेन' इति पाठः । **प्रतिबन्धकत्वाकल्पनेति** । 'प्रतिबन्धकत्वाकल्पनाप्रयुक्तलाघवेन च' इति पाठः । तदभावावगाहिघटितेत्यत्र 'तदभावघटित' इति च । **वाक्यार्थेति** । 'वाक्यस्थ' इति पाठः । **दुर्वचमिति** । 'दुर्घटम्' इति पाठः । **विभक्तिस्मरणं विनेति** । एतदुत्तरं 'निरूढलक्षणात्वस्यानिर्णयेपि सामान्यतो लक्षणा' इति साधुः । न सम्भवत्येवेत्यत्र नञ्घटितश्च ॥

मु—**राजसम्बन्धिनि लक्षणेति** । नचैवं राजपुरुष इत्यस्य कर्मधारयत्वापत्तिः, यत्समासघटकपदार्थयोरभेदान्वयः, तस्यैव कर्मधारयत्वात्, एवं राज्ञी दासीत्यादौ पूर्वपदस्य सामानाधिकरण्यप्रयुक्तपुंवद्भावापत्तिश्चेति वाच्यम्, यत्समासघटकीभूतपदस्य स्वोत्तरोत्पत्तियोग्यविभक्त्यर्थवदन्तर्भावेण लक्षणाधीनः तदर्थस्य तादात्म्येनान्वयः, स तत्पुरुषः, यत्र तादृशलक्षणां विनैव सामानाधिकरण्यं स कर्मधारयः, तत्रैव पुंवद्भाव इत्यङ्गीकारेण दर्शितापत्त्योरभावात् । अधिकमन्यतोऽवगन्तव्यम् ॥

---

अन्यतः न्यायकौस्तुभादितः ॥

त—**परस्परजन्यत्वे इति।** 'परस्परजन्यज्ञाने' इति पाठः । **इति चेदिति।** 'इति चेन्न' इति पाठः । **संख्याभिन्नार्थकतैव न स्यादिति।** अवेष्टापत्ता वाह—**किञ्चेति।** अथ राजपुरुषपदं स्वत्वसम्बन्धेन राजवत्पुरुषशक्तमिति भ्रम काले तादृशपुरुषबोधस्य त्वयाप्यङ्गीकार्यत्वान्नाधिकं गौरवमित्यत आह—**अपि चेति।** 'राजसम्बन्धिभिन्नः पुरुषः' इति पाठः । **सिद्धत्वादिति।** परपदे अहिनकुलसमाहारे लक्षणेति वक्ष्यमाणत्वात्। 'सिद्धत्वात्' इत्यतः पूर्वं 'स्वतः' इति प्रक्षिप्तम् ॥

मु—**विभक्त्यर्थद्वित्वप्रकारेणेति।** विभक्त्यर्थः प्रथमाद्विवचनार्थः द्वित्वं, तदभिन्नप्रकारेणेत्यर्थः । बोधान्वयि विषयित्वं तृतीयार्थः । तरङ्गिणीकृतान्तु 'विभक्त्यर्थ प्रकारेण' इत्येव पाठः । 'धवखदिरौ छिन्धीत्यादौ' इति च पाठः । प्रथमापरित्यागे पदान्तरघटने च प्रयोजनाभावात् 'धवखदिरावित्यादौ' इति पाठः साधीयान्। स एव प्रभाकारैरङ्गीकृतश्च ॥

दि—**इत्यादिवाक्य इति।** अत्र 'इत्यादिवाक्यस्य' इति, 'खदिरद्वयस्य वा' इत्यत्र 'खदिरद्वयस्य च' इति च पाठः ॥

त—**सुपामितीति।** एतदुत्तरं 'निर्वाहः' इत्यन्तभागः प्रक्षिप्तः । एवं 'व्याप्तिविशिष्ट' इत्यनन्तरं 'संख्यायाः' इति पदमपि प्रक्षिप्तम् । **न तद्वत्त्वमिति।** 'न द्वित्ववत्त्वम्' इति ताळीग्रन्थपाठः । **प्रकारतावगाहीति।** 'प्रकारतयावगाहि' इति साधुः । **विभक्तीनामित्युपेक्ष्येति।** अथैवं चैत्रो मैत्रश्च गच्छन्तीति प्रयोगापत्तिः, देवदत्तादिसाधारणबहुत्वस्य चैत्रादावबाधादिति चेन्न, घटस्तिष्ठत इत्यादिप्रयोगवारणाय यथा एकप्रथमान्तपदधातुपदयोस्समानवचनत्वनियमः स्वीक्रियते, तथा प्रथमैकवचनान्तद्वयस्थले धातूत्तरं बहुवचनभिन्नवचननियमस्य स्वीकारात्। **एकक्रियान्वयित्वमिति।** एतदुत्तरम् 'एकधातूपस्थाप्यार्थान्वयित्वम्' इति पाठः ॥

मु—**इत्यादिदर्शनादिति।** 'इत्यादौ दर्शनात्' इति पाठः । ननु महाकविभिरेवमप्रयोगादसाधुरेवायमित्यत आह—**साहित्यस्येति।** ज्ञानस्य स्व प्रकाशतावादिमते स्वस्मिन् स्वविषयिताविषयकत्वमनुभूयत एवेत्यत आह—**अत एवेति।** अवतारिकान्तरं प्रभायां द्रष्टव्यम्। **लक्षणाभावात् द्वन्द्व इति।** न च विभक्त्यर्थस्वत्वादिसम्बन्धेन राजादेरन्वयमते किं विनिगमकमिति वाच्यम्,



विभक्त्यर्थसम्बन्धेनैवान्वयात् सम्बन्धे लुप्तविभक्त्यर्थत्वज्ञानसापेक्षत्वरूपगौरवस्य दुर्वत्वात्, तन्मतस्य सिद्धान्तिनाऽनङ्गीकाराच्च । नच राजपुरोहितावित्यत्र धारय एवास्त्विति वाच्यम्, ब्राह्मणस्यैव पौरोहित्येऽधिकाराद्योग्यताभावात् ॥

त—**द्वन्द्वदर्शनादित्यर्थ इति।** 'इत्यर्थः' इति प्रक्षिप्तम् । **एतच्च पातत इति।** द्वौ गच्छत इत्यादौ पुरुषावित्यादिपदान्तराध्याहारेणैव बोध इति दिनकरभट्टाशयो भाति। **समासनिष्ठेति।** उभयत्रापि 'समासघटक' इति पाठः। **सापेक्षत्वादेवेति।** एवकारः प्रक्षिप्तः । एतादृशसापेक्षत्वस्यासामर्थ्यरूपत्वे घटपटावानयेत्यत्रापि समासघटकघटपदस्य तदघटकानयनपदार्थान्वय्यर्थबोधकतया समासो न स्यादित्यापाततो रमणीयमेतत्। वस्तुतस्तु, साक्षात् परम्परया वा निरूप्यनिरूपकभावापन्नविषयिताप्रयोजकत्वमेव सामर्थ्यं पदगतम्। समुच्चयस्थले बोधस्य समूहालम्बनत्वमेव सर्वतान्त्रिकाभिमतमिति न तत्र सामर्थ्यम्। यत्र तु घटकर्मत्वादेरानयनादावेकत्र द्वयमिति रीत्या बोधोऽभिमतः, तत्र विभाषया समासोपीष्ट एव ॥

दि—**इतरेतरेति।** 'इतरेतरयोग' इति ताळीग्रन्थपाठः ॥

मु—**नीलपदस्येति।** नीलरूपात्मकनीलत्वे नीलपदस्य शक्तेः सत्त्वात् लक्षणेति मुक्तावल्यादावुक्तिश्चिन्त्या। वस्तुतस्तु, लक्षणापदस्यात्र वृत्तिरित्यर्थ इति न दोष इति ध्येयम् ॥

त—'नचैवं सरूपाणाम्' इति स्थाने 'नन्वेवं सरूपाणाम्' इति 'अनुचितत्वात्' इति स्थाने 'अनुचितत्वादित्याशङ्कायामाह' इति च पाठः। **बोधयतीति।** 'बोधयतीत्यस्य व्युत्पत्त्यर्थतया' इति साधुः पाठः । **नानार्थानामिति।** नानार्थकानां पदानामित्यर्थः ॥

मु—'वादय इत्यत्र कथम्' इत्यनन्तरं 'समाहारस्यान्वयः' इति पाठो न दिनकरभट्टाभिमत इति स्पष्टम्। अत्रत्यप्राचीनताळीग्रन्थेषु स च नास्त्येव ॥

दि—**वादनकर्मत्वासम्भवादिति।** मुक्तावलीगतवादनपदं वादनकर्मत्वलाक्षणिकमिति भावः । अत एव 'तदन्वयात्' इत्यत्र तच्छब्देन वादनकर्मत्वपरामर्शः । अभिघाताख्येत्यादिः वादनकर्मत्वासम्भवादित्यर्थ इत्यन्तो ग्रन्थः न तरङ्गिणी

कृत्सम्मतः। अत एव 'मूले वादनासम्भवादिति' इति प्रतीकं धृत्वा स्वयं तदर्थ कथनम् ॥

**त—शब्दजनकसंयोगेति।** मन्दं वादयेत्यादौ क्रियाविशेषणस्य मन्दादेः शब्द एवान्वयः सम्भवतीत्याशयेन शब्दस्यापि धात्वर्थतावच्छेदकघटकत्वोक्तिः॥

**दि—एकत्वस्य कुत्रान्वय इति।** 'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रस्य द्वित्वे एकत्वे च विवक्षिते क्रमेण द्विवचनमेकवचनञ्च भवतीत्यर्थकत्वादेकत्व विवक्षायामेवैकवचनसम्भव इत्याशयः। **साधुत्वार्थमिति।** संख्याया अविवक्षायामपि 'न केवला प्रकृतिः प्रयोक्तव्या' इति शास्त्रेण पदसाधुत्वायौत्सर्गिकमेकवचनं प्रयोक्तव्यमिति भावः। पूर्वोक्तरीत्या एकत्वान्वयसम्भवे तस्य शाब्दबोधे भानाभावकथनमसमञ्जसमिति वदन्तीत्यनेनास्वरसः सूचितः। **नित्यैकेति।** अत्रादिपदात् वाक्त्वच मित्यादौ समासान्तटच्परिग्रहः। नित्येत्यादिः आदीत्यन्तः पाठो न तरङ्गिणीकार सम्मतः, अन्यथा स चेत्यादितद्ग्रन्थस्य वैफल्यापत्तेः ॥

**त—अन्यत्रेतीति।** एतदुत्तरं 'समुदायादिपदेष्वित्यर्थः' इति पाठः। **पदसंस्कारार्थत्वादिति।** एतदुत्तरं 'पदस्य अहिनकुलादिपदस्य संस्कारः' इत्यादिः पाठः। **तथोपगमादिति।** 'तयोर्विधानात्' इति ताळीग्रन्थपाठः॥

**दि—पितृद्वयासम्भवेनेति।** अत्र दत्तकस्य पितृद्वयसम्भवेन विरूपैकशेषं विना गत्यभाववचनमसङ्गतमिति यत् प्रभाकारैरवादि, तत् दिनकरभट्टाशयानभिज्ञानमूलकम्, दत्तादिभिन्नव्यक्तिविशेषबोधनायैव 'चैत्रादेः' इत्यस्योपादानात्, अन्यथा तस्य वैयर्थ्यप्रसङ्गात्, 'जनकपुंस्त्वावच्छिन्नस्यैव पितृशब्दार्थत्वात्' इति तरङ्गिण्यनुसरणे गतिगन्धस्याप्यभावाच्च ॥

**त—गतिरिति।** 'गतिः सम्भवतीति सूचिता' इति पाठः। एवम् 'आहुः' इत्यत्र 'अन्ये' इति च। स्त्रीपरत्वज्ञानस्य लक्षणायामुपयोगितां विशदयति—**इदञ्च लक्षणायामिति** ॥

**सु—नीलोत्पलमित्यादिकर्मधारयस्थले** नीलाभिन्नोत्पलमिति बोधात् तत्र चाभेदांशस्य समासघटकपदबोध्यतया न लक्षणां विनोपपत्तिरिति भ्रमं निवर्तयितुमाह—



**कर्मधारयस्थल इति।** तथाच न तत्राभेदप्रकारिकोपस्थितिश्शाब्दबुद्धिर्वेति न लक्षणेति भावः। **न लक्षणेति।** न समासाधीनलक्षणेत्यर्थः। तेन नीलपदस्यात्र नीलरूपविशिष्टे लक्षणायाः सत्त्वेपि नासङ्गतिः। अन्यथा नीलशुक्लावित्यादिद्वन्द्वेपि लक्षणा सत्त्वात् 'द्वन्द्वे न लक्षणा' इत्यभियुक्तोक्तिविरोधापत्तिः। अनुभवे विवदमानं प्रत्याह—**अत एवेति। विद्याप्रयुक्तेरिति।** विद्याप्राप्तेरित्यर्थः ॥

**दि—याजनानुपपत्त्येति।** निषादस्थपतिकर्मकयाजनं नाम निषादस्थपति कर्तृकयजनानुकूलव्यापारः। तत्कर्तृकयजनं च तस्य वेदाध्ययनं विना अनुपपन्नमिति भावः ॥

**त—लक्षणाकल्पनाप्रयुक्तेति।** लक्षणाया अकल्पनया प्रयुक्तेत्यर्थः। 'अधिपूर्वकेङ्धात्वर्थः' इति साधुः पाठः। **निराकुरुत इति।** एतदनन्तरं 'तत्रेति' इत्यस्य पूर्वं 'शूद्रेति' इति पाठः। **प्राप्तं निषादस्येति।** निषादस्य यागोपयुक्त वेदाध्ययनं प्राप्तमिति योजना। प्राप्तं सिद्धम्। **तदतिरिक्तेति।** 'तदतिरिक्तवेदाध्ययनं निषादस्य, वेदाध्ययनमात्रं च निषादातिरिक्तशूद्रमात्रस्य' इत्यादिः साधुः पाठः। ननु 'स्त्रीशूद्रौ' इत्यादिश्रुतिगतस्य अधिपूर्वकेङ्धातोर्वा लक्षणा, प्रकृतश्रुतिगत निषादपदस्य वेत्यत्र विनिगमकं दुर्लभमिति चेन्न, पत्न्याः समन्त्रकाज्यावेक्षणरथकारेष्ट्याादि विध्यनुरोधेन 'स्त्रीशूद्रौ' इत्यादावुक्तलक्षणायाः प्रतिवादिनाप्यङ्गीकरणीयत्वात्। **पूर्वकाल सम्बन्धज्ञानेति।** 'पूर्वकाले लक्षणाज्ञान' इति ऋजुः पाठः। **कल्पनाप्रयुक्तगौरव मिति।** ईदृशैकसम्बन्धिज्ञानेनापरसम्बन्धिस्मरणे जननीये सम्बन्धज्ञानमपि सहकारीति मतमवलम्ब्य। यदि तु सम्बन्धज्ञानाधीनसंस्कार एव सहकारी, तदा प्रतिशाब्दव्यक्ति अव्यवहितपूर्वं शक्तिलक्षणान्यतरज्ञानं नावश्यकम्। अतो वेदजन्यशाब्दबोधव्यक्ती नामित्यस्य अनन्तपुरुषीयतादृशशाब्दबोधानामित्येवार्थ इत्यवसेयम्। **अस्वपदेतीति।** एतदुत्तरं 'समस्यमानपदमात्रघटितविग्रहः स्वपदविग्रहः तदन्य इत्यर्थः। तादृशविग्रहक समास एव नित्यसमास इति व्यवह्रियते' इत्यादिः पाठः॥

---

अनुभवे अभेदसंसर्गकशाब्दानुभवे ॥

**संस्कार एवेति।** 'पूर्वानुभूत्या संस्कारशेषधौ स्वार्थगोचरा। जन्यमाना स्मृतिः शब्द मुद्बोधकमपेक्षते ॥' इत्यभियुक्तोक्तेरिति भावः। **इत्येवार्थ इति।** तथाच प्रतिशाब्दबोधव्यक्ति लक्षणाज्ञानस्यानावश्यकत्वेपि अनन्तपुरुषाणां प्रत्येकं प्रथममेकैकलक्षणाज्ञानं कल्पनीयमिति भावः॥

**दि—कुम्भपदलक्षितस्येति** । यद्यपि घटशून्यमित्यादौ घटपदार्थस्य भेदसम्बन्धेन शून्यपदार्थैकदेशान्वयपक्षस्य पूर्वं दर्शितस्यानुसरणे उपकुम्भमर्धपिप्पलीत्या दावपि कुम्भपिप्पल्यादेर्निरूपितत्वसम्बन्धेन उपार्धादिपदार्थैकदेशसामीप्यार्धत्वादावन्वय सम्भवान्न लक्षणाया आवश्यकता। एवं राजपुरुष इत्यादावपि। तथापि निपाता तिरिक्तनामार्थस्य भेदसम्बन्धेनान्वयस्य सिद्धान्तेऽनङ्गीकारालक्षणादरणमावश्यकमिति भावः। एवमप्यव्ययीभावघटकोपादिपदस्याव्ययभिन्ननामत्वाभावात् तदर्थे कुम्भादिरूप नामार्थस्य भेदान्वये नियमभङ्गाभावाल्लक्षणादरणक्लेशश्चिन्त्यः ॥

**त—पदविभक्तेरिति** । 'पदविभक्त्योः' इति साधुः। **सङ्कोचोपगमा दिति भाव इति** । नच 'प्रत्ययानाम्' इत्यादिघटकप्रकृतित्वं प्रकृत्यैकदेशसाधारण मिति न नियमसङ्कोचावकाश इति वाच्यम्, राजपुरुषं पश्येत्यादौ राजादेरपि कर्म त्वादौ, यत्र पाकादिकर्तरि द्वित्वं बाधितं पाकादौ चाबाधितम्, तत्र पचन्तौ पश्येत्यादौ द्विवचनार्थद्वित्वादेः पाकादौ चान्वयबोधापत्तेरेकदेशसाधारणप्रकृतित्वनिवे शासम्भवात्। वस्तुतस्त्वत्र प्रत्ययविध्युद्देश्यत्वरूपप्रकृतित्वपर्याप्त्यधिकरणत्वविवक्षणे न सङ्कोचावश्यकतेति ध्येयम्। **इत्यभिप्राय इति** । अन्वयबोध इत्यस्य अन्वय बोधोपयोग्युपस्थितिरित्यर्थ इति व्याख्या साधीयसी। **अशक्यतयास्वेति** । अत्र अकारप्रश्लेषो बोध्यः। **समासान्तर्गतेति** । एतत्पूर्वम् अपिः प्रक्षिप्तः। एतत्स्थाने च 'समानार्थक' इति पाठः। **विग्रहवाक्यस्वीकाराचेति** । चकारो भिन्नक्रमः। 'सामीप्यविशिष्टार्थकतया' इत्युत्तरं योज्यः। 'उचितत्वम्' इति, 'अयुक्तमिति च' इति च पाठः। **शक्तिनिराकरणमितीति** । 'शक्ति' इति स्थाने 'लक्षणा' इति पाठे न क्लेशलेशः। प्रभायामप्येवमेव दृश्यते। **पूर्वपदेपीति** । अपिः प्रक्षिप्तः ॥

**दि—ऋजुरेवेति** । एवञ्च आसत्तेः स्वरूपसत्या कारणत्वपक्षे आसत्तिः योग्यताकाङ्क्षातात्पर्यज्ञानञ्चेति समाहारमाश्रित्य मूलानुगमः कर्तव्यः ॥

**त—मूलकारिकायामिति** । एतदुत्तरं 'पदद्वयसान्निध्यम्' इत्यादिपाठः। अग्रे 'तत्र चोप' इत्यंशः प्रक्षिप्तः। **अन्वयप्रतियोगीत्यादीति** । 'अन्वयप्रतियोग्य नुयोगिपदयोरव्यवधानमासत्तिः। तज्ज्ञानं शाब्दबोधे कारणम्। वस्तुतोऽव्यवधान ज्ञानस्यानपेक्षितत्वात् यत्पदार्थेन' इति तरङ्गिणीसम्मतः पाठः। अयं पाठो दिनकरभट्टै



रनादृत इति भाति। तदादरणमभिसन्धाय तु तरङ्गिणीकारैः 'तात्पर्यविषय इति' इति प्रतीकं धृत्वा क्लिष्टतरं विवरणमारचितम्। प्रकाशस्थाया 'विसर्गशून्यपाठस्त्वृजुरेव' इति पङ्क्तेः परमेतत्पक्षानुसरणे योजनं दुश्शकं भाति। 'पाठान्तरं काल्पनिकम्' इति प्रकाशे स्पष्टमभिधास्यते। तस्मात् प्राचीनमतमवलम्ब्यैव मुक्तावलीपङ्क्तयोऽत्र विवृता दिनकरभट्टैः, काल्पनिकपाठश्च नादृत इति वेदितव्यम्। प्रभाकारैरपीयमेव सरणि रङ्गीकृता। अथैवमग्रे छत्री कुण्डलीत्यादौ तावत्पदविषयकस्मरणस्याव्यवधानेनोत्पत्तिं स्वीकृत्यासत्तेः सम्पादनं न घटत इति चेन्न, अव्यवधानेन स्मरणस्योत्पत्तेरिति योजनया तृतीयायाः स्मरणान्वयिप्रकारकत्वार्थकत्वेन चासत्तिज्ञानसम्पादनस्य सुघटत्वात्। अग्रे 'अभेदेऽप्यव्यवधानसम्भवात्' इत्यस्य चाव्यवधानप्रकारकत्वसम्भवात् इत्यर्थ इति न काप्यनुपपत्तिः। अथैवमर्थवर्णने अग्रे 'तत्रोत्तरपदेन पूर्वपदनाशात्' इत्येव वक्तु मुचितमिति चेन्न, पदस्मरणपदस्य समाहारद्वन्द्वत्वेन तदर्थस्यापि लाभात्। स्मरणपदं पदस्मरणलाक्षणिकम्। **स्मरणेन** स्मरणनाशोक्तिश्च पदज्ञानयोरव्यवधानमासत्तिरिति नव्य मतेपि दोषप्रदर्शनायेति च ज्ञेयम्। यदि 'वस्तुतोऽव्यवधानस्यानपेक्षितत्वात्' इत्यादि सिद्धान्तग्रन्थः 'न क्षतिः' इत्यनन्तरं 'ननु यत्र छत्री' इत्यस्य पूर्वं पठ्यते, तदा न कोपि स्वारस्यभङ्गः। 'न क्षतिः' इत्यन्तं प्राचां मतम्। 'वस्तुतः' इत्यारभ्य च सिद्धान्त इति साधु सङ्गच्छते। मतद्वयेपि अव्यवधानं लाघवात् स्ववृत्तिकृतिमत्त्वादिरूपं समानकालिकत्वमेव। पदज्ञानयोरव्यवधानमासत्तिः सविसर्गपाठश्च श्रेयानिति रामरुद्र भट्टाचार्यपक्षे तुल्ययुक्त्या तत्पदज्ञाने तत्पदज्ञानवत्त्वमेवाकाङ्क्षा वक्तव्या। तस्याश्च स्वरूपसत्या एव हेतुत्वात् 'योग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते' इति मूलासङ्गतिः स्यात्। तत्र प्राचीनमतमेव समुपन्यस्तमिति चेदत्रापि सममित्यादिकमनुसन्धेयम्। **अनपेक्षितत्वा दितीति** । एतदुत्तरं 'शाब्दबोधात् पूर्वं नियमाभावादित्यर्थः' इति पाठः। **उपस्थितिज्ञाने इति** । 'उपस्थितिकाले' इति पाठः। एवं 'तात्पर्यविषयत्वनिश्चय' इत्यत्र 'तात्पर्यविषयत्वेन निश्चित' इति, 'मन्तव्यम्' इत्यत्र 'वाच्यम्' इति च। **आसत्तिभ्रमादित्यस्येति** । 'नीलो

---

**सुघटत्वादिति** । एतत्पक्षे छत्री कुण्डलीत्यादावासत्तिज्ञानं भ्रमात्मकमित्यवसेयम्। पक्षान्तरन्तु दर्शयिष्यते ॥

**प्राचीनमतमेवेति** । नव्यमते अयोग्यतानिश्चयाभावस्य स्वरूपसत्या आकाङ्क्षायाश्च हेतुत्वात्, एवं नानार्थस्थल एव शाब्दबोधं प्रति तात्पर्यज्ञानस्य हेतुत्वाचेति भावः ॥

घटो द्रव्यं पट इत्यादौ नासत्तिः । 'भ्रमाच्छाब्दबोधः' इति दिनकरभट्टाभिमतः पाठः । स्पष्टञ्चेदं वाक्ययोः प्रत्येकमवतारिकाप्रदर्शनेन । 'इष्टापत्तिमाह' इति प्रथमवाक्यावतारणेन च । आसत्तेः भ्रम इति विग्रहे षष्ठ्या निर्वाहकत्वरूपसम्बन्धोऽर्थः । एवञ्चार्थात् भ्रमनिर्वाह्यासत्तिलाभ इत्याशयः ॥

दि—**एतादृशेति** । 'एतादृशयत्तत्पदगर्भासत्ति' इत्यादिपाठः । **तात्पर्यविषयत्वाभावादिति** । एतदुत्तरम् 'अतस्तत्र' इत्यादिपाठः ॥

त—**भ्रमनिर्वाह्येति** । 'भ्रमनिर्वाह्यासत्तेः' इति पञ्चम्यन्तः पाठः । 'विषयकनिश्चय' इति स्थाने 'विषयत्वनिश्चय' इति च । 'प्रमात्मक इति' इत्यादिः 'तयोरभावात्' इत्यन्तो ग्रन्थः प्रक्षिप्तः । **तथाचेति** । एतत्पूर्वं 'न तु तत्रासत्तिरिति' इति प्रतीको भ्रष्टः ॥

दि—**पदाव्यवधानासम्भवादिति** । ननु मौनिश्लोकेपि लिप्यव्यवधानेन पदाव्यवधानकानुमितेः स्मरणस्य वा सम्भवात्तत्राप्यासत्तिज्ञानं सम्भवतीत्यत आह—**उक्तासत्तीति** । तथाच व्यतिरेकव्यभिचारान्न कारणतासम्भव इति भावः । गिरिर्भुक्तमित्यादौ च सति तात्पर्यग्रहे बोध इष्ट इति भावः । अनेन ज्ञानयोरव्यवधानमासत्तिरिति पक्षेपि दोष उद्घाटितः ॥

त—**पदाव्यवधानेतीति** । एतदुत्तरम् 'इदञ्चैतदनुरोधेन पदस्यासत्तिज्ञानमेव' इत्यादिपाठः । उत्तरत्र 'निरासायैवोक्तम्' इति च । **योजनावाक्यादितीति** । एतदुत्तरं 'शाब्दबोधोपपत्तये' इति प्रक्षिप्तम् । 'अन्वयः' इत्यत्र 'अर्थः' इति च पाठः । **न ग्रन्थकृन्मते शाब्दबोधानुपपत्तिरिति** । इदमत्र विचार्यते—पदज्ञानयोरव्यवधानरूपासत्तिः स्वरूपसती कारणमित्यस्य कोऽर्थः । यदि शाब्दकारणयोः पदज्ञानयोरव्यवधानमपि शाब्दाव्यवहितपूर्ववर्तीति, तदा दण्डादेरपि तत् घटकारणं स्यात् । तत्र तस्यान्यथासिद्धिरिति चेदत्रापि सा न कुतः । खले कपोतन्यायेन शाब्दबोधमते हि सकलपदविषयकैकस्मरणस्य पूर्वं शाब्दप्राक्क्षणे नियतम् । इत्थञ्च सर्वत्र शाब्दे तादृशस्मरणकारणतयैवोपपत्तौ किं पदज्ञानाव्यवधानस्य कारणतया । मतान्तरे

---

तत् अव्यवधानम् ॥



तु महावाक्यार्थबोधपूर्वक्षणे निखिलपदस्मरणापेक्षाभावात् कथमासत्तिः । तदपेक्षामभ्युपगच्छाम इति चेत्तेनैव गतार्थता पूर्ववत् । यद्यपि तरङ्गिण्याम् 'इदमत्रावधेयम्' इत्यादिना द्वितीयमतमवलम्ब्य शङ्कामेतामुत्थाप्य वारणप्रकारो दर्शितः, तथापि घटपदज्ञानानन्तरं पटपदज्ञानदशायामेव घटरूपार्थोपस्थितेरवर्जनीयतया तस्याः क्षणान्तरविलम्बकल्पनमन्याय्यम् । न च घटपदज्ञानं पटपदज्ञानञ्चात्र प्रत्यक्षात्मकमेव विवक्षितम् । इत्थञ्च पटपदप्रत्यक्षसामग्र्याः स्मृतिसामग्रीतो बलवत्त्वान्न पटपदज्ञानकाले घटरूपार्थस्मरणसम्भव इति वाच्यम्, पकारादिवर्णत्रयप्रत्यक्षानन्तरं जायमानपटपदप्रत्यक्षेण घटपदज्ञानस्य नष्टत्वाद्घटरूपार्थोपस्थितेरसम्भवप्रसङ्गात् । इत्थञ्च पटरूपार्थोपस्थितिरेव शुक्लपदविषयिणी वक्तव्या । ततश्च तदर्थस्मृत्या शाब्दबोध आपादनीयः । स तु न सम्भवति, घटरूपार्थोपस्थितेः पूर्वं नष्टत्वादिति । अतः पदयोरव्यवधानज्ञानमेव शाब्दधीकारणम् । गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादौ सत्यपि तात्पर्यग्रहे पद्य इव योजनावाक्यादेव शाब्दबोधो विशेषदर्शिनाम्, न तु तावद्विषयकसमूहालम्बनस्मरणेन । इत्थञ्च साम्प्रदायिकपक्ष एव साधीयानिति ॥

सु—**अव्यवधानेनोत्पत्तेरिति** । अव्यवधानं नाम साक्षात् परम्परया वा एकपदप्रयोज्यविषयतानिरूपितविषयत्वाप्रयोजकपदनिरूपितव्यवधानाभाव एव । एवञ्च छली कुण्डलीत्यादौ श्लोके च नासत्तिविरह इति परे ॥

त—**तावदर्थविशेष्यक एवेति** । 'तत्तदर्थविशेष्यक एव' इति पाठः । 'एकव्यक्तित्वात्' इत्यत्र 'एकजातीयत्वात्' इति च । ज्ञानेच्छयोः प्रत्यक्षानुमित्योर्वा भिन्नजातीयत्वं यथा ऐक्ये बाधकम्, तथा नात्रेति भावः । **प्रयोजनविरह इति** । ननु यत्र शाब्दबोधप्राक्क्षणेऽव्यवधानवत्पदद्वयज्ञानं नोत्पन्नम्, तत्र शाब्दबोधापत्तिरित्याक्षेपमिष्टापत्त्या परिहरति—**स्वजन्येति** । 'पदद्वयज्ञानसत्त्वात्' इत्यनन्तरं 'शाब्दबोधसम्भवात्, व्यवहितपदज्ञानयोरेकतरस्य शाब्दबोधप्राक्क्षणेऽसम्भवेनैव' इत्यादिः साधुः पाठः । अथ पदज्ञानयोर्यत्र व्यवधानम्, तत्र शाब्दापत्तिपरिहार एव तत्प्रयोजनमित्याशङ्कामपनुदति—**व्यवहितेति** । नन्वेवमासत्तेश्शाब्दाव्यवहितपूर्वक्षणे नैयत्यादवर्जनीयं जनकत्वमित्याक्षेपं परिहरति—**अव्यवहितपूर्वत्वस्येति** । **उद्बोदकान्तर इति** । 'उद्बोधकान्तरेण' इति पाठः । **न दोष इति** । नच दर्शितस्थले यदि शुक्लरूपार्थ

स्मरणं घटपदविषयकमप्यासीत्, तदा तत्र शाब्दबोधापत्तिरपरिहार्येति वाच्यम्, यत्पद ज्ञानयोरर्थोपस्थितिद्वारा शाब्दबोधहेतुत्वम्, तयोरव्यवधानस्यैवासत्तित्वमित्याशयात् ॥

दि—**पदस्मरणवदाशुतरविनाशिनीनामिति**। अत्र पदस्मरणवदित्युक्ति रासत्तिविचारेणोत्तरग्रन्थस्य प्रसङ्गसङ्गतिज्ञापनाय ॥

त—**योग्यताज्ञानाधीनमिति**। 'योग्यताज्ञानविषयः' इति पाठः ॥

दि—**तेन तेनैवेति**। 'पदैरेव' इत्येवकारो भिन्नक्रम इत्यनेन दर्शितम्। अयमेव राजपुरप्रवेशन्याय इति व्यवह्रियते ॥

त—**शाब्दबोधानन्तरमित्यर्थ इति**। एतदुत्तरं 'तथाच न पदार्थोप स्थित्यनन्तरमेव महावाक्यार्थबोधो भवतीति बोध्यम्' इति पाठः। 'पदार्थस्मृत्येत्यस्य' इत्य नन्तरम् 'अवान्तरवाक्यार्थबोधसमानाकारिकया पदज्ञानजन्यानयनादिपदार्थस्मृत्यैवेत्यर्थः' इति, 'न हि' इन्यनन्तरं 'पदजन्यपदार्थोपस्थितित्वेनेति' इति च। **एवञ्चेति**। एतदुत्तरं 'स्वीकारे' इत्यन्तो ग्रन्थः प्रक्षिप्तः ॥

दि—**एवञ्च यत्र नेति**। खण्डवाक्यार्थबोधस्य यत्रोपेक्षात्मकत्वं फल बलकल्प्यस्योद्बोधकस्यान्वयांशे वैधुर्यं वा तत्रेत्यर्थः। एवञ्च न प्रभोक्तदूषणावकाश इति बोध्यम्। महावाक्यार्थबोधद्वैविध्येन तत्सामग्रीद्वैविध्याङ्गीकारे समानाकारकानुमित्या दिकं प्रति प्रतिबन्धकत्वद्वयं शाब्दसामग्र्या वक्तव्यमिति गौरवमित्यादिकं सूचयितु मुक्तम्—**अन्यत्र विस्तर इति** ॥

मु—**एतेनेत्यादि**। दिनकरभट्टनृसिंहशास्त्रिभ्यामव्याख्यानात् पाठोऽयं न तदनुमत इति भाति ॥

त—**यतो हि नेति**। अत्र नञ्रहितः क्वचित् पाठः। **समवायेनोत्पत्तु मिति**। 'समवायेन नोत्पत्तुम्' इति तत्पक्षे साधुः। **यावदर्थेति**। 'यावद्वर्ण' इति पाठः ॥

मु—नन्वासत्तेः तज्ज्ञानस्य वा कारणत्वाभिधानमसङ्गतम्, पिधेहीत्यादि पदानासन्नेन द्वारमित्यादिपदेनैव पिधानाद्यर्थोपस्थितिदशायां शाब्दबोधादित्यत आह—**इदन्तु बोध्यमिति**। **क्रियाकर्मपदानामिति**। निर्धारणे षष्ठी। कर्मपदस्येति



शेषः। **तेनैव पदेन**। क्रियापदेनैव। तेन कर्मपदेन। कर्मपदञ्चात्र कारकान्तराणा मुपलक्षकम् ॥

दि—**कार्यतावच्छेदके निवेशादिति**। पिधेहीत्यानुपूर्वीज्ञानाव्यवहितो त्तरद्वारनिष्ठकर्मतानिरूपकपिधानानुकूलकृतिप्रकारकबोधं प्रति पिधेहीत्यानुपूर्वीज्ञानं कार णम्। एवं द्वारमित्यत्रापि बोध्यम्। नचैवं कार्यकारणभावगौरवमिति वाच्यम्, घटकर्मकानयनान्वयबोधं प्रति घटं कलशमित्यादिपर्यायपदानां व्यभिचारात् तत्त दानुपूर्वीज्ञानाव्यवहितोत्तरत्वस्य कार्यतावच्छेदककोटौ सर्वथा निवेश्यत्वात्। नच द्वितीयान्तघटार्थकपदाव्यवहिततिङन्तानयनार्थकपदज्ञानत्वेन कारणत्वादेव व्यभिचार वारणेन अव्यवहितोत्तरत्वनिवेशो नावश्यक इति वाच्यम्, यत्र घटपदान्न घटस्मृतिः, किन्तु कलशपदात्, तत्र घटमानयेति वाक्यादपि घटानयनबोधापत्तेः, पदे घटाद्यर्थकत्वमजानतामपि घटमित्याद्यानुपूर्वीज्ञानमात्रात् घटीयं कर्मत्वमिति बोध स्यानुभवसिद्धत्वेन व्यभिचारावारणाच्च। **उपस्थितस्यैवेति**। 'उपस्थितस्येव' इति पाठः। **द्रुह्यतीति**। एतदुत्तरम् 'ईर्ष्यति असूयति इत्यादिपरिग्रहः' इति पाठः। **तज्जन्योप स्थितित्वेनेति**। 'तज्जन्यपदार्थोपस्थितित्वेन' इति पाठः। **पदार्थोपस्थितित्वस्यैवेति**। अथैवं प्रत्यक्षादिना द्वाराद्युपस्थितावपि शाब्दापत्तिरिति चेन्न, शाब्दत्वावच्छिन्नं प्रति पदज्ञानस्य करणत्वेन आकाङ्क्षाज्ञानस्य कारणत्वेन च साकाङ्क्षकपदज्ञानस्यावश्य कत्वात् ॥

त—**इदमत्र चिन्त्यमिति**। द्वारं पिधानं कुरु इति प्रयोगे द्वितीयाया असाधुत्वेपि द्वारं पिधानं कृतिरित्यत्रैव बोध इष्ट एव। पुष्पेभ्य इत्यत्र स्पृहे रयोगे चतुर्थ्या कर्मत्वबोध एव न भवेत्। तथाच विवक्षितबोधजननार्थं तत्र पदाध्या हार आवश्यक इति मूलाशयः। चतुर्थ्यनुपपत्तेरित्यस्य च चतुर्थ्या कर्मत्वबोधा नुपपत्तेरित्यर्थ इति न काचिदसङ्गतिरिति विभावनीयम् ॥

भा—**पदार्थे तत्रेति**। 'सन्निधानन्तु पदस्यासत्तिः' इति पूर्वप्रक्रान्त परामर्शः तच्छब्देन माभूदिति बोधयितुं 'पदार्थे' इति विशेष्यनिर्देशः ॥

मु—**एकपदार्थ इति**। एकापरत्वे अर्थविशेषणे। अतो धात्वेत्वकारा दीनां खण्डशक्तिप्रतियोगिनामर्थयोर्न परस्परान्वयानुपपत्तिः। अत्रैकत्वपदार्थत्वादीनां

न कारणतावच्छेदककोटौ प्रवेशः। तद्विशेष्यकतत्संसर्गकतत्प्रकारकशाब्दं प्रति तद्विशेष्यकतत्संसर्गकतत्प्रकारकज्ञानत्वेन हेतुता बोध्या। व्यक्तिविशेषघटनया च करकाभिप्रायप्रयुक्तात् पयसा सिञ्चतीति वाक्यान्न शाब्दबोधापत्तिः। योग्यताभ्रमवतान्तु वह्निना सिञ्चतीत्यत्रैवात्रापि बोध इष्ट एव। अत एव योग्यताया न स्वरूपसत्या हेतुत्वम्। अत्र कार्यकारणयोरेकसंसर्गघटनात् आकाशे समवायेन शब्दवत्ताज्ञाने आकाशः शब्द इति वाक्यान्नाभेदसंसर्गकबोधापत्तिः। अत्र कार्यकारणभावे विशेष्यतायां प्रकारतायाञ्च तत्तदन्वयितावच्छेदकरूपावच्छिन्नत्वमपि देयम्, तेन सेकत्वावच्छेदेन पयःकरणकत्वत्वावच्छिन्नाभावग्रहेपि तद्व्यक्तित्वादिधर्मान्तरेण योग्यताज्ञानात् पयसा सिञ्चतीति वाक्यान्न शाब्दबोधापत्तिः। परे तु पयस्त्वेन रूपेण करकोपस्थितावपि शाब्दबोध इष्ट इति न व्यक्तिभेदेन कार्यकारणभावभेदावश्यकतेत्याहुः। **एतस्या योग्यताया इति**। एतस्या इत्यनेन योग्यताया अन्वयप्रयोजकरूपवस्त्वात्मकत्वपक्षे नैष दोष इति सूचितम्। **तज्ज्ञानमात्र इति**। 'तज्ज्ञानमात्रे' इति ताळीग्रन्थपाठः। दिनकरीयेपि तत्स्थाने तथैव ॥

**दि—उचितत्वादत इति**। 'उचितत्वमतः' इति साधुः पाठः। **निर्वाहे इति**। एतदुत्तरं 'योग्यताज्ञानस्य हेतुत्वं न कल्प्यत इति भावः' इति ताळीग्रन्थेषु दृश्यते। 'नायोग्यताज्ञानम्' इत्यनन्तरं 'नवा योग्यताज्ञानम्' इति चाधिकतया ॥

**त—इच्छाविरहविशिष्टत्वमिति**। एतदुत्तरम् 'अनन्तर्भाव्यैव' इति पाठः ॥

**दि—एकविधाप्रामाण्यग्रहेति**। अत्र नव्याः—योग्यताज्ञाने अप्रामाण्यनिश्चयेपि शाब्दबोधो भवति। अत एव मुखं चन्द्र इत्यादिरूपकस्थले शाब्दबोधः। परन्तु तत्राप्रामाण्यनिश्चयान्न तदुत्तरं चन्द्राहरणादिविषयकप्रवृत्त्यापत्तिः। इत्थञ्च योग्यताज्ञाननिष्ठकारणतावच्छेदककोटावप्रामाण्यनिश्चयाभावो न निवेश्यत इति प्राहुः। एतन्मतेपि योग्यताज्ञानहेतुतासिद्ध्यर्थमाह—**बाधनिश्चयस्येवेति**। इदमुपलक्षणम्। भिन्नविषयकप्रत्यक्षप्रतिबन्धकशाब्दसामग्र्यां ग्राह्याभावतद्व्याप्यतद्व्याप्यावच्छेदकधर्मदर्शनाभावकूटनिवेशादपि गौरवमिति ॥

**त—तन्निश्चय इति**। 'तन्निश्चयश्च' इति पाठः ॥



**दि—अतिगौरवाच्चेतीति**। ननु शाब्दबोधे अयोग्यतानिश्चयस्य प्रतिबन्धकत्वमेव न स्वीक्रियते। उक्तञ्च खण्डनकारैः 'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि' इति। अस्यार्थः—अत्यन्तासति बाधनिश्चयविषये अर्थेपि शब्दः वाक्यं ज्ञानं शाब्दबोधं हि निश्चयेन करोति हि जनयत्येवेति। तथाच योग्यताज्ञानकारणतावादिनामेव गौरवमित्यत आह—**एवमिति**। यद्वा, प्रत्यक्षातिरिक्तेष्वनुभवेषु विलक्षणजातिमङ्गीकृत्य तदभावनिश्चयादेस्तत्प्रकारकविजातीयं प्रत्येकप्रतिबन्धकत्वं स्वीक्रियते लाघवात्। इत्थञ्च न शाब्दस्थले योग्यताज्ञानस्य हेतुत्वसिद्धिरित्यत आह—**एवमिति**। **कल्पनीयमिति गौरवमिति**। अथ योग्यताज्ञानाभावस्यान्यस्य वा मानससामग्र्यां सत्यामपि चाक्षुषानुमित्यादिसामग्रीसत्त्वे मानसानुदयान्मानसं प्रति सामान्यतो भिन्नविषयकज्ञानसामग्र्याः प्रतिबन्धकत्वस्योभयवादिसिद्धत्वात् प्रतिबन्धकत्वान्तराकल्पनान्न गौरवमिति चेन्न, शाब्दसामग्रीप्रतिबन्धकतायामशाब्दज्ञानं जायतामितीच्छाया उत्तेजकत्वानुरोधेन विशिष्य शाब्दसामग्रीत्वादिनैव प्रतिबन्धकत्वस्य वक्तव्यत्वात्। नच योग्यताज्ञानस्य कारणत्वे योग्यतां जानामीति मानसं प्रति प्रतिबन्धकत्वं तव कल्पनीयमिति साम्यमिति वाच्यम्, शाब्दबोधात् प्राक् कदाचिद्योग्यताज्ञानसम्भवादर्शितप्रतिबन्धकत्वस्योभयवादिसिद्धत्वात्। इत्थञ्च गुरुभूतशाब्दसामग्रीप्रतिबन्धकताकल्पनप्रयुक्तालाघवाद्योग्यताज्ञानहेतुतायां सिद्धायां विशिष्टपरामर्शविलम्बेनानुमितिविलम्बवद्योग्यताज्ञानविलम्बेन शाब्दविलम्बोप्यङ्गीकरणीय एव। एतत्सर्वं सूचयितुमेव 'इत्याद्यवसेयम्' इत्युक्तम् ॥

**भा—यत्पदेन विनेति**। घटमानयेत्यादौ घटकर्मकानयनानुकूलकृतिमानिति शाब्दबोधं प्रति घटपदस्य नीधातुसहकारेण जनकत्वात् नीधातौ घटपदवत्त्वस्याप्याकाङ्क्षात्वापत्तिः, तद्वारणाय निषेधद्वयघटनम् ॥

**त—नैतावतेति**। एतदुत्तरम् 'आकाङ्क्षास्वरूप' इत्यादिपाठः। **इत्यस्वरसादिति**। तेन पदेनेत्यादिपूरणे कृतेपि तत्पदनिरूपिता तत्पदनिष्ठा आकाङ्क्षेति बोधो भवति, तावताप्याकाङ्क्षास्वरूपं न प्रदर्शितं भवेदिति भावः। वस्तुतस्तु, 'सह' शब्दोऽत्र न निरूपितत्वमभिधत्ते, द्योतयति वा तृतीयायास्तदर्थकत्वम्, किन्तु पूर्वत्वापरत्वान्यतररूपवैशिष्ट्यं बोधयति। इत्थञ्च तत्पदपूर्वत्वापरत्वान्यतरवत्तत्पदनिष्ठा

आकाङ्क्षेति बोधः। धान्यवतो धनमित्यादाविव विवक्षावशात् उद्देश्यतावच्छेदकाभेदो विधेये भासत इति तत्पदविशिष्टत्वं तत्पदविशिष्टतत्पदत्वं वा आकङ्क्षेति शाब्द एव बोधो भवति। आकाङ्क्षापदञ्च तत्पदनिरूपिताकाङ्क्षापरम्। तेन पदेन सहे त्यस्यावृत्त्या वा तदर्थलाभः। दर्शितविवक्षाविशेषसूचनमेव दिनकरभट्टैः कृतमिति ॥

दि—**स्वरूपत एवोपयोग इति**। तत्पदजन्यशाब्दबोधं प्रति तत्पदजन्य शाब्दबोधाभावो हेतुरिति भावः। अत एव निषेधद्वयगर्भपरिचायकप्रदर्शनं सार्थकम्। नचैवं खण्डवाक्यार्थबोधे जाते महावाक्यार्थबोधानुपपत्तिरिति वाच्यम्, तात्पर्यविषय महावाक्यार्थबोधाभावस्यैव हेतुत्वात्, तावत्पदजन्यशाब्दबोधविषयित्वाव्यापकविषयिता शून्यशाब्दबोधत्वस्यैव तावत्पदजन्यबोधाभावकार्यतावच्छेदकत्वाद्वा दोषाभावात्। खले कपोतन्यायेन बोधमते तु पूर्वपक्ष एव नोदेतीति बोध्यम्। **प्रत्यये प्रकृत्युत्तरत्व रूपाकाङ्क्षेति**। अत्र सामान्यत एवं कार्यकारणभावे घटः कर्मत्वमित्यादितोपि शाब्दापत्तिः, तत्रापि प्रकृत्युत्तरप्रथमादिसत्त्वात्, अतोऽम्पदत्वावच्छिन्नविशेष्यतानिरूपिता व्यवहितोत्तरत्वसम्बन्धावच्छिन्नघटपदत्वावच्छिन्नप्रकारताशालिनिश्चयत्वादिना प्रत्येकमेव कारणत्वं वाच्यम्। नच घटोपस्थापकनामपदाव्यवहितोत्तरकर्मत्वोपस्थापकविभक्ति ज्ञानत्वेन कारणत्वमस्तु, इत्थञ्च घटं, घटौ, घटान्, कुम्भं, कलशमित्यादौ, घटस्येत्यादिकृद्योगषष्ठीप्रयोगे, घटलाक्षणिकपटमित्यादिप्रयोगे च सर्वत्रैककार्यकारण भावेन निर्वाह इति वाच्यम्, घट अम्, घट ङस् इत्यादितोपि बोधापत्तेः, नामत्व विभक्तित्वादिकमजानतो घटमित्यादिवाक्याद्बोधानुपपत्तेश्च। नच बहुगुडमित्यादौ बहुच्प्रत्यये प्रकृत्युत्तरत्वरूपाकाङ्क्षाविरह इति वाच्यम्, विशिष्यैवाकाङ्क्षाया हेतुत्वेन तत्र गुडपदाव्यवहितपूर्वबहुच्प्रत्ययत्वादिरूपाकाङ्क्षाज्ञानस्यैव हेतुत्वोपगमात्। नच प्रत्येकं कार्यकारणभावे परस्परं व्यभिचारेण कार्यतावच्छेदककोटावव्यवहितोत्तरत्वं देयम्, तथाच घटः कर्मत्वमित्यादितोपि बोधापत्तिः, घटमित्याद्यानुपूर्वीज्ञानानां तत्राहेतुत्वा दिति वाच्यम्, सामान्यसामग्र्या फलजनने विशेषसामग्र्यन्यतमस्य सहकारित्वात्त दभावादेवापत्त्यसम्भवादित्यन्यत्र विस्तरः ॥

---

महावाक्यार्थबोधेति। तत्त्वञ्च बोधाजनकबोधत्वम्। एवमपि घटीया कर्मतेति बोधानन्तरं घटीया कर्मतेति बोधापत्तिरित्यत आह—तावत्पदजन्येति।



त—**इदञ्च यत्पदेनेति**। ग्रन्थमिमं लिखितवता रामरुद्रभट्टेन 'अजनितान्वयबोधदशायाम्' इति दिनकरीयपाठो न दृष्ट इति बोध्यम्। तत्पाठे आकाङ्क्षाशरीरे अननुभावकत्वांशान्तर्भावेपि सम्भवत्येवापत्तिः, राज्ञः पुरुष इति बोधसामग्र्या अपि सत्त्वा दित्यवधेयम्। **राजसम्बन्धो भवत्विति**। 'राजसम्बन्धबोधो भवतु' इति साधुः ॥

दि—**तत्पदं तत्पदज्ञानपरमिति**। 'यत्पदं यत्पदज्ञानपरम्' इति, 'यत्पदपदं यत्पदज्ञानपरम्' इति च पाठो दृश्यते। अन्त्यपाठः साधिष्ठः। **प्रतिबन्धकत्वे गौरवा दिति**। अथ ग्राह्याभावव्याप्यतदवच्छेदकधर्मज्ञानयोर्हि प्रतिबन्धकत्वं दृश्यते। निराकाङ्क्षत्वं च नात्र ग्राह्याभाव इति न तयोः प्रतिबन्धकत्वापत्तिः। नच यज्ज्ञानं यत्र प्रतिबन्धकम्, तद्व्याप्यतदवच्छेदकधर्मज्ञानयोरपि तत्र प्रतिबन्धकत्वमिति वाच्यम्, तादृशनियमे मानाभावात्। अन्यथा तद्व्याप्यव्याप्यतदवच्छेदकधर्मदर्शनयोरपि प्रतिबन्धकत्वापत्तेरिति चेन्न, एतद्रीत्या ग्राह्याभावानवगाहितया निराकाङ्क्षत्वज्ञानस्यापि प्रतिबन्धकत्वासम्भवात्। अत्र यद्यपि निराकाङ्क्षत्वज्ञानस्य मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वम्, न तु तद्व्याप्यवत्ताज्ञानादेरिति वक्तुं शक्यम्, तथापि न तस्य प्रतिबन्धकत्वं सम्भवति, यतः प्रतिबन्धकीभूतज्ञानविषयनिराकाङ्क्षत्वस्वरूपं दुर्वचम्। तद्धि न तावत् घटपदानुत्तराम्पदत्वम्, घटः कर्मत्वमित्यादौ तादृशाम्पदज्ञानाभावे शाब्दबोधापत्तेः। न वा घटपदोत्तराम्पदाभावः, तज्ज्ञानाभावदशायामुक्तापत्तेरवारणात्। घटः कर्मत्वं, घटम् इति यत्रोक्तम्, तत्र प्रतिबन्धकसद्भावात् घटीया कर्मतेति शाब्दबोधानुपपत्तिश्च। अतः प्रकृतिप्रत्यययोः पौर्वापर्यरूपाकाङ्क्षाया ज्ञानम्, प्रकृतिप्रत्ययज्ञानयोः पौर्वापर्यरूपाकाङ्क्षा वा शाब्दबोधहेतुर्वक्तव्य इति। एतदभिप्रेत्योक्तम् 'इत्यलम्' इति। इदमत्रावधेयम्—न केवलं प्रकृतिप्रत्यययोः पौर्वापर्यमाकाङ्क्षा, अभेदसंसर्गकनीलादिप्रकारकघटादि विशेष्यकबोधे नीलादिपदाव्यवहितोत्तरघटादिपदत्वम्, नीलघटादिपदयोस्समानविभक्तिकत्वं वाप्याकाङ्क्षा। एवं कर्तृत्वाद्यर्थकतृतीया शाब्दजनने कृदन्तपदसमभिव्याहाररूपाकाङ्क्षा। एवमाख्यातेन कर्तृकर्मत्वयोर्विवक्षायां यगात्मनेपदसमभिव्याहाररूपाकाङ्क्षेति। विस्तरो व्युत्पत्तिवादादौ द्रष्टव्यः ॥

**वक्तुरिच्छेतीति**। 'वक्तुरिच्छेतीति' इति पाठः। मूलस्थमिच्छापदं न 'सुखं मे भूयात्' इतीच्छासामान्यपरम्, किन्तु इच्छाविशेषार्थकम्, इच्छाविशे

षस्यापि न तद्गानयमित्याद्याकारकं ज्ञानं कारणम्, न वा तेनोच्चरितं न वेति सन्देहस्य न तेनोच्चरितमिति निश्चयस्य च हेतुत्वमिति दर्शयितुमाह—**घटमानयेत्यादाविति**। **उच्चरितम्**। ज्ञापितम्, तेन मौनिश्लोकान्न शाब्दानुपपत्तिः ॥

त—**तात्पर्यज्ञानमिति**। तात्पर्यप्रकारकं ज्ञानमित्यर्थः। इदं वाक्यं स्व प्रयोज्योच्चरितत्वसम्बन्धेन इच्छारूपतात्पर्यविशिष्टमिति ज्ञानाकारः। एतदुत्तरं 'तत् तादृशवाक्य' इति पाठः। **नियमानभ्युपगमेनेति**। 'गमयति' इत्यस्य स्मारयती त्यर्थमभिसन्धायैवमुक्तम्। एकमेव बोधं जनयतीत्यर्थकत्वे समूहालम्बनात्मकोभयविध बोधोत्पत्तावपि नियमभङ्गाभावादिति केचित्। नानार्थकपदरूपोद्बोधकसत्त्वे नानार्थ स्मरणस्यानिवार्यत्वादेकपदप्रयोज्यशाब्दविषयता एकैवेत्येव नियमार्थः। तथाचोभयबोधे भवत्येव नियमभङ्ग इति परे। नन्वेवं शक्तिद्वयेनोभयबोधाङ्गीकारे 'युगपद्वृत्तिद्वय विरोधः' इति प्राचीनप्रवादस्य का गतिरिति चेन्न, एकपरत्वमात्रग्रहे वृत्तिद्वयज्ञानस्य न बोधकत्वमित्यर्थकत्वाद्‌द्वयभावाभावात्। यत्रोभयोस्तात्पर्यं न युगपत् किन्तु क्रमेण गृहीतम्, तत्राद्यस्यैव बोधः, पूर्वपदज्ञानस्य नष्टत्वात्। एवं यत्र मुख्यार्थस्य प्रथम मुपस्थितिः बोधश्च, तत एव लाक्षणिकार्थस्य, तत्राप्यावृत्तिरित्यवसेयम्॥

दि—**व्यतिरेकनिश्चये वेति**। 'व्यतिरेकनिश्चये च' इति पाठः। **वियोगेति**। 'विप्रयोग' इति पाठः। **मात्रकल्पने इति**। 'मात्रं कल्प्यते' इति पाठः॥

त—**संयोगः साह्निध्यमिति**। सशङ्खचक्रो हरिः, अशङ्खचक्रो हरिः, रामलक्ष्मणौ इत्यादीन्यालङ्कारिकदर्शितानि संयोगादीनामुदाहरणानि। **आभिमुख्या दीति**। आदिना विरोधितादयो गृह्यन्ते, यथा रामरावणाविल्यादौ। **मूले महाप्रलय स्येति**। अत्र महेत्यंशः प्रक्षिप्तः। **तच्चायुक्तमिति**। इदमापाततः। शङ्कितुरपि प्रलयशब्देन खण्डप्रलयस्यैव प्रतिविपादयिषितत्वात् महाप्रलयाभावस्य सर्गाभावे प्रयोजकत्वा सम्भवात्, महाप्रलयमङ्गीकुर्वताापि तदनन्तरं सर्गानङ्गीकारात्। अतः शिष्यबुद्धिवैश द्यायैव व्याख्यानमिति ध्येयम्। **सूक्तत्वादिति**। 'सूचितत्वात्' इति ताळीग्रन्थपाठः। **तथापि प्रलय इति**। इदनप्यापाततः, सर्गप्रथमक्षणे नित्येषु कार्योत्पत्त्यन्यथानुपपत्त्या तेषां सर्गाव्यवहितपूर्वक्षणे प्रलयात्मके वृत्तित्वस्यावश्यकत्वात्, कार्यद्रव्यानधिकरणेत्यत्र द्रव्ये कार्यत्वविशेषणवैयर्थ्यापाताच्च ॥



शु—**शुकवाक्येपीति**। शुकवाक्ये तात्पर्यभ्रमादेव शाब्दबोधः। विशेष दर्शिनान्तु तत्र पदार्थोपस्थित्यधीनमानसमेवेति परे। **कारणं वाच्यमिति**। 'वाच्यम्' इति ताळीग्रन्थेषु न दृश्यते ॥

दि—**गृहीतनानार्थकलक्षणाकस्येति**। करणत्व,सहार्थादिलाक्षणिकक्कृति शक्ततृतीयादेः, स्वस्वामिभाव,गुरुशिष्यभावादिसम्बन्धविशेषविशिष्टलाक्षणिकराजपुरुषादि षष्ठीतत्पुरुषादेश्चेत्यर्थः ॥

त—**उपात्तमिति**। एतदुत्तरं 'गृहीत' इत्यादिः 'भावः' इत्यन्तो ग्रन्थः निरर्थकत्वात् प्रक्षिप्त इति भाति ॥

दि—**गृहीतविभिन्नार्थेति**। कृतौ शक्तस्याश्रयत्वे लाक्षणिकस्य तिबादेः, कर्मधारयत्वे राज्ञि शक्तस्य तत्पुरुषत्वे तत्सम्बन्धिनि लाक्षणिकस्य राजपुरुषादिपदस्य चेत्यर्थः ॥

त—**कपिञ्जलानितीति**। तादात्म्येन साध्यत्वे हेतुव्यापकतावच्छेदकं त्रित्वादिपरार्धान्तसंख्यान्यतमत्वं बहुत्वत्वसामान्यं वा बोध्यम्। तत्र बहुत्वस्य त्रित्व रूपत्वे लाघवमिति लाघवज्ञाने त्रित्वाभिन्नबहुत्वमेवानुमित्या विषयीक्रियते। इत्थञ्च तादृशतर्कसहकृतया बहुवचनार्थबहुत्वोपस्थित्या त्रित्वविषयक एवात्र शाब्दबोध इति भावः। नचैवं 'व्रीहीनवहन्ति' इत्यत्रापि त्रित्वस्यैव बोधः स्यादिति वाच्यम्, व्रीहित्रियस्यावश्यकपुरोडाशसम्पादकत्वासम्भवेनानुपयोगरूपबाधात्, सति बाधे लाघव रूपतर्कस्याकिञ्चित्करत्वात्। अत्र लाघवस्य यत् प्रथमोपस्थितत्वात्मकत्वं दर्शितं राम रुद्रभट्टेन, तदुपलक्षणम्। कपिञ्जलचतुष्टयाद्यालम्भनस्य वेदार्थत्वे अधिकानामङ्गापूर्वा णामधिककार्यकारणभावस्य च कल्पनापत्त्या गौरवम्। त्रयालम्भनस्य तथात्वे च लाघवम्। एवमधिकव्यक्तीनां वेदजन्यशाब्दबोधविषयत्वाकल्पनप्रयुक्तमपि लाघवमिति। एतेन बहुवचनश्रवणे बहुत्वत्वेन रूपेण त्रित्वस्येव चतुष्ट्वादेरपि झटित्युपस्थितिसम्भवात्त्रित्वस्य प्रथमोपस्थितत्वकथनमसमञ्जसम्। तथाच न त्रित्वे लाघवमिति निरस्तमित्यन्यत्र विस्तरः। सिद्धान्तेपीश्वरतात्पर्यनिर्णये अनादिमीमांसापरिशोधिततर्कोपयोगो बोध्यः ॥

दि—**तर्कोऽनुमानमिति**। अनुमानं न्यायपदाभिधेयं प्रतिज्ञादिपञ्चकम्, तदधीनपरामर्शो वा। तत्रानादित्वञ्च प्रवाहतो बोध्यम्। तर्के अनादित्वोक्त्या तत्रा

प्रामाण्यशङ्का परिहृता। अनादीनां चिरन्तनानामृषीणां मीमांसा विचारः तया परिशोधिता अबाधितत्वेन निर्णीताः तर्का लाघवविपक्षबाधकादयः तैः सहकृतपदैरेवेति प्रभाकृतः। तद्वीजन्त्विति। पदजन्यानुभवत्वस्य कार्यतावच्छेदकत्वोक्तिः शाब्दत्वजात्यनङ्गीकारेपि लाघवप्रदर्शनाय। पदजन्यपदार्थस्मृतेस्तात्पर्यज्ञानानपेक्षत्वाद्व्यभिचारवारणाय ज्ञानत्वं विहाय अनुभवत्वनिवेशः। अत्र गृहीतनानार्थवृत्तिकपदजन्यानुभवत्वस्य जन्यतावच्छेदकत्वोक्तिरसङ्गता, सैन्धवः प्रमेय इत्यादौ तात्पर्यज्ञानापेक्षाभावादिति केचित्। तदसुन्दरम्, तत्र कदाचिदश्वबोधः कदाचिल्लवणबोध इति नियमस्यान्यथोपपादयितुमशक्यत्वात्, तात्पर्यसन्देहेपि शाब्दबोधापत्तेश्च ॥

**त—वेदस्थल इति।** एतदुत्तरं 'तात्पर्यज्ञानेन नार्थनिर्णयः' इति पाठः। एवं 'संशयादिस्थले' इत्युत्तरं 'शाब्दबोधाननुभवादपि' इति च ॥

इति महामहिमश्रीरामवर्मपरीक्षिद्धोश्रीमहाराजविरचितायां
सुबोधिन्यां
शब्दपरिच्छेदः ॥

# स्मरणनिरूपणम्

**दि—सुगमस्य स्वयमपीति।** मूले स्मरणानिरूपणे यत् सुगमत्वं हेतुतयोपन्यस्तम्, तदेवेदानीं स्मरणनिरूपणे सङ्गतिद्योतकमपीति भावः ॥

**मु—पूर्वानुभव इति।** व्यापारद्वारैवानुभवस्य कारणत्वमिति द्योतयितुं पूर्वेति विशेषणम् ॥

**दि—तच्च कार्येति।** कार्याव्यवहितप्राक्क्षणवृत्तिभिन्नं कार्याव्यवहितप्राक्क्षणवृत्तिस्वव्यापारकभिन्नञ्च यद्यत्, तत्तद्भिन्नत्वमित्यर्थः। यथाश्रुते कपालसंयोगपरामर्शादौ कारणलक्षणाव्याप्तेः, तत्र तद्व्यापाराप्रसिद्धेः। वस्तुतस्तु, तत्कार्याव्यवहितपूर्ववृत्तित्व,तादृशपूर्ववृत्तित्वाश्रयाव्यवहितपूर्ववृत्तित्वान्यतरवत्त्वे सत्यनन्यथासिद्धत्वमेव तत्कार्यकारणत्वम्। एवञ्च न कोपि दोष इत्यवधेयम्। 'तच्च' इत्यत्र तच्छब्दार्थः कारणत्वमात्रम्, न तु व्यापारद्वारा कारणत्वम्, अन्यथा कपालसंयोगादीनामपि व्यापारद्वारा कारणत्वव्यवहारापत्तेः। इदमत्र तत्त्वम्—कारणपदस्यानन्यथासिद्धाव्यवहितपूर्ववृत्तावेव शक्तिः। तादृशस्वव्यापारके तु निरूढलक्षणा। अत एव व्यापाराद्यज्ञानेपि कपालो घटकारणमित्यादितः शाब्दबोध उपपद्यते। यत्र तु दण्डचक्रकपालादीनां घटकारणत्वं साधर्म्यमुच्यते, तत्रान्यतरत्वघटितनिरुक्तकारणत्वमेव निर्दिष्टं तदिति। **समानप्रकारकत्वाभावादिति।** संस्कारान्यूनप्रकारकत्वाभावादित्यर्थः। नच तत्प्रकारकसंस्कारनाशं प्रति तत्प्रकारकस्मरणं कारणमित्येवास्तु, एवञ्च फलस्य संस्कारनाशकत्वमपि घटत इति

---

कार्याव्यवहितेत्यादि। अस्यायमनुगमः—कार्यविशिष्टान्यत्वम्। वैशिष्ट्यञ्च स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदद्वयवत्त्वसम्बन्धेन। अवच्छेदकते च स्वाव्यवहितप्राक्क्षणवृत्तित्वसम्बन्धावच्छिन्ने। एकं वृत्तित्वं कालिकसम्बन्धावच्छिन्नम्। अपरं स्वनिरूपितव्यापारवत्त्वसम्बन्धावच्छिन्नमिति। व्यापारस्वशरीरे प्रकृतकार्यजनकत्वप्रवेशेनात्माश्रय इत्यत आह—वस्तुतस्त्विति। अन्यतरवत्त्वे सतीति। निरुक्तान्यतरवत्त्वञ्च स्वाश्रयत्व,स्वाश्रयाव्यवहितपूर्ववृत्तित्वान्यतरसम्बन्धेन तत्कार्याव्यवहितपूर्ववृत्तित्वपर्यवसन्नं बोध्यम् ॥

वाच्यम्, तर्हि तत्र घटस्मरणेनैव समूहालम्बनसंस्कारनाशात् पटस्मरणस्यानन्तरं जायमानस्यानुपपत्तेः ॥

**मु—कालस्येति।** 'कालेन तद्विस्मृतं मया' इत्यादिव्यवहारदर्शनादिति भावः। सन्निपातज्वरादीनां संस्कारनाशहेतुत्वस्यायुर्वेदप्रतिपादितत्वादनुभूयमानत्वाचाह—**रोगस्येति।** रोगविशेषस्येत्यर्थः। एतदुत्तरं वाकारः प्रक्षिप्तः। एवं दिनकरीयेपि तत्प्रतीकधारणे बोध्यम्। उभयत्रापि कार्यकारणते कालिकसम्बन्धावच्छिन्ने बोध्ये॥

**दि—**ननु चरमफलस्यापि तत्तद्व्यक्तित्वेनैव हेतुत्वं वाच्यमतो गौरवं तुल्यमित्यत आह—**चरमफले वैजात्यं कल्पयित्वेति।** अथ सर्वेषु चरमफलेष्वेकवैजात्यकल्पने घटचरमस्मरणात् पटकुड्यादिसंस्काराणामपि नाशापत्तिः। नच समानप्रकारकत्वविशिष्टवैजात्यावच्छिन्नं नाशकम्, दर्शितसमूहालम्बनसंस्कारस्थले दर्शितापत्तेर्जागरूकत्वात्। नच तत्र वैजात्यं पटस्मरण एव, तस्य च संस्कारप्रकारपटत्वप्रकारकत्वमप्यक्षतमिति वाच्यम्, पटो द्रव्यमिति चरमफलेन पटो रूपवानिति संस्कारस्यापि नाशापत्तेः, उभयोः पटत्वप्रकारकत्वात्। नच समानप्रकारकत्वं स्वविषयित्वाव्यापकविषयिताशून्यत्वम्, तथाच नोक्तदोष इति वाच्यम्, नानासंस्कारजन्यसमूहालम्बनरूपाचरमफलात्तेषां नाशानुपपत्तेः। अतश्चरमफलस्यापि तत्तद्व्यक्तित्वेनैव हेतुत्वं वक्तव्यमिति चेन्न, संस्कारनिष्ठप्रतियोगितासम्बन्धेन नाशं प्रति जनकतासम्बन्धेन वैजात्यावच्छिन्नं कारणमिति कार्यकारणभावस्वीकारेण सर्वसामञ्जस्यात्। इदं पुनरिहानुसन्धेयम्—प्रतिजीवं चरमस्मरणव्यक्तेरेव तद्वृत्तिसकलसंस्कारनाशकत्वम्। यावन्मुक्ति घटादिसंस्कारानुवर्तनेपि फलबलकल्प्यस्योद्बोधकस्याभावादेव तत्स्मरणापत्त्यसम्भवात्। इत्थञ्च तादृशचरमव्यक्तिष्वेव वैजात्यं कल्पनीयम्। दैशिकविशेषणतया संस्कारनाशं प्रति समवायेन वैजात्यावच्छिन्नं कारणमिति कार्यकारणभावेन च लाघवम्। अत एव न तत्तन्मुक्त्यव्यवहितपूर्वक्षणेषु वैजात्यं कल्पयित्वा कालिकसम्बन्धेन संस्कारनाशं

---

**उभयत्रेति।** कालस्य कारणता तादात्म्यसम्बन्धावच्छिन्नापि सम्भवतीति बोध्यम्॥

**चरमफलस्येति।** अत्र चरमत्वं स्वजनकसंस्कारजन्यस्मृतिप्रागभावासमानकालीनत्वमवसेयम्॥ **उद्बोधकस्याभावादिति।** नचैवमनुभवध्वंस एव व्यापारोऽस्तु, किं संस्कारकल्पनेनेति वाच्यम्, वक्ष्यमाणरीत्या स्मृतिनिष्ठविषयिताया विषयिताप्रयोज्यत्वस्य वक्तुमशक्यत्वात्, दूषणान्तरस्य संस्कारग्रन्थे वक्ष्यमाणत्वाच्च। **क्षणेषु वैजात्यं कल्पयित्वेति।** इदञ्च क्रियात्मकोपाधेः



प्रति तेन सम्बन्धेन तेषां जनकत्वम्। उक्तरीत्या सामान्यकार्यकारणभावाङ्गीकारेपि तत्पुरुषीयसंस्कारनाशं प्रति तत्पुरुषीयमुक्त्यव्यवहितपूर्वक्षणस्य तद्व्यक्तित्वेन हेतुत्वावश्यकतया अनन्तकार्यकारणभावकल्पनाप्रयुक्तस्य, तत्पुरुषीयत्वनिवेशप्रयुक्तस्य च गौरवस्यापरिहार्यत्वादिति। नचैवं संस्कारस्य सविषयकत्वे किं मानमिति शङ्क्यम्, स्मृतिनिष्ठघटादिनिरूपितविषयितायाः स्मृतिकारणसंस्कारविषयिताप्रयोज्यत्वस्यावश्यं वक्तव्यत्वात्, विषयितायाः स्वाश्रयसमकालिकतया कारणीभूतानुभवस्य नष्टत्वेन तद्विषयिताप्रयोज्यत्वासम्भवादिति। इदमत्र तत्त्वम्—न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति। उत्पन्नस्य च सिद्धे प्रयोजने न क्षणान्तरमप्यवस्थितिः, अप्रामाणिकानन्तक्षणसम्बन्धकल्पनस्य गौरवपराहतत्वात्। इत्थञ्च येन संस्कारेण संस्कारैर्वा याः स्मृतिव्यक्तयो जायन्ते, तासु चरमाया उत्पत्त्यनन्तरं तस्य तेषां वा न क्षणान्तरावस्थितिर्युक्तेति संसारकालेपि चरमफलेन तत्तत्संस्कारनाशाभ्युपगम एव युक्ततर इति। **न स्मरणोत्तरेति।** 'न स्मरणोत्तरस्मरणेत्यर्थः' इति पाठः॥

**मु—व्यभिचारसंशय इति।** आन्तरालिकानां नाशकत्वेपि बाधकाभावादित्याशयः। ननु चरमफलस्य संस्कारनाशकत्वस्य पूर्वमभिहितत्वादान्तरालिकानां कथमिदानीं नाशकत्वसंशयसम्भव इति चेन्न, यत्र गत्यन्तराभावः, तत्रैव चरमफलस्य वैजात्येन हेतुत्वम्, न तु सर्वत्र, वैजात्यकल्पने मानाभावादित्येव पूर्वग्रन्थाशयात्॥

**दि—विशेषधर्मेणेति।** एतदुत्तरं 'व्यभिचाराज्ञानम्' इति पाठः। **व्यभिचारसंशयाभावादितीति।** नन्वनुभवत्वेन स्मृतित्वेन कार्यकारणभावे व्यभिचारसंशयः कार्यकारणभावान्तरव्यवस्थापनेन कथमपैतीति शङ्कां भाववर्णनेन परिहरति—**सकृदिति। अन्यथेति।** अथ लाघवाद्विशिष्टज्ञानत्वेन हेतुत्वे

---

क्षणत्वम्, न तु तद्विशिष्टमहाकालस्येति मताभिप्रायेण, महाकालस्य तथात्वे तस्यैकत्वेन तत्र वैजात्यकल्पनाऽसम्भवात्। नचोत्क्षेपणत्वादिना साङ्कर्यमिति वाच्यम्, तस्य जातिबाधकत्वस्यैवानङ्गीकारात्, गमनात्मकस्तदातनसूर्यपरिस्पन्दादेरेवोपाधित्वाङ्गीकाराद्वा। **हेतुत्वावश्यकतयेति।** अन्यथा पुरुषान्तरीयसंस्कारस्य पुरुषान्तरीयमुक्त्यव्यवहितपूर्वक्षणेन नाशापत्तेरिति भावः। अत्र तत्पुरुषीयानन्तसंस्काराणामनुगमाय तत्पुरुषीयत्वनिवेशः। एवं वैजात्यं कल्पयित्वा नाशकत्वाङ्गीकारे। **विषयितायाः स्वाश्रयसमकालिकतयेति।** विषयितायाः ज्ञानस्वरूपत्वमतिरिक्तत्वं वा अवलम्ब्येदम्॥

सिद्धे तदधीनकल्पनागौरवस्यादोषत्वमुक्तम्, अत्र तु ज्ञानत्वेन वा स्मृतिं प्रति हेतुत्व मुतानुभवत्वेनेति सन्देह एवेति दृष्टान्तदार्ष्टान्तिकयोर्न तुल्यतेति चेन्न, विशिष्ट ज्ञानत्वेन हेतुतायां व्यभिचारसंशयात् लाघवरूपतर्केणैव ज्ञानहेतुतानिश्चयसम्भवेन तौल्यात्। **उपेक्षात्मकतत्तत्स्मृतीति** । नच त्वन्मत इवास्मन्मतेपि स्मृतीनामुपेक्षात्मकत्वं नाङ्गी क्रियत इति वाच्यम्, संस्कारानन्त्यवारणाय कासाञ्चित्स्मृतीनामुपेक्षात्वस्य त्वयाऽ वश्यमङ्गीकार्यत्वात्। **उत्तेजकसत्त्वादिति** । इदञ्च मिश्रमतानुसारेणोक्तमिति तर्क ग्रन्थे स्फुटीभविष्यति। इदन्त्ववधेयम्—संस्कारग्रन्थे वक्ष्यमाणरीत्या स्मृतिकारण तावच्छेदककोटौ उपेक्षान्यत्वं न निवेश्यम्, किन्तु संस्कारकारणतावच्छेदककोटा वेव। उपेक्षास्थले संस्कारानुत्पत्त्यैव स्मरणापत्तिवारणात्। इत्थञ्च संस्कारकारणताव च्छेदकतया अनुभवत्वजातिसिद्धौ व्यापाराभावादेव स्मृतितः स्मरणानुत्पत्त्या व्यभि चारसंशयस्यानवकाशो च ज्ञानत्वेन सामान्यरूपेणान्यथासिद्धत्वमेवेति ॥

इति स्मरणनिरूपणम्।

# मनोनिरूपणम्

**भा—साक्षात्कारे सुखादीनामिति** । निर्विकल्पकस्य, भट्टमते ज्ञान सामान्यस्य च साक्षात्काराभावात् प्रथमपठिताया अपि बुद्धेरुपेक्षा ॥

मु—'मनो निरूपयति' इति क्वचित् पाठः। **करणत्वसिद्धिरिति** । करणत्वेन रूपेण सिद्धिरित्यर्थः। 'करणस्य मनसः सिद्धिः' इत्यलत्यताळीग्रन्थपाठः। नन्वत्र साध्यघटकं करणत्वं किंरूपम्, न तावद्व्यापारवत्कारणत्वरूपम्, सुखादि व्यापारवन्तमात्मानमादाय सिद्धसाधनप्रसङ्गादिति चेन्न, व्यापारद्वारा कारणत्वस्य व्यापार सम्बन्धावच्छिन्नकारणतारूपस्य विवक्षितत्वात्, आत्मनश्च व्यापारानात्मकतादात्म्य सम्बन्धेन कारणत्वात्। अत एव साक्षात्कारत्वस्यापि हेतुकोटौ निवेशः। यथाश्रुते जन्यानामीश्वरकृतिजन्यत्वेन, तज्जन्याद्दृष्टजन्यत्वेन च जन्यत्वव्यापकत्वस्य सकरणकत्वे सत्त्वात् साक्षात्कारत्वनिवेशस्य वैयर्थ्यापत्तेः। यद्वा, इन्द्रियत्वरूपमत्र करणत्वं विव क्षितम्। तच्च मनस्त्वाघटितमेव साध्यघटकमिति नानुमितेः प्राक् साध्याप्रसिद्धि रिति बोध्यम्। दिनकरीये अग्रे प्राणस्य वेत्युक्तिः पूर्वकल्पानुसारेण ॥

दि—**त्वगिन्द्रियस्येति** । मृतशरीरे व्यभिचारवारणायाह—प्राणस्य वेतीति केचित्। परे तु मरणकाले इन्द्रियाणां नाशात्, अथवा तच्छरीरसंयोगनाशान्न मृतशरीरे व्यभिचारसम्भवः। अतो यत्र शरीरविशेषे रोगविशेषेण त्वगिन्द्रियनाशः,

---

**करणत्वेन रूपेण सिद्धिरिति** । तथाच करणत्वेन सिद्धिरिति विग्रह इति भावः। **सुखादिव्यापारेति** । सुखस्यात्मजन्यत्वात्, आत्मजन्यसाक्षात्कारं प्रति विषयविधया जनक त्वाच्च व्यापारत्वं बोध्यम्। ननु समवायस्याजन्यत्वात् शब्दस्य श्रवणेन्द्रियव्यापारत्वपक्षे श्रावणे व्यभिचारः, समवायसम्बन्धेनैव श्रोत्रस्य तत्र कारणत्वादित्यत आह—यद्वेति। **इन्द्रियत्वरूप मिति** । तथाच कारिकायां करणमित्यस्य शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति कारणीभूतसंयो गाश्रयत्ववदित्यर्थः। तत्र कारणतायां साक्षात्कार इति सप्तम्यर्थनिरूपितत्वस्यान्वय इत्यभिप्रायः ॥

**मृतशरीरे व्यभिचारेति** । अन्वयव्यभिचारेत्यर्थः। नच सुखाद्यात्मकविषय रूपकारणाभावान्न व्यभिचार इति वाच्यम्, ज्ञानादिरूपविषयस्यापि तत्सम्पादनसम्भवात्।

तत्र व्यभिचारवारणायाह—प्राणस्य वेतीत्याहुः। वस्तुतस्तु, पाठोऽयं प्रक्षिप्तः। अत एवालत्यप्राचीनताळीग्रन्थेषु स न दृश्यते ॥

**मु—एवं सुखादीनामिति।** नच त्वगात्मसंयोगः प्राणात्मसंयोग एव वास्त्वसमवायिकारणमिति वाच्यम्, चर्मात्मसंयोगमादाय विनिगमनाविरहेणातिरिक्त मनस्सिद्धेः, सुषुप्तावपि सुखाद्यापत्तेश्च। स्पष्टीभविष्यति चेदमनुपदमेव ॥

**दि—तदसन्निधानमिति।** तत् ज्ञानाभावप्रयोजकम्। मनस इत्यस्य तस्येत्यादिः, पूर्ववाक्ये यच्छब्दश्रवणात्। वस्तुतस्तु, तन्मनस इत्येकं पदं तस्य मनस इत्यर्थकम्। **इत्यर्थ इति।** 'इति योजना' इति साधुः ॥

**मु—भेदादिवेति।** 'भेदादाविव' इति पाठः। **भ्रान्तत्वादिति।** 'भ्रान्तित्वात्' इति साधुः। दिनकरीये प्रतीकधारणेपि तथा बोध्यम् ॥

**दि—ज्ञानानामनुपपत्तिरिति।** ज्ञानानामुत्पत्तिः इति पाठः। **निष्प्रत्यूहत्वादिति।** नन्वेवमपि कारिकायां 'ज्ञानानाम्' इति सामान्यनिर्देशोऽसङ्गतः, स्पार्शनेतरज्ञानलाक्षणिकत्वे तु स्वारस्यभङ्गः, लक्षणाया निरूढत्वाभावादत आह **—यद्वेति।** 'त्वचो योगो मनसा ज्ञानकारणम्' इति पूर्वमूलविरोधं मनसि निधायाह**—इत्यभिप्राय इति।** तथाच मतान्तरमनुसृत्यैवमलोक्तमिति भावः। नन्विदं स्वकल्पनामात्रमिति नादर्तव्यमिति शङ्कामपनुदति**—अत एवेति।** एतदुत्तरं 'यदसम्बन्धात्' इति पाठः। मनस्सम्बन्धाभाव एव ज्ञानानुत्पादप्रयोजकतया उक्तः, न तु प्रतिबन्धकप्रयुक्तत्वं स्पार्शनाभावस्योक्तमिति भावः। **अधस्तादिति।** 'त्वचो योगो मनसा ज्ञानकारणम्' इति मूलार्थविचारावसर इत्यर्थः। ननु मनसो विभुत्वेन युगपत् सर्वेन्द्रियसम्बन्धेपि तत्तदिन्द्रियसंयोगेषु केषुचिद्वैजात्यं कल्पयित्वा तद्विशिष्टानामेव तत्तदिन्द्रियजन्यप्रत्यक्षहेतुत्वमभ्युपेयत इति, यद्वा मनोणुत्वपक्षेपि बहुघटेषु मनोधिष्ठितचक्षुषा संयुक्तेषु नानाज्ञानोत्पादवारणाय एकस्यात्ममनस्संयोगस्य युगपदनेकज्ञानोत्पादनसामर्थ्याभावः कल्पनीयः, मनोविभुत्वपक्षेपि सोऽभ्युपेयत इति न

---

**तत्र व्यभिचारेति।** व्यतिरेकव्यभिचारेत्यर्थः ॥

वैजात्याकल्पनप्रयुक्तलाघवादाह—**यद्वेति। सामर्थ्याभाव इति।** तज्ज्ञानसामग्र्यास्तदन्यज्ञानं प्रति प्रतिबन्धकत्वादिति भावः ॥



काप्यनुपपत्तिरित्यत आह—**एवं मनस इति। ताद्रूप्येणेति।** तत्तद्व्यक्तित्वेनेत्यर्थः। नच भौतिकपरमाणुषु यत् ज्ञानादिहेतुत्वम्, तदवच्छेदकतया लाघवान्मनस्त्वजातिसिद्धिरिति वाच्यम्, पृथिवीत्वादिना साङ्कर्येण जातित्वासम्भवात्। नन्वेवं कः परमाणुः कस्य ज्ञानादिकं सम्पादयतीत्यत्र नियमानुपपत्तिरित्यत आह**—नियमस्त्विति।** अदृष्टेन धर्माधर्मात्मकेन उपग्रहः ज्ञानादिसम्पादनाय शरीरान्तर्नयनं तस्माददृष्टोपग्रहात्। **यत्संयोगेति।** यद्धर्मावच्छिन्नसंयोगेत्यर्थः। तस्य मनसः मनस्त्वात्मकतद्धर्मावच्छिन्नस्य। सुषुप्तौ कार्यानुत्पादः कारणाभावप्रयुक्तः इत्यनुमाने प्रतिबन्धकरूपकारणाभावेनार्थान्तरमाशङ्कते**—नच कालेति।** भौतिकपरमाणुभिः सिद्धसाधनमाशङ्कते**—नचोदासीनेति। अदृष्टविशेषाकृष्टमिति।** सत्स्वपि भूयस्सु मनस्सु एकं चैत्रमनः, अन्यन्मैत्रमनः इत्यत्र त्वन्मते विनिगमकमदृष्टविशेषाकृष्टत्वमन्तरा दुर्निर्वचमिति भावः। **तस्य भौतिकत्व इति।** तस्य ज्ञानादिहेतोर्मनसः। **भौतिकत्वे** भूतत्वे। स्वार्थे ठक्। **उभयकल्पने** एकस्मिन्नेव मनसि पृथिवीत्वादिनानाजातिकल्पने। **जातिसाङ्कर्यम्** पृथिवीत्वादेर्जलत्वादिना साङ्कर्यम्। इदमत्र चिन्त्यम्—गन्धादिसमवायिकारणतावच्छेदकतया सिद्धपृथिवीत्वादिमतामेव भूतपरमाणूनामदृष्टविशेषोपगृहीतानां मनोव्यवहारविषयत्वस्य स्वीकृतत्वान्न जातिविनिगमनाविरहप्रसक्तिरिति। वस्तुतस्तु, यद्धर्मावच्छिन्नसम्बन्धव्यतिरेकात् सुषुप्तौ ज्ञानाभावः, तद्धर्मस्य मनस्त्वाख्यस्य लाघवाज्जातित्वेनैव सिद्धिः। तदवच्छिन्नानाञ्च यावतां पृथिवीत्वमिति न युज्यते, विनिगमकदौर्लभ्यात्। अदृष्टविशेषोपगृहीतेषु केषुचित् पृथिवीत्वं केषुचिज्जलत्वमित्येवमङ्गीकारे मनस्त्वेन पृथिवीत्वादीनां साङ्कर्यं स्यात्। इत्थञ्च विपक्षे बाधकसत्त्वात् मनस्त्वाश्रया भूतपरमाणुव्यतिरिक्ता एव सिद्ध्यन्तीत्यवधेयम्। **एतदभिप्रेत्येति।** इदमुपलक्षणम्। मनसो वायुत्वे त्वगिन्द्रियसमानयोगक्षेमतया स्पर्शमात्रग्राहित्वापत्तिः। अदृष्टविशेषादन्यदपि गृह्यत इति चेत्तर्हि त्वचैव निर्वाहे घ्राणादिकमपि न सिद्ध्येत्। अतो गन्धरसरूपस्पर्शेष्वेकैकमात्रसाक्षात्काराजनकत्वेन मनसः पृथिव्यादिभेदसिद्धिरिति। इत्थञ्च साङ्कर्यस्य जातिबाधकत्वाभावेपि न मनसोऽसिद्धिरिति ॥

**इति महामहिमश्रीरामवर्मपरीक्षिद्वोश्रीमहाराजविरचितायां**
**सुबोधिन्यां**
**द्रव्यनिरूपणम् ॥**

---

**मनस्त्वजातिसिद्धिरिति।** तथाच गुरुभूतं तत्तद्व्यक्तित्वेन हेतुत्वन्नावश्यकमिति भावः ॥

# गुणनिरूपणम्

मु—मूलस्थाथशब्दव्याख्या—**द्रव्यं निरूप्येति। द्रव्येति।** द्रव्ये कर्मणि च विद्यमानां कारणतामादाय सिद्धसाधनवारणाय भिन्न इत्यन्तम्। सामान्यादिगतां तामादाय तद्दोषवारणाय सामान्यवतीति। **तत्रेति।** द्रव्यकर्मभिन्नसामान्यवन्निष्ठकारणतात्वावच्छिन्न इत्यर्थः ॥

दि—**प्रत्यक्षमेव प्रमाणमिति।** यद्येवं पामराणां कुतो न रूपादिषु गुणत्वप्रत्यक्षमिति चेन्न, रत्नत्वादेरिव गुणत्वस्यापि प्रत्यक्षे उपदेशस्य सहकारित्वात् प्रकृते तदभावात्। स्पष्टमिदं न्यायकन्दल्यां गुणग्रन्थे। **धर्मिग्राहकमानेनेति।** आद्यपतनासमवायिकारणतया हि गुरुत्वसिद्धिः। द्रव्यस्यासमवायिकारणत्वानङ्गीकारात्, आद्यपतनाश्रये कर्मान्तरादर्शनात्, कर्मणः कर्मासमवायिकारणत्वस्य भाष्ये निरस्तत्वाच्च गुरुत्वे गुणत्वमितरबाधसहकृतेन धर्मिग्राहकमानेनैव सिद्ध्यति। अदृष्टभावनयोः सुखदुःखस्मरणादिकारणतया आत्मवृत्तित्वैव सिद्धेरात्मनि च द्रव्यक्रिययोर्बाधात्तयोरपि गुणत्वसिद्धिरिति भावः। **रूपादाविति।** 'रूपादौ पण्डितपामर' इत्यादि ताळीग्रन्थपाठः। **तादृशसकलकारणतावच्छेदकतयेति।** गुणत्वस्य तत्तत्कारणतातिप्रसक्तत्वेपि द्रव्यकर्मभिन्नसामान्यवन्निष्ठकारणतात्वरूपानुगतधर्मावच्छिन्नानतिप्रसक्तत्वा

---

अथशब्दव्याख्येति। पूर्ववाक्यस्थधातुतात्पर्यविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नानन्तर्ये अथशब्दस्य शक्तिरिति शब्दमणिगादाधर्यां स्पष्टम्। एवञ्च 'तत्र क्षितिः' इति कारिकायां 'द्रव्याणि निरूप्यन्ते' इत्यादिपूरणस्य, मनोनिरूपणान्ते 'द्रव्याणि निरूपितानि' इति शेषपूरणस्य चावश्यकतया अथशब्दस्योक्तार्थलाभ इति भावः ॥

असमवायिकारणत्वानङ्गीकारादिति। समवायेन कार्यं प्रति समवाय,स्वसमवायिसमवेतत्वान्यतरसम्बन्धेन द्रव्यस्य कारणत्वासम्भवात्तदनङ्गीकार इति बोध्यम्। भाष्ये निरस्तत्वादिति। तत्र कर्मणः असमवायिकारणत्वं साधर्म्यमुक्त्वा स्वसजातीयानारम्भकत्वस्य साधर्म्यान्तरस्य प्रदर्शितत्वादिति भावः। युक्तिश्चाग्रे व्यक्तीभविष्यति। गुरुत्वादावित्यादिपदग्राह्यौ दर्शयंस्तत्र गुणत्वसिद्धिप्रकारमाह—अदृष्टेति। स्मरणादीत्यादिना प्रत्यभिज्ञानं ग्राह्यम् ॥



दवच्छेदकत्वं सम्भवति, यथा मूलावच्छिन्नतत्तत्संयोगातिप्रसक्तत्वेपि संयोगत्वावच्छिन्नानतिप्रसक्ततया द्रव्यत्वस्य संयोगसामान्यावच्छेदकत्वमित्याशयः। **सिद्धिप्रसङ्गादिति।** प्रतिबन्देरनुत्तरत्वमभिसन्धायाह—**पारिमाण्डल्यस्येति। अन्यत्र विस्तर इति।** विस्तरः प्रभायां द्रष्टव्यः। इदमत्र चिन्त्यम्—रूपादिचतुर्विंशतौ कणादादीनां परिभाषैव गुणपदस्य वर्तते, यथा साङ्ख्यानां सत्त्वरजस्तमस्सु। परिभाषाया अपि जातिसाधकत्वे अस्मदिच्छातोपि तत्सम्भवादप्रामाणिकानन्तजातिकल्पनाप्रसङ्गः। ज्ञायमानकरणतावादिमतमाश्रित्य द्रव्यं गुणवत्त्वादित्यनुमानेन, प्रभादर्शितानुमानान्तरैश्च गुणत्वजातिसिद्धावपि तस्य कर्मव्यावृत्तत्वं न लभ्यत इति पूर्वमेवावेदितमिति। वस्तुतस्तु, 'मौर्व्यां द्रव्याश्रिते सत्त्वशौर्यसन्ध्यादिके गुणः' इत्यादिकोशैर्गुणपदस्य रूपादिष्वपि शक्तेरावेदितत्वाच्छक्यतावच्छेदकतया सकलगुणसाधारणगुणत्वजातिसिद्धिर्निष्प्रत्यूहैवेति ॥

मु—**द्रव्यत्वव्यापकतावच्छेदकेति।** द्रव्यनिष्ठाभावप्रतियोगितानवच्छेदकेत्यर्थः। द्रव्यनिष्ठत्वञ्च निरवच्छिन्नविशेषणतया बोध्यम्, तेन जन्यद्रव्येषूत्पत्तिक्षणे गुणाभावेपि न क्षतिः। भेदघटितं व्यापकत्वमत्र विवक्षितमिति केचित्। तन्न, गगनादौ 'द्रव्यकर्मणोरभावात्' इत्यग्रिमग्रन्थस्यासामञ्जस्यप्रसङ्गात्। **द्रव्यस्य न निर्गुणत्वमिति।** इदञ्च ध्वंसप्रागभावाधिकरणे नात्यन्ताभाव इति प्राचीनमतानुसारेण। अन्ये तु निर्गुणपदस्य गुणवदवृत्तिधर्मवदर्थकतां ग्रन्थकार एवावोचदिति न दोष इत्याहुः। गुणसमवायिकारणत्वाभावोऽर्थ इति कश्चित्। तन्मन्दम्, गुणांशस्य निष्प्रयोजनत्वात्। ननु गुणे गुणानङ्गीकारः कुत इति चेत्, अप्रत्यक्षादनवस्थाप्रसङ्गाच्चेत्यवेहि। एकं

---

अवच्छेदकत्वं सम्भवतीति। प्रत्येकातिप्रसक्तत्वेप्यवच्छेद्यतावच्छेदकावच्छिन्नानतिप्रसक्ततया सामान्यावच्छेदकत्वं शिरोमणिनाप्युक्तम्, यथा 'घटपूर्ववृत्तित्वस्य प्रतिदण्डं भिन्नत्वेपि वह्निसामानाधिकरण्यस्य वा प्रतिधूमं भिन्नत्वेपि दण्डत्वं धूमत्वं वा तत्सामान्यावच्छेदकम्' इति। पूर्वमिति। गुणविभागग्रन्थतरङ्गिणीव्याख्यानावसर इत्यर्थः। दीधितिकारमतं समर्थयति—वस्तुतस्त्विति। द्रव्याश्रित इति। रूपरसादिचतुर्विंशतावित्यर्थः। गुणपदस्य रूपादिष्वपि शक्तेरिति। अत्र 'कार्यं निदानाद्धि गुणानधीते' इत्यादिमहाकविप्रयोगा अपि प्रमाणतया बोध्याः ॥

असामञ्जस्यप्रसङ्गादिति। यदि भेदघटितं व्यापकत्वं विवक्षितमभविष्यत्, तदा द्रव्यकर्मवद्भेदादित्येवावक्ष्यदिति भावः। ग्रन्थकार एवावोचदिति। 'गुणादिर्निर्गुणक्रियः' इति कारिकाव्याख्यानावसर इति बोध्यम्। निर्गुणपदस्य लक्षणां विनैवोपपत्तौ उक्तार्थकत्वकल्पनमनुचितमित्यस्वरसः आहुरित्यनेन सूचितः। निष्प्रयोजनत्वादिति। अखण्डाभावसम्पादकतयापि न सार्थक्य

रूपम् इत्यादिव्यवहारश्चोपचारात्। एवमेव रूपं चलतीत्यादिरपि प्रत्ययः, स्वव्यापकस्य मूर्तत्वस्य निवृत्त्या क्रियाया अपि गुणान्निवृत्तेः ॥

**दि—पदार्थविभाजकोपाधिमत्त्व इति** । उपाधिमत्त्वं सर्वाधारतानिया मकातिरिक्तसम्बन्धेन बोध्यम्, तेन न जन्यद्रव्येऽतिव्याप्तिः । यदि च समवायेन, तदा सामान्यवत्त्वे सतीति न देयम् ॥

**मु—वेगेनेति** । वेगपदेनेत्यर्थः । **मूर्तगुणा इतीति** । मूर्तानामेव गुणा इति सावधारणत्वस्य विवक्षितत्वम्, विशेष्यभागस्य च प्रयोजनाभावान्न लक्षणे घटनमिति बोधयति—**अमूर्तेष्विति** । एवमग्रेपि । 'लक्षणम्' इत्यादिः 'अग्रेपि' इत्यन्तो ग्रन्थः प्रक्षिप्तः ॥

**दि—प्रदर्शितेति** । 'प्रदर्शितमूर्तगुणानाम्' इति पाठः । **अमूर्तगुणेति** । अत्र गुणपदं समवायेन वृत्तितालाभाय । गुणत्वव्याप्यत्वं गुणत्वन्यूनवृत्तित्वरूपं गुणत्व सत्तयोर्व्यावृत्त्यर्थम्, अन्यथा असम्भवापातात्। 'अमूर्तेषु न वर्तन्ते' इत्यस्य नामूर्त गुणघटितलक्षणकरणे तात्पर्यम्, किन्तु रूपादीनां मूर्तत्वाभाववद्वृत्तित्वरूपमूर्तत्व व्याप्यताबोधन एवेत्यभिप्रायवान् लाघवमभिसन्धायाह—**मूर्तत्वव्याप्यतेति** । अपकर्षा ख्यजातिमादाय घटादिपरिमाणेऽतिव्याप्तिवारणाय जातौ परिमाणावृत्तित्वमपि देयम् । **विशेष्यीभूतगुणत्वस्येति** । इदञ्च मूर्तगुणवृत्तीत्यत्र गुणत्वेन गुणनिवेशाभिप्रायेण । अखण्डाभावसम्पादकतया च नानर्थक्यम् । समवायेन मूर्तवृत्तिवृत्तीत्येवं लक्षणकरणे कर्मत्वादीनां तादृशजातित्वान्न कर्मण्यतिव्याप्तिः । अतः सामान्यादिवारणमेव तत्प्रयोजन मवसेयम् । **रूपादावतिव्याप्तमिति** । एकत्वादावव्याप्तिवारणाय उभयवृत्तित्वं न केवलं व्यक्तिद्वयवृत्तित्वरूपम्, किन्तु स्वप्रतियोगिवृत्तितावच्छेदकत्व,स्वानुयोगिवृत्तिताव च्छेदकत्वोभयसम्बन्धेन भेदविशिष्टधर्मवत्त्वरूपं वक्तव्यम् । एवञ्च रूपादावतिव्याप्तिरि

---

मिति भावः । **उपचारादिति** । सामानाधिकरण्यसम्बन्धेनाश्रयगतैकत्वादिकमवलम्ब्येत्यर्थः । **सावधारणत्वस्येति** । अब्भक्ष इत्यादिवदिति बोध्यम् ॥

**समवायेन वृत्तितेति** । एवञ्चामूर्तवृत्तिवृत्तित्वघटितमेव लक्षणम् । समवायेनामूर्तवृत्ति त्वाविवक्षणे रूपादेरपि कालिकसम्बन्धेन कालवृत्तितया असम्भवो बोध्यः । तादृशजातित्वा दिति । गुणत्वव्याप्यत्वस्य गुणत्वन्यूनवृत्तित्वरूपत्वादिति भावः । वाचकत्वपदस्य यथाश्रुतार्थक



त्यर्थः । मूर्तवृत्तिवृत्त्यमूर्तवृत्तिवृत्तीत्यादिलक्षणं मूलाल्लभ्यते, तत्र मूर्तेत्यादिभागस्याघट नादमूर्तत्वस्थाने कालनिष्ठतद्व्यक्तित्वघटनाच्च लाघवमभिसन्धायाह—**कालवृत्तिवृत्तीति** । 'उभयेषाम्' इति मूलस्वारस्यभङ्गमसहमानः मूर्तामूर्तपदं मुक्तावलीस्थं सर्वद्रव्योपलक्षक मित्यभिप्रायवानाह—**द्रव्यत्वव्यापकतेति** । 'द्रव्यत्वव्यापकतावच्छेदकगुणत्वव्याप्य जातिमत्त्वस्य' इति पाठः साधुः । सत्तागुणत्वयोर्व्यावृत्तये गुणत्वव्याप्येति । 'द्रव्यत्व समव्यापकतावच्छेदकजातिमत्त्वस्य' इति मुद्रितः पाठः । गुणत्वव्यावृत्त्यलाभात् स हेयः । **बहुत्वविशिष्टे शक्तत्वादिति** । पङ्कजादिपदवदनेकपदं बहुत्वविशिष्टे योग रूढमित्याशयः ॥

**मु—त्रिचतुष्ट्वेति** । 'त्रित्वचतुष्ट्वादिकम्' इति ताळीग्रन्थपाठः ॥

**दि—तथाचेति** । वाचकत्वं बोधकत्वम् । लाघवाद्बहुत्वत्वजातिविशिष्टा वच्छिन्ने अनेकपदस्य शक्तावपि एकत्वान्यसंख्याविशिष्टे लक्षणेति भावः । यद्वा, पुत्रद्वयपितरि अनेकपुत्रोऽयमिति व्यवहारादनेकपदस्य बहुत्वविशिष्टे रूढिर्नास्ति, किन्तु एकत्वान्यसंख्याविशिष्ट इति भावः । संख्याविशिष्टत्वं पर्याप्तिसम्बन्धेन । पर्याप्तिश्च न प्रत्येकवृत्तिरित्याशयः । प्रत्येकमपि पर्याप्तिर्भवतीति मतेनाह—**स्वाश्रयेति** । स्वं लक्ष्यत्वे नाभिमतम् । घटादावतिव्याप्तिवारणाय गुणत्वनिवेशः । केचिदित्यनेनास्वरसः सूचितः । तद्बीजन्तु 'द्वित्वादीनि द्विवृत्तीनि, त्रित्वचतुष्ट्वादिकं त्रिचतुरादिवृत्ति' इति लक्षणसमन्वय ग्रन्थस्यानानुगुण्यमेव । **स्वसमानेति** । एकत्वमत्र तद्व्यक्तित्वम् । तत्कत्वं तत्समानाधि करणत्वम् । स्वपदेन रूपादिधरणे तत्समाधिकरणा या एकत्वव्यक्तिः, तद्भेदस्य तद्रूपादिसमानाधिकरणत्वाभावाल्लक्षणसमन्वयः । अत्र कर्मादिवारणाय गुणत्वमपि लक्षणे निवेश्यम् । एवमग्रेपि । नन्वेकत्वानामननुगमाल्लक्षणाननुगम इत्यत आह—**यद्वेति** । अत्र स्वपदेन घटपटादिगतद्वित्वादिधरणे स्वाश्रयघटभेदः पटे, तत्र च

---

त्वनिर्वाहायाह—यद्वेति । **अनानुगुण्यमेवेति** । एकत्वान्यसंख्याविशिष्टाश्रितत्वस्य विवक्षितत्वे तत्र तत्र लक्षणसमन्वये एकत्वभिन्नसंख्येत्यनेन कस्याः संख्याया ग्रहणमिति ज्ञापयितुं तद्ग्रन्थोप योग इति बोध्यम् । नन्वेकत्वं यदि संख्यारूपम्, तदा गु[illegible]र्मस्याभावप्रतियोगितानवच्छेदकत्वपक्षे द्वित्वादावतिव्याप्तिः, द्वित्वसमानाधिकरणैकत्वव्यक्तिमद्भेदस्य प्रतियोगितायां तद्व्यक्तित्वेन संख्यारूपै कत्वस्यानवच्छेदात्, लाघवेनैकत्ववन्निष्ठतद्व्यक्तित्वस्यैव तत्रावच्छेदकत्वोपगमादित्यत आह—**एकत्व मत्रेति** । **कर्मादीति** । अत्रादिपदेन विशेषो ग्राह्यः । **गुणत्वमपीति** । अनेन प्रभाकृदुक्तं विशेषे

न द्वित्वाद्यत्यन्ताभाव इति न द्वित्वादावतिव्याप्तिः। नच स्वाश्रयप्रतियोगिकोभयभेदमादायासम्भव इति वाच्यम्, स्वाश्रयान्योन्याभावेत्यनेन स्वाश्रयेतरावृत्तिप्रतियोगिताकभेदस्य विवक्षितत्वात्। नच स्वत्वघटितत्वेनाननुगमः, पदार्थविशिष्टप्रतियोगिताकभेदविशिष्टाभावप्रतियोगित्वे उक्तार्थस्य पर्यवसानात्। पदार्थविशिष्टत्वं प्रतियोगितायां स्वाश्रयविशिष्टत्वसम्बन्धेन। स्वाश्रयवैशिष्ट्यं स्वप्रतियोगिताकभेदवद्वृत्तित्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन। भेदवैशिष्ट्यञ्चाभावे स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वरूपव्यापकतासम्बन्धेनेति। अत्र स्वाश्रयत्वमत्यन्ताभावप्रतियोगित्वञ्च समवायसम्बन्धावच्छिन्नं ग्राह्यम्, तेन कालिकेन तद्धटरूपाश्रयस्य पटस्य भेदः तद्धटेपि, तत्र च न तद्रूपात्यन्ताभाव इति व्यापकत्वभङ्गादसम्भवस्य, एवं संयोगाद्याश्रयभेदव्यापकत्वं संयोगेन संयोगाद्यभावस्येत्यतिव्याप्तेश्च न प्रसङ्ग इति ध्येयम्। स्वसमवेतत्व,स्वभिन्नसमवेतत्वोभयसम्बन्धेन किञ्चिद्विशिष्टान्यत्वे सति गुणत्वमित्यादिकमपि साधर्म्यं सम्भवतीत्यवधेयम् ॥

मु—**स्पर्शान्ता इति**। 'स्पर्शान्ता इति' इति पाठः। एवं 'वैशेषिकाः' इत्यत्र 'वैशेषिका इति' इति च। **विशेषा इति**। स्वाश्रयव्यवच्छेदसमर्थगुणत्वावान्तरधर्मसमवायिन इत्यर्थः। रूपं भास्वरत्वादिना, रसोऽम्लत्वादिना, गन्धो गन्धत्वादिना, स्पर्श उष्णत्वादिना, स्नेहः स्नेहत्वेन, सांसिद्धिकद्रवत्वं तत्त्वेन, बुद्ध्यादयोपि बुद्धित्वादिना स्वाश्रयमितरेभ्यो व्यवच्छिन्दन्तीति तेषां वैशेषिकत्वं बोध्यमिति किरणावलीकृतः। अत्र 'रसो मधुरत्वादिना' इति क्वचित् पाठः। स प्रामादिकः, मधुरत्वस्य पृथिवीजलवृत्तितावच्छेदकतया व्यावर्तकतावच्छेदकत्वासम्भवात् ॥

दि—**वायुवृत्तिवृत्तीति**। संस्कारत्वस्य तादृशधर्मत्वान्न स्थितस्थापकेऽतिव्याप्तिः। **असम्भववारणायेति**। लक्ष्यैकदेशे लक्षणासम्भवरूपाव्याप्तिवारणायेत्यर्थः।

---

ष्वतिव्याप्तिरूपं दूषणमपास्तम्। पदार्थविशिष्टेति। पदार्थेत्यनेन यत्र लक्षणसमन्वयः कर्तव्यः, स ग्राह्यः। **स्वाश्रयविशिष्टत्वसम्बन्धेनेति**। नच प्रतियोगितायां पदार्थविशिष्टत्वं स्वाश्रयप्रतियोगिकभेदवद्वृत्तित्वसम्बन्धावच्छिन्नस्वनिष्ठत्वादिभेदवत्त्वसम्बन्धेनैवास्त्विति वाच्यम्, तथा सति स्वाश्रयप्रतियोगिकोभयभेदमादायासम्भवाप्रवारणात्, तत्रापि प्रतियोगितायां स्वाश्रयेतरावृत्तित्वविवक्षणे अनवस्थानात्। **स्वाश्रयव्यवच्छेदसमर्थेति**। स्वाश्रयविशेष्यकेतरभेदानुमितिजनकतावच्छेदकविषयतावच्छेदकेत्यर्थः। **इतरेभ्य इति**। अष्टभ्यो द्रव्येभ्य इत्यर्थः। गुणादिभ्यो व्यवच्छेदकत्वन्तु सर्वेषां गुणानामिति न तद्वैशेषिकत्वव्यवहारे प्रयोजकमिति भावः ॥



तेन भावनान्यत्वेन समवायिनो विशेषितत्वाद्भावनायां लक्षणसमन्वयेपि न क्षतिः। स्पर्शसंग्रहायेति मास्तोक्तौ मनोवृत्तिवृत्तित्वमेव धर्मे निवेश्यतामित्याक्षेपः स्यादित्यतोऽसम्भवप्रदर्शनम्। रूपावृत्तित्वं रसावृत्तित्वं वाऽस्त्विति शङ्कां वारयितुम्—**स्पर्शसंग्रहाय चेति** ॥

भा—'द्रवो नैमित्तिकस्तथा' इत्येतद्देशीयपाठः। **सामान्यगुणा इति**। 'सामान्यं साधर्म्यं तद्रूपा गुणाः सामान्यगुणाः, न स्वाश्रयव्यवच्छेदाय प्रभवन्तीत्यर्थः।' इति किरणावली। संख्यादीनां विशेषत्वन्त्वाश्रयविशेषकृतमिति कन्दलीकाराः ॥

दि—**वेगद्रवत्वावृत्तीति**। स्थितस्थापकसंग्रहाय वेगपदमत्रापि भावनान्यसंस्कारपरम्। स्थितस्थापकस्य पृथिव्यादिचतुष्टयवृत्तित्वपक्षे तु यथाश्रुतमेव साधु। **द्रवत्वम्** अजलद्रवत्वम्, तेन न जलद्रवत्वेऽतिव्याप्तिः। **द्रव्यविभाजकतावच्छेदकमिति**। 'द्रव्यविभाजकोपाधिः' इति पाठः। **सत्यन्तमिति**। नच जलीयमधुररसे पृथिवीगतमधुररसव्यावृत्तजातिविशेषे मानाभावान्मधुररसेऽतिव्याप्तिरिति वाच्यम्, तयोर्विलक्षणजातिमत्त्वस्यानुभवबलेनाङ्गीकारात्। **शब्दविशेषेति**। 'शब्दविशेषजनकतावच्छेदकजात्यवच्छिन्ने भेरीदण्डसंयोगे, तादृशकठिनावयव' इत्यादिपाठः। **जातिपदमिति**। नच कालिकादिसम्बन्धेन संख्यादेरपि तादृशजातिमत्त्वादव्याप्तिवारणाय प्रतियोगितायां समवायसम्बन्धावच्छिन्नत्वं निवेशनीयम्, इत्थञ्च जातित्वेन विवक्षणं व्यर्थमिति वाच्यम्, तन्निवेशस्फोरणायैव जातिपदोपादानात्। एतदुत्तरं 'द्रव्यविभाजकोपाधेश्च' इति पाठः। **तत्तद्व्यक्तित्वेनेति**। स्वविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकपृथिवीत्वत्वाद्यन्यतमकत्वं जातिविशेषणम्। पृथिवीत्वत्वादिकं पृथिवीत्वादिनिष्ठतत्तद्व्यक्तित्वमेव। अत्रेदमवधेयम्—गन्धत्वस्नेहत्वशब्दत्वज्ञानत्वादिकमादाय गन्धादावतिव्याप्तिवारणायान्यतमत्वकोटौ पृथिवीत्वत्वजलत्वत्वाकाशत्वत्वात्मत्वत्वानां निवेशावश्यकत्वेपि तेजस्त्वत्वादीनां पञ्चानां निवेशस्यानतिप्रयोजनकत्वमेव, तेजस्त्वत्वस्याप्रवेशेपि भास्वरशुक्लोष्णस्पर्शयो रूपस्पर्शान्यत्वदलेनैव वारणादिति। यद्यपि गुरुत्व,द्रवत्व,मनोवृत्तिगुणान्य

---

**स्वाश्रयव्यवच्छेदायेति**। स्वाश्रयस्याष्टद्रव्यातिरिक्तत्वसाधनायेत्यर्थः, तेन नैमित्तिकद्रवत्वस्य सतद्रव्यातिरिक्तत्वसाधकत्वेपि न सामान्यगुणत्वहानिः। ननु सङ्ख्यादयोपि तत्तद्व्यक्तित्वेन स्वाश्रयव्यवच्छेदाय प्रभवन्तीति तेषां सामान्यगुणत्वं भग्नमित्यत्राह—**सङ्ख्यादीनामिति**। **आश्रयविशेषकृतमिति**। तथाच तेषां भेदकत्वमाश्रयभेदेन परस्परभेदसिद्ध्युत्तरमेव, न तु

तमवृत्ति,जलद्रवत्वावृत्तिजातिमत्त्वे सति भावनान्यत्वम्, तादृशान्यतमवृत्तिरूपावृत्तिजातिमत्त्वे सति भावना,जलद्रवत्वान्यत्वं वा सामान्यगुणानां लघुभूतं लक्षणं सम्भवति, तथापि सामान्य पदस्वरससिद्धम् अनेकद्रव्यविभाजकोपाधिमद्वृत्तितावच्छेदकरूपवत्त्वं गुणेषु बोधयितु मेवमुक्तम्। **चक्षुस्त्वगुभयाग्राह्येति**। चाक्षुषनिरूपितलौकिकविषयत्व,स्पार्शननिरूपित लौकिकविषयत्वविशिष्टेत्यर्थः। **गुणसमवेतेति**। प्रभात्वजातिव्यावर्तनायेदम्। **त्रसरेणु निष्ठेति**। त्र्यणुकपरिमाणनिष्ठेत्यर्थः। **परिमाणान्यत्वेनापीति**। अपिना बहिरिन्द्रिय ग्राह्यत्वं गुण एव विशेषणमिति द्योतितम्। अग्राह्यत्वन्तु जातावेव, अन्यथा सत्ता दिकमादायातिव्याप्तेः। **लौकिकसाक्षात्कारेति**। साक्षात्कारनिरूपितलौकिकविषयता शून्यगुणवृत्तिजातिमत्त्वमेव लघुभूतमतीन्द्रियत्वं गुरुत्वादीनां लक्षणमिति केचित्। तन्न, अनुद्भूतत्वजातिमादाय रूपादावतिव्याप्तेः। एवमणुपरिमाणजीवनयोनियत्नयोर्व्या वृत्तिरपि गुरुभूतलक्षणानुसरणबीजमवसेयम्। अत्र गुणत्वन्यूनवृत्तिसंस्कारत्वान्यत्वयोः स्थाने वेगावृत्तित्वनिवेशे वेगेऽतिव्याप्तिर्बोध्या। अथ कुतोऽणुपरिमाणादीनां लक्ष्य ताऽत्र न परिगृहीतेति चेत्, भाष्याद्यनुसारायैवेति बोध्यम् ॥

मु—'कारणगुणेन कार्यगुणा उत्पद्यन्त इति कारणगुणपूर्वकाः' इत्येत द्देशीयपाठः ॥

दि—**पाकजादाविति**। 'पाकजरूपादौ' इति पाठः। **गुणत्वव्याप्यत्वं तदर्थ इति**। अत्र गुणत्वव्याप्यत्वं गुणवृत्तित्वरूपम्, गुणत्वसत्तयोः प्रथमदलेन विवक्षणीयपरत्वाद्यवृत्तित्वेन च वारणसम्भवात्। **नीलत्वादिनेति**। स्नेहे गुरुत्वे च गुणत्वव्याप्यव्याप्यजातिरुत्कर्षादिरेव ग्राह्यः। **कर्मजवेगे चेति**। चकारेण चित्ररूप स्यापि संग्रहः। **अव्याप्तिरिति**। नित्यरूपादौ जन्यत्वाभावप्रयुक्तम्, इतरेषु च दर्शि तेषु जनकगुणानां सजातीयत्वाभावप्रयुक्तं, कर्मणश्च गुणत्वाभावप्रयुक्तं लक्षणासत्त्वमव सेयम्। **गुणजन्यवृत्तीति**। नच कालिकसम्बन्धावच्छिन्नगुणनिष्ठजनकतानिरूपित

---

गुणत्वावान्तरधर्मपुरस्कारेण साक्षादिति भावः ॥

अखण्डाभावघटकतया सार्थक्यात्—**अनतीति**। तेजोद्रवत्वे विलक्षणजात्यनङ्गीकारे तत्राव्याप्तेर्लक्षणान्तरमाह—**तादृशेति**। गुणत्वादिव्यावृत्तये रूपावृत्तीति। **केचित्** प्रभाकृतः। भाष्याद्यनुसारायैवेति। 'गुरुत्वधर्माधर्मभावना ह्यतीन्द्रियाः' इति भाष्ये अणुपरिमाणादेर्लक्ष्य त्वेनागणनादिति भावः ॥



जन्यतामादाय द्वित्वादावतिव्याप्तिरिति वाच्यम्, जनकतायां स्वसमवायिसमवेतत्वसम्ब न्धावच्छिन्नत्वस्य, जन्यतायां समवायसम्बन्धावच्छिन्नत्वस्य वा निवेशेन तद्वारणात्। जातौ पृथक्त्वत्वातिरिक्तत्वनिवेशनप्रयोजनं पृथक्त्वग्रन्थे व्यक्तीभविष्यति। 'भावनावृत्त्य न्यत्वेन च' इति पाठः। ननु पाकजरूपादीनामलक्ष्यत्वमभिधाय तत्रातिव्याप्तिवार णाय लक्षणेऽप्यपाकजत्वदलदानाद्वरं तेषामपि लक्ष्यत्वोक्तिरत आह—**पाकजरूपादी नामितीत्यादि**। तथाच व्यवहार एव लक्ष्यतायां प्रयोजकः, तदनुसारिणा च लक्षणेन भाव्यमिति नात्र कोपि शङ्कावकाश इति भावः। व्यवहारश्चेत्थमिति भाष्यादौ स्पष्टम्। लक्ष्यत्वस्य व्यवहाराधीनत्वादेव यथाश्रुते भावाभावरूपलक्षणद्वयस्याप्यलक्ष्यत्वं केषाञ्चिद्गुणानां दर्शयति—**अत्रेति** ॥

मु—**अपाकजमिति**। एतदुत्तरं 'कारणगुणोद्भवा इति। तथैकत्वमपि बोध्यम्। कर्मजा इति। कर्मजत्वं यद्यपि' इत्यादिपाठः। **संयोगजसंयोग इति**। विभागजविभागस्य वेगजवेगस्याप्युपलक्षणमेतत्। **कर्मजन्येति**। जन्यतात्र पूर्ववत् समवायसम्बन्धावच्छिन्ना ग्राह्या, तेन न कालविधया कर्मजन्ये रूपादावतिव्याप्तिः। एवं जातौ संस्कारत्वान्यत्वनिवेशनान्न भावनादावतिव्याप्तिरिति च बोध्यम्। नचैव मपि समवायेन घटं प्रति स्वाश्रयसंयोगसम्बन्धेन चक्रभ्रमणस्य हेतुत्वात् घटेऽति व्याप्तिस्तदवस्थैवेति वाच्यम्, गुणत्वव्याप्यत्वस्य गुणवृत्तित्वघटितत्वात्, कर्मनिष्ठ जनकतायामेव समवायसम्बन्धावच्छिन्नत्वनिवेशाद्वा दोषाभावात्। **क्वचिदिति**। पाठोऽयं क्वाचित्कः ॥

---

नन्वेकपृथक्त्वत्वादिजात्यस्वीकारेण पृथक्त्वे गुणत्वव्याप्यव्याप्यजात्यप्रसिद्ध्या अति व्याप्तेरभावात् पृथक्त्वत्वातिरिक्तत्वविशेषणं व्यर्थमित्यत आह—**जाताविति**। **व्यक्तीभवि ष्यतीति**। एकपृथक्त्वादिनिष्ठद्विपृथक्त्वादिनिरूपितापकर्षजात्या अवयवावयव्येकपृथक्त्वयोः सा जात्यं सम्भवतीति भावः। **व्यवहारः** कारणगुणपूर्वकत्वव्यवहारः। **इत्थमिति**। मुक्ता वल्युक्तप्रकारेणेत्यर्थः। तत्परिगणितानामेवेति यावत्। दिनकरोक्तनिष्कृष्टरूपस्य भावाभावरूपत्वा भावात्—**यथाश्रुत इति**। **भावाभावरूपलक्षणद्वयस्यापीति**। अपिशब्दो भावरूपलक्षण लक्ष्यबहिर्भूतस्याभावरूपलक्षणलक्ष्यत्वं लोकसिद्धमित्यावेदयन् विरोधमुद्भावयति ॥

**घटेऽतिव्याप्तिरिति**। गुणत्वमादाय रूपादावतिव्याप्तिवारणाय गुणत्वव्याप्यत्वस्य गुणत्व न्यूनवृत्तित्वरूपत्वविवक्षणस्यावश्यकत्वादिति भावः। कालिकादिसम्बन्धेन गुणवृत्तित्वमादायातिव्या प्तिवारणाय वृत्तितायां समवायसम्बन्धावच्छिन्नत्वं विवक्षणीयम्। एवञ्चावश्यघटकस्य तस्यान्यत्र निवेशेनैवोपपत्तौ गुणवृत्तित्वनिवेशनं गौरवायेत्याशयेनाह—**कर्मनिष्ठेति** ॥

**भा—भवेदसमवायित्वमिति।** असमवायिकारणत्वमात्रमित्यर्थः। तेन संयोगादावुभयकारणतावति नातिव्याप्तिः। एवञ्च स्पर्शपदमुष्णेतरस्पर्शपरम्। अत एवैतत्साधर्म्यप्रकरणे भाष्ये स्पर्शे अनुष्णेति विशेषणं सङ्गच्छते। नचैवमन्त्यावयविरूपादावव्याप्तिरिति वाच्यम्, ध्वंसप्रत्यक्षातिरिक्तनिरूपितनिमित्तकारणतावदवृत्तिसमवायस्वसमवायिसमवेतत्वान्यतरसम्बन्धावच्छिन्नकारणतावद्गुणवृत्तिजातिमत्त्वस्य विवक्षितत्वात्। ध्वंसप्रत्यक्षनिमित्तकारणरूपादिवृत्तिरूपत्वाद्यसंग्रहवारणाय निरूपितत्वान्तं निमित्तकारणताविशेषणम्। सुखत्वादिव्यावृत्तये गुणे कारणत्वान्तनिवेशः। शब्दत्वस्य रूपत्वादीनाञ्च संग्रहाय सम्बन्धद्वयनिवेशः। कर्मत्वोत्क्षेपणत्वादिव्यावृत्तये गुणेति। नच कर्मणोपि कालविधया निमित्तत्त्वात् प्रथमदलेनैव तद्व्यावृत्तिरिति वाच्यम्, एतद्रीत्या रूपत्वादेरप्यसंग्रहापत्त्या तादृशकारणताभेदस्य निमित्तकारणतायामवश्यनिवेश्यत्वात्। यद्यपि स्पर्शत्वं नैतादृशजातिः, तथापि शीतत्वादिकमादायानुष्णस्पर्शेषु लक्षणसमन्वयः। वस्तुतस्तु, असमवायित्वादित्रयं न लक्षणत्वेनाभिमतम्। किन्तु स्वरूपप्रदर्शनमात्रम्। अत एव 'एवमन्यत्रापि' इति ग्रन्थव्याख्यानावसरे प्रादेशिकत्वरूपदूरस्थलक्षणपरत्वोक्तिर्दिनकरभट्टस्य सङ्गतेति बोध्यम्॥

**मु—**'पृथक्त्वेत्यत्र' इत्यारभ्य 'एकपृथक्त्वम्' इत्यन्तं प्रक्षिप्तम्। **द्वितीय शब्दं प्रतीति।** मूलस्य न्यूनतापरिहारायाह—**एवमिति।** 'एवं स्थितस्थापकेपि ज्ञेयम्' इति साधुः पाठः॥

**भा—स्यान्निमित्तत्वमिति।** निमित्तत्वमेवेत्यर्थः। अवधारणेन चासमवायिकारणत्वव्यवच्छेदः। यद्यस्य साधर्म्यत्वमभिमतम्, तदा असमवायिकारणावृत्तिगुणवृत्तिजातिमत्त्वे सति कारणत्वं तदवधेयम्। अत्रासमवायिकारणत्वं, तत्त्वं वा

---

**कर्मत्वेति।** कर्मत्वस्य चक्रभ्रमणादिनिमित्तकारणवृत्तित्वात्—उत्क्षेपणत्वादीति। **नैतादृशेति।** स्पर्शत्वस्य पाकजनिमित्ते उष्णस्पर्शे वृत्तित्वादिति भावः॥

**असमवायिकारणेति।** घटत्वादिजातिमादायातिव्याप्तिवारणाय गुणवृत्तित्वनिवेशः। नन्वसमवायिकारणत्वं समवाय,स्वसमवायिसमवेतत्वान्यतरसम्बन्धावच्छिन्नकारणत्वम्, एवञ्च समवायेनेच्छादिकारणे ज्ञानादावव्याप्तिरित्यत आह—**अत्रासमवायिकारणत्वमिति।** ननु कारणताया अखण्डोपाधिरूपत्वेपि सम्बन्धादिभेदेन भेदोऽङ्गीकार्यः, एवञ्च लाघवात् स्वरूपसम्बन्धरूपत्वमेव युक्तमित्यनुगम इत्यत आह—**तत्त्वं वेति॥**



अखण्डोपाधिः, यथा पूर्वलक्षणे निमित्तकारणत्वं, तत्त्वं वा। परममहत्त्वत्वादिजातिमत्परममहत्त्वादावतिव्याप्तिवारणाय कारणत्वदलम्। अन्त्यावयविरूपादावतिव्याप्तिभिया असमवायिकारणभिन्नत्वे सति कारणत्वे सति गुणस्वरूपलक्षणत्यागः॥

**मु—स्पन्दनेति।** 'स्यन्दन' इति पाठः। एवमुत्तरत्रापि बोध्यम्॥

**दि—तथापि संयोगेति।** तथाचासमवायिकारणवृत्ति,निमित्तकारणवृत्ति,शीतस्पर्शावृत्तिजातिमत्त्वे सति गुणत्वं साधर्म्यम्। अत्र मुक्तावल्यां 'भेर्याकाशसंयोगेऽसमवायी' इति, एवं 'वंशदलाकाशविभागे' इति च सप्तम्यन्तपाठस्य साधीयस्त्वं प्रभाकृतो मन्यन्ते, व्याकुर्वते च क्लिष्टया सरण्या। तच्चिन्त्यम्, न्यायकन्दल्यां किरणावल्याञ्च प्रथमान्तपाठस्यैव दर्शनात्, शब्दनिरूपितनिमित्तत्वासमवायित्वयोरेव प्रतिपादितत्वाच्च। **अकारणत्वस्योक्तत्वादिति।** उक्तत्वात् अभिप्रेतत्वात्। 'परत्वापरत्वद्वित्वद्विपृथक्त्वादीनामकारणत्वम्' इति भाष्यवचनमेव तादृशाभिप्राये मूलम्। **विस्तरस्त्विति।** अनेनात्मविशेषगुणसाधर्म्यतयोक्तं निमित्तत्वं परत्वादावतिव्यापकम्, ध्वंसप्रत्यक्षातिरिक्तनिमित्तत्वोक्तौ च सुखदुःखयोरव्यापकम्, अतो मानसेतरप्रत्यक्षपरमत्रत्यप्रत्यक्षपदमवसेयम्। यद्वा, सुखमिच्छां दुःखं द्वेषञ्चारभते। नच सुखादिज्ञानमेवेच्छादिकं जनयतीति वाच्यम्, अज्ञातसुखादेरप्रसिद्ध्या सुखादेरेव तज्जनकत्वस्य लाघवेन युक्तत्वात्। अत एव 'सुखदुःखेच्छाद्वेषप्रयत्नाश्चासमानजात्यारम्भकाः' इति प्रशस्तपादोक्तिस्सङ्गच्छते। एवञ्च प्रत्यक्षपदमपि यथाश्रुतार्थपरमित्याचार्यसूचितम्॥

**भा—अथ प्रादेशिक इति।** प्रदेशे भवः प्रादेशिकः। प्रदेशोऽवयवादिः। तदवच्छिन्नवृत्तिताक इत्यर्थः। ननु प्रदेशस्यैव संयोगादिः न प्रदेशिनः। नचाग्रे वृक्षे कपिसंयोग इत्यादिप्रतीतिरेव प्रदेशिवृत्तित्वे मानमिति वाच्यम्, वृक्षावयवाग्रवृत्तित्वस्यैव तत्र भानादिति चेन्न, यतः प्रदेशरूपाग्रादेरपि सावयवत्वान्निरवयवपरमाणुष्वेव संयोगादिः स्यात्, स च तद्वृत्तिर्न प्रत्यक्ष इति संयोगादिप्रत्यक्षाभाव आपद्येतेति प्रदेशिवृत्तित्वमप्यवश्यं स्वीकार्यम्, तत्र चाग्रादेरवच्छेदकत्वं युक्तम्। अत एव वृक्षः कपिसंयुक्त इति व्यवहारस्य प्रामाणिकत्वम्, न कपिसंयुक्त इत्यस्याप्रामाणिकत्वञ्च विना लक्षणामुपपद्यत इति॥

---

**अवयवादिरिति।** आदिपदेन शरीरादयो गृह्यन्ते॥

दि—**दैशिकेत्यादिरिति** । एतल्लाभायैव मूले अव्याप्यवृत्तिरित्यनुक्त्वा प्रादेशिक इत्युक्तिः ॥

मु—**प्रतीतिर्नास्तीति चेदिति** । पामराणामित्यादिः । **अस्त्येवेति** । 'शुक्लवर्णा सरस्वती' इत्यादिप्रचुरप्रयोगादिति भावः । नन्वेवमपि द्व्यणुकादिरूप साधारण्यं रूपत्वस्य कथं सिद्ध्यतीति चेत्, त्र्यणुकरूपं द्व्यणुकरूपञ्च रूपासमवायि कारणकं पाकाजन्यजन्यरूपत्वात् घटरूपवदित्यनुमानेनैव । एवं नीलत्वादिकमपि । **नीलरूपादीति** । 'नीलारुणादि' इति ताळीग्रन्थपाठः । एवमुत्तरत्र 'जगदनीलमापद्येत' इति च । **उत्पादविनाशेति** । 'विनाशोत्पाद' इति क्वचिद्ग्रन्थेषु पाठः । स क्रमानुसारित्वाज्ज्यायान् । अग्रेपि 'विनाशोत्पादविषयकः' इति । **विनाशेति** । समवायस्यानित्यत्वस्वीकारादिति भावः । **प्रतीत्या** नीलो नष्ट इत्यादिव्यवहारजन्यप्रतीत्या । **समवायानुल्लेखात्** समवायस्याविषयीकरणात् । समवायबोधकपदाभावादिति भावः । अथ प्रमाणान्तरेणैक्ये सिद्धेऽन्वयानुपपत्त्या नीलादिपदानां नीलादिसमवाये निरूढ लक्षणेत्यभिप्रायवानाह—**नचेति** । **प्रत्यक्षबलादिति** । 'प्रत्यक्षात्' इति पाठः ॥

दि—**इत्यादिप्रत्यक्षबाधितमिति** । आदिना नीलतर इत्यादिप्रत्यक्षसंग्रहः । एकस्मिन् तरतमभावासम्भवाद्बाधो निरपवादः । इदमुपलक्षणम् । नीलादीनामैक्ये तेषां सामान्यत्वं स्यात्, नित्यैकानुगतस्य सामान्यत्वात् । अस्तु तर्हि सामान्यत्व मिति चेन्न, गोत्वादिभिस्साङ्कर्यापत्तेरिति । ननु 'एतेन रसादिकमपि व्याख्यातम्' इत्युक्तिरसङ्गता, रसादेर्निरूपयिष्यमाणत्वादिति शङ्कामपाकर्तुमाह—**एतेनेदशेति** ।

---

पामराणाम् अनधीतशास्त्राणाम् । तेषामाकृत्यादावेव रूपशब्दप्रयोग इत्याशयः । **प्रचुरप्रयोगादिति** । पामरसाधारणप्रयोगादित्यर्थः । समवायोल्लेखने कारणाभावं विशदयितुं व्याचष्टे—**नीलो नष्ट इत्यादीति** ॥

ननु नीलो नष्ट इत्यादिप्रत्यक्षेण नीलसमवाय एव विषयीक्रियत इत्युक्तम्, एवञ्च लाघवं न प्रत्यक्षबाधितमित्याशङ्क्याह—**आदिनेति** । ननु स्वाश्रयावयवेषु विजातीयरूपवदवयवसंयोगतद्राहित्यप्रयुक्त एव रूपे तरतमभावप्रत्ययो भ्रमात्मकः, यथा गुहाभ्यन्तरादौ प्रविष्टतरणिकिरण न्यूनताधिक्याधीनोऽन्धकारेऽभावरूपे मन्दनिबिडतादिप्रत्ययः । नचैवं नीलतररूपे चित्रत्वप्रत्यक्षापत्तिरिति वाच्यम्, दोषवशेन विविच्यावयवरूपदर्शनात्मककारणाभावादिति नैतत्प्रत्यक्षमपि बाधकं भवतीत्यत आह—**इदमुपलक्षणमिति** ॥



**चक्षुर्मात्रगृहीतस्नेहविशेषेति** । विशेषगुणत्वविवक्षणे संख्यादौ नातिव्याप्तिरिति तत्त्यागः । यद्यप्येवमपि तादृशसांसिद्धिकद्रवत्वेऽतिव्याप्तिः शक्यते वक्तुम्, तथापि तादृश द्रवत्वसामान्येऽतिव्याप्त्यभावेन तद्विशेषपर्यन्तानुधावनक्लेशमनुचिन्त्य तदपि परित्यक्त मित्यवसेयम् । **चक्षुर्मात्रग्राह्यजातिमदिति** । चाक्षुषानिरूपितलौकिकविषयताशून्यत्वे सति लौकिकविषयतावती या जातिः, तद्वदित्यर्थः । उपनीतभानमादायासम्भववार णाय प्रथमं लौकिकेति । गुरुत्वत्वादिकमादायातिव्याप्तिवारणाय द्वितीयं लौकिकेति । एकैकेन्द्रियग्राह्यत्वात्मकसाधर्म्यविचारदर्शितदिशा त्र्यणुकपरिमाणातिव्याप्तिवारणाय परिमा णान्यत्वमपि रूपलक्षणे देयम् । **एवमग्रेपीति** । 'एवमग्रेपीति' इति पाठः । तदुत्तरं 'रस' इति प्रक्षिप्तम्, रसनाग्राह्यगुणत्वव्याप्यजातिमत्त्वस्यैव रसलक्षणत्वसम्भवेन 'एवम्' इत्यस्यासाङ्गत्यापत्तेः । अत्र अतीन्द्रियरसे लक्षणगमनाय जातिघटनम् । **स्पर्श लक्षणेपीति** । स्पर्शलक्षणे गुणत्वं न निवेशनीयम्, प्रयोजनाभावात् । वायोः प्रत्यक्षत्व मते तु त्वङ्मात्रग्राह्यवायुत्वजातिमति वायावतिव्याप्तिवारणाय तदावश्यकता बोध्या । **सविषयावृत्तिरिति** । 'सविषयकावृत्तिः' इति पाठः ॥

मु—**रूपैरवयविनीति** । रूपैरेवावयविनि' इति पाठः । **चित्रं रूपमार भ्यत इति** । ननु व्याप्यवृत्तिवृत्तिजातौ सविषयकावृत्तित्ववदनुभवबलाद्रूपावृत्तित्वमपि निवे श्याविरोधस्सुघट इत्यत आह—**अत एवेति** । **नानारूपकल्पने** नानारूपेषु कल्पने । चित्रमिति प्रतीतिविषयताया इत्यादिः । एतदेव स्पष्टीकृतं चित्रमित्यादिविवरणेन ॥

दि—**इति रीत्येति** । चित्ररूपं प्रति तु कस्यापि रूपस्य न प्रतिबन्धकत्व मित्यवधेयम् । **कल्पनागौरवमिति** । नच भावकार्याणां सासमवायिकारणकत्वनियमा न्नीलादिकं प्रति स्वाश्रयसमवेतत्वसम्बन्धेन नीलत्वादिना हेतुत्वमुभयवादिसिद्धमिति न तत्कल्पनमधिकमिति वाच्यम्, रूपं प्रति गुणत्वेन रूपत्वेन वैककारणत्वेनैव तन्नियमोपपत्तेः नीलादिभेदेन दर्शितनानाहेतुताकल्पनस्य गुरुत्वात् । द्वितीयकल्पे अग्रे 'गगनादौ' इत्यादिपदग्राह्ये जलादावापत्तिर्बोध्या । **गगनादाविति** । यद्यपि नील

---

**साधर्म्यविचारदर्शितदिशेति** । चक्षुर्मात्रग्राह्यापकर्षजातिमादायेत्यर्थः । **प्रयोजना भावादिति** । वायूष्मणोरप्रत्यक्षत्वादिति भावः ॥

सम्भवति व्याप्यरूपेण कारणत्वे व्यापकरूपेण न हेतुत्वमन्यथासिद्धेरित्यत आह—**रूप त्वेन वेति** । **द्वितीयकल्पे** रूपत्वेन कारणत्वकल्पे ॥

कपालाभ्यामारब्धे घटे व्याप्यवृत्तिपीतरूपादेरापत्तिः शक्यते कर्तुम्, तथाप्यत्यन्तानिष्टत्व सूचनाय रूपजननायोग्ये गगनादौ सा कृता। नचैवमपि तादृशनीलादेर्वायावेवापत्तिः कुतो न कृतेति शङ्क्यम्, वायुसामान्यस्यावच्छेदकीभूतकपालसम्बन्धनैयत्याभावात्। तवाप्यावश्यकत्वादिति। ननु तद्व्यक्तिसमवेतसत्सामान्यं प्रति तद्व्यक्तेः कारणत्वेन प्रागभावकारणत्वेन वा नोक्तदोष इत्यत आह—किञ्चेति। अथैवं रीत्या वनमिति प्रतीतिविषयताया अनेकत्र कल्पने गौरवादतिरिक्तवनसिद्ध्यापत्तिरिति चेन्न, तत्र क्लृप्तेषु वृक्षेष्वेव विषयताकल्पनम्, अत्र तूभयवाद्यसिद्धनानाव्यक्तिषु तत्कल्पनमिति विशेषात्। एवमेकचित्रस्थाने द्वित्रादिधर्मि,तत्प्रागभावादिकल्पनागौरवञ्च बोध्यम्। नन्वेवं चित्ररूपविशिष्टस्य घटस्यैकपार्श्वमात्रग्रहणेपि चित्ररूपप्रत्यक्षापत्तिरिति चेन्न, अन्वयव्यतिरेकाभ्यां चित्रत्वेन चित्रग्रहणे नानाजातीयावयवरूपदर्शनस्य तत्सामग्र्या वा हेतुत्वावधारणात्। एतदेव सूचयत्यन्यत्र विस्तर इत्यनेन। अस्तु त्र्यणुक इति। अथ नानाजातीयरसवद्भिर्द्व्यणुकैरारब्धे त्र्यणुके को रसः। न कश्चिदिति चेत्, तेनारब्ध महावयविनोपि नीरसत्वात्तत्रापि रसानुपलब्धिप्रसङ्ग इति चेन्न, सजातीयरसादिमद्भि रेव द्व्यणुकैस्त्र्यणुकारम्भाङ्गीकारात्। अत एव त्र्यणुके इदं चित्ररूपवदिति न कस्यापि प्रतीतिः। यदि त्र्यणुके विजातीयरूपवदवयवारब्धे चित्रं जायत एव, चित्रत्वेनाप्रती तिश्चावयवरूपग्रहणरूपसामग्र्यभावादित्युच्यते, तदा नानाजातीयरसवदवयवारब्धत्र्यणुको नीरस एवास्तु, महावयव्यारम्भकेषु बहुषु त्र्यणुकेषु केषाञ्चित् सजातीयरसवद्द्व्यणुका रब्धत्वसम्भवात् तद्रसग्रहणेनैवोपपत्तिरवसेया॥

मु—क्षतेरभावादिति। एतदनन्तरं 'नव्यास्तु' इत्यादिः 'वदन्ति' इत्यन्तो ग्रन्थः प्रक्षिप्तः। 'जलादिपरमाणौ' इति मूलस्थादिपदग्राह्यं दर्शयति—तेजः

---

नैयत्याभावादिति। तथाच वायुविशेषपर्यन्तानुधावनक्लेशमनुचिन्त्य तत्र नापत्तिः कृतेति भावः। तद्व्यक्तेः कारणत्वेनेति। ननु सद्घटव्यक्तिसमवेतद्वित्वसंयोगादिव्यक्तेः पटादावुत्पत्त्या व्यभिचा रेण तद्व्यक्तिसमवेतत्वस्य विशेषणविधया कार्यतावच्छेदकत्वम्, कार्याधिकरणयत्किञ्चिद्व्यक्त्यैव कारणसत्त्वस्य कार्योत्पत्तावपेक्षितत्वं चाङ्गीकार्यम्, एवञ्च न दर्शितकार्यकारणभावेनोक्तापत्तिवारणं सम्भवतीत्यत आह—प्रागभावकारणत्वेनेति। नानाजातीयेति। अत्रायं कार्यकारणभावः स्वविषयसमवायित्वसम्बन्धेन चित्रत्वप्रकारकप्रत्यक्षं प्रति स्वविषयसमवायिसमवेतत्वसम्बन्धेन विजा तीयनानारूपदर्शनं कारणमिति। चित्ररूपप्रत्यक्षात् पूर्वं नानाजातीयावयवरूपदर्शने विवादादाह— तत्सामग्र्या वेति॥

प्रक्षिप्त इति। दिनकरभट्टादिभिरव्याख्यानात्, 'अत्र नव्याः' इत्यादिदिनकरीयग्रन्थ स्याप्रसक्तेश्चेति भावः॥



परमाणाविति। अवधारणार्थकतुशब्दव्यवच्छेद्यं दर्शयति—पृथिवीति। कापालि केति। 'कपालिका' इति पाठः॥

चक्षुर्ग्राह्यत्वापत्तेरिति। यद्यपि कठिनत्वादेः स्पर्शगतत्वेपि चक्षुः संयुक्तसमवेतसमवायादिकारणबलाच्चाक्षुषापत्तिवारणाय तत्र तस्य तादात्म्येन प्रतिबन्ध कत्वं वाच्यम्, इत्थञ्च संयोगवृत्तित्वेपि न दोषः, तथापि दर्शितरीत्या स्पर्शत्वशीत त्वादिचाक्षुषवारणाय तादात्म्येन स्पर्शमात्रवृत्तिधर्मत्वेन प्रतिबन्धकताया उभयवादिसिद्ध तया तत एव कठिनत्वादिचाक्षुषवारणं भवति, संयोगगतत्वे तु पृथक् प्रतिबन्धकत्वस्य कल्पनीयतया गौरवं बोध्यम्॥

दि—कठिनस्पर्शवदिति। इदञ्च विशेषदर्शिनामपि कठिनसंयोग इति प्रतीतिरस्तीत्याशयेन। प्रभाकृतस्तु भ्रमत्वमेवाभिप्रयन्ति। अथ प्रमात्वे कठिनो विभाग इति प्रयोगः कथं वार्यत इति चेत्, घटस्य रूपमितिवत् शाखाया वृक्ष इति प्रयोगो यथा षष्ठीग्रन्थे गदाधरभट्टाचार्येण वारितः, तथैवेत्यवेहि। इष्टापत्त्या तद्वारणमिति केचित्॥

मु—अवयविना अवष्टब्धेष्विति। स्वजनकसंयोगवत्त्वसम्बन्धेनावयवि विशिष्टेष्वित्यर्थः। यथा अवयवी जायते, तथा दृढसंयोगवत्स्विति यावत्॥

दि—पाको न सम्भवतीत्यत्र पाकपदस्य रूपादिपरावृत्तिरित्यर्थकरणे तत्र योजकजिज्ञासा न निवर्तेतेति प्रथमं तेजस्संयोगविशेषपरत्वं प्रतिपादितम्। रूपपरावृत्तेरेवात्र प्रकृतत्वात्तत्र पर्यवसानं दर्शितम्—इति यावदिति। सर्वावयवावच्छेदेनेति। सम वाय,स्वसजातीयानवच्छेदकासमवेतत्वोभयसम्बन्धेन हेतुतयेत्यर्थः। तेन परमाणोरवयवा भावेपि न तत्र पाकानुपपत्तिः। न हि श्यामा अवयवा अवयवी च रक्त इति क्वचित् दृष्टम्, ततश्चापरमाणुसर्वावयवेषु तेजस्संयोगोऽवश्यं वाच्य इति भावः। परे तु, 'अवय

---

तथैवेति। पूर्वप्रयोगाभावादेव स वारणीय इति भावः॥

समवायेति। व्यक्त्यन्तरगततेजस्संयोगमादाय परमाणौ पाकापत्तिवारणाय समवायस्य सम्बन्धमध्ये प्रवेशः। कतिपयावयवेषु तेजस्संयोगकाले घटे तेजस्संयोगात् पाकापत्तिवारणाय स्व सजातीयानवच्छेदकासमवेतत्वस्य तथात्वम्। एवञ्च घटगततेजस्संयोगस्य स्वपदेन ग्रहणे स्व

बिना अवष्टब्धेष्ववयवेषु' इति न भावलक्षणसप्तमी, किन्त्वधिकरणसप्तमी । पाको न सम्भवतीति। द्रव्यस्य प्रतिबन्धकत्वादिति भाव इति वदन्ति। तच्चिन्त्यम्, समवायेन प्रतिबन्धकत्वे अन्त्यावयविनि रूपादिनाशापत्तेः । तादात्म्येन तत्त्वे 'अवयविषु' इत्येव वक्तव्यं स्यादिति। **मानाभावेनाकल्पनादिति** । ननु बाधकाभाव एव मानमित्यत आह—**अवयविरूपनाश इति** । समवेतसमवेतरूपनिष्ठप्रतियोगितासम्बन्धेन नाशं प्रति स्वप्रतियोगिसमवेतत्वसम्बन्धेन नाशः कारणमिति कार्यकारणभावो बोध्यः । ननु दर्शितकार्यतावच्छेदककोटौ पाकाजन्यत्वस्यापि निवेशात् पाकजस्य अवयविरूपनाशस्य नानुपपत्तिरित्यत आह—**पाकाजन्यत्वस्येति** । 'पाकजन्यत्वस्य' इत्यसाधुः। रूपनाशासम्भवमुपपाद्य रूपान्तरोत्पादमपि निराकरोति—**अवयविनीलादाविति । व्यभिचारापत्त्येति** । पूर्वरूपात्मकप्रतिबन्धकसम्भवस्योपलक्षणमेतत्। 'नीलाद्युत्पादासम्भवात्' इति साधुः पाठः। घटादिद्व्यणुकपर्यन्तेष्विति षष्ठ्यर्थे सप्तमी। 'घटादिद्व्यणुकपर्यन्तम्' इत्यपि पाठः। **कार्यद्रव्यध्वंसविशिष्टेष्विति** । विभागग्रन्थस्थस्य 'स्वतन्त्रं वाऽवयवमपेक्ष्य' इति भाष्यस्य व्याख्यानावसरे 'स्वातन्त्र्यमप्यवयवस्य कार्यविनाशविशिष्टत्वमेव' इत्युदयनाचार्याः। स्वातन्त्र्यमारम्भकसंयोगराहित्यमिति केचित्। तन्मते विनश्यदवस्थावयविक्षणे परमाणुषु रूपपरावृत्तिप्रसङ्ग इष्टापत्त्या परिहरणीयः ॥

**शु—व्यूहान्तरोत्पत्तिश्चेति** । नच कुलालकृत्यादिकं विना कथं घटोत्पत्तिरिति वाच्यम्, तं विनापि खण्डघटोत्पत्तिवदुपपत्तेः। तदुपपत्तिप्रकारश्च ईश्वरानुमाने प्राक्

---

सजातीयानवच्छेदकं यत्रावयवे तेजस्संयोगावच्छेदकत्वं नास्ति सः। तत्र समवेतत्वमेव घटस्येति नापत्तिः। साजात्यमत्र तेजःप्रतियोगिकत्वेन पाकजनकतावच्छेदकजात्या वा बोध्यम्। घटादौ यत्राग्निसंयोगस्य नानात्वम्, तत्र तत्तत्संयोगानवच्छेदकत्वं केषाञ्चिदवयवानामिति तत्समवेतत्वात् सर्वावयवावच्छेदेन तेजस्संयोगेपि पाकानुपपत्तिरिति साजात्यनिवेशः। अनवच्छेदकसमवेतत्वञ्च साक्षात्परम्परासाधारणस्वावयवकत्वम्। अन्यथा घटस्य परम्परया अवयवेषु कतिपयेषु तेजस्संयोगावच्छेदकत्वाभावकाले घटे पाकापत्तिः। **अधिकरणसप्तमीति** । अन्यथा 'न सम्भवति' इत्यत्रान्वयिनः अधिकरणवाचकपदस्य पूरणीयत्वमिति भावः। **वक्तव्यं स्यादिति** । परमाणावपि पाकानुत्पत्तिप्रसङ्ग एव कुतो न कृत इति तु न शङ्क्यम्, समवेतद्रव्यत्वेन प्रतिबन्धकत्वे तद्दोषाभावात्। ननु 'अवयविषु' इत्येवास्तु ग्रन्थ इति चेन्न, उभयवादिसिद्धतेजस्संयोगनिष्ठकारणतायां सम्बन्धान्तरस्याप्यवच्छेदकत्वस्वीकारेणैवोपपत्तौ अतिरिक्तप्रतिबन्धकाभावहेतुताकल्पनस्यान्याय्यत्वात्। पाकाजन्यत्वं कार्यतावच्छेदककोटौ निवेश्य व्यभिचारवारणे दोषान्तरं दर्शयति—**पूर्वरूपेति** ॥

**खण्डघटोत्पत्तिवदिति** । पक्वघटे दण्डादिजन्यतावच्छेदकापक्वघटनिष्ठजातितो विलक्षणजातिस्वीकारात् तादृशजात्यवच्छिन्नं प्रति दण्डादेरकारणत्वादित्यर्थः। **धारणादिकमिति** । आदि



दर्शितः। नचैवमपि प्रत्यभिज्ञानम्, उपरिनिहितमूर्तान्तरधारणादिकञ्च व्यूहान्तरत्वे कथमुपपद्यत इति वाच्यम्, त्रिचतुरत्रसरेणुविभागाधीनखण्डघटवदुपपत्तेः। उक्तञ्चाचार्यैः 'सूचिव्यतिभेदेन विदलितत्रिचतुरत्रसरेणुघटादिवदुपपत्तेः' इति। अत्र 'अयमाशयः' इत्यादिः 'इत्यलमतिपीडया' इत्यन्तः किरणावलीग्रन्थो द्रष्टव्यः। एतदनन्तरम् 'अत्र' इत्यस्य स्थाने 'अथ' इति ताळीग्रन्थपाठः। 'जिज्ञासायाम्' इति तेषु न दृश्यते च। 'वैशद्याय प्रक्रिया' इति साधुः पाठः, न तु 'क्षणप्रक्रिया' इति। 'कर्मत्वं स्यात्' इत्यनन्तरं 'संयोग' इत्यादिः 'अव्याप्तिः स्यात्' इत्यन्तो ग्रन्थः प्रक्षिप्तः ॥

**दि—कारणाकारणविभागानङ्गीकार इति** । कारणक्रियाया वैयधिकरण्याभावात् तयैव कारणाकारणविभागसम्भवादिति भावः। ननु द्रव्यारम्भकसंयोगेत्यादिनियमभङ्गान्नात्र कारणक्रियाया दर्शितविभागजनकत्वसम्भव इत्याक्षेपं परिहरति—**द्रव्यारम्भकेत्यादिना । मानाभावादिति** । व्यभिचारशङ्कानिवर्तकतर्काभावादित्याशयः। **विकसत्कमलभङ्गप्रसङ्गभियेति** । अत्र 'प्रसङ्ग' इति प्रक्षिप्तम्। कमलस्य विकसत्त्वं नाम अग्रावच्छेदेन परस्परविभज्यमानदलरूपावयवकत्वम्। तस्य भङ्गो नाम नाशः, अनुत्पत्तिर्वा। अग्रावच्छेदेन दलद्वयविभागजनककर्मणा कमलारम्भकमूलावच्छिन्नदलसंयोगविरोधिविभागस्यापि जनने कमलभङ्ग एवापद्येतेति भावः। अग्रेतनस्य 'विकसत्कमलकुड्मलभङ्गप्रसङ्गः' इति मुक्तावलीग्रन्थस्याप्यत्रैव तात्पर्यम्। अत एव तत्र 'तेन कमलनाशः स्यादिति भावः' इति वक्ष्यते। विकासकाले कुड्मलनाशस्य सर्वाभिमतत्वेन तद्भङ्गापत्तेरनिष्टत्वासम्भवादिति ध्येयम्। 'का क्षतिरिति वाच्यम्' इत्यनन्तरं 'तथा सति नाशकविभागाभावेन परमाण्वाकाशसंयोगस्य नित्यत्वापत्तेः। एवं परमाण्वाकाशसंयोगरूपस्य पूर्वदेशसंयोगस्य प्रतिबन्धकस्य सत्त्वात् परमाणावुत्तरदेशसंयोगानुत्पत्त्या' इत्यादिः पाठः। **नित्यत्वापत्तेरिति** । ननु तस्मिन् परमाणावुत्पन्नेन क्रिया

---

पदेन रेखापरिमाणादयो ग्राह्याः। **त्रसरेणुविभागेत्यादि** । आकृतिसाम्येन प्रत्यभिज्ञानस्य, पतनं प्रत्यदृष्टस्य प्रतिबन्धकत्वकल्पनेन धारणस्य, अदृष्टाधीनत्वकल्पनया च रेखादेश्चोपपत्तिरिति भावः। **सूचिव्यतिभेदः** सूच्यग्रेण वेधनम् ॥

उत्पन्नस्यैव नाशः, अत्र विकसत्कमलस्योत्पत्तिरेव न सम्भवति, पूर्वकर्मणा आरम्भकसंयोगस्यैव नाशादित्यभिप्रेत्य तथैवार्थमाह—**अनुत्पत्तिर्वेति** । कमलकुड्मलभङ्ग इत्यनुक्त्वा कमलभङ्ग इत्युक्तेराशयमाविष्करोति—**कमलभङ्ग एवेति** । न तु कमलकुड्मलभङ्ग इत्येवकारार्थः।

बहुत्वसम्भवादिति भावः। ननु रक्ततारतम्यादिप्रतीत्यनुरोधेन रक्तरक्ततराद्युत्पादकतावच्छेदकजातयो नाना। तासां सर्वासामपि रूपनाशकतावच्छेदकत्वमप्यस्तु, चिरं नीरूपतापसङ्गश्च दर्शितदिशा परिहार्य इति चेन्न, पृथिवीरूपत्ववैजात्याभ्यामेव लाघवेन नाश्यनाशकभावकल्पनाया युक्तत्वात् नानाजातीनां रूपनाशकतावच्छेदकत्वासम्भवात्। 'एकत्वानेकत्वे' इत्यनन्तरम् 'अनियम्ये एव' इति प्राचीनपाठः। 'अनियते एव' इति प्रभानूदितः पाठः। 'अनियमः' इति पाठे 'एकत्वानेकत्वे' इति सप्तम्यन्तः समाहारद्वन्द्व इत्यवसेयम्। अत्र घटाद्यारम्भकपरमाणुषु तेजस्संयोगाधीनानेकरक्तध्वंसानां पूर्वं जातत्वेन पूर्वरूपविशेषध्वंसरूपसहकारिणोऽवश्यम्भावात् रक्ततारतम्यस्य तदधीनत्वोक्तिरयुक्तेति केचित्। तन्न, उत्पत्तिसम्बन्धेनैव रूपविशेषध्वंसस्य हेतुताया अभिमतत्वात्। तथा च यत्राव्यवहितपूर्वक्षणे रक्तध्वंसोत्पत्तिः, तत्र रक्ततरस्योत्पाद इत्यादिरीत्या निर्वाहसम्भवात्। एवमुत्पादकविनाशकयोः कदाचिदैक्ये उत्पादकविनाशकतावच्छेदकजात्योस्साङ्कर्यमपि तैरापादितम्। तन्मन्दम्, जात्योरैक्यस्यैवोक्तत्वात्, नाशकोत्पादकव्यक्त्योः परमनियमस्य दर्शितत्वात्। 'स्वतन्त्रेषु परमाणुष्वग्निसंयोगादौष्ण्यापेक्षात् श्यामादीनां विनाशः। पुनरन्यस्मादग्निसंयोगादौष्ण्यापेक्षात् पाकजा जायन्ते' इति भाष्यवाक्यात् स्वरसतो नाशकोत्पादव्यक्त्योर्भेद एव प्रतीयते। तत्स्वारस्यभङ्गमगणयित्वैव 'भाष्यस्य द्व्यणुकनाशक' इत्यादिदिनकरभट्टेनोपन्यस्तम्। एवं परमाणुषु रूपादीनामुत्पादविनाशौ नैकाग्निसंयोगकारणकौ रूपाद्युत्पत्तिविनाशत्वात् श्यामाद्युत्पत्तिविनाशवदित्यनुमानं यद्व्यक्तिभेदनैयत्यसाधकमत्राचार्यैः प्रदर्शितम्, तदप्रयोजकमिति चास्याशयोऽवसेयः॥

**मु—अथ परमाण्वन्तर इति।** 'अथ' इति प्रक्षिप्तम्। एतावता द्व्यणुकारम्भकयोर्मध्ये एकस्मिन् परमाणौ कर्मचिन्तनात् प्रक्रिया दर्शिताः। इदानीन्तु एकत्र द्व्यणुकविनाशिकामन्यत्र च द्व्यणुकान्तरोत्पादिकां क्रियामालम्ब्य विचारे पञ्चमादिक्षणेष्वपि गुणोत्पत्तिस्सम्भवतीति भावः। **ततः श्यामादिनाश इति।** पूर्वद्व्यणुकावयवयोरुभयोरपि परमाण्वोरिति शेषः। एवमग्रेऽपि। **इति पञ्चक्षणेति।** पञ्चमादिक्षणे रूपाद्युत्पत्तिरप्रामाणिकीति प्रभाकृतोऽभिप्रयन्ति। द्रव्यारम्भानुगुणक्रियां

---

तावच्छेदकत्वस्य सुखत्वादौ सत्त्वेपि न क्षतिः। **बहुत्वसम्भवादिति।** एकधर्मावच्छिन्नोत्पत्तौ अपरधर्मावच्छिन्नोत्पत्त्यापत्तेरिति भावः। **जातत्वेनेति।** परमाणूनामनादित्वादिति भावः। **उत्पत्तिसम्बन्धेन** उत्पत्तिक्षणावच्छिन्नाधिकरणतासम्बन्धेन॥



प्रति द्रव्यस्य प्रतिबन्धकत्वादारम्भकसंयोगनाशक्षणे द्व्यणुकनाशक्षणे वा सा क्रिया न परमाण्वन्तरे भवितुमर्हति। एवं परमाण्वोः श्यामनाशसमकालं रक्तोत्पत्तिसमकालं वा रक्तद्रव्यारम्भकसंयोगोपि न भवेत्, तत्समवायिकारणस्य रक्तद्रव्यस्य पूर्वमभावादिति। तच्चिन्त्यम्, दर्शितप्रतिबन्धकत्वकल्पने युक्तेः, नीरूपद्रव्यस्य द्रव्यारम्भकसंयोगसमवायिकारणत्वे बाधकस्य चाप्रदर्शनात्। नच तथापि सप्तक्षणा अष्टक्षणा च प्रक्रिया न सम्भवति, निर्गुणे द्रव्ये द्रव्यारम्भानुगुणक्रियाया अनुत्पादस्य मुक्तावल्यां पूर्वं प्रतिपादितत्वादिति वाच्यम्, तस्याभ्युच्चयवादत्वात्। यद्वा, परमाण्वन्तरमित्यस्य तद्द्व्यणुकारम्भकपरमाणुभिन्नपरमाणुरित्यर्थः। एतदेव स्पष्टीकृतं परमाण्वन्तरपदार्थे द्व्यणुकान्तरारम्भकत्वविशेषणं घटयता दिनकरभट्टेन। घटारम्भकेषु सर्वेष्वपि परमाणुषु युगपदेवाग्निसंयोगाद्रक्तोत्पत्तिरिति नियमो नास्ति। इत्थञ्च पूर्वमेव रक्ते कस्मिंश्चित्परमाणावग्निनोदनवशात्स्वानारब्धद्व्यणुकावयवपरमाणुगततदारम्भकसंयोगनाशादिकाल इव श्यामादिनाशकालेपि द्व्यणुकान्तरारम्भकक्रियोत्पत्तिस्सम्भवत्येव। तथा च क्रियया द्व्यणुकान्तरारम्भः सुघटः। एवञ्च पूर्वघटारम्भकपरमाणुभिरेव द्व्यणुकादिद्वारा घटान्तरोत्पत्तिसम्भवात्तस्य पूर्वघटसमानपरिमाणत्वमपि निर्बाधमिति। अत एव 'एवमेव पक्वापक्वाभ्यामारम्भश्चिन्तनीयः' इत्याचार्योक्तिरपि सङ्गच्छते॥

**दि—अरक्तत्वप्रसङ्गादिति।** ननूत्पत्तिक्षणे सर्वेषामप्यवयविनां नीरूपत्वस्येष्टत्वात् परमाणौ रक्तोत्पत्तिक्षणे द्व्यणुकोत्पत्तौ बाधकाभावः। कारणगुणेन द्व्यणुके तस्मिन्नुत्पत्तिद्वितीयक्षणे रक्तोत्पादस्य सम्भवात्। इत्थञ्च चतुःक्षणप्रक्रियायान्न कश्चिद्दोष इति चेन्न, रूपनाश इव रूपोत्पत्तावपि द्रव्यस्य समवायेन प्रतिबन्धकत्वेन प्रतिबन्धकाभावस्य च कार्यकालेप्यावश्यकत्वेन च रक्तरूपद्व्यणुकयोर्युगपदुत्पादासम्भवात्। एतदेव सूचितम् 'अन्यत्र विस्तरः' इत्यनेन। अत्र 'अरक्तत्वप्रसङ्ग इति' इति ताळीग्रन्थपाठः। एतदुत्तरम् 'अन्यत्र विस्तरः' इति स्थाने 'परमाण्वन्तररक्तेनैव द्व्यणुकरक्तोत्पादसम्भवात् द्व्यणुकनाशक्षणे श्यामनाशक्षणे वा द्व्यणुकोत्पत्तौ क्षतिविरहेण द्वित्रिक्षणापि सम्भवति। रूपाद्यन्तरसहकृतस्यैव रूपादे रूपाद्युत्पादकत्वाङ्गीकारे द्वित्रिक्षणप्रक्रियाया असम्भवेपि चतुःक्षणा सम्भवत्येव, रक्तोत्पत्तिक्षणे द्व्यणुकोत्पत्त्या तदुत्तरक्षणे तत्र

---

**अभ्युच्चयवादेति।** अङ्गीकृत्योक्तीत्यर्थः॥

रक्तोत्पादसम्भवादित्युच्छृङ्खलमतमनादरणीयम्, रूपादिमत्त्वैव रूपादिमद्द्रव्यारम्भकत्व मिति सिद्धान्तविरोधात्। द्विक्षणप्रक्रिया तु कस्यापि मतेन सम्भवत्येव, पूर्वद्व्यणुकस्य प्रतिबन्धकतया द्व्यणुकनाशक्षणे द्व्यणुकान्तरोत्पादासम्भवादिति ध्येयम्' इति च पाठः। उच्छृङ्खलमतमुपन्यस्य खण्डयति—**परमाण्वन्तरेत्यादिना**। निगदव्याख्यातमेतत् ॥

**सु—संयुक्तेषु सत्स्विति**। प्रभानूदितोप्ययं नालत्यतालीग्रन्थपाठः ॥

**दि—रूपादिनाशहेतुत्वे मानाभावेनेति**। एतदुत्तरम् 'अनारम्भकसंयोग' इत्यादिपाठः। ननु कतिपयावयवावच्छेदेन तेजस्संयोगे सति तदवयवेषु क्रियया आरम्भकसंयोगनाशात् घटाद्यवयविनाशोऽवश्यं भावीत्यत आह—**आरम्भकसंयोगेति**। यथा कमलावयवदलाग्रामग्रावच्छेदेन संयोगोऽनारम्भकः, मूलावच्छेदेन त्वारम्भकः, तथा घटादेरपि केषाञ्चिदवयवानां किञ्चिद्देशावच्छेदेनानारम्भकः, तदितरदेशावच्छेदेन चारम्भकः संयोगो भवतीत्याशयः। ननु पूर्वदर्शितया अवयवावयविनोर्भिन्नरूपत्वापत्त्या सर्वावयवावच्छेदेन तेजस्संयोग एष्टव्यः, तस्य चारम्भकसंयोगावच्छेदेनासत्त्वं शपथैक निर्वाह्यमित्याशङ्कायामाह—**सर्वाश्रयेति**। **नोदनत्वाभिघातत्वविरुद्धस्यैवेति**। अन्यथा जातिसङ्करप्रसङ्ग इति भावः। अपसिद्धान्तप्रसङ्गादाह—**अस्तु वेति**। **नोदनाभि घातत्वव्याप्यत्वमिति**। नोदनत्वव्याप्यमेकं वैजात्यम्, अभिघातत्वव्याप्यञ्चापरमित्यर्थः। रूपनाशादिनिष्ठकार्यतावच्छेदककोटौ तत्तद्वैजात्यविशिष्टाव्यवहितोत्तरत्वनिवेशान्न परस्पर व्यभिचार इति भावः। **अवयवाभिघातोत्पादेति**। यदा अवयवेष्वप्यभिघातः, तदा अवयविनो नाश इष्यते। अत एव पाकानन्तरं कदाचिद्व्रणसच्छिद्रादिघटानुभवः। सम वायेनाभिघातानधिकरणानामप्यवयवानामवयविनिष्ठाभिघातावच्छेदकत्वं समवायेन ज्ञाना नधिकरणशरीरस्यात्मनिष्ठज्ञानावच्छेदकत्ववदुपपद्यत इति हृदयम्। नन्वस्तु ज्ञानादि स्थले तथा, संयोगादिस्थले तु नैवं सम्भवति, अन्यथा अग्र एव कपिसंयोगकालेपि मूलस्यापि तदवच्छेदकत्वसम्भवात् मूले वृक्षः कपिसंयोगीति प्रत्ययापत्तेरित्यत आह—**आस्तां वेति**। **मानाभाव एवेति**। ननु क्रियात्वेन विभागत्वेन हेतुहेतुमद्भावात् क्रियादिघटितसामग्रीसत्त्वमेव मानमिति शङ्कामपनुदति—**विभागं प्रतीति**। तत्तद्व्य

---

**अभिघातानधिकरणानामिति**। यद्धर्मविशिष्टो यदवच्छेदेन जायते, तद्धर्मविशिष्टः तत्रापि जायत इति नियमोऽप्रामाणिक इति भावः। अमुमेव गुणदीधित्युक्तं नियममनुपालय न्नाह—**नन्वस्त्विति** ॥



**क्तित्वेनैवेति**। 'यद्विशेषयोः' इति नियमस्याप्रयोजकत्वेनास्वीकारान्न दर्शितसामान्य कार्यकारणभाव इत्याशयेन एवकारप्रयोगः। यद्वा, हेतुतयैवेति योजना। आस्तां कारणा न्तरचिन्तेत्याशयः। दण्डिनि चैत्रे गच्छति दण्डचैत्रयोरुभयोः क्रियासत्त्वेपि तयोः परस्परं विभागादर्शनात्तत्तद्विभागं प्रति क्रियायास्तत्तद्व्यक्तित्वेन हेतुत्वमावश्यकम्। तथाच विशेष कारणाभावान्नात्र सामग्रीति भावः। कारणान्तराभावमपि दर्शयति—**तत्तत्क्रियाधी नेति**। घटपटसंयुक्ते शरीरादौ क्रियया विभागे जायमाने कदाचित् घटोऽवधिः, कदाचित् पट इत्यनुभवोपपत्तये तत्तत्क्रियाजन्यविभागं प्रति तत्तत्पूर्वदेशस्यापि विशिष्य कारण ताया आवश्यकत्वात्, प्रकृते प्रायश एकावयवे वह्न्यभिघातजन्यक्रियाजन्यविभागं प्रति अवयवान्तररूपदेशस्य कारणत्वाकल्पनादेवारम्भकसंयोगविरोधिविभागाभाव उप पद्यत इति भावः। कार्यकारणभावश्चावधितासम्बन्धेन तत्क्रियाजन्यविभागं प्रति, तद्विभागं प्रति वा तादात्म्येन तत्तद्देशः कारणमिति रीत्या बोध्यः। अत एवैकक्रिया जन्यविभागे क्रियानधिकरणम्, उभयक्रियाजन्यविभागे चोभयं हेतुरिति सङ्गच्छते। इत्थञ्च तत्तत्क्रियात्वेन तत्तद्विभागत्वेन हेतुहेतुमद्भावाभावेपि न क्षतिरिति च बोध्यम्। **तज्ज न्यक्रियाया इति**। अग्निसंयोगजन्यक्रियाया इत्यर्थः। **विजातीयरूपादिकं प्रत्येवेति**। अत्र केचित्, रूपादिगतशुक्लत्वादिना वैजात्यस्य साङ्कर्यवारणाय शुक्लत्वादिव्याप्य वैजात्यानि बहूनि स्वीकार्याणीति कार्यकारणभाववाहुल्यापत्तिर्न्यायनये दुरुद्धरो दोष इत्याहुः। तच्चिन्त्यम्, तन्नये साङ्कर्यस्य जातिबाधकत्वानङ्गीकारात्। तस्य तथा त्वेपि अनन्तावयवितन्नाशादिकल्पनामपेक्ष्य कतिपयवैजात्यान्यङ्गीकृत्य कतिपयकार्य कारणभावकल्पनस्यैव ज्यायस्त्वात्। यद्वा, विजातीयपदमत्र विलक्षणधर्मवत्परम्। स च धर्मः तेजस्संयोगाजन्यत्वमेव। एवमाश्रयनाशजन्यतावच्छेदककोटावपि नाशविशेषणं वैजात्यमेतदेव। इत्थञ्च न कार्यकारणभाववाहुल्यम्, न वा रूपादिगतवैजात्यानां प्रत्यक्षा पत्तिपरिहाराय तेषां तत्र तादात्म्येन प्रतिबन्धकत्वकल्पना चेति। **पूर्वेति**। 'पूर्वा वयविनोऽभेदाभावेन' इति पाठः॥

**भा—गणनव्यवहारेति**। व्यवह्रियते हानोपादानादि क्रियते अनेनेति व्यवहारो ज्ञानम् एकम्, द्वे, त्रीणीत्याकारकम्। तस्य विषयतया हेतुरित्यर्थः। विषय

---

सामान्यकार्यकारणभावव्यवच्छेदस्य निष्प्रयोजनत्वादाह—**यद्वेति**। **अवधितासम्बन्धे नेति**। उभयक्रियाजन्यविभागस्थले तन्निष्ठावधितासम्बन्धेनेत्यर्थः। तेन न तत्र व्यभिचारः ॥

इति यावत्। अनेन प्रमाणं दर्शितम्। यद्वा, गणनव्यवहारः एको, द्वावित्यादिपदम्, तद्धेतुः तत्प्रवृत्तिनिमित्तमित्यर्थः। एतेन एकत्वं स्वरूपानतिरिक्तम्, द्वित्वादिकं स्वरूपभेद इति भूषणमतनिरासकः तर्कोपि सूचितः। तथाहि—यद्येकत्वं घटस्वरूपम्, तर्हि एक इति प्रत्यक्षं प्रयोगो वा पटे न स्यात्। एवं घटमानयेत्युक्ते एकम्, द्वौ वा इति प्रश्नस्यानुपपत्तिश्च। एवं द्वित्वादिकं यदि स्वरूपभेदः, तदा द्वित्वत्रित्वादेरैक्यप्रसङ्ग इति। स्पष्टञ्चेदं किरणावल्याम्। एवं परिमाणादावपि ॥

सु—'संख्यां निरूपयति—गणनेति। गणनव्यवहारासाधारणकारणं संख्येत्यर्थः' इति पाठः ॥

दि—**असाधारणेतीति**। असाधारणत्वञ्चात्र न गुरुभूतं कार्यत्वानवच्छिन्नकार्यतानिरूपकत्वम्, किन्तु विषयतासम्बन्धावच्छिन्नकार्यतानिरूपकत्वम्, तथाच प्रकृते विषये पर्यवसितमिति दर्शयति—**वस्तुत इति**। ननु गणनं नाम एकत्वादिसंख्या, तत्प्रकारकप्रमाविषयत्वं घटादौ, एकत्वत्वादौ चातिव्याप्तमित्यत आह—**गणनं संख्यात्वमिति**। एकत्वत्वादिकमननुगतमिति संख्यात्वपर्यन्तानुधावनम्। तथाच गणनपदमत्र भावप्रधानमिति भावः। **तद्विषय इति**। तद्विशेष्य इत्यर्थः। **प्रमाण तयोक्तमिति**। एवमेकद्व्यादिप्रत्यय एकत्वत्वादिजातिषु प्रमाणं वेदितव्यम्। **अग्रे पीति**। 'मानव्यवहारस्य कारणम्' इत्यादावित्यर्थः ॥

सु—**नित्येष्वितीति**। कारिकास्थनित्यानित्यपदे नित्यानित्यद्रव्यपरे, गुणादौ संख्याभावादिति विशदयति—**परमाण्वादिष्विति, घटादाविति च**। **द्वित्वादयस्त्विति**। एतत्पूर्वं 'द्वित्वादय इति' इति प्रतीकस्ताळीग्रन्थेषु दृश्यते। एतदुत्तरं 'व्यासज्यवृत्ति' इति प्रक्षिप्तम्, अव्याख्यानात्, 'अनेकाश्रयपर्याप्ताः' इत्युत्तरकारि

---

**प्रमाणम्** प्रत्यक्षप्रमाणम्, हेतुपदेन व्यवहारस्य प्रत्यक्षरूपत्वावेदनात्। व्यवहारपदस्य ज्ञाने भूरिप्रयोगाभावादाह—**यद्वेति**। **एतेन** गणनव्यवहारे तु हेतुस्संख्येति प्रमाणप्रदर्शनेन। **स्वरूपानतिरिक्तम्** धर्म्यभिन्नम्। ननु तत्तन्निष्ठैकत्वं तत्तत्स्वरूपमिति घटस्वरूपस्येव पटस्वरूपस्याप्येकत्वस्य सत्त्वान्नानुपपत्तिरित्यत आह—**एवं घटमानयेति**। **एवं परिमाणादावपीति**। तत्रापि लक्षणवाक्यघटकव्यवहारपदार्थादिकमुक्तदिशा ज्ञेयमित्यर्थः ॥

मुख्यविशेष्यताभिन्नविषयत्वनिवेशेपि न सामञ्जस्यमिति, दर्शयति—**एकत्वत्वादाविति** ॥

**अव्याख्यानादिति**। दिनकरभट्टादिभिरिति शेषः ॥



कयैव व्यासज्यवृत्तित्वप्रदर्शनाच्च। गुणादिगतद्वित्वादेरपेक्षाबुद्धिरूपस्य व्यावृत्तये संख्या इति। कार्यकारणभावश्च समवायेन एकत्वान्यसंख्यात्वावच्छिन्नं प्रति नानैकत्वावगाहि समूहालम्बनज्ञानं विशेष्यतासम्बन्धेन हेतुरिति। विशेषतश्च द्वित्वं प्रति एकत्वद्वयावगाहि, त्रित्वं प्रति एकत्वत्रयावगाहि इत्यादिरीत्या बोध्यम्। अत्र एकत्वे द्वित्वादिसंख्याभावादेकत्वद्वयावगाहीत्यादिरीत्या विशेषसामग्रीकथनमसङ्गतमित्याक्षिप्य द्वित्वं प्रति केवलापेक्षाबुद्धिः, त्रित्वं प्रति इमौ द्वौ अयमेक इत्याकारिका द्वित्वविशिष्टैकत्वावगाहिनी, चतुष्ट्वं प्रति इमे त्रयः अयमेक इत्याकारिका त्रित्वविशिष्टैकत्वावगाहिनी अपेक्षाबुद्धिः कारणमिति समाहितमुदयनाचार्यैः। अधिकं 'यत्रानियतैकत्वज्ञानम्' इति पङ्क्तिव्याख्याने द्रष्टव्यम् ॥

दि—**अनेकसंख्यात्वादिना तदनुमानादिति**। आदिपदात् द्वित्वत्वादिपरिग्रहः। नचेदमप्रयोजकम्, कार्यतावच्छेदककोटौ इन्द्रियगोचरत्वाद्यनिवेशरूपलाघवज्ञानात्मकतर्कसत्त्वात्। **अथापेक्षाबुद्धेरिति**। यद्यपि रूपादिस्थलेपीयमाशङ्का भवति, तथापि तत्र रूपत्वादिना प्रतिबन्धकत्वाद्वारणं सुशकम्, अत्र त्वन्यपुरुषीयापेक्षाबुद्ध्या द्वित्वोत्पत्त्या न तथा कल्पनसम्भव इति बोध्यम्। नचाविरलक्रमेण द्वित्वाद्युत्पत्ताविष्टापत्तिरिति वाच्यम्, द्वित्वानां परस्परभेदस्य प्रत्यक्षत्वप्रसङ्गात्। ननु जलग्रन्थोक्तरीत्या तुल्ययोग्याश्रयकत्वं भेदबुद्धौ बाधकमस्तीति नोक्तदोष इति चेन्न, एकघटगतरूपरसादीनामपि भेदप्रत्यक्षाभावप्रसङ्गेन जातिभेदप्रत्यक्ष एव तस्य प्रतिबन्धकत्वस्य तत्रोक्तत्वात्। **उत्पत्तिसम्बन्धेनेति**। उत्पत्तिक्षणविशिष्टविषयतासम्बन्धेनेत्यर्थः। ताळीग्रन्थेष्वयं पाठो दृश्यते। अथापेक्षाबुद्धिद्वितीयक्षणे योग्यविशेषगुणान्तरोत्पत्तेरनङ्गीकारात् प्रथमद्वित्वसविकल्पककाले द्वित्वान्तरोत्पत्तिः, पूर्वापेक्षाबुद्धिनाशश्च,

---

**द्वित्वविशिष्टेति**। वैशिष्ट्यं द्वित्वविषयकज्ञानविषयत्वरूपं सामानाधिकरण्यम् ॥

**इन्द्रियगोचरत्वाद्यनिवेशेति**। आदिपदान्महत्त्वोद्भूतरूपोभयव्याप्यत्वपरिग्रहः। सामानाधिकरण्यं विहाय व्याप्यत्वघटनात् घटपरमाणुद्वित्वादेर्घटवायुद्वित्वादेश्च व्यावृत्तिः। एवं महत्त्वव्याप्यत्वे सति उद्भूतरूपव्याप्यत्वस्याप्यादिपदात् संग्रहो बोध्यः। **अनङ्गीकारादिति**। तथाच तृतीयक्षण एवापेक्षाबुद्ध्यन्तरम्। तच्च द्वित्वनिर्विकल्पात्मकम्, उत्तरक्षणे द्वित्वसविकल्पकानुरोधात्। यदि ज्ञानस्य किञ्चिदंशे निर्विकल्पकत्वं किञ्चिदंशे सविकल्पकत्वञ्चेत्यप्रामाणिकमित्युच्यते, तदा सविकल्पककाल एवापेक्षाबुद्ध्यन्तरस्योत्पत्त्या द्वित्वान्तरोत्पत्तेरेकक्षणेनापि

ततो द्वित्वान्तरनिर्विकल्पकं, पूर्वद्वित्वनाशश्चेति न युगपद्द्वित्वद्वयप्रत्यक्षापत्तिरित्यत आह—**भगवदिति**। 'भगवदपेक्षाबुद्ध्या द्वित्वानुत्पत्तेर्दुर्वारत्वाच्च' इति साधुः पाठः। भगवदपेक्षाबुद्ध्या द्वित्वजननावश्यकता चेश्वरानुमानग्रन्थे दर्शिता। दर्शयिष्यते च 'सर्गादिकालीनपरमाण्वादौ' इत्यादिग्रन्थेनानुपदमेव। परन्तु सर्गादिकालीनपरमाणुद्वित्वे ब्रह्माण्डान्तरवर्तियोगिनामपेक्षाबुद्धिरेव कारणमिति मते उत्पत्तिसम्बन्धेनापेक्षाबुद्धेर्हेतुता निराबाधेति ध्येयम् ॥

**भा—नाशस्तेषामिति**। 'तेषां नाशः' इति पाठः॥

**मु—तथाप्येक इति**। यदि समवाय एव तत्र संसर्गतया भासते, तर्हि विषयबाधाभावात्तादृशी प्रमा स्यादिति भावः ॥

**दि—नन्वेकत्वस्येति**। उत्पत्तिकालीनो घटो गन्धवानित्यादाविव एको द्वावित्यादावपि उद्देश्यतावच्छेदके नियमेन विधेयाधारतायाः, विधेयस्य वाऽवच्छेदकत्व भानाद्विषयबाध इति भावः। अथैवमेको द्वित्ववानिति प्रमापि न स्यादिति चेन्न, तत्रा वच्छेदकत्वेभानानभ्युपगमात्, कल्पनाया अनुभवानुरोधित्वात्। **किन्तु पर्याप्तिसम्बन्धेनेति**। एतदुत्तरं 'द्वित्वम्' इति स्थाने 'द्वित्वाभावः' इति पाठः। एवम् 'अत्र बहवः' इति स्थाने 'अथ' इति ताळीग्रन्थपाठः साधीयान्, 'इति चेत्' इति पर्यवसानात्। **अन्यत्र विस्तर इति**। धवखदिरावित्यादिनानोद्देश्यतावच्छेदककस्थले केवलपर्याप्तेः केवलसमवायस्यैव वा संसर्गतया भानम्, अन्यथा तत्र धवद्वयादेरेव बोधापत्तेरित्यादि विस्तर इत्यर्थः। अत्र केचित्, सुपामुद्देश्यतावच्छेदकव्याप्यत्वविशिष्टसंख्याबोधकत्व

---

विलम्बात्सुतरामप्रत्यक्षत्वं युगपद्द्वित्वद्वयस्येत्यवसेयम्। **द्वित्वान्तरनिर्विकल्पकमिति**। अनेन द्वित्वान्तरसविकल्पकानुकूलद्वित्वत्वरूपविशेषणज्ञानसम्पत्तिर्यद्यपि पूर्वद्वित्वसविकल्पकेनापि सम्भवति, तथापीमौ द्वाविति द्वित्वान्तरप्रकारकप्रत्यक्षोपयोगिद्वित्वान्तररूपविशेषणज्ञानार्थं सविकल्पकोत्तरक्षणे ज्ञानान्तरस्वीकार आवश्यक इति दर्शितम्। प्रत्यक्षाद्येति। आदिपदेन परस्परभेद प्रत्यक्षस्य संग्रहः॥

घटो गन्धवानित्यादौ आधारताया अनुल्लेखने त्वाह—विधेयस्य वेति। तत्रेति। द्वित्वसम्बन्धविधेयकस्थल इत्यर्थः। द्वित्वाभाव इति पाठ इति। युज्यते चैतत्, 'तथाच तादृशप्रतीतेः' इत्यादिपूर्वग्रन्थेन एको न द्वावित्यादिप्रतीतेरेवोपादानात् 'किन्तु' इत्यादिग्रन्थेन एको द्वाविति प्रतीतिविषयस्योक्तौ सन्दर्भविरोधापत्तेः। नानोद्देश्यतावच्छेदकेति। विधेयान्यून संख्याकत्वबहुत्वविशिष्टत्वान्यतरवदुद्देश्यतावच्छेदकेत्यर्थः। वैशिष्ट्यं व्यापकतासंबन्धेन। तेन न कालाकाशा इत्यादिप्रयोगापत्तिः, न वा कालघटा इति प्रयोगानुपपत्तिः॥



नियमेन आकाशत्वव्याप्यद्वित्वस्याप्रसिद्धयैवाकाशावित्यादिवाक्यस्य प्रामाण्यवारणादुक्त रीत्या अतिरिक्तपर्याप्तिसाधनं न सम्भवतीत्याहुः। तच्चिन्त्यम्, आकाशद्वयप्रमवत आकाशाविति वाक्याद्बोधानुपपत्तेः 'सुपाम्' इत्यादिनियमस्य दर्शितपर्याप्तिसम्बन्धेन संख्याबोधकत्वमित्यत्रैव पर्यवसानस्य वक्तव्यत्वात्। उक्तञ्च कण्ठतस्तत्रैव 'नच साहित्ये लक्षणेति वाच्यम्' इति मुक्तावलीग्रन्थव्याख्यानावसरे तरङ्गिण्याम्। आकाशो द्वित्ववानिति वाक्ये मतुपा समवायोल्लेखात् द्वित्वसमवायावगाहित्वमेवेत्यादिकं व्युत्पत्तिवादे स्पष्टम्॥

**मु—प्रथममिति**। एतत्पूर्वम् 'अपेक्षाबुद्धिनाशाच्चेति' इति प्रतीकपाठः प्रभ्रष्टः॥

**दि—द्वित्वत्वविशिष्टलौकिकप्रत्यक्षमिति**। लौकिकत्वविशेषणेन तदानीं द्वित्वसत्त्वावश्यकता दर्शिता। **द्वित्वस्य नाश एवेति योजनेति**। यथाश्रुते प्रकृतो पयोगिव्यवच्छेद्याभावादवधारणासङ्गतिः। योजनायान्तु अयोगव्यवच्छेदार्थकैवकारेण नाशा वश्यकता प्रतिपादिता। **योग्यविभुविशेषगुणत्वस्येति**। योग्यविभुविशेषगुणत्वस्यानुगतस्य, स्वत्वस्यानुगतस्याभावेन स्वोत्तरोत्पन्नगुणत्वस्यानुगतस्य चाभावादिति योजना। विशेषगुणत्वं रूपाद्यन्यतमत्वादतिरिक्तं दुर्वचम्, अन्यतमत्वञ्च न कार्यतावच्छेदकमित्याशयः। द्रव्यत्वव्यापकतावच्छेदकगुणत्वन्यूनवृत्तिजातिशून्ययोग्यविभुगुणत्वमनुगतं भवतीत्यत आह—**स्वत्वस्येति**। **नाशकत्वं कल्प्यत इति**। इदमुपलक्षणम्। द्वित्व प्रत्यक्षस्य विशेषसामग्रीत्वाङ्गीकारेणापेक्षाबुद्धेस्त्रिक्षणावस्थायित्वं सुवचम्। एतेन साधर्म्य प्रकरणोक्तरीत्या अनुगतकार्यकारणभावसम्भवेपि न दोष इति। **उपनीतभानात्मकमेवेति**। तत्र च न विषयस्य हेतुतेति भावः। **द्रव्यांशे द्वित्वप्रकारकमेवेति**। द्वित्वे लौकिकसन्निकर्षस्य तदाश्रयलौकिकसन्निकर्षनियतत्वात्, सामग्रीसत्त्वे कार्या वश्यम्भावाच्च द्रव्यमानं नियतमिति भावः। शङ्कते—**निर्विकल्पकोत्तरक्षण इति**। 'नच निर्विकल्पकोत्तरक्षणे........ज्ञानासम्भवादिति वाच्यम्' इति ताळीग्रन्थपाठः। **उपनीतभानासम्भवादिति**। अस्तु निर्विकल्पकस्यापि प्रत्यासत्तित्वमिति चेदाह—**तस्येति**। इदमत्रावधेयम्—द्वित्वत्वनिर्विकल्पकानन्तरं द्वित्वगुणप्रत्यक्षमपेक्षाबुद्धिनाशश्च। ततः

---

**न कार्यतावच्छेदकम्**. साक्षात् परम्परया वा न कार्यतावच्छेदकम्। प्रामाणिकानां

ज्ञानान्नानुमितिरिति भावः। **एतदस्वरसादिति**। घटाद्युत्पत्त्यनन्तरमपि वस्त्वन्तरारम्भक द्व्यणुकादिपरिमाणोत्पत्त्या तदुपपत्तये परमाणुद्वित्वाद्युत्पत्तिरभ्युपगन्तव्या। यस्य काल विशेषस्य तज्जनकत्वम्, तमपेक्ष्य घटादावपि द्वित्वाद्युत्पादापत्तिरपरिहार्या, सामग्रीसत्त्वा दित्यस्वरसादित्यर्थः। घट एकः, पट एकः इत्यादिज्ञानादपि द्वित्वोत्पादवारणायोक्तम् —**तत्तद्व्यक्तीति**। **इति भाव इति**। 'इति नोक्तदोष इति भावः' इति पाठः। **एकत्वविशेष्यकेति**। अनियतमेकत्वज्ञानम् अनियतैकत्वज्ञानमिति कर्मधारयः। अनि यतपदस्य विवक्षितार्थमाह—**कालीनमित्यन्तेन**। नियतपदमत्रैकत्वविशेष्यकसंख्यात्व नियतत्रित्वादिप्रकारकज्ञानलाक्षणिकम्, तत्र समानकालीनत्वसम्बन्धेन विद्यते यस्मिन्निति व्युत्पत्त्या तादृशार्थलाभः। एकत्वपदमनेकैकत्वपरम्। यद्वा, नियतेन संख्यात्वनियतत्रित्वादिना, तत्प्रकारकमिति यावत्। एकत्वस्य एकत्वविशेष्यकं ज्ञानं नियतैकत्वज्ञानम्, तत्र विद्यते यत्रेत्यनियतैकत्वज्ञानमिति विग्रहः। अनेकैकत्वज्ञान मिति विशेषस्याध्याहारः। अथैवं सति घटादौ त्रित्वाद्युत्पादे त्रित्वादेरेकत्वगतस्या पेक्षाबुद्धिविषयतारूपतया संख्याविशेष्यकापेक्षाबुद्धिर्द्रव्यविशेष्यकापेक्षाबुद्धिश्चेत्युभयमाव श्यकं भवेत्, तच्च गुरुभूतमनुभवविरुद्धञ्चेत्यत आह—**यद्वेति**। एतत्कल्पे अनियत पदस्य निर्धर्मितावच्छेदककेत्यर्थः। प्रकारान्तरेणास्य व्याख्यानं प्रभायां द्रष्टव्यम्। दोषादित्यस्य प्रकृते कारणाभावार्थकतां स्पष्टयति—**नियतानेकैकत्वज्ञानाभावादिति**। उक्तञ्चाचार्यैः—'नियमतस्तदप्रतीतिस्तु नियतापेक्षाबुद्धेर्व्यञ्जिकाया अभावात्' इति। **तं विनेति**। 'तद्विना' इति पाठः॥

**मु—बहुत्वत्वजातिर्नातिरिच्यत इति**। त्रित्वत्वाद्यन्यतमशून्ये न वर्तत इत्यर्थः। ननु यन्मया त्रित्वाद्युत्पादकमुच्यते, तदेव त्वया त्रित्वत्वादिप्रकारकप्रत्यक्ष कारणमुच्यते, तथाच गौरवमिति शङ्कामन्यथानुपपत्त्या परिहरन्नाह—**इत्थञ्चेति**। **तत्तारतम्याभावादिति**। इदमत्र चिन्त्यम्—घटकपालपरिमाणयोर्महत्त्वत्वेनैकविध त्वेपि यथोत्कर्षापकर्षभावात् कपालान्महत्तरो घट इत्यादिप्रतीतिः, तथा बहुत्वत्वेनैक

---

पदस्य गुरुभूतार्थे स्वारसिकलक्षणां विना निरुक्तार्थं लम्भयति—**यद्वेति**। **प्रकारान्तरेणेति**। संख्यात्वव्याप्यद्वित्वत्वाद्यवच्छिन्नप्रकारकमेकत्वप्रकारकप्रत्यक्षमिति प्रकारेणेत्यर्थः॥

नातिरिच्यत इत्यस्य न भिन्नेति यथाश्रुतार्थस्य बाधाद्व्याचष्टे—**त्रित्वत्वाद्यन्यतमेति**॥



विधत्वेपि उत्कर्षापकर्षभावात् इतो बहुतरेयमित्यादिप्रतीतिरपि सङ्गच्छते, बहुत्वस्य त्रित्वादिभिन्नत्वेपीति। वस्तुतस्तु, परिमाणस्योत्कृष्टपरिमाणजनकत्वनियमात् परि माणादिजन्यत्वं परिमाणोत्कर्षप्रयोजकमिष्यते, बहुत्वे तु तथोत्कर्षप्रयोजकं दुर्वचमिति तारतम्याभावोक्तिः सङ्गतैवेति॥

अणुप्रतिद्वन्द्वित्वस्य महत्येव वर्तमानत्वात् कारिकाक्रममुल्लङ्घ्य विभागं दर्शयति—**अणु महदिति**। ननु महत्त्वाभाव एवाणुत्वमिति चेन्न, वैपरीत्ये विनि गमकाभावादुभयसिद्धेः, अभावे तारतम्यासम्भवेनाणुतरत्वादिव्यवहारानुपपत्तेश्च। 'तत्र संख्याजन्यमुदाहरति—द्व्यणुकादाविति' इति ताळीग्रन्थपाठः॥

**दि—यद्यप्यणुत्वमेवेति**। अणुत्वह्रस्वत्वयोर्महत्त्वदीर्घत्वयोश्च सामाना धिकरण्यमेव भाष्यादावुक्तम्, तन्मास्तु, अभेदस्यैव सम्भवादित्याशयः। **अव्यवहा रादिति**। तथाच यदि तयोरभेदः स्यात्, तदा दर्शितव्यवहारापत्तिरिति भावः। नच द्व्यणुकापेक्षया परमाणौ ह्रस्वत्वसम्भवात् ह्रस्वत्वाव्यवहारोक्तिरसङ्गतेति वाच्यम्, ह्रस्वत्वे जन्यत्वस्य भाष्ये कण्ठत उक्तत्वात् परमाणौ तद्व्यवहारासम्भवात्। नचाणुत्वह्रस्वत्वयोः सामानाधिकरण्ये कथं महत्यपीक्षौ वंशापेक्षया ह्रस्वत्वव्यवहार इति वाच्यम्, तस्य भाक्तत्वात्। अथ ह्रस्वत्वाणुत्वयोः कारणैक्यात् कथं भेद इति चेत्, सत्यम्, उक्तयुक्त्या कार्यभेदस्याङ्गीकार्यतया कारणविशेषस्य कल्प नीयत्वात्। स च तत्तदभावो वा, अदृष्टविशेषो वेत्यन्यदेतत्। एवं महत्त्वदीर्घत्वयो रपि ज्ञेयम्। **संख्यामात्रजन्यमिति**। ननु द्व्यणुकादिपरिमाणस्य परिमाणजन्यत्वं नास्तीत्येव मुक्तावल्यामुपपादितम्, तस्य प्रचयजन्यत्वेन संख्यामात्रजन्यत्वोक्तिरसङ्गतेति शङ्कां परिहर्तुमाह—**न सजातीयमित्यनन्तरमिति**। **प्रचयस्तु न द्व्यणुकादा**

---

**परिमाणादीति**। आदिपदात् संख्याप्रचययोः परिग्रहः। **दुर्वचमिति**। नच कारणीभूतापेक्षाबुद्ध्योर्न्यूनाधिकवृत्तित्वरूपं वैलक्षण्यमेवोत्कर्षापकर्षयोः प्रयोजकं सम्भवतीति वाच्यम्, दशत्वशतत्वादिकमनन्तर्भाव्य न्यूनाधिकभावस्य दुर्वचतया बहुत्वोत्पादकाले तत्र दशत्वादेरनुत्पत्त्या तथा वक्तुमशक्यत्वात्। **महत्येव वर्तमानत्वादिति**। तथाच तस्यैव प्रथमोपस्थित्या पूर्वं वक्तव्यत्वमिति भावः। प्रत्यक्षं प्रति महत्त्वस्य हेतुत्वे लाघवमेव विनिगमकमित्यत आह—**अभाव इति**। इति ताळीग्रन्थपाठ इति। अयमेव साधुः, 'अनित्यम्' इत्यस्य पूर्वान्वयित्वेन 'अनित्यमिति' इति प्रतीकधारणस्यायुक्तत्वादिति बोध्यम्॥

**उक्तयुक्त्येत्यादि**। उक्तञ्चाचार्यैः कण्ठत एव—'समवाय्यसमवायिनोस्साम्येपि कार्य भेदो निमित्तभेदात्। तत्राभावोऽदृष्टं वा' इति। अभावः ह्रस्वत्वादिरूपप्रतिबन्धकस्याभावः, तत्त

विति। बाधकाभावादस्त्विति चेदाह—तत्सत्त्वेपीति। प्रचयस्य स्वाश्रयपरिमाणसजातीयोत्कृष्टपरिमाणजनकत्वनियमात्, द्व्यणुकपरिमाणस्योत्कृष्टत्वाभावात्, त्र्यणुकपरिमाणस्य सजातीयत्वाभावाच्च न प्रचयजन्यत्वसम्भव इति भावः। यद्वा, परमाणोर्निरवयवत्वेन न प्रचयप्रसक्तिः। द्व्यणुकसंयोगस्य प्रचयत्वसम्भवेपि प्रचितावयवकतूलादाविव त्र्यणुके परिमाणतारतम्यादर्शनात्तस्यान्यथासिद्धत्वमेवेति भावः। तत्सत्त्वेपीत्यस्य च द्व्यणुके तत्सत्त्वेपीत्येवार्थः, परमाणौ तदसम्भवादिति बोध्यम्। अत्र प्रथमपक्ष एव केषाञ्चिदभिमत इत्यनुपदं व्यक्तीभविष्यति। **परमाणुसंयोगस्य प्रचयत्व इति**। अथ परमाणोरवयवाप्रसिद्ध्या किञ्चिदवयवावच्छेदेन परमाण्वन्तरसंयोगाभावोऽसम्भवीति कथं परमाणुसंयोगस्य तथात्वम्। नच किञ्चिदवयवावच्छेदेनावयवान्तरसंयोगि यत्तद्भिन्नमित्येवासंयोगिपर्यन्तस्यार्थः, इत्थञ्च परमाणोरपि तद्भिन्नत्वमक्षतमिति वाच्यम्, तूलाद्यवयवानां तद्भिन्नत्वासम्भवेन तत्संयोगस्य प्रचयत्वानुपपत्त्या अवयवान्तरसंयोगाभाव एव किञ्चिदवयवावच्छिन्नत्वस्य निवेश्यत्वादिति चेन्न, किञ्चिदवयवेत्यत्रावयवपदं न समवायिपरम्, किन्तु देशपरमित्याशयात्। इत्थञ्च परमाणोरेकस्य परमाण्वन्तरसंयोगे प्राच्यादेरवच्छेदकत्वसम्भवाान्नानुपपत्तिः। **भूयोवयवेति**। अत्र कल्पे अवयवत्वं समवायित्वमेवेत्यवधेयम्। **संख्यापरिमाणोभयजन्यमिति**। एतदुत्तरं 'महदवयवद्वयारब्धमहत्त्वादतिशयितत्वात्, अल्पत्र्यवयवारब्धमहत्त्वादतिशयितत्वाच्च' इति पाठः। एवं परिमाणप्रचयोभयजन्यमित्यनन्तरम् 'अप्रचितमहावयवारब्धमहत्त्वात्, प्रचितालपावयवारब्धमहत्त्वाच्चातिशयदर्शनात्' इति च। **मूले प्रदर्शितत्वादितीति**। ननु त्र्यणुकोपादाने तदुपादाने च परिमाणसत्त्वे प्रमाणाभावः, त्र्यणुकमहत्वादिना कार्येण तत्र त्रित्वादिसंख्याया एवानुमानादिति चेन्न, त्र्यणुकोपादानं तदुपादानञ्च परिमाणवत् द्रव्यत्वात् घटवदित्यनुमानेन तत्सिद्धेः। न चायं हेतुरप्रयोजकः, रूपादौ परिमाणाभावे द्रव्यभेदस्यैकस्य प्रयोजकत्वे लाघवमिति लाघवरूपतर्कानुगृहीतत्वात्। एवमेव विभुष्वपि तत्सिद्धिः। तदेतदनुचिन्त्योक्तम्—**अन्यत्र विस्तर इति**। **केचित्त्विति**। मुनि

स्प्रागभावो वा। प्रचयस्य स्वाश्रयसजातीयोत्कृष्टपरिमाणजनकत्वानियमेष्याह—यद्वेति। देशपरमित्याशयादिति। नचैवमयःपिण्डादौ निखिलदेशावच्छेदेनावयवान्तरसंयोगवत्स्वन्तःस्थावयवेषु विद्यमानानां संयोगानां कठिनत्वसम्भवेपि बहिरवयवेषु तद्देशावच्छेदेनावयवान्तरसंयोगाभावस्य सत्त्वात्



वचनाननुसारित्वमेव मतेऽस्मिन्नस्वरसबीजं स्पष्टम्। 'अवयवसंस्थानानुपलम्भेपि दूरात् दीर्घादिप्रत्ययस्य दर्शनात्, चतुरश्रादिप्रत्ययादर्शनाच्च दीर्घत्वादिः परिमाणं, चतुरश्रादिश्चावयवसंस्थानविशेषः' इति युक्तिमपि प्रादर्शयन् कन्दलीकाराः। अर्थपदस्य प्रकरणार्थकत्वं नातिप्रसिद्धमित्यत आह—**यद्वेति**। **रूपादेराश्रयनाशमात्रनाश्यत्वाभावेनेति**। रूपत्वादेराश्रयनाशभिन्ननाश्यवृत्तित्वेनेत्यर्थः, तेन जलरूपादेराश्रयनाशमात्रनाश्यत्वेपि नासङ्गतिः। **परिशेषसम्भवादिति**। परिशेषाकारश्चेत्थम्—आश्रयनाशेतरजन्यनाशप्रतियोग्यवृत्तिरूपादिपरिमाणान्तान्यतमवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्प्रतियोगिकनाशः परिमाणप्रतियोगिकः परिमाणान्याप्रतियोगिकत्वे सति सप्रतियोगिकत्वादिति। पाकजरूपादिनाशोऽत्र व्यतिरेकेण दृष्टान्तः। अत्र पक्षतावच्छेदकघटकजातावप्रवृत्तित्वान्तदलप्रयोजनं सुबोधम्। स्नेहत्वमादाय स्नेहनाशे बाधवारणाय वृत्तित्वान्तम्। भास्वरत्वादिकमादाय तद्वारणाय गुणत्वसाक्षाद्व्याप्यत्वञ्च जातिविशेषणम्। **प्रयोजनाभाव इति**। आश्रयनाशेतरनाश्यत्वस्य परिमाणे प्रसक्त्यभावात्तन्निषेधोऽनर्थक इति भावः। **आश्रयमात्रनाशेति**। 'आश्रयनाशमात्र' इति पाठः॥

**मु—अर्थात् परिमाणस्यैवेति**। एतदुत्तरं 'न चावयविनाशः' इत्यारभ्य 'अवश्यमभ्युपेयत्वात्' इत्यन्तो ग्रन्थः प्रक्षिप्तः, दिनकरभट्टादिभिरव्याख्यातत्वात्, 'न च मूलस्य' इत्यादिदिनकरीयस्थशङ्कानुत्थितेश्च॥

ननु संख्यावत्त्वित्यादिमूलमसङ्गतम्, लक्षणकथनानन्तरमेव संख्यावदित्यनेनोक्तनित्यत्वादिविभागस्योचितत्वादिति शङ्कां योजनया परिहरन् विवक्षितार्थमाह—**पृथक्प्रत्ययेति**। 'तथाहि' इति स्थाने 'यथाहि' इति पाठः स्वरसतरो भाति॥

**दि—एकसमवेतपृथक्त्वमिति**। एकपृथक्त्वत्वादिजातेर्भाष्ये निराकरणादेवमर्थवर्णनम्। अयमेकः पृथक्, इमौ द्वौ पृथक्, इत्यादौ सर्वत्र पृथगित्यनुगतरूपेणैव प्रत्ययः, संख्याविशेषसामानाधिकरण्यभानकृत एकपृथक्त्वादिव्यवहार इति भावः। स्पष्टमिदम् 'एतावांस्तु विशेषः' इति भाष्ये तद्व्याख्यायां कन्दल्याञ्च। न चैवमेकमेवास्तु पृथक्त्वमिति वाच्यम्, सामान्यत्वापत्तेः। नचेष्टापत्तिः, अवध्यपेक्षानुपपत्तेः।

सन्निष्ठावयवान्तरसंयोगानां शिथिलत्वापत्तिरिति वाच्यम्, प्रकृतमते तस्येष्टत्वात्। **स्नेहत्वमिति**। स्नेहत्वस्नेहपदे गुरुत्वत्वगुरुत्वयोरुपलक्षके॥ **अवध्यपेक्षानुपपत्तेरिति**। ननु तारत्वमन्दत्वयोरुत्कर्षापकर्षयोश्च जात्योः परस्पराश्रयावधिकत्वेन नेदमनुपपन्नमिति चेन्न, तत्र स्वाश्रयसजातीयावधिकत्वस्यैव दृष्टतया तदन्यावध्यपेक्षाया अनुपपत्तिरित्येव तात्पर्यात्। वस्तुतस्तु, द्रव्यनिष्ठजातेः सावधिक

**नानैकेति** । एतत्पूर्वं 'पृथगिति' इत्यपि पाठः। **एकपृथक्त्वद्वयादिनेति** । इमौ शुक्लावित्यादिप्रतीतेर्यथा शौक्ल्यद्वयाद्यवगाहितयोपपत्तिः, तद्वदिति भावः। **तेनैवेति** । द्विपृथक्त्वस्य समवायेन प्रत्येकवृत्तित्वादिति भावः। न चैकपृथक्त्वानङ्गीकारे द्विपृथक्त्वस्य किमसमवायिकारणमिति शङ्क्यम्, परमते एकपृथक्त्वद्वयेयत्, तदेवेति सुवचत्वात्। एवं द्विपृथक्त्वावगाहने समानेपि घटः पटात् पृथगिति बुद्धिर्नापेक्षाबुद्धिमपेक्षते, अपेक्षते तु तां घटौ पटात् पृथगिति बुद्धिः। अपेक्षाबुद्धिनाशाच्च न द्विपृथक्त्वस्य नाशः, किन्तु प्रत्यक्षविशेषस्यैव। समानमेतत् सर्वमेकपृथक्त्वमालाङ्गीकर्तुरपीति ध्येयम्। न चैवमाकाशमेकपृथगितिवदाकाशं द्विपृथगिति व्यवहारापत्तिरिति वाच्यम्, एकपृथक् द्विपृथगित्यादिव्यवहारस्यालीकत्वात्, इदमेकं पृथक् इमे द्वे पृथगिति व्यस्ततयैव पृथक्पदप्रयोगात्। आकाशौ पृथगित्यस्य च नापत्तिः, आकाशावित्यंशस्याप्रामाणिकत्वात्। आचार्यास्तु, 'अन्योन्यावधित्वानवधित्वाभ्यां विरोधेन' एकद्विपृथक्त्वयोः भेदमसाधयन्। तथाहि—चैत्रनिष्ठमेकपृथक्त्वं मैत्रावधिकत्वरूपधर्मवत्, चैत्रमैत्रोभयनिष्ठं द्विपृथक्त्वन्तु तदवधिकत्वाभावरूपविरुद्धधर्मवत्, चैत्रमैत्रौ मैत्रात् पृथगिति व्यवहाराभावात्, अतो न तयोरैक्यमिति। अन्ये तु, इमौ द्वौ पृथगिति बुद्धेरेकपृथक्त्वद्वयावगाहितामतेपि अयमेकः पृथगयमेकः पृथगित्यपेक्षाबुद्धिसापेक्षत्वं तस्या अभिमतम्। एवं सति कारणीभूतापेक्षाबुद्धितः कार्यभूताया बुद्धेर्वैलक्षण्यं दुर्निरूपम्, विषयवैलक्षण्याभावात्। तस्मात् द्वित्वादिवद्व्यासज्यवृत्तिगुणान्तरमेव तत्र विषय इत्याहुः। नन्वेवमेकपृथक्त्वत्वादिजात्यस्वीकारे कारणगुणोद्भवत्वसाधर्म्यविचारे तद्घटकजातौ पृथक्त्वत्वातिरिक्तत्वनिवेशनमफलम्, पृथक्त्वत्वस्य स्वसजातीयगुणजन्यवृत्तित्वाभावादेव वारणात्, एकपृथक्त्वस्य गुणत्वव्याप्यव्याप्यजात्या सजातीयाप्रसिद्धेरिति चेन्न, एकपृथक्त्वनिष्ठापकर्षजातिमादायावयव्येकपृथक्त्वसाजात्यस्यावयवैक

---

त्वस्य केनाप्यनङ्गीकारान्नानिष्टापत्तिसम्भव इति भावः। **सुवचत्वादिति** । नन्वेवमपि द्विपृथक्त्वमपेक्षाबुद्ध्या जायते, तन्नाशान्नश्यति च, न तथैकपृथक्त्वमिति वैषम्यादेकपृथक्त्वं न द्विपृथक्त्वेन चरितार्थं भवतीत्यत आह—**एवमिति** । **समानेपि** घटः पटात् पृथक्, घटौ पटात् पृथगिति प्रतीत्योः समानेपि। **अपेक्षते तु तामिति** । तथाच द्विपृथक्त्वमपि नापेक्षाबुद्धिजन्यमिति भावः। नन्वेवं द्विपृथक्त्वमात्राङ्गीकर्तृमते अपेक्षाबुद्धेर्व्यञ्जकत्वं तन्नाशस्य प्रत्यक्षनाशकत्वञ्चाभ्युपेयमित्यत आह—**समानमेतदिति** । एकपृथक्त्वमात्राङ्गीकर्तृमतेपि एकपृथक्त्वस्यापेक्षाबुद्धिजन्यत्वाभावेन तथा स्वीकारस्यावश्यकत्वादिति भावः। **तदवधिकत्वेति** । मैत्रावधिकत्वेत्यर्थः॥



पृथक्त्वे सम्भवात्। उक्तञ्चाचार्यैः—'कारणविशेषात् प्रकर्षनिकर्षलक्षणोऽवान्तरविशेषस्त्वस्त्येव' इति। न चैवं सति त्रित्वाद्यपेक्षया निकर्षजातेरेकत्वद्वित्वाद्योस्सत्त्वादवयवावयविद्वित्वादावतिव्याप्तिरिति वाच्यम्, एकत्वगतो निकर्षः स्वेतरनिखिलसंख्यावधिकः, न तथा द्वित्वादिगत इति तयोर्भेदात् एकत्वद्वित्वयोर्दर्शितसाजात्यासम्भवात्॥

**सु—अन्योन्याभाव इति** । 'अन्योन्याभाव एव' इति पाठः। 'कल्प्यत इत्यत आह' इत्यनन्तरम् 'अस्मादिति' इत्यस्य स्थाने 'अन्योन्याभावत इति। विलक्षणेति' इति। पठनीयम्। दृश्यते चैवमेव ताळीपत्रग्रन्थेषु॥

**दि—ननु रूपं न घट** इत्यत्र यत्किञ्चिद्घटावधिकपृथक्त्वस्य सामानाधिकरण्यसम्बन्धेन घटान्तरादिरूपे भानान्नानुपपत्तिरित्याशङ्कायामाह—**इदमुपलक्षणमिति** । **प्रतीत्यनुपपत्तेरिति** । ननु कालिकस्वाश्रयसमवेतसमवेतत्वाद्यबाधितसम्बन्धेन पृथक्त्वावगाहनान्नानुपपत्तिरित्यत आह—**एतद्रूपमिति** । अत्र रूपपदं घटादेरुपलक्षकम्, तेन द्रव्यभिन्नावधिकपृथक्त्वस्याप्रसिद्ध्यैव नात्रापत्तिसम्भव इति दूषणं परास्तम्। **अन्योन्याभावार्थकपदयोगस्येति** । 'अन्यारादितरर्ते' इति सूत्रे इतरग्रहणवैयर्थ्यपरिहाराय अन्यपदमन्योन्याभावार्थकम्, इतरपदं तद्विशिष्टार्थकमित्यभ्युपगन्तव्यत्वादित्याशयः। पृथक्त्वरूपगुणाङ्गीकारे तु अन्यपदं पृथक्त्वविशिष्टार्थकमिति न नञ्पदयोगे पञ्चम्यापत्तिः। 'पृथग्विना' इत्यादिसूत्रे पृथग्ग्रहणञ्च वैकल्पिकतृतीयादिसिद्ध्यर्थमिति च ज्ञेयम्। **पञ्चमीविधानादिति** । सूत्रे इतरग्रहणं प्रपञ्चार्थमिति भावः। अन्यत्र **सिद्धान्तितत्वादिति** । लाघवाद्भेदत्वविशिष्टे शक्तिरिति नञ्वाददीधितौ सिद्धान्तितत्वादित्यर्थः। घटाद्भेद इत्यादावपादानपञ्चम्यैवोपपत्तिरित्यस्वरसं सूचयितुं यदिचेत्युक्तम्। सिद्धान्तितञ्चैवमेव व्युत्पत्तिवादे। **घटो न पट इति** । अत्र 'पट' इति प्रक्षिप्तम्। **निपातातिरिक्तेति** । अथैवं पृथक्पदस्यापि निपाततया तद्योगेपि पञ्चमी न स्यादिति चेन्न, 'पृथग्विना' इत्यनुशासनान्तरेण तत्र पञ्चमीविधानात्। नचान्योन्याभावपदस्य निपातातिरिक्तत्वात् भेदबोधकत्वाच्च तद्योगेपि पञ्चम्यापत्तिरिति वाच्यम्, निपातपदेन तस्याप्युपलक्षणात्॥

**भा—अप्राप्तयोरिति** । विद्यमानयोरप्यसम्बद्धयोरित्यर्थः। अवयव्यादीनामुत्पत्तिसमय एवावयवादिषु समवायसम्बन्ध इति समवायस्य नाप्राप्तप्रतियोग्यनुयो

---

नन्वन्यारादिति सूत्रे अन्यपदस्य पृथक्त्वविशिष्टार्थकत्वकल्पनं व्यर्थम्, पृथग्विनेत्यादिसूत्रेणैव पृथक्पदयोगे पञ्चमीविधानादित्याशङ्क्याह—**पृथग्विनेति** । **विद्यमानयोरिति** । सम्बद्धावस्थातः पूर्वं विद्यमानयोरित्यर्थः। तस्य फलमाह—**अवयव्यादीनामिति** ।

गिकत्वम् । एवं कालिकादिस्वरूपस्यापीति न तेष्वतिव्याप्तिः । यद्यपि भूतलघटाभावयो रप्राप्तयोरेव तत्तत्कालघटितस्वरूपसम्बन्धविशेष इति न तन्निरासः तथापि भावयोरिति विशेषणात्तद्व्युदासः, गोनिष्ठाश्वत्वाभावादिवारणाय प्राप्तिरिति । सम्बन्ध इत्यर्थः । अस्य लक्षणत्वसम्भवेपि लाघवमभिसन्धायोक्तम्—'लक्षणन्तु संयोगत्वं जातिः' इति दिनकर भट्टेन ॥

दि—**विजातीयसंयोगत्वेनेति** । ननु कुतो नैतेषां संयोगगतानां वैजात्यानां प्रत्यक्षमिति चेन्न, तृणादिजन्यतावच्छेदकवैजात्यानां वह्निगतानामिव तादात्म्येन प्रतिबन्धकत्वात् । यद्वा, नोदनत्वाभिघातत्वयोः प्रत्यक्षे वेगाभाववेगयोः प्रत्यक्षं यथा सहकारि, तथा प्रकृतवैजात्यानां प्रत्यक्षेपि अन्यतरकर्मादिसाक्षात्कारस्य सहकारित्वाङ्गीकारात् । एवमन्यतरकर्मोभयकर्मावयवसंयोगगतवैजात्यानामपि कारणतावच्छेदकानां प्रत्यक्षं ज्ञेयम् । ततः **कुम्भतरुसंयोग इति** । तस्मिन्नेव क्षणे कुम्भतरुसंयोग इत्यर्थः, न तु तदनन्तरमिति । तदानीं कपालक्रियानाशेनासमवायिकारणत्वस्य तत्रासम्भवात्, सामग्रीसत्त्वे कार्यावश्यम्भावाच्च । 'कपालक्रियया एव तरुसंयोगस्तत्र' इति प्रक्षिप्तम् । **हेतुत्वान्तरकल्पनापेक्षयेति** । नचावयविनि कर्मकाले तदवयवेष्वपि कर्मावश्यम्भावात् सर्वत्रावयवक्रियैव सामानाधिकरण्येन हेतुरिति न हेतुत्वान्तरकल्पनेति वाच्यम्, परमाणुद्वयसंयोगानुपपत्तेः, क्रियायाः क्रियान्तरं प्रत्यजनकत्वाच्च । अत एवात्र 'अवयविसमवेतक्रियां प्रत्यवयवसमवेतक्रियायाः समवायघटितसामानाधिकरण्यसम्बन्धेनैव हेतु

---

अस्य लक्षणत्वसम्भवेपीति । नचाप्राप्तयोरित्यस्य स्वोत्पत्तिपूर्वकालीनयोरित्यर्थकतया स्वत्वघटितत्वेनाननुगमात् कथं लक्षणत्वसम्भव इति वाच्यम्, स्वोत्पत्तिपूर्वकालीनस्वप्रतियोग्यनुयोगिकत्वसम्बन्धेन सम्बन्धविशिष्टत्वस्यानुगतत्वात् । नचोत्पत्तिघटनेनैव गोनिष्ठाश्वत्वाभावादावतिव्याप्त्यसम्भवात्सम्बन्धत्वनिवेशो व्यर्थ इति वाच्यम्, तथाप्यादिपदग्राह्यगोनिष्ठरूपध्वंसादिवारणाय तदावश्यकत्वात् । तादृशजातीनां प्रत्यक्षमस्त्येवेत्यभिप्रायेण तस्यासार्वकालिकत्वं सङ्गमयति–यद्वेति । एवमिति । तत्तत्संयोगविशेषसाक्षात्कारस्यात्र सहकारिता ग्राह्या । ननु क्रियायाः संयोगजनने पूर्ववृत्तित्वमेवापेक्षितम्, न कार्यसहभाव इति मते न दोषइत्याशङ्क्याह—**सामग्रीसत्त्व इति** । तथाच कपालतरुसंयोगक्षण एव कारणसत्त्वेन कुम्भतरुसंयोगस्यापि सम्भाव्यतया अनन्तरक्षणपर्यन्तानुधावनमनुपपन्नं स्यादिति भावः । ननु सामानाधिकरण्येन क्रियायाः संयोगं प्रति हेतुत्वं न कल्प्यते, किन्तुसमवायेनैव । कपालतरुसंयोगेन कुम्भतरुसंयोगस्थले कपालक्रियया उत्तरक्षणे कुम्भे क्रिया जायते, तयैव कुम्भतरुसंयोग इति न हेतुत्वान्तरकल्पनेत्याशङ्क्याह—**क्रियाया इति** । अत एव क्रियायाः क्रियान्तरं प्रत्यजनकत्वादेव । तदजनकत्वे युक्तिश्च गुणकर्मणोः साधर्म्यविचारे



त्वस्य क्लृप्तत्वात्' इति प्रभाकारोक्तमनादरणीयम् । ननु तत्रापि संयोगगतवैजात्ये संयोगकारणतावच्छेदकत्वं कल्प्यमिति गौरवमित्यत आह—**वस्तुत इति** । प्रभाकृतां यदत्रखण्डनम्, तदपेशलम्, घटजनककपालद्वयसंयोगस्य चक्रावच्छेद्यत्वेपि अवयवान्तरावच्छेदेन कपालस्य कदाचित्तरुणापि संयोगे बाधकाभावात् । सर्वावयवावच्छेदेन कपालद्वयसंयोगश्च घटोत्पादे नोपयोगी, असम्भवात् । अथैतादृशस्थलेपि कुम्भतरुसंयोगो न संयोगजः, किन्तु चक्रनोदनाधीनकुम्भक्रियाजन्यः, कुम्भोत्पत्त्यव्यवहितोत्तरक्षण एव कुम्भतरुसंयोगानङ्गीकारे क्षत्यभावादिति चेन्न, यतस्तत्र कुम्भक्रियया कुम्भतरुसंयोगानङ्गीकारे कुम्भोत्पत्तिषष्ठक्षण एव कुम्भतरुसंयोगोत्पत्त्या तदुत्तरमेव तत्प्रत्यक्षं सम्भवितुमर्हति । इत्थञ्च तत्पूर्वक्षणेषु कुम्भे तरुसंयोगप्रत्यक्षानुपपत्तिरूपायास्तदभावप्रत्यक्षापत्तिरूपायाश्च क्षतेः सत्त्वात् कुम्भोत्पत्तिद्वितीयक्षण एव कुम्भतरुसंयोगस्याङ्गीकरणीयतया संयोगजसंयोगोऽवश्यं स्वीकार्य इति । यदत्र दिनकरभट्टैः प्रत्यपादि संयोगेषु वैजात्यत्रयं, तदवच्छिन्नकारणेषु च वैजात्यत्रयमङ्गीकृत्य कार्यकारणभावो वक्तव्य इति, तत्रेदं विचारणीयम्—उभयकर्मस्थलेपि तत्तन्मेषगगनादिसंयोगरूपस्यान्यतरकर्मजन्यसंयोगस्य नियमेनोत्पत्त्या कर्मत्वजातिरेवान्यतरकर्मनिष्ठाया विजातीयसंयोगनिरूपितकारणताया अवच्छेदकं सुवचमिति विजातीयकर्मत्वस्य कर्मत्वव्याप्यजातिविशेषरूपस्य तत्त्वप्रदर्शनं निर्युक्तिकमिति । एवं साङ्कर्यस्य जातिबाधकत्वाङ्गीकारे उभयकर्मजसंयोगस्थलेपि जातिविशेषस्य कारणतावच्छेदकत्वं दुर्घटम्, यत उत्क्षेपणावक्षेपणरूपकर्मद्वयेन यत्र पदार्थयोः संयोगः, तत्र तज्जनकैककर्मणि वैजात्योत्क्षेपणत्वयोस्सामानाधिकरण्यम्, उत्क्षेपणत्वं विना वैजात्यमवक्षेपणे तत्रैव, वैजात्यं विना चोत्क्षेपणत्वमुत्क्षेपणरूपान्यतरकर्मणीति साङ्कर्यं स्यात् । इत्थमवक्षेपणत्वादिनापि साङ्कर्यं सूपपादम् । नचैतद्वैजात्यव्याप्यमुत्क्षेपणत्वादिकमुत्क्षेपणादिरूपान्यतरकर्मव्यावृत्तमेवाङ्गीक्रियत इति वाच्यम्, उत्क्षेपणत्वादिना पञ्चधा कर्मविभागानुपपत्तेरिति । **कुम्भतरुसंयोगानुपपत्तेरिति** । प्रथमान्तः साधुः पाठः । **अन्यतरकर्मजन्यसंयोगस्याप्रसिद्धेरिति** । अत्रान्यतरकर्मपदं संयोगस्याप्युपलक्षणम्, युक्तेस्तौल्यात् । **यत्किञ्चिद्व्यक्त्यधिकरणीभूतेति** । घटत्वावच्छिन्नं प्रत्यनन्यथासिद्धत्वेन सिद्धा

---

प्रतिपादिता तत्रैव द्रष्टव्या । **युक्तेस्तौल्यादिति** । कुम्भतरुसंयोगाधिकरणे कुम्भे कपालतरुसंयोगविरहेण व्यभिचारादित्यर्थः । **अनन्यथासिद्धत्वेन सिद्धान्तितस्येति** । तथाच तादृशदलेन

न्तितस्य रासभस्य तन्निरूपितकारणत्वापत्तिः, रासभाभावस्य घटाधिकरणयावद्व्यक्त्यन्तर्गततद्घटाधिकरणे वृत्तित्वाभावादतो यत्किञ्चिदिति । इत्थञ्च रासभासमानाधिकरणघटव्यक्तिमादाय रासभे नैयत्यभङ्गस्सुघटः । कार्यतावच्छेदकावच्छिन्नयत्किञ्चिद्व्यक्तीत्यादेः तादृशयत्किञ्चिद्व्यक्त्यधिकरणतासमानाधिकरणाभावप्रतियोगितानवच्छेदकं यद्यद्धर्माव च्छिन्नप्रतियोगिताकाभावत्वम्, तत्तद्धर्मभिन्नो योऽन्यथासिद्धिनिरूपकतानवच्छेदको धर्मः, तद्वत्त्वमित्यर्थः, तेन न प्रमेयत्वाभावत्वादिकं तादृशाधिकरणताव्यापकतावच्छेदकमादाय कारणाभावस्य तादृशाधिकरणताव्यापकत्वापत्तिः। अत्र चाय मनुगमः—कार्यविशिष्टधर्मभिन्नत्वम् । वैशिष्ट्यं धर्मे स्ववद्भिन्नत्वसम्बन्धेन । स्वव त्त्वं स्वाधिकरणतासमानाधिकरणाभावप्रतियोगिताविशिष्टत्वसम्बन्धेन । वैशिष्ट्यं स्वावच्छेदकाभावत्वनिरूपकतावच्छेदकत्वसम्बन्धेनेति । अत्र केचित्—स्वाव्यवहितोत्तरक्षणावच्छेदेन कारणतावच्छेदकावच्छिन्नसमानाधिकरणप्रतियोगिव्यधिकरणाभाव प्रतियोगितानवच्छेदककार्यतावच्छेदककत्वं कारणत्वम् । इत्थञ्च क्रियाधिकरणे न प्रतियोगिव्यधिकरणसंयोगाभाव इति न व्यभिचार इत्याहुः । तच्चिन्त्यम्, कदाचिदपि दण्डाद्यसमवहिते कपालादौ कारणाधिकरणे घटाभावसत्त्वादसम्भवापत्तेः। स्वाव्यवहितोत्तरक्षणे स्वेतरयावत्कारणाधिकरणत्वनिवेशेन तद्वारणे आत्माश्रयः । दण्डत्वादिना कारणानान्निवेशे चाननुगम इति । अधिकं कारणत्वसाधर्म्ये द्रष्टव्यम् । सूचितश्चेदं दिगित्यनेन। **कारणताघटकमिति** । कारणत्वस्यानन्यथासिद्धत्वघटितत्वात् घटकमित्युक्तिः। **जातिसङ्करप्रसङ्गादिति** । क्रियाजन्यतावच्छेदकस्य संयोगजन्यतावच्छेदकस्य च वैजात्यस्यैकत्र समावेशसम्भवादितिभावः । **चित्रसंयोगो विजातीय एवेति** । तथाच संयोगश्चतुर्विध इति तदाशयः । इदमत्रालोचनीयम्—क्रियाया व्याप्यवृत्तित्वं, सत्यां क्रियायां क्रियान्तरं नोत्पद्यत इति च सिद्धान्तात् हस्तक्रियोत्पत्तिद्वितीयक्षणे शरीरक्रियोत्पत्तिर्न्नसम्भवति, शरीरक्रियायामुत्पद्यमानायां सर्वावयवेषु क्रियोत्पत्तेराव श्यकत्वात्, हस्ते च तदानीं क्रियोत्पत्तेरसम्भवात् । नच क्रियाया व्याप्य

वारयितुमशक्यस्येति भावः । तेन यावद्व्यक्तिकाभावप्रतियोगितावच्छेदकधर्मवत्त्वरूपयथाश्रुतव्यापकत्वपरित्यागेन। **न सामग्रीसंवलनमिति** । क्रियाजन्यसंयोगजसंयोगयोः सामग्रीसंवलनमित्यर्थः। **अविनश्यदवस्थापन्नेति** । शरीरक्रियायाः क्षणत्रये व्याप्यवृत्तित्वं चरमक्षणे अव्याप्यवृत्तित्वञ्चास्तीत्यभिप्रायेणेदम् । तत्र दृढतरप्रमाणादर्शनादस्वरससूचनाय यदिचेत्युक्तम् ॥



वृत्तित्वं न समानकालोत्पन्नक्रियावत्सर्वावयवावच्छेद्यत्वम्, किन्तु क्रियावत्सर्वावयवावच्छेद्यत्वमेव । तच्च पूर्वोत्पन्नक्रियाया हस्ते सत्त्वादेवोपपद्यत इति वाच्यम्, शरीरतरुसंयोगोत्पत्तिक्षणे हस्तक्रियानाशः शरीरक्रिया च वर्तत इति व्याप्यवृत्तित्वभङ्गस्य अपरिहारात् । अतः पूर्वहस्तक्रियानाशानन्तरमेव शरीरे तदीयनिखिलावयवेषु च क्रिया जायत इत्यभ्युपेयम्। इत्थञ्च न सामग्रीसंवलनमिति । यदिचाविनश्यदवस्थापन्नक्रियाया एव व्याप्यवृत्तित्वनियम इत्युच्यते, तदा सम्भवेदेव दर्शितसामग्रीसंवलनमिति ध्येयम्। एकस्मात् संयोगात्, द्वाभ्यां, बहुभ्यश्च एकः संयोगजसंयोगो भवति। एकस्मात् संयोगात् द्वयोस्संयोगयोरुत्पत्तिर्भवति । एवं संयोगजाभ्यां संयोगाभ्यामेकः संयोगो भवति। नित्यः संयोगो नास्तीत्यादिकं भाष्यादितोऽवगन्तव्यमिति ज्ञापयितुम् 'अन्यत्र विस्तरः' इत्युक्तम्। एवमन्यतरोभयकर्मजन्यतावच्छेदकवैजात्ययोर्नोदनत्वादिना साङ्कर्यवारणाय नोदनत्वव्याप्यं जातिद्वयम्, अभिघातत्वव्याप्यञ्चापरं जातिद्वयमित्यपि विस्तरान्तरं बोध्यम् ॥

भा—**कर्मजोपीति** । संयोगजसंयोगस्तु नाभिघातः, न वा नोदनमिति भावः । नचैवं शब्दाहेतुसंयोगत्वरूपनोदनलक्षणस्य तत्रातिव्याप्तिरिति वाच्यम्, 'शब्दाहेतुः' इत्यस्य स्वरूपकथनमात्रपरत्वात्, कर्मजत्वमपि घटयित्वा तस्य लक्षणपरत्वस्य सुवचत्वाच्च ॥

मु—मूले विभागलक्षणाकथनन्यूनतां परिहरन् विभागं विशिनष्टि—**विभक्तप्रत्ययेति** । विभागत्वमेव लक्षणम्, तत्र प्रमाणोपन्यासाय विशेषणमिति

**एकस्मादित्यादि** । संयोगादिति पदं वचनविपरिणामेन द्वाभ्यां बहुभ्य इत्यत्रापि सम्बध्यते । एकस्मात् हस्तपुस्तकसंयोगात् एकस्य कायपुस्तकसंयोगस्य, द्वाभ्यां तन्त्वाकाशसंयोगाभ्यां द्वितन्तुकपटाकाशसंयोगस्य, बहुभ्यश्च तन्तुतुरीसंयोगेभ्यः एकतुरीपटसंयोगस्य चोत्पत्तिरिति विवेको बोध्यः। **एकस्मात् संयोगात् द्वयोरिति** । यदा पार्थिवाप्यपरमाण्वोस्संयोगे सति अन्येन पार्थिवेन पार्थिवस्य अन्येनाप्येन चाप्यस्य युगपत् संयोगौ भवतः, तदा ताभ्यां संयोगाभ्यां पार्थिवाप्ये द्व्यणुके युगपदारभ्येते। ततो यस्मिन् काले द्व्यणुकयोः कारणगुणप्रक्रमेण द्व्यणुकयो रूपाद्युत्पत्तिः, तस्मिन्नेव क्षणे इतरेतरकारणाकारणगतात् पार्थिवाप्यपरमाणुसंयोगादितरेतरकार्याकार्यगतौ पार्थिवपरमाण्वाप्यद्व्यणुकसंयोगः, आप्यपरमाणुपृथिवीद्व्यणुकसंयोगश्चेति द्वौ संयोगौ युगपदुत्पद्येते इत्येकस्मात् संयोगात् द्वयोस्संयोगयोरुत्पत्तिरवसेया। क्रियाजन्याभ्यां संयोगाभ्यामेकसंयोगोत्पत्तिर्दर्शिता, इदानीं संयोगजाभ्यामपि ताभ्यामेकसंयोगोत्पत्तिं दर्शयति—**एवमिति** । तथाचाप्यपार्थिवपरमाण्वोर्यः प्रथममेकः संयोगो जातः, तज्जन्याभ्यां विजातीय

परे । तेनैवेति । एतदुत्तरं 'कपालविभागेन' इति प्रक्षिप्तम् । 'तेनैवेति । कपालविभा गेनैवेत्यर्थः ' इति दिनकरीयपाठः ॥

दि—नाशकाभावेनेति । नन्वाश्रयनाश एव नाशको भविष्यतीति चेन्न, आश्रयनाशाजन्यनाशप्रतियोगित्वाभावस्यैवात्र नित्यत्वपदेन विवक्षणात्, कपालपदस्यावयवसामान्योपलक्षकतया घटपदस्य द्व्यणुकाद्युपलक्षकतया च परमाण्वाकाशसंयोगस्य नित्यत्वापत्तेरसम्भवाच्च। ननु कपालपरमाण्वादौ क्रियान्तरेणैव दर्शित संयोगनाशो भविष्यतीत्यत आह—एवमिति । 'एव' इति मुद्रितपाठः प्रामादिकः। पूर्वदेशसंयोगनाशानन्तरमेवोत्तरसंयोगस्यानुभवादिति प्रतिबन्धकस्य सत्त्वेनेति। उक्तञ्च न्यायकन्दलीकारैः—'पूर्वदेशावस्थितस्य द्रव्यस्य देशान्तरप्राप्तेरसम्भवात्' इति। हृदि निधायोक्तमिति । अन्यथा प्रकृतानुपयोगात्तद्वचनमयुक्तं स्यादिति भावः ॥

मु—कारणविभागेनैवेति । एतदुत्तरं 'द्रव्यनाशात्' इति प्रक्षिप्तम् । शरीरेपीति। एतदुत्तरं 'क्वचित्' इत्यपि ताळीग्रन्थपाठः ॥

दि—'सति द्रव्ये' इत्यस्य विवरणं 'द्रव्यनाशं विना' इति। पाकजेति। जकारः प्रक्षिप्तः। तदुभयसामानाधिकरण्यसत्त्वादिति। ननु शरीरतरुसंयोग नाशाय विभागजविभागो मा स्वीक्रियताम्, तथापि तत्संयोगनाशार्थं विभागोऽङ्गीकार्य एवेत्याशङ्कामपनुदति—मास्त्विति । 'कर्मजन्यः' इति विसर्गान्तः पाठः । उक्ताभिन्नवक्ष्यमाणयुक्त्यैवेत्यर्थः। कारणतावच्छेदकलाघवमनुसन्धाय अत एवेति । किञ्चेति । 'हेतुस्तु' इत्यत्र 'हेतुरस्तु' इति पाठः। विरोधिगुणजन्यत्वनियमेनेति । नन्वपेक्षाबुद्धिनाशात् द्वित्वादिनाशदर्शनान्नायं नियम इत्यत आह—शरीरकर्मजन्येति । तथाचाश्रयनाशाजन्यगुणनाशस्य विरोधिगुणकारणनाशान्यतर

द्व्यणुकेतरेतरावयवीभूतपरमाणुसंयोगाभ्यां जातः संयोग इत्यर्थः। यथाश्रुतनित्यत्वमवलम्ब्यैव समाधत्ते—कपालपदस्येति ॥



प्रक्षिप्तमिति । दिनकरीये 'पूर्वं' इति प्रतीकं धृत्वा व्याख्यानादिति भावः ॥



जन्यत्वनियमोऽस्त्येव, तस्य च भङ्गः। यद्वा, आश्रयनाशाजन्येत्यत्राश्रयपदं कारणमात्रबोधकम्। इत्थञ्च कारणनाशाजन्यगुणनाशं प्रति विरोधिगुणः कारणमित्येव नियमाकारः। तथाच न द्वित्वादिनाशे व्यभिचारः। नचैवं करतोयातिलङ्घनादिचेष्टया कथं धर्मनाश उपपद्यत इति वाच्यम्, आत्मनिष्ठतया समानाधिकरणायास्तदनुकूलकृतेरेव धर्मनाशकत्वाङ्गीकारात्। अथैवं नियमपरिष्कारेपि तद्भङ्गो दुष्परिहर इति दर्शयति—शरीरकर्मजन्येति । अकारणत्वेनेति। शरीरे तदवयवेषु च यदा कर्मोत्पत्तिस्तदनन्तरं हस्तक्रियया हस्ततरुसंयोगः शरीरक्रियया च हस्तावच्छेदेन शरीरतरुसंयोगः समकालं जायते, तत्र हस्ततरुसंयोगस्य पूर्वभावित्वाभावान्न कारणत्वसम्भव इति भावः। अयमत्र प्रयोगः—कर्मजशरीरतरुसंयोगस्य नाशः किञ्चिज्जन्यः नाशत्वात् घटनाशवदिति। अत्र हस्ततरुसंयोग नाशादिजन्यत्वबाधाद्विभागसिद्धिः। अत्रानुमाने कर्मणा सिद्धसाधनमाक्षिप्य परिहरति—यच्चोक्तमिति । दर्शितो गुणजन्यत्वनियमश्चाप्रयोजक इत्याशयः । सङ्कोचकल्पनानुपपत्तेरिति । तथाच हस्तक्रियाया न कारणत्वसम्भव इति भावः। नन्वनन्तविभागतत्प्रागभावादिकल्पनागौरवरूपबाधकस्य सत्त्वान्नियमसङ्कोच, उपपद्यत एवेति न विभागसिद्धिरित्यत आह—वस्तुतस्त्विति । संयोगाभाव इति। संयोगनाश इत्यर्थः। अन्यथा गुणादावपि विभक्तप्रत्ययापत्तेः। एवमग्रेपि। ननु कपालद्वयसंयोगादीनां घटाद्यसमवायिकारणत्वान्यथानुपपत्त्या गुणकर्मान्यतरत्वं स्वीकार्यम्, तत्र च कर्मत्वं प्रत्यक्षबाधितमिति संयोगस्य गुणत्वे विनिगमकमस्तीत्याशयेनाह—अत एवेति। इदमत्रावधेयम्—संयोगश्चिरस्थायी संयुक्तप्रत्ययस्यानुवृत्तिदर्शनात्। विभागस्तूत्तरसंयोगनाश्यः, जाते उत्तरसंयोगे विभक्तप्रत्ययादर्शनात्। स्पष्टञ्चेदं भाष्यादौ। तथाच ज्ञायते विभागो न संयोगनाशात्मकः, किन्तु क्षणिकं गुणान्तरमितीति ॥

नन्वेवं नियमपरिष्कारे व्याप्यतावच्छेदककोटावाश्रयनाशाजन्यत्वविशेषणं व्यर्थम्, कारणपदस्याश्रयेतरकारणार्थकत्वे महागौरवमित्यत आह—यद्वेति। तदनुकूलकृतेरिति। तथाच विरोधिगुण एव नाशक इति भावः। ननु घटः पटाद्विभक्त इत्यत्र नावधित्वं प्रतीयते, अपितु पटादन्य इत्यादाविव प्रतियोगित्वम्, तच्च संयोगनाशैकदेशसंसर्गे भासत इति न विभागस्य संयोग नाशात्मकत्वे तत्प्रत्ययानुपपत्तिरित्यत आह—इदमत्रावधेयमिति । क्षणिकमिति। त्रिक्षणस्थायीत्यर्थः ॥

**भा—परत्वमपरत्वञ्चेति ।** परत्वापरत्वयोरेकग्रन्थेन निरूपणं तयोः परस्परानुविद्धव्यवहारकारणत्वेन ज्ञापनार्थं, संक्षेपार्थञ्चेति किरणावल्यामुक्तमनुसन्धेयम् ॥ **दैशिकमिति ।** दैशिकपरत्वापरत्वयोरजन्यद्रव्येष्वपि सम्भवादाश्रयाणामधिकसंख्याकत्वरूपं प्राशस्त्यमवलम्ब्य तयोः प्रथममुक्तिः । दैशिकं विप्रकृष्टादिदेशविशेषप्रत्यायकम्, श्रुताभ्यां परत्वापरत्वाभ्यां दूरसमीपरूपदेशविशेषस्यानुमानादिति भावः ॥ एवं कालिकमित्यस्याप्यर्थः ॥

**सु—**परत्वापरत्वयोर्लक्षणप्रमाणे दर्शयितुं 'परापरव्यवहारनिमित्ते' इति विशेषणम् । निमित्तपदमिदं विशेषणार्थकमिति किरणावल्याममिहितम् ॥

**दि—विप्रकृष्टदेशमात्रवृत्तित्वेति ।** समीपदूरस्थयोर्घटपटयोस्संयुक्ते दीर्घदण्डे 'घटादयं परः, पटादपरः' इति प्रत्ययापत्तिपरिहाराय मात्रपदम् । तथाच तद्बुद्धेः परत्वादिकारणस्य विभावसम्भवात्तत्र न परत्वादिरिति भावः ॥

**सु—**'परापरव्यवहारनिमित्ते' इत्यनेनोक्तलक्षणघटकव्यवहारस्वरूपं तद्घटकपञ्चम्यर्थप्रदर्शनपूर्वकं दर्शयति—**अत्रावधित्वेति । अवधित्वार्थम्** अवधित्वबोधार्थम् । 'अत्र परत्वमपरत्वं च' इति पाठः ॥

**भा—अपेक्षाबुद्धिनाशेनेति ।** अत्रापेक्षाबुद्धिनाशपदं समवायिकारणासमवायिकारणनाशयोरप्युपलक्षकम्, 'विनाशस्त्वपेक्षाबुद्धिसंयोगद्रव्यविनाशात्' इति भाष्यात् । अधिकं तत एवावगन्तव्यम् ॥

**दि—वदन्तीति ।** नचैवं कालिकपरत्वादिः जन्यगुणादावपि स्यादिति वाच्यम्, प्राचीनमते कालिकपरत्वादिजनकापेक्षाबुद्धेस्तत्रानिवार्यतया स्वमते तत्रेष्टा

---

**परस्परानुविद्धेति ।** परस्पराश्रयविषयकेत्यर्थः । कारणत्वेनेति तृतीयायाः प्रकारत्वमर्थः ॥

**नाशयोरप्युपलक्षकमिति ।** क्वचिदपेक्षाबुद्धिनाशात्, समवायिकारणनाशात्, असमवायिकारणनाशात्, समवायिकारणापेक्षाबुद्ध्योर्नाशात्, समवायिकारणासमवायिकारणयोर्नाशात्, असमवायिकारणापेक्षाबुद्ध्योर्नाशात्, त्रितयनाशाच्च परत्वापरत्वयोर्नाश इत्यर्थः । उदाहरणानि भाष्यतोऽवगन्तव्यानि ॥

**एवम्** कालिकपरत्वादेर्बहुतरस्पन्दान्तरितजन्यत्वादिरूपत्वे । **कालिकपरत्वादीति ।** आदिपदात्तादृशापरत्वपरिग्रहः । दैशिकपरत्वादेर्बहुतरसंयोगान्तरितत्वादिरूपतया गुणादौ संयोगासम्भवेन तदापत्तेरयोगात् कालिकेति । **अनिवार्यतयेति ।** तथाच गुणादौ द्वित्वादेरिव



पत्तौ बाधकाभावात् । आचार्यास्तु, संयोगबहुत्वभावस्याविशेषेपि वाराणसी किञ्चिदपेक्ष्य मत्तः परा अपरा वेति, अहमपि तस्याः परोऽपरो वेति च प्रत्ययाभावात् परापरत्वे न विप्रकृष्टत्वसन्निकृष्टत्वरूपे, किन्तु गुणान्तरे । नच परत्वापरत्वकारणस्य विप्रकृष्टत्वसन्निकृष्टत्वबुद्धेः प्रमातृविषयत्वसम्भवात् कारणसत्त्वात् कार्यं तत्र कुतो नोत्पद्यत इति वाच्यम्, भेर्याकाशसंयोगस्यासमवायिकारणस्योभयाश्रयत्वाविशेषेपि यथा नभ एव समवायिकारणं शब्दस्य, तथा संयोगबहुत्वाद्यविशेषेपि प्रमेय एव परत्वापरत्वयोः समवायिकारणम्, न तु प्रमातेत्यभ्युपगमसम्भवादित्याहुः । तच्चिन्त्यम् । इदन्तु बोध्यम्—घट इत्यादिप्रतीतिविषयताया अनेकत्र कल्पनागौरवभिया यथा अवयवातिरिक्तावयविसिद्धिः, तथा पर इत्यादिप्रतीतिविषयताया अपीति विप्रकृष्टत्वादिव्यतिरिक्ते गुणान्तरे एव परत्वापरत्वे सिद्ध्येते इति । अथ द्विपृथक्त्वादिवत् द्विपरत्वादयोऽपि किन्न स्युरिति चेन्न, अन्योन्यावधित्वानवधित्वरूपविरुद्धधर्माधिकरणत्वाद्धि द्विपृथक्त्वादीनामेकपृथक्त्वाद्वैलक्षण्यमुपपादितम्, तथा नात्र सम्भवति, घटनिष्ठपरत्वे पटावधिकत्ववत् तयोस्समानदेशतास्थले पटावधिकत्वाभावस्यापि सत्त्वाद्विरोधाभावात्, असमानदेशस्थौ घटपटाववलम्ब्येमौ कुड्यात् पराविति धीसत्त्वेपि एकस्य परत्वादपरस्य परतरत्वात् परत्वस्य तत्र प्रत्येकविश्रान्तेरवश्याभ्युपेयत्वात्, एकस्यैव द्विपरत्वस्य तत्र स्वीकारे उत्कर्षापकर्षप्रतीतेरनुपपन्नत्वाच्च । उक्तञ्चेदं पृथक्त्वकिरणावल्याम् ॥

**भा—बुद्धेः प्रपञ्च इति ।** ननु परत्वापरत्वादेरिव बुद्धेरपि विभाग एव कर्तव्यः, किं मध्ये प्रतिज्ञयेति चेन्न, बुद्धिविभागस्य प्रागेव कृतत्वेन तत्र

---

अपेक्षाबुद्धिविशेषविषयत्वरूपस्य कालिकपरत्वादेः प्राचीनैरपि तत्र स्वीकृतत्वादिति भावः ॥ **तच्चिन्त्यमिति ।** चिन्ताबीजन्तु—उक्तयुक्त्या दैशिकपरत्वापरत्वयोर्गुणान्तरत्वसिद्धावपि कालिकयोस्तयोस्तथात्वे प्रमाणाभावः, प्रमातर्यपि ज्येष्ठे 'अहं तस्मात् परः', कनिष्ठे 'अहं तस्मादपरः' इति प्रत्ययस्य सर्वानुभवसाक्षिकत्वादिति । **समानदेशतास्थल इति ।** तत्र कुड्यादिनिरूपितं परत्वं बोध्यम् । **विरोधाभावादिति ।** घटनिष्ठपरत्वे पटावधिकत्वतदभावावुपपादयितुं शक्येते इति नात्र तयोर्विरोधः, एकपृथक्त्वे तु न तथा, घटनिष्ठैकपृथक्त्वे कदापि पटावधिकत्वाभावस्य वक्तुमशक्यत्वात्, तत्र तस्य सदातनत्वादिति भावः । ननु घटपटयोरसमानदेशतास्थले इमौ कुड्यात् पराविति व्यवहारात् द्विपरत्वमङ्गीकार्यम्, तच्चैकपरत्वादतिरिक्तं वक्तव्यम्, एकपरत्वस्यान्यतरावधिकत्वात्, द्विपरत्वस्य च तदन्यकुड्याद्यवधिकत्वादित्याशङ्क्याह—**असमानेति । अवश्याभ्युपेयत्वादिति ।** तथाच तत्र प्रत्येकविश्रान्तं कुड्यनिरूपितपरत्वद्वयमवलम्ब्य तरतमभावमनादृत्य व्यवहार इति भावः ॥

पुनर्जिज्ञासानुदयात्तत्सम्पादनार्थं तस्या आवश्यकत्वात्। प्रपञ्चः प्रकारः। अवशिष्टभागस्या रूपत्वादाह—**प्रायश इति**। अप्रमायाः प्रथमतो निर्देशश्च तद्भिन्नत्वस्यैव प्रमालक्षण तया वक्ष्यमाणत्वात्। प्रमालक्षणमभिधाय तद्भिन्नत्वमप्रमालक्षणं कुतो न दर्शितमिति तु न शङ्कयम्, सर्वेषामपि ज्ञानानां किञ्चिदंशे प्रमात्वेन भ्रमलक्षणस्य असम्भवा पातात्। महामल्लभङ्गन्यायमनुसृत्य प्रथममप्रमानिरूपणमिति केचित् ॥

**प्रु—क्रमप्राप्तामिति**। एतत्पूर्वं 'निरूपण' इति प्रक्षिप्तम्। 'निरूप यति' इत्यत्र 'निरूपयितुमाह' इति च पाठः। 'तच्छून्ये' इत्यत्र सप्तम्यर्थो विशेष्य त्वमिति सूचयन् तन्मतिरिति षष्ठीतत्पुरुषघटकतच्छब्दस्य तत्प्रकारकार्थकतां विशद यति—**तदभाववतीति**। एतेन शुक्तिकां दृष्ट्वा अत्र रजतत्वमित्यादिज्ञानं रजतत्व भ्रम इति न व्यवहारः, किन्तु एतद्वृत्तित्वभ्रम इत्येवेति सूचितम् ॥

**दि—तदभाववद्विशेष्यकतदभावप्रकारकेति**। यद्यपि तत्प्रकारकत्वा निवेशे वह्निभ्रमलक्षणस्य अयं ह्रद इत्यादिप्रमायामप्यतिव्याप्तिः सम्भवति, तथापि तद भावस्योपस्थितत्वात्तदभावप्रकारकेत्युक्तिः। अपिच ज्ञानव्यक्तेरलक्ष्यताप्रयोजकप्रमात्वस्फुटी करणायैतदुक्तिः। भ्रमलक्षणघटकतदभाववत्त्वं तन्निष्ठप्रकारत्वाभाववद्धर्मावच्छिन्नत्व,साव च्छिन्नावच्छेदकताकत्वोभयाभाववत्तन्निष्ठप्रतियोगिताकाभाववत्त्वरूपम्। प्रकारत्वाभावश्च अवच्छेदकतासम्बन्धावच्छिन्नप्रतियोगिताको बोध्यः, तेन विशिष्टाभावोभयाभावादिक मादाय न प्रमायामतिव्याप्तिः, न वा गुणो द्रव्यमित्यादिभ्रमे प्रकारतावच्छेदका प्रसिद्धिनिबन्धनाव्याप्तिः। येन सम्बन्धेन प्रकारता, तेन सम्बन्धेन प्रतियोगिता ग्राह्या, तेन समवायेन घटाभावमादाय भूतलं घटवदिति प्रमायां नातिव्याप्तिः। तदभाव वत्त्वञ्च तद्वत्ताग्रहविरोधितानियामकसम्बन्धेन, तेन कालिकादिसम्बन्धमादाय नाति व्याप्तिः। भावस्यापि तदभावाभावत्वेन दैशिकविशेषणतया वृत्तित्वमते दैशिकविशेषणतया तदभाववत्त्वं बोध्यमिति केचित्। तन्न, कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभा

---

**तदभावस्योपस्थितत्वादिति**। तथाचायं ह्रद इत्यादिप्रमायां नातिव्याप्तिरिति नाभिप्रायः, परन्त्वतिव्याप्तिस्फुटीकरणाय लक्ष्यव्यक्तिविशेषे परिचाययितव्ये साक्षिध्यात्तदभाव एव तत्र प्रकारतया उपात्त इति भावः। ननु विशिष्टाभावादिकमादायातिव्याप्तिवारणाय प्रतियोगि तायां पर्याप्तिघटितप्रकारतावच्छेदकावच्छिन्नत्वमेवोपादीयताम्, किमुभयाभावनिवेशेनेत्यत आह—न वेति। नच उभयाभावनिवेशो मास्तु, प्रकारत्वाभाववद्धर्मानवच्छिन्नत्वमेव प्रतियोगितायां



वाभाववानात्मेत्यादिप्रमायामतिव्याप्तेः, तृतीयाभावस्याकाशाभावरूपत्वात्तस्य चात्मनि दैशिकविशेषणतया सत्त्वात्। घटो नीलः, जलं नीलाभाववदिति समूहालम्बनप्रमायामति व्याप्तिवारणाय विशेष्यित्वप्रकारित्वयोरवच्छेद्यावच्छेदकभावोपि विवक्षणीयः। 'तच्छून्ये' इति कारिकावाक्ये उद्देश्यविधेयभावमहिम्नैव तल्लाभोऽवसेयः। प्रकारताविशिष्टविशेष्यता शालिज्ञानत्वं भ्रमसामान्यलक्षणम्। वैशिष्ट्यञ्च स्वविशिष्टप्रतियोगिताकाभाववद्वृत्तित्व, स्वनिरूपितत्वोभयसम्बन्धेन। प्रतियोगितायां स्ववैशिष्ट्यञ्च स्वसामानाधिकरण्य,स्वाव च्छेदकसम्बन्धावच्छिन्नत्व, अवच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठप्रतियोगिताकाभाववद्धर्मव दन्यत्वैतत्त्रितयसम्बन्धेन। धर्मवत्त्वं स्वावच्छिन्नत्वसहितस्वावच्छिन्नावच्छेदकताकत्वसम्ब न्धेन। भ्रमस्य लक्षणान्तराणि तेषामनुगमप्रकाराश्चान्यतोऽवगन्तव्यानि। निरुक्तविशे ष्यताशून्यत्वाचैव सर्वांशे प्रमात्वमवसेयम् ॥

---

विशेषणम्, तेनैव विशिष्टाभावादीनां वारणसम्भवादिति वाच्यम्, गुणो द्रव्यमित्यादिभ्रमे अव्याप्तितादवस्थ्यात्। तत्र धर्ममात्रस्य प्रकारतानवच्छेदकत्वात्, प्रतियोगिताभावस्य च किञ्चिद्धर्मा वच्छिन्नत्वनियमात् द्रव्यनिष्ठप्रकारत्वाभाववद्धर्मानवच्छिन्नप्रतियोगित्वाप्रसिद्धेः। उभयाभावनिवेशे तु द्रव्यत्वाभावीयद्रव्यत्वनिष्ठप्रतियोगितायामवच्छेदकस्य तद्व्यक्तित्वस्य स्वरूपतो भानेन तदवच्छिन्न द्रव्यत्वनिष्ठप्रतियोगितायां सावच्छिन्नावच्छेदकताकत्वाभावप्रयुक्तोभयाभावसम्भवेन तत्संग्रहसम्भ वात्। नच निरवच्छिन्नावच्छेदकताकत्वमेव तन्निष्ठप्रतियोगितायां विशेषणमस्तु, तावतैव विशि ष्टाभावादीनां वारणसम्भवात्, गुणो द्रव्यमित्यादिभ्रमे अव्याप्त्यप्रसक्तेश्च, तद्व्यक्तित्वावच्छिन्नप्रति योगिताकाभावमादाय लक्षणसमन्वयादिति वाच्यम्, गुणो गुणान्यत्वविशिष्टसत्तावानिति भ्रमे, विशिष्टवैशिष्ट्यावगाहिज्ञाने विशेषणतावच्छेदकस्य गुणान्यत्वस्यापि धर्मिपारतन्त्र्येण भान मिति मते गुणान्यत्वनिष्ठतद्व्यक्तित्वावच्छिन्नाभावमादाय भ्रमत्वोपपादनसम्भवेपि विशिष्टनिरू पितसमवायस्य संसर्गतापक्षे प्रकारतावच्छेदकसम्बन्धावच्छिन्नविशिष्टसत्तानिष्ठप्रतियोगिताकतादृशा भावस्याप्रसिद्ध्या अव्याप्तेः, तद्व्यक्तित्वावच्छिन्नप्रतियोगितायां विशिष्टनिरूपितसमवायस्यावच्छेदक सम्बन्धत्वाभावात्। **अतिव्याप्तेरिति**। तद्वत्ताग्रहविरोधितानियामकसम्बन्धेन तदभाववत्त्व विवक्षणे कालिकस्यैव तादृशसम्बन्धत्वेन नोक्तप्रमायामतिव्याप्तिरिति बोध्यम्। नचैवमपि गुणा न्यत्वविशिष्टसत्ताभाववान् गुण इति प्रमायामतिव्याप्तिः, गुणस्य सत्तात्मकतादृशाभावाभाववत्त्वा दिति वाच्यम्, तत्र विशिष्टनिरूपितसमवायस्यैव तद्वत्ताग्रहविरोधितानियामकसम्बन्धतया तेन सम्बन्धेन गुणे सत्तावत्त्वाभावात्। विशिष्टनिरूपितसमवायस्य सम्बन्धत्वानङ्गीकारपक्षे विशिष्टा भावाभावो न सत्तास्वरूपः, गुणेपि तत्प्रत्ययापत्तेः, किन्तु विशिष्टाधिकरणतारूपः। सा च न गुण इति नातिव्याप्तिः। यद्वा, सिद्धान्तलक्षणे गदाधरभट्टाचार्यदर्शितदिशा विशिष्टाभावप्रतियो गिता विशेषणविशेष्योभयपर्याप्ता, तथाच विशिष्टाभावाभावोऽत्र गुणान्यत्वसत्तोभयरूपः, तद्व त्त्वञ्च न गुण इति नातिव्याप्तिः ॥

भा—'तत्प्रपञ्चो विपर्यासः संशयोपि प्रकीर्तितः' इति पाठः। शरीरात्म वादिनां मते गौरोऽहमित्यादिदेहात्मबुद्धेरप्रमात्वाभावात् सर्वमतसाधारणमुदाहरणमाह— शङ्खादाविति। देहात्मबुद्धेः प्रथममुपन्यासश्च तन्निवारणस्यैव शास्त्रमुख्यप्रयोजनत्वात् ॥

दि—तदभावप्रकारतेति। 'तदभावप्रकारकता' इति पाठः। महानसो वह्निमान्नवेति। संशयभिन्नत्वं निश्चयत्वमित्युक्तावपि न निस्तार इति सूचयितुं संशयात्मकसमूहालम्बनानुधावनम्। पर्वतः पाषाणमयः महानसो वह्निमानिति ज्ञानस्य पर्वते वह्निनिश्चयत्वापत्तिपरिहाराय द्वितीयदले तद्विशेष्यकत्वावच्छिन्नत्वनिवेशनम्। अत्रापि सम्बन्धविशेषादिनिवेशनप्रयोजनं पूर्ववत्। ज्ञानत्वजातिरेव निश्चयत्वमिति प्रभाकृतः। तत्र निर्विकल्पकवारणाय सप्रकारकत्वमपि देयमिति बोध्यम्। घटनिश्चयः, पटनिश्चय इत्यादिव्यवहारोपयोगिनिश्चयलक्षणमेव मुक्तावल्यां प्रतिपादितमिति च ॥

मु—एकधर्मिकेति। 'एकत्र' इति मूलस्थसप्तम्या विशेष्यत्वार्थकत्वमनेन बोधितम्। इदञ्च समानविषयकत्वेन प्रतिबध्यप्रतिबन्धकभाव इति प्राचीनमतेन। नवीनमतानुसारेण तदर्थमाह दिनकरीये 'एकधर्मितावच्छेदक' इत्यादिना। मूले 'किंस्विन्नरो वा स्थाणुर्वा' इति संशयाकारप्रदर्शनं संशयद्वयमभिप्रेत्य नव्यमतानुसारेण। प्राचीनमते तु विरुद्धभावद्वयावगाहिसंशयस्याप्यङ्गीकारादेकोऽयं संशय इति बोध्यम् ॥

दि—यद्यपि पर्वतह्रदौ वह्नितदभाववन्ताविति प्रमायामप्यतिव्याप्तिस्सम्भवति तथापि ज्ञानत्वस्थाने भ्रमत्वनिवेशेनापि न निस्तार इति सूचयितुं ह्रदपर्वताविति विशेष्यनिर्देशः। संयोगतदभावयोर्विरोधभ्रमे वृक्षः संयोगवांस्तदभाववान् वेति ज्ञानस्य संशयत्वमेव, न तु समुच्चयत्वमित्यत आह—विरोधावगाहित्वं तदर्थ इति। घटो द्रव्यं पृथिवी चेति। नच द्रव्यत्वपृथिवीत्वयोर्विरुद्धत्वाभाव एवेति वाच्यम्, तत्रापि विरोधभ्रमसम्भवात्। विरोधावगाहनस्यैव संशयत्वप्रयोजकत्वात्, घटः अद्रव्यम् इति छेदे वास्तवविरोधस्य सम्भवाच्च। इदमत्रावधेयम्—तद्वत्ताबुद्धिं प्रति अनाहार्य

---

शङ्खादावितीति। ननु तर्हि सर्वसाधारणमुदाहरणमेवास्तु, किं देहात्मबुद्धिप्रदर्शनेन, गौरवात्, तस्य प्रपञ्चार्थत्वेपि प्रथमोपन्यासः कुत इत्यत आह—देहेति। मुख्यप्रयोजनत्वादिति। तथाच तत्सूचनार्थत्वान्न तद्वैयर्थ्यमिति भावः ॥

विरोधभ्रमेति। एतेन प्रभाकृदुक्तं दूषणं निराकृतमिति बोध्यम्।



तदभाववत्तानिश्चयसामान्यं प्रतिबन्धकम्, अप्रामाण्यज्ञानाव्याप्यवृत्तित्वज्ञानयोरुत्तेजकत्वमित्येकं मतम्। तद्विरोधावगाहितादृशतदभाववत्तानिश्चयत्वेन विरोधित्वम्, अव्याप्यवृत्तित्वज्ञानस्य नोत्तेजकत्वमित्यपरम्। तत्र द्वितीयमेव विश्वनाथपञ्चाननैः स्वीकृतमिति विरुद्धभावाभावेत्युक्त्यैव ज्ञायते। एतेन पर्वतो वह्निमान् द्रव्यं वह्न्यभाववदिति समूहालम्बने भावाभावयोर्विरोधावगाहनमेव नाङ्गीक्रियत इत्येकधर्मावच्छिन्नविशेष्यकत्वांशस्य संशयलक्षणे घटनं नावश्यकमिति केषाञ्चिदुक्तिः परास्ता, तत्रापि वह्निविरोधावगाहनस्यावश्यकत्वात्, अन्यथा तदुत्तरं द्रव्यं वह्निमदिति बुद्ध्यापत्तेरिति। विरोधावगाहनप्रकाराश्च संशयवादे गदाधरभट्टाचार्यैर्दर्शिताः। तद्यथा, संशये क्वचिद्भावकोटिविरोधविशिष्टविशेषणतासम्बन्धेनाभावकोटेः क्वचिदभावकोटिविरोधविशिष्टसमवायादिसम्बन्धेन भावकोटेः, क्वचित् परस्परविरोधविशिष्टसम्बन्धेन भावकोटेरभावकोटेश्च धर्मिणि प्रकारत्वम्, क्वचित्त्वभावकोटौ प्रतियोगिनः भावकोटिविरोधविशिष्टप्रतियोगिताकत्वसम्बन्धेन प्रकारत्वमिति। इच्छाव्युदासार्थमिति। यस्य तृप्तावभ्युदये च कामना, तस्यैकादश्यां भुनजै न वेति विरुद्धभोजनतदभावविषयकेच्छा अनुभवसिद्धेत्यभिप्रायः। एवं बुभुक्ष्वादेः शत्रुगृहप्रवेशादिस्थलेपि बोध्यम्। संशयत्वप्रसङ्गश्चेति। अत्र चकारः सामानाधिकरण्येन कोटिद्वयावगाहिज्ञानस्य संशयत्वप्रसङ्गस्य समुच्चायकः। स्वीयैककोटीति। अत्र कोटिपदे भावाभावपरे। अनुगमस्तु प्रकारिताविशिष्टप्रकारितावत्त्वं संशयत्वम्। वैशिष्ट्यञ्च स्वाधिकरणज्ञानवृत्तित्व,स्वनिरूपकनिष्ठप्रतियोगिताकाभावनिरूपितत्व,स्वघटितधर्मावच्छिन्नप्रतिबद्ध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वैतत्त्रितयसम्बन्धेन इति। अन्यत्स्वयमूह्यम्। यत्तु संशयत्वमिति। जातिविशेष इत्यत्रैकवचनार्थो विवक्षितः। तेन चाक्षुषत्वादिव्याप्यनाना

---

केषाञ्चित् प्रभाकृताम्। स्वाधिकरणेत्यादि। अत्र जलवान् वह्न्यभाववानिति निश्चयविशिष्टजलवान् ह्रद इति निश्चयस्य ह्रदे वह्निमत्ताबुद्धिं प्रति प्रतिबन्धकतया जलप्रकारिताया वह्निप्रकारिताविशिष्टत्वेन ह्रदो वह्निमान् जलवांश्चेति निश्चयेऽतिव्याप्तेर्वारणाय द्वितीयसम्बन्धोपादानम्। केचित्तु, दर्शितदोषवारणाय ज्ञानवैशिष्ट्यानवच्छिन्नत्वं प्रतिबन्धकतायां देयम्। नचैवं घटो गगनाभाववदभाववत्कालीनगगनवान्नवेत्यादिसंशयेऽव्याप्तिः, तादृशगगनाभाववत्तानिश्चयस्य ज्ञानविशिष्टज्ञानत्वेनैव गगनवत्ताबुद्धिं प्रति प्रतिबन्धकत्वादिति वाच्यम्, तादृशगगनाभाववत्ताबुद्धिं प्रति तादृशगगनवत्ताबुद्धेः प्रतिबन्धकता ज्ञानवैशिष्ट्यानवच्छिन्नैवेति प्रथमप्रकारितापदेन तादृशाभावनिष्ठप्रकारितामादाय लक्षणसमन्वयसम्भवादित्याहुः। तच्चिन्त्यम्, गौरवान्मूलाननुसारित्वाच्च। नन्वेकधर्मिकत्वोपादाने कोटिद्वयविशेष्यकसंशयासंग्रह इति चेन्न, तस्यालक्ष्यत्वेनेष्टत्वात्। एतदादिसूचनाय 'अन्यत्

सन्देहत्वजात्यङ्गीकारे न साङ्कर्यरूपं बाधकमिति सूचितम्। वस्तुतस्तु, पर्वतो वह्निमान्नवेति वह्न्यंशे संशयः न पर्वतत्वांशे इत्यांशिकत्वं संशयत्वेऽनुभवसिद्धं तस्य जातित्वे अनुपपन्नं स्यात्, जातेरांशिकत्वानङ्गीकारादिति ॥

**मु—स्थाणुपुरुषेति** । 'स्थाण्वस्थाणु' इति ताळीग्रन्थपाठः ॥

**दि—अप्रामाण्यस्याप्युपलक्षकमिति** । अप्रामाण्यं भ्रमत्वम्, न तु प्रमात्वाभावः। अत एव तत्संशयस्य स्वातन्त्र्येणोक्तिः सङ्गच्छते। **तस्यापि तद्धेतुत्वमिति** । 'तस्य तद्धेतुत्वमावश्यकम्' इति ताळीग्रन्थपाठः । ननु कोट्युपस्थितिमात्रं न संशयजनकम्, अतिप्रसङ्गात्। तथाच यथा कोट्युपस्थितिविशेषार्थं विप्रतिपत्तिवाक्यस्योपयोगः, तद्वदत्रापीति व्याप्यसंशयस्य प्रयोजकत्वमेव, न जनकत्वमित्यत आह—**अत एवेति। चकारस्यापीति** । अपिः प्रक्षिप्तः। **व्यावृत्तो धर्म इति** । तथाच सूत्रस्थमनेकधर्मपदं मध्यमपदलोपी समास इति भावः। 'साधनाव्यापकव्याप्यत्वसन्देहतः' इति आदिपदशून्यः पाठः, स एव समञ्जसः, 'साध्यव्यापकत्वसन्देहः' इत्यत्र आदिपदादर्शनात्। तमेव चानुसरति प्रभा ॥

**मु—किन्तु संशये इति**। अत्र 'किन्त्विति' प्रक्षिप्तम्। **धर्मिज्ञानम्** धर्मितावच्छेदकविशिष्टधर्मिज्ञानम्। निर्विकल्पकोत्तरसंशयः, निर्धर्मितावच्छेदककसंशयश्चाप्रसिद्ध इति भावः । धर्मिज्ञानस्य कारणत्वं स्वातन्त्र्येण, संशयसामान्यस्य विशिष्टवैशिष्ट्यावगाहित्वनियमेन, विशेष्यतावच्छेदकप्रकारकनिर्णयत्वेन वेत्यन्यदेतत्। दर्शितसंशयद्वयमप्यङ्गीकुर्वतां मतेनाह—**धर्मीन्द्रियसन्निकर्षो वेति । तत्रापीति** । अपिः प्रक्षिप्तः । **ज्ञानसामान्येति** । प्रमाऽप्रमोभयनिष्ठकार्यतानिरूपितकारणतावच्छेदकभिन्न

---

स्वयमूह्यम्' इत्युक्तम् । **सूचितमिति** । एवं साङ्कर्यवारणेपि, साङ्कर्यस्य जातिबाधकत्वानङ्गीकारेपि वा सन्देहत्वस्य जातित्वं दुर्घटमित्याह—**वस्तुतस्त्विति** ॥

अन्यदेतदिति । प्रथमकल्पे दण्डो रक्तो नवेति संशयानन्तरं रक्तदण्डो मैत्रीयो नवेति संशयोपीष्ट एवेति बोध्यम्। **प्रमाऽप्रमोभयनिष्ठेति** । अत्र प्रमानिष्ठत्वमात्रोपादाने बाधः, अप्रमानिष्ठत्वमात्रोपादाने दृष्टान्तासिद्धिरित्युभयोपादानम्। प्रमात्वं सर्वांशे विवक्षितम्, तेन गुणदोषकार्यतयोरांशिकभ्रमनिष्ठत्वेपि न बाधदृष्टान्तासिद्धी। यदिन्द्रियसंयोगादिव्यक्तिविशेषेण प्रमैव जाता, तज्जन्यत्वमादाय सिद्धसाधनवारणाय अवच्छेदकधर्मघटना। स्वरसतः प्रतीयमाना



धर्मावच्छिन्नकारणतानिरूपितकार्यतावतीत्यर्थः । न तु ज्ञानत्वावच्छिन्ना ज्ञानत्वव्यापिका वा या कार्यता, तन्निरूपितकारणतावद्भिन्नजन्येति, तदवच्छेदकधर्मानवच्छिन्नकारणतेति वार्थः, आत्मेन्द्रियादिनिष्ठकारणतामादाय सिद्धसाधनापत्तेः। वक्ष्यमाणरीत्या दोषाभावस्यापि प्रमाहेतुत्वात्तमादाय सिद्धसाधनवारणाय द्वितीयकारणतायां भाववृत्तित्वमपि देयम्। **जन्यज्ञानत्वादिति** । फलेच्छां प्रति आत्मादिभिन्नं फलज्ञानमेव कारणम्। तस्य च विशेषणज्ञानविधया प्रमाऽप्रमोभयनिरूपितकारणत्वात्तद्भिन्नकारणजन्यत्वस्य फलेच्छायामभावाद्व्यभिचारवारणाय हेतौ ज्ञानत्वप्रवेशः। **ज्ञानस्थलेपीति** । अपिः प्रक्षिप्तः ॥

**दि—अनुगतगुणत्वस्येति** । 'अनुगतगुणस्य' इति ताळीग्रन्थपाठः । प्रत्यक्षप्रमादिकं प्रति विशेषणवद्विशेष्यसन्निकर्षत्वादिरूपगुणत्वस्येत्यर्थः । **न शङ्खे पीतत्वप्रमेति** । अत्र शङ्खपदं स्थाण्वादेः, पीतत्वपदञ्च पुरुषत्वादेरुपलक्षकम् । अत एव 'पित्तादिदोषाभाव' इत्यत्र दूरत्वादिसंग्राहकादिपदोपादानं सङ्गतम् । **न गुणस्यान्यथासिद्धिरिति** । कार्याभावप्रयोजकीभूताभावप्रतियोगित्वं ह्यन्यथासिद्धत्वे तन्त्रम्, गुणस्य तु तादृशप्रतियोगित्वमेवेति नान्यथासिद्धिरिति भावः ॥

**मु—सुवचत्वादिति** । गुणे सति भ्रमासम्भवादिति भावः । अत्र मथुरानाथतर्कवागीशाः, पित्तादिदोषाणां प्रतिबध्यतावच्छेदकं न श्वैत्यादिप्रमात्वम्, किन्तु श्वैत्यादिप्रत्यक्षत्वमेव, तत्सत्त्वे श्वैत्यादिनिर्विकल्पकस्याप्यनुत्पत्तेः। अतः प्रमात्वावच्छिन्नं प्रति गुणस्यैव हेतुत्वमिति प्राहुः। 'तत्र दोषः कः इत्याकाङ्क्षायामाह' इति ताळीग्रन्थपाठः। एवं 'पित्तं दोषः' इत्यत्र 'पित्तादिर्दोषः' इति च। 'इत्येवंरूपाः' इत्यत्र 'रूपाः' इति पदं तत्र न दृश्यते च ॥

**भा—प्रत्यक्षे त्विति** । प्रमात्मकप्रत्यक्षे त्वित्यर्थः । प्रत्यक्षसामान्ये इन्द्रियसन्निकर्षः कारणम्, तद्विशेषे तद्विशेष इति भावः । एवमग्रेपि । **अनुमिताविति** ।

---

नर्थान् विकल्प्य दूषयति—**नत्विति** । **तदवच्छेदकेति** । तादृशकारणतावच्छेदकेत्यर्थः । आत्मेति । नच प्रमाऽप्रमोभयनिष्ठात्मनिरूपितकार्यता ज्ञानत्वावच्छिन्नैवेति कथमात्मकारणतामादाय सिद्धसाधनमिति वाच्यम्, तद्व्यक्तिसमवेतसत्सामान्यनिरूपिततद्व्यक्तित्वावच्छिन्नात्मनिष्ठकारणतामादाय तत्सम्भवात्। द्वितीयकारणतायामात्मवृत्तित्वानिवेशेपि नाश्वास इति दर्शयति—**इन्द्रियादीति** । आदिपदेन व्याप्तिज्ञानादीनां संग्रहः । अत्रानुमानान्तराणि मणावुत्पत्तिवादरहस्ये द्रष्टव्यानि ॥

अथ सल्लिङ्गपरामर्शोऽनुमितौ गुण इति चिन्तामणावुक्तम्, तत्त्यागः कुत इति चेन्न, यत्र वह्निव्याप्यधूमवान् पर्वत इति यथार्थपरामर्शानन्तरं लाघवज्ञानादिना पर्वतो महानसीयवह्निमानित्यनुमितिः, तत्र तस्याः प्रमात्वापत्तेः। नच हेत्वाभास सामान्यशून्यत्वरूपं सत्त्वं लिङ्ग एव विशेषणम्, प्रकृते च लिङ्गस्य बाधितत्वान्नोक्ता पत्तिरिति वाच्यम्, वह्निव्याप्यजलवान् पर्वत इति परामर्शात् पर्वतो वह्निमानिति प्रमात्मकानुमित्यनुत्पादापत्तेः। नच सत्त्वमत्राबाधितत्वमात्रमिति न दोष इति वाच्यम्, प्रकृते बाधाप्रसिद्धया गौरवेण च तथा विवक्षाया असम्भवात्। योग्यतासंशयात् शाब्दप्रमानुभवादाह—**तात्पर्यस्याथवेति।** ननु यत्र भ्रान्तेन केनचित् रक्तः स्फटिक इत्युक्तम्, श्रोत्रा च रक्तपदस्य रक्तिमाश्रयसंयोगितात्पर्यकत्वं गृहीतम्, तत्र तात्पर्य भ्रमे सत्यपि शाब्दप्रमैव जायते, वक्तृतात्पर्यप्रमावतश्च तत्र भ्रमात्मक एव बोधो भवतीति कथं तात्पर्यप्रमाया गुणत्वमिति चेन्न, तात्पर्यपदस्यात्र वक्तृतात्पर्यविषयत्वेन गृहीतज्ञानविषयार्थकत्वात्। तथाच तत्प्रकारतानिरूपिता या वस्तुतस्तद्वन्निष्ठ विशेष्यता, तत्कत्वप्रकारकबोधविशेष्यकतात्पर्यज्ञानं शाब्दे गुण इति पर्यवसितार्थ इति न कोपि दोषः। अथैवमपि नानार्थकस्थल एव तात्पर्यज्ञानस्य कारणता वादिमते शाब्दसामान्ये को गुण इति चेत्, योग्यताप्रमैवेत्यवेहि। योग्यता संशयस्थलेपि एककोट्यंशे प्रमात्वस्याव्याहतत्वात्। योग्यतासंशयस्थले सर्वत्र शाब्दप्रमापत्तिरेवं सति स्यादिति तु न शङ्क्यम्, तदंशे शाब्दप्रमां प्रति तदंशे योग्यताप्रमाया एव हेतुत्वात्। योग्यताज्ञानं शाब्दे न कारणम्, किन्त्वयोग्यतानिश्चयः प्रतिबन्धक इत्यपि ये वदन्ति, तन्मते वक्तृयथार्थवाक्यार्थज्ञानमेव गुणः। भ्रान्तप्रतारकेण

---

ये ये बाधिताः प्रसिद्धाः, तत्तद्भेदकूटवत्त्वमेव प्रकृतेऽबाधितत्वमित्युक्तावाह—**गौरवेण चेति। तात्पर्यभ्रम इति।** समवायेन रक्तिमाश्रय एव तात्पर्यादिति भावः। **वक्तृयथार्थवाक्यार्थज्ञानमिति।** तथाच तत्तद्वाक्यजन्यप्रमां प्रति तत्तद्वाक्यहेतुभूतवक्तृयथार्थ वाक्यार्थज्ञानं गुण इत्यर्थः। विशेष्यतासम्बन्धेन च हेतुहेतुमद्भाव इति भावः। नचैवं रक्तिमाश्रय संयोगितात्पर्येण रक्तः स्फटिक इत्युक्तम्, तात्पर्यभ्रमेण समवायेन रक्तिमाश्रयस्य च बोधो जातः, तत्र गुणसत्त्वात् कथं प्रमानुत्पत्तिरिति वाच्यम्, तत्र गुणसत्त्वेपि तात्पर्यभ्रमस्य दोषत्वेन प्रतिबन्धकाभावरूपकारणाभावात् शाब्दप्रमानुत्पत्तेः। यत्र तु वक्तुर्भ्रमः, तात्पर्यभ्रमाच्च श्रोतुः प्रमा, तत्र वक्ष्यमाणरीत्या वक्तृत्वेनेश्वर एव ग्राह्य इति बोध्यम्। **भ्रान्तप्रतारकेणेति।** घटं दृष्ट्वा पटत्वेन भ्रान्तः कश्चित् परं प्रतारयितुम् अत्र घटोऽस्तीत्युक्तवान्, तत्र वाक्यार्थ



शुकेन वोच्चरितवाक्यस्थले ईश्वर एवागत्या वक्तृत्वेन ग्राह्य इत्यवसेयम्। तर्हि योग्यताज्ञानादिकारणतावादिभिरप्यस्यैव गुणत्वं कुतो नोक्तमिति चेन्न, अस्य शब्द प्रयोगं प्रत्यन्यथासिद्धत्वस्यैव तैरङ्गीकारात्। अन्यथासिद्धिश्च चिन्तामणावन्यत्रोपपादिता तत एवावगन्तव्या॥

**अथवा तत्प्रकारमिति।** अत्रायं विवेकः—विभाजकं प्रमात्वं भ्रमभिन्नत्व मेव। तच्च निर्विकल्पकेप्यक्षतम्। अत एव 'ज्ञानं द्विविधम्' इति विभागसङ्गतिः। रजतत्वप्रमेत्यादिव्यवहारौपयिकम् 'अथवा' इत्यादिना दर्शितमिति॥

**मु—प्रमेत्यर्थ इति।** एतदुत्तरम् 'अथैवम्' इत्यारभ्य 'नातिव्याप्तिः' इत्यन्तो ग्रन्थः प्रक्षिप्तः, दिनकरभट्टादिभिरव्याख्यानात्। **भ्रमः प्रमा च स्यादिति।** यद्यपि भ्रमस्स्यादित्युक्त्यैव दोष आपादितो भवति, तथापि नेष्टापत्त्या परिहारः शक्यत इति सूचयितुमुक्तं प्रमाचस्यादिति। लक्षणकर्तुः परिहास्यतातिशयसूचनायेदमिति केचित्। नच भ्रमत्वापादनमसङ्गतम्, तद्वत्ताग्रहविरोधितानियामकसम्बन्धेन हि तद भाववत्त्वं लक्षणघटकम्, स च सम्बन्धोऽत्र न शुद्धविशेषणता, किन्तु निरवच्छिन्ना सा, तया च संयोगाभावो न वृक्ष इति वाच्यम्, शुद्धविशेषणतैव तन्नियामकसम्बन्धः, अव्याप्यवृत्तित्वज्ञानाभावकाले शुद्धविशेषणतया तदभाववत्ताज्ञानस्य प्रतिबन्धकत्वमिति मतमाश्रित्य पूर्वपक्षकरणात्। **प्रतियोगिव्यधिकरणेति।** अथ किमिदं प्रतियोगि व्यधिकरणत्वम्, न तावत् प्रतियोग्यसमानाधिकरणत्वम्, गुणः संयोगीत्यस्यापि भ्रमत्वानुपपत्तेः, नापि प्रतियोग्यनधिकरणवृत्तित्वरूपं तदभाववति प्रतियोग्यनधिकरणत्व

---

बोधः प्रमा, वक्तुश्च वाक्यार्थप्रमा नास्तीति बोध्यम्। यत्र कटं दृष्ट्वा पटत्वभ्रमवता केनचित् पटोस्तीति वक्तव्ये करणापाटवात् कटोऽस्तीत्युच्चरितम्, तादृशस्थलस्याप्युपलक्षणमेतत्। वाक्यार्थ ज्ञाने असन्दिग्धं स्थलविशेषमाह—**शुकेनेति। चिन्तामणावन्यत्रोपपादितेति।** वाक्यार्थ ज्ञानस्य बुबोधयिषा,कृति,कण्ठताल्वादिसंयोगद्वारैव शाब्दबोधं प्रति हेतुत्वस्य वाच्यतया तैरन्यथासिद्धत्वमिति रीत्येति ध्येयम्॥

अथवेति। नन्वप्रमात्वस्येव प्रमात्वस्यापि प्रकारतादिघटितत्वे 'अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते' इति विभागासङ्गतिः, निर्विकल्पके निरुक्तविभाजकधर्माभावेन तस्य तृतीय त्वापत्तेरित्यत आह—**अत्रायमिति। भ्रमभिन्नत्वमिति।** भ्रमभिन्नत्वे सति ज्ञानत्वमित्यर्थः॥

**सूचयितुमुक्तमिति।** तथाचैकस्यैव ज्ञानस्य यदंशे भ्रमत्वम्,तदंश एव प्रमात्वं च स्यात्, तच्चानिष्टमिति सूचयितुं तदुक्तिरिति भावः। **भ्रमत्वानुपपत्तेरिति।** संयोगासमानाधिकरणसंयोगा

पर्यवसन्नम्, तदभाववत्त्वांशस्य वैयर्थ्यापातादिति चेन्न, निरवच्छिन्नदैशिकविशेषणता सम्बन्धेन तदभाववत्त्वविवक्षणे तात्पर्यात्। **कपिसंयोगेत्यादि**। अत्र 'कपिसंयोगा नवच्छेदेन' इति पाठः। **लक्ष्यस्याननुगमादिति**। व्यासज्यवृत्तिधर्मावच्छिन्नविशेष्यताकप्रमालक्षणे विशेष्यतावच्छेदकाश्रययावद्वृत्तिप्रकारकत्वं घटकम्, अतो न घटपटोभयं घट इत्यस्य प्रमात्वापत्तिः। एवमन्यत्राप्यूह्यम् ॥

**दि—श्यामत्वादिति**। एतदनन्तरं 'वर्तमानत्वस्य प्रमात्वाघटकत्वात्' इति पाठः। ननु 'तद्वति तत्प्रकारकानुभवः प्रमा' इति ग्रन्थान्तरेषु लक्षणं दृश्यते, अत्र तु अनुभवत्वस्थाने ज्ञानत्वं निविष्टम्, कथमुभयोस्साङ्गत्यमित्याशङ्कां वारयितुमाह—**अत्र यद्यपीत्यादिना**। **अनुमन्यन्ते तान्त्रिका इति**। तथाच 'ज्ञानं द्विविधम्' इति विभागानुसारेणात्र स्मृतिसाधारणप्रमात्वनिरुक्तिः, प्रमाणव्यवहारौपयिकप्रमात्वन्त्वनुभवत्वघटितमिति भावः। **विशिष्टवैशिष्ट्यानुभव इति**। यद्यपि विशेषणज्ञानजन्यतावच्छेदकतयैवानुभवत्वजातिसिद्धिः तरङ्गिण्यां प्रत्यक्षादिलक्षणस्यैकलक्षणसम्भवविचारे दर्शिता, तथापि विशेषणज्ञानस्य विशिष्टबुद्धौ हेतुतायाः सर्वतान्त्रिकाननुमतत्वादत्र प्रकारान्तरानुसरणम्। अत एव तरङ्गिण्यां विशेषणज्ञानादीत्यादिपदमुपात्तम्। **नानुभवत्वस्य वैयर्थ्यमिति**। गौरवेण यदनुभवत्वनिवेशनवैयर्थ्यमापादितम्, तन्नास्तीत्यर्थः। **कृतं पल्लवितेनेति**। अथैवमनुभवत्वस्य जातित्वसिद्धौ तस्य विशिष्टवैशिष्ट्यानवगाहिज्ञानसाधारण्यं कथं सेत्स्यतीति चेन्न, प्रत्यक्षत्वादिना साङ्कर्यापत्त्या तत्साधारण्यस्यावश्यमभ्युपेयत्वात्। ननु विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षत्वमेवास्तु कार्यतावच्छेदकम्, परामर्श,खण्डवाक्यार्थबोधादीनां विशेषणतावच्छेदकप्रकारकनिर्णयत्वात् परामर्शादिकारणतयैवानुमित्यादीनां विशिष्टवैशिष्ट्यावगाहित्वोपपत्तेरिति चेन्न, अभावसाध्यकव्यतिरेकिपरामर्शजन्यानु

---

भावत्वाप्रसिद्धेरिति भावः। अप्रमालक्षणस्येव प्रमालक्षणस्यापि लक्ष्याननुगमेनाननुगमोऽस्तीति दर्शयति—**व्यासज्यवृत्तीति**। एवं देशस्य कालस्य वा यत्र विशेष्यतावच्छेदकत्वम्, तत्र प्रमालक्षणे तदवच्छेदेन तद्वति तत्प्रकारकत्वं घटकम्, अतो न मूलावच्छिन्नो वृक्षः कपिसंयोगीत्यादेः प्रमात्वापत्तिः। एतदेव मनसिकृत्याह—**एवमन्यत्रापीति** ॥

**अनुमन्यन्ते तान्त्रिका इतीति**। 'अनुमन्यन्ते' इत्यनन्तरं 'ते' इति मुद्रितपुस्तकेषु प्रक्षिप्तमिति बोध्यम्। **अनुभवत्वघटितमिति**। तथाच प्रमापदस्य ज्ञानत्वघटितधर्मावच्छिन्ने शक्तिः, अनुभवत्वघटितधर्मावच्छिन्ने तान्त्रिकाणां परिभाषा, मावातोर्ज्ञानत्वावच्छिन्न एव शक्तित्वादिति भावः ॥



मित्यादौ विशिष्टवैशिष्ट्यावगाहित्वाभावे अनुगतप्रयोजकलाभाय दर्शितकार्यतावच्छेदककोटौ प्रत्यक्षत्वमपहाय सर्वानुभवसाधारणानुभवत्वजातिघटनस्यैव युक्तत्वादित्याशङ्कासमाधाने सूचयितुमुक्तम्—**कृतं पल्लवितेनेति** ॥

**भा—प्रमात्वमिति**। 'प्रामाण्यम्' इति पाठः। मुक्तावल्यां प्रतीकेपि तथा बोध्यम् ॥

**मु—स्वप्रकाशकत्वादिति**। 'स्वप्रकाशत्वात्' इति पाठः। **तेनैव गृह्यत इति**। तज्ज्ञानेनैव विषयीक्रियत इत्यर्थः ॥

**दि—गृह्यत इतीति**। ननु प्रामाण्यप्रकारकज्ञाने प्रामाण्यरूपविशेषणज्ञानस्य हेतुतया तद्विना कथं व्यवसाय एव प्रामाण्यग्रह इत्याशङ्क्याह—**ज्ञाने गृह्यमाण इति**। तथाच ज्ञानत्वप्रकारित्वादिविशेषणज्ञानस्य यथा तत्प्रकारकप्रत्यक्षपूर्ववृत्तित्वं नावश्यकम्, तथा प्रामाण्यरूपविशेषणज्ञानस्यापि, तत्सामग्र्या एवापेक्षितत्वादित्यभिप्रायः। **तन्निष्ठप्रामाण्यस्यापीति**। ननु ज्ञाननिष्ठविशेष्यताप्रकारित्वयोर्ज्ञानत्ववत् ग्रहसम्भवेपि प्रमात्वघटकं तद्वत्त्वं विशेष्ये कथं गृह्यत इति चेन्न, ससम्बन्धिकस्य ज्ञानाभावादेर्ज्ञानत्वाभावत्वादिना प्रत्यक्षम्, सम्बन्धितावच्छेदकरूपेणैव सम्बन्धिनं गृह्णातीति नियमात्, तस्य विशिष्टवैशिष्ट्यावगाहित्वनियमस्य नैयायिकैरपि स्वीकारात्। नचैवं भ्रमगताप्रामाण्यमपि तेनैव कुतो न गृह्यत इति शङ्क्यम्, व्यवसाये तदभाववत्त्वांशस्यानवगाहनात्, पित्तादिदोषेण तत्प्रतिबन्धात्। एवं भट्टमुरारिमतयोरपि ज्ञेयम् ॥

**मु—ज्ञातता प्रत्यक्षेति**। घटज्ञानानन्तरं घटे ज्ञातता जायते, ततश्च घटो मया ज्ञात इति ज्ञाततात्राक्षुषादिकं जायते। ज्ञातता च घटादौ समवायेन स्वरूपेण वेत्यन्यदेतत्। ननु ज्ञानस्यैव प्रत्यक्षं कुतो नास्तीति चेन्न, सविकल्पकस्य प्रत्यक्षत्वे निर्विकल्पकातीन्द्रियत्वनिर्वाहाय निष्प्रकारकज्ञानत्वावच्छिन्नस्य प्रत्यक्षं प्रति प्रतिबन्धकत्वस्य वक्तव्यतया गौरवात्, लाघवाज्ज्ञानत्वावच्छिन्नस्यैव प्रति

---

ज्ञानकर्तृकज्ञानाप्रसिद्ध्या ग्रहधातोर्विषयतालाक्षणिकतां विशदयति—**विषयीक्रियत इति** ॥

**अभावादेरिति**। आदिपदेनाधिकरणत्वादयो गृह्यन्ते। **इति नियमादिति**। तथाच प्रत्यक्षे ज्ञानभासकलौकिकसन्निकर्षस्य सम्बन्धितावच्छेदकरूपेण सम्बन्धिविषयकत्वविशिष्टज्ञानप्रत्यक्षं प्रत्येव हेतुत्वान्न तद्धानानुपपत्तिरिति भावः। **अनवगाहनादिति**। भ्रमस्यापि 'अयं घटः, घटमहं जानामि' इत्येवाकारादिति भावः ॥

बन्धकत्वौचित्यमित्याशयात्। निर्विकल्पकग्रन्थदर्शितदिशा ज्ञानप्रत्यक्षस्य विशिष्टवैशिष्ट्यावगाहित्वनियमात् व्यापकधर्मावच्छिन्नजनकसामग्र्यभावादेव निर्विकल्पकप्रत्यक्षापत्तिवारणे प्रतिबध्यप्रतिबन्धकभावकल्पनाया अनावश्यकतया भट्टोक्तिरसङ्गतेति नैयायिकाभिप्रायोऽवगन्तव्यः॥

दि—इयं ज्ञाततेति। गुरुमुरारिमिश्रमतयोरिव भट्टमतेपि आत्मविशेष्यकमेव ज्ञानज्ञानमिति पक्षे अहं घटज्ञानवान् घटज्ञाततावत्त्वादित्यनुमानाकारः। तत्तज्ज्ञातताया-स्तत्तदात्मनैव ग्रहणात् तत्तज्ज्ञातताया-स्तत्तदात्मना सह सम्बन्धविशेषो वाच्यः, स एवात्र हेतुतावच्छेदकसम्बन्ध इति मथुरानाथीये स्पष्टम्। यथा पट इति। नच पटत्वप्रकारकज्ञाततायाः पक्षसमत्वात् कथं दृष्टान्तत्वमिति वाच्यम्, उपदेशेन व्यतिरेक्यनुमानेन वा अत्र साध्यस्य निश्चितत्वाभिप्रायात्। अनुव्यवसायेनेतीति। गुरुमते विषयज्ञानमेव ज्ञानज्ञानम्, भट्टमते च परामर्शबलात् ज्ञानज्ञानं विषयविषयकमिति मुरारिमत एवाग्रिमशङ्कोत्थितिरिति बोधयितुं प्रतीकधारणम्। इत्थञ्च 'सर्वेषाम्' इत्यादिवाक्यात् पूर्वमेव 'विषयनिरूप्यम्' इत्यादिवाक्यस्य पाठः स्वरसतर इति भाति। यदि च 'अनुव्यवसायेनेति' इति स्थाने 'गृह्यत इति' इति प्रतीकधारणम्, सर्वस्योपरि च 'ननु ज्ञानज्ञानस्य' इति शङ्का, तदा यथास्थितमेव साधु। विषयाविषयकप्रत्यक्षेति। विषयनिरूप्यमिति पदं सावधारणम्, असति बाधके सर्वं वाक्यं सावधारणमिति न्यायात्। इत्थञ्च विषयेणैव निरूप्यमित्यर्थः। निरूप्यं प्रत्यक्षविषयः, 'निरूपणं साक्षात्कारः, एवं वित्तिरपि' इति दीधित्युक्तेः। अवधारणेन विषयं विना निरूप्यत्वाभावबोधनाद्विषयाविषयकप्रत्यक्षाविषयत्वे सति विषयविषयकप्रत्यक्षविषयत्वलाभः। तत्र विशेष्यकोटौ विषयविषयकत्वांशस्य प्रवेशे प्रयोजनाभावेन तत्त्यागाद्दर्शितहेतुलाभः। हीत्यस्य यत इत्यर्थः। अथ विषयाविषयकप्रत्यक्षाप्रसिद्ध्या हेत्वप्रसिद्धिरिति चेन्न, घटज्ञानं घटत्वविशिष्ट

---

मथुरानाथीय इति। तत्र प्रामाण्यवादपूर्वपक्षरहस्ये—'ज्ञाततावत्त्वञ्चात्मनस्तदीयतानियामकस्वरूपसम्बन्धविशेषेण, घटो मया ज्ञात इत्यनुभवात्' इत्युक्तम्। नचातीतादिविषयकज्ञानानुमितिस्थले विषयरूपोपादानविरहाद् ज्ञातताऽनुत्पत्त्या हेत्वसिद्धिरिति वाच्यम्, तत्र ज्ञानस्यैवोपादानत्वाङ्गीकारात्। विषयेण तु ज्ञातताया विशेषणताविशेषः सम्बन्धः। स चातीतादावभावसम्बन्धवन्निराबाध इति च तत्रैव स्पष्टम्। घटत्वविशिष्टेत्यादि। अत्र स्वपदं न



विषयितानियतस्वविषयिताकप्रत्यक्षकम्, घटत्वविशिष्टाविषयकप्रत्यक्षाविषयत्वे सति प्रत्यक्षविषयत्वात्। यत् यद्विशिष्टाविषयकप्रत्यक्षाविषयत्वे सति प्रत्यक्षविषयः, तत् तद्विशिष्टविषयितानियतस्वविषयिताकप्रत्यक्षकम्, यथा पटज्ञानमिति विशेषरूपेणानुमाने तात्पर्यात्। ज्ञानानुमितिशाब्दयोर्विषयाविषयकयोरसम्भवाद्व्याप्तिभङ्गपरिहाराय प्रत्यक्षत्वेन प्रत्यक्षस्य हेतुकोटौ प्रवेशः। घटविषयेश्वरप्रत्यक्षादिविषयपटादौ व्यभिचारवारणाय नञ्द्वयघटितहेतून्यासः। अतीन्द्रिये व्यभिचारवारणाय हेतौ विशेष्यभागः। प्रामाण्यस्य सर्वत्रानुव्यवसायग्राह्यत्वरूपेष्टसिद्धये साध्यकोटौ सामानाधिकरण्यमुपेक्ष्य नियतत्वप्रवेशः। अथैवमपि व्यवसायीययावद्विषयनिरूप्यत्वासिद्ध्या प्रामाण्यघटकरजतत्वादिवैशिष्ट्यभानासिद्धिरिति चेन्न, व्यवसायरूपज्ञानलक्षणाप्रत्यासत्तेस्तुल्यत्वेन सामग्रीसम्पत्त्या तस्यापि भानावश्यम्भावात्। एतादृशशङ्कासमाधानसूचनायोक्तम्—अन्यत्र विस्तर इति॥

सु—अनभ्यासदशापन्नेति। अभ्यासः घटवत्तादिज्ञानानन्तरं सफलप्रवृत्तेः पौनःपुन्यम्, तद्दशापन्नं तस्मिन् सति या दशा पूर्वजातज्ञाने प्रामाण्यव्याप्यसफलप्रवृत्तिजनकत्वज्ञानसाहित्यं तद्विशिष्टम्, तन्न भवतीत्यनभ्यासदशापन्नमित्यर्थः। नच प्रथमज्ञानादनिश्चितप्रामाण्यात् प्रवृत्तिरेव कथमिति शङ्क्यम्, प्रामाण्यावगमस्य प्रवृत्तावनुपयोगात्। तर्हि ज्ञाने प्रामाण्यावगमो निरर्थक इति चेन्न, तत्समानाकारभाविज्ञानात् निष्कम्पप्रवृत्तौ तदुपयोगात्॥

दि—उपदर्शितसफलप्रवृत्तिजनकत्वं प्रामाण्यव्याप्यगुणजन्यत्वादेरुपलक्षकमिति दर्शयितुं फलितार्थमाह—अनवधृतेति। अवधृतप्रामाण्यस्य पूर्वं निश्चितप्रमात्वकस्य ज्ञानस्य सजातीयं समानधर्मविशेषवत् न भवतीत्यनवधृतप्रामाण्यसजातीयम्। अवधृतप्रामाण्यसजातीयत्वस्य प्रामाण्यव्याप्यत्वात् तज्ज्ञानस्य विशेषदर्शनत्वेन प्रामाण्यसंशयप्रतिबन्धकत्वमवसेयम्। अनभ्यासदशापन्नेत्यस्य प्रामाण्यव्याप्यवत्तानिश्चयाकालीनेत्यर्थ इति तर्कवागीशाः। व्याप्यवति व्यापकेति। तथाचैतद्व्याप्तिभङ्गापत्तिरेव

---

तद्व्यक्तिपरम्, किन्तु घटज्ञानत्वावच्छिन्नार्थकम्, तेन नाननुगमप्रयुक्तो व्यभिचारः। विषयितेति। विषयिताश्रयेत्यर्थः। अनुमितिशाब्दयोरिति। ज्ञानं गुण इत्याद्यनुमितिशाब्दयोरित्यर्थः। ईश्वरेति। अक्लेशत उभयविषयकत्वसम्पादनायेश्वरप्रत्यक्षानुधावनम्। आदिपदात् तादृशास्मदादिप्रत्यक्षसंग्रहः। अतीन्द्रिय इति। अनेन निर्विकल्पकस्यापि संग्रहात् ज्ञानत्वस्य विशेष्यभागत्वेपि न निस्तार इति सूचितम्॥

निष्कम्पेति। सकम्पत्वनिष्कम्पत्वे विषयिताविशेषौ॥

अत्रानुकूलतर्क इति भावः। **ननु कथं तर्हीति। अनुमेयता** प्रामाण्याश्रयग्राहकातिरिक्त लिङ्गग्राह्यता। इत्थञ्च भट्टमते प्रामाण्यस्यानुमेयत्वेपि नाक्षेपासङ्गतिः ॥

**मु—तत्प्रकारकत्वावच्छिन्नतद्वद्विशेष्यकत्वमिति।** रङ्गरजतयोरिमे रजत रङ्गे इति भ्रमेऽतिव्याप्तिवारणाय प्रकारिताविशेष्यितयोरवच्छेद्यावच्छेदकभावस्यापि प्रमात्वशरीरे प्रवेशावश्यकता बोध्या। परमित्यव्ययमवधारणार्थकम्। **न गृह्यत इति।** उक्तञ्च दीधितिकृता—'पुरोवर्तिनि रजतत्वप्रकारकमिति ग्रहेपि पुरोवर्तिनि रजते रजतत्वप्रकारकमिति न ग्रहः' इति ॥

**दि—प्रवृत्त्युपयुक्तस्येति।** निष्कम्पप्रवृत्त्युपयुक्तस्येत्यर्थः। **प्रामाण्यग्राहकसामग्रीसत्त्वादिति।** मनस्संयुक्तसमवेतसमवायेन यथा ज्ञानत्वम्, यथा च तद्विशेषणतया प्रकारितादि च गृह्यते, तथा तद्विशेषणविशेषणतया विषयितानिष्ठमवच्छिन्नत्वमपि मनसा गृह्यतैव, लौकिकमानससामग्र्याः सत्त्वादिति भावः। नच तथापि रजतत्ववत्त्वं विशेष्यिताविशेषणधर्मिणि कथं विषयीक्रियत इति शङ्क्यम्, इदन्त्ववद्रजतत्वेपि ज्ञानलक्षणाप्रत्यासत्तेरविशेषेण तदुपपत्तेः। **संशयजनकदोषस्येति।** प्रामाण्यादिनिश्चयासमानकालीनव्यवसाय एवात्र दोषत्वेनाभिमतः, संशयजनकदोषाणां तत्तद्व्यक्तित्वेन, अनुगतप्रामाण्यसंशयजनकदोषत्वेन वा प्रतिबन्धकत्वे यत्र व्यवसायानन्तरं कोट्यन्तरोपस्थित्यादिकारणवैकल्यान्न प्रामाण्यसंशयो जातः, तत्र दोषकल्पने प्रमाणाभावेन प्रतिबन्धकाभावात् प्रामाण्यस्य स्वतोग्राह्यत्वापत्तेरपरिहारादित्यवधेयम्। केचित्तु, विशेष्यतासम्बन्धेन तत्प्रकारकत्वावच्छिन्नत्वप्रत्यक्षं प्रति तद्वद्विशेष्यकत्वभेदस्य हेतुत्वस्वीकारान्न प्रामाण्यं स्वतोग्राह्यमित्याहुः। तद्वद्विशेष्यकत्वविशेष्यकतत्प्रकारकत्वावच्छिन्नत्वप्रकारकप्रत्यक्षस्यालीकतया लौकिकसन्निकर्षादिघटितसमुदाये तत्सामग्रीत्वकल्पकाभावादेव न प्रामाण्यस्य स्वतोग्राह्यतेति परे। मतद्वयेप्यस्मिन् द्वितीयानुव्यवसायेनापि न प्रामाण्यग्रहसम्भव इति नेदं दिनकरभट्टाभिमतमिति मन्तव्यम्। मणिकारास्तु, 'रजतत्ववैशिष्ट्यं पुरोवर्तिनि नानुव्यवसायविषय इति न स्वतः प्रामाण्यग्रहः' इति प्राहुः। 'बहिर्विशेष्यके मनसोऽस्वातन्त्र्यात्' इति तत्र हेतुञ्च प्रादर्शयन्। बहिर्विशेष्यके बहिरिन्द्रियग्राह्यधर्मिविशेष्यकत्वे। यद्वा, रजतत्वादिरूपबहिर्विशेषणविशेष्यतापन्नधर्मिविशेष्यकत्वे।

---

**तद्विशेषणतयेति।** मनस्संयुक्तसमवेतविशेषणतयेत्यर्थः। **प्रामाण्यादीति।** आदिपदेन प्रामाण्यव्याप्यत्वादिपरिग्रहः। **धर्मिविशेष्यकत्व इति।** ग्रहान्वयिविषयत्वं सप्तम्यर्थः। ननूक्तार्थकत्वे अनुव्यवसाये रजतादिप्रत्यक्षविषयके इदम्पदार्थविशेष्यकत्वभानानुपपत्तिरित्यत आह—यद्वेति।



अस्वातन्त्र्यात् तादृशधर्मिविशेष्यकत्वज्ञानाद्यसहकारेणाग्राहकत्वादिति तदर्थः। ननु तर्ह्यनुव्यवसाये इदन्त्वस्यापि तादृशधर्मतया तद्विशिष्टविशेष्यकत्वग्रहोपि न स्यादिति चेन्न, इष्टत्वात्। 'इदन्त्वरजतत्ववैशिष्ट्यं पुरोवर्तिनि नानुव्यवसायविषय इति न स्वतः प्रामाण्यग्रहः' इत्येव मणिकारैरुक्तत्वात्। अत एव इदं रजतमिति व्यवसायानन्तरम् इदं ज्ञानं रजतत्वविशिष्टविशेष्यकं न वेति क्वचित्संशयोपपत्तिः। अधिकमन्यतोऽवगन्तव्यम्। **प्रामाण्यानिश्चये इति।** 'प्रामाण्यनिश्चये' इति साधुः। **तद्घटकतयेति।** करादेः पुरुषत्वाव्याप्यत्वे करादिघटितहेतोः स्थाण्वादिविशेष्यकपुरुषत्वप्रकारकज्ञानेपि प्रसङ्गेन व्यभिचारित्वापत्त्या पुरुषत्वव्याप्यकरादिमति पुरुषत्वप्रकारकत्वादेरेव हेतुतया पुरुषत्वव्याप्यकरादेर्हेतुघटकत्वमावश्यकमित्यभिमानः। **करादौ पुरुषत्वेति।** अयं भावः—करादौ पुरुषत्वव्याप्यत्वं न हेतुघटकम्, वस्तुतः करादेस्तथात्वेन व्यभिचारासम्भवात्। परन्तु तत्र हेतौ प्रामाण्यव्याप्यत्वशङ्काविघटकतर्कोत्थापकतया क्वचित्तज्ज्ञानस्योपयोगः। एवञ्च शङ्कासामग्र्यभावस्थले तज्ज्ञानं विनापि प्रामाण्यव्याप्यत्वग्रहः सम्भवत्येवेति। यत्र पुरुषत्वप्रामाण्यानुमितिजनकपरामर्शः स्मृतिरूपः, तत्र पूर्वोक्तव्याप्यत्वज्ञानानपेक्षा स्फुटैव। स्पष्टञ्चेदमभिहितं दीधितिकारैः। **द्वितीयानुव्यवसायस्यापीति।** प्रथमानुव्यवसायानन्तरं पुरोवर्तिनि गन्धादिज्ञानोत्तरं पृथिव्यादिरेव मया पृथिवीत्वादिना पूर्वं ज्ञात इति द्वितीयानुव्यवसायाकारः। तत्र स्मृत्युपनीतपूर्वव्यवसाये ज्ञानोपनीततद्वद्विशेष्यकत्वतत्प्रकारकत्वे इव तयोरेकस्मिन्नपरवैशिष्ट्यमवच्छिन्नत्वरूपं मनसा गृह्यत एव, प्रतिबन्धकस्य व्यवसायस्यापगमादिति भावः। ननु तर्हि प्रामाण्यस्य स्वतोग्राह्यत्वमेवापतितमिति चेन्न, स्वाश्रयविषयकयावद्ग्रहविषयत्वस्यैव स्वतस्त्वात्, तस्य च प्रामाण्येऽभावात्, स्वाश्रयव्यवसायसामग्र्यघटकज्ञानान्तरजन्यज्ञानविषयत्वस्यैव प्रामाण्ये सत्त्वेन परतस्त्वानपायाच्च। ननु तत्प्रकारकत्वादेः प्रथमानुव्यवसायजन्यस्मृत्यात्मकज्ञानोपनीतत्वं तदा भवेत्, यदि प्रथमानुव्यवसाये ज्ञानविशेषणतया तत् भासेत, तदेव कथं पूर्वं

---

**तदर्थ इति।** तथाच बहिर्विशेषणवैशिष्ट्यं विशेष्यताविशेषणतापन्ने धर्मिणि विशिष्टविशेष्यताज्ञानाद्यसहकृतं मनो न भासयतीति पर्यवसितार्थो बोध्यः। **इष्टत्वादिति।** नन्वेवमनुव्यवसायस्य इदमंशे निर्विकल्पकत्वापत्तिः, नचेष्टापत्तिः, जात्यतिरिक्तस्य स्वरूपतो भानास्वीकारादिति चेन्न, इदन्त्वप्रकारकज्ञानविषयत्वरूपेदन्त्वेनैव धर्मिणो भानाङ्गीकारात्, बहिर्विशेषणेत्यत्र बहिष्ट्वस्य व्यवसायीयविषयताभिन्नत्वरूपत्वादित्याद्यनुचिन्त्योक्तम्—**अधिकमन्यत इति। प्रामाण्येऽभावादिति।** प्रथमानुव्यवसायस्य यावदन्तर्गतत्वादिति भावः। **ज्ञानान्तरजन्येति।** तत्प्रकारकत्वादिस्मृतिरूपज्ञानलक्षणाजन्येत्यर्थः।

बन्धकत्वौचित्यमित्याशयात्। निर्विकल्पकग्रन्थदर्शितदिशा ज्ञानप्रत्यक्षस्य विशिष्टवैशिष्ट्यावगाहित्वनियमात् व्यापकधर्मावच्छिन्नजनकसामग्र्यभावादेव निर्विकल्पकप्रत्यक्षापत्तिवारणे प्रतिबध्यप्रतिबन्धकभावकल्पनाया अनावश्यकतया भट्टोक्तिरसङ्गतेति नैयायिकाभिप्रायोऽवगन्तव्यः ॥

**दि—इयं ज्ञातेति**। गुरुमुरारिमिश्रमतयोरिव भट्टमतेपि आत्मविशेष्यकमेव ज्ञानज्ञानमिति पक्षे अहं घटज्ञानवान् घटज्ञाततावत्त्वादित्यनुमानाकारः। तत्तज्ज्ञाततायास्तत्तदात्मनैव ग्रहणात् तत्तज्ज्ञाततायास्तत्तदात्मना सह सम्बन्धविशेषो वाच्यः, स एवात्र हेतुतावच्छेदकसम्बन्ध इति मथुरानाथीये स्पष्टम्। **यथा पट इति**। नच पटत्वप्रकारकज्ञाततायाः पक्षसमत्वात् कथं दृष्टान्तत्वमिति वाच्यम्, उपदेशेन व्यतिरेक्यनुमानेन वा अत्र साध्यस्य निश्चितत्वाभिप्रायात्। **अनुव्यवसायेनेतीति**। गुरुमते विषयज्ञानमेव ज्ञानज्ञानम्, भट्टमते च परामर्शबलात् ज्ञानज्ञानं विषयविषयकमिति मुरारिमत एवाग्रिमशङ्कोत्थितिरिति बोधयितुं प्रतीकधारणम्। इत्थञ्च 'सर्वेषाम्' इत्यादिवाक्यात् पूर्वमेव 'विषयनिरूप्यम्' इत्यादिवाक्यस्य पाठः स्वरसतर इति भाति। यदि च 'अनुव्यवसायेनेति' इति स्थाने 'गृह्यत इति' इति प्रतीकधारणम्, सर्वेनलोपरि च 'ननु ज्ञानज्ञानस्य' इति शङ्का, तदा यथास्थितमेव साधु। **विषयाविषयकप्रत्यक्षेति**। विषयनिरूप्यमिति पदं सावधारणम्, असति बाधके सर्वं वाक्यं सावधारणमिति न्यायात्। इत्थञ्च विषयेणैव निरूप्यमित्यर्थः। निरूप्यं प्रत्यक्षविषयः, 'निरूपणं साक्षात्कारः, एवं वित्तिरपि' इति दीधित्युक्तेः। अवधारणेन विषयं विना निरूप्यत्वाभावबोधनाद्विषयाविषयकप्रत्यक्षाविषयत्वे सति विषयविषयकप्रत्यक्षविषयत्वलाभः। तत्र विशेष्यकोटौ विषयविषयकत्वांशस्य प्रवेशे प्रयोजनाभावेन तत्यागाद्दर्शितहेतुलाभः। हीत्यस्य यत इत्यर्थः। अथ विषयाविषयकप्रत्यक्षाप्रसिद्ध्या हेत्वप्रसिद्धिरिति चेन्न, घटज्ञानं घटत्वविशिष्ट

---

मथुरानाथीय इति। तत्र प्रामाण्यवादपूर्वपक्षरहस्ये—'ज्ञातताबत्त्वञ्चात्मनस्तदीयतानियामकस्वरूपसम्बन्धविशेषेण, घटो मया ज्ञात इत्यनुभवात्' इत्युक्तम्। नचातीतादिविषयकज्ञानानुमितिस्थले विषयरूपोपादानविरहात् ज्ञातताऽनुत्पत्त्या हेत्वसिद्धिरिति वाच्यम्, तत्र ज्ञानस्यैवोपादानत्वाङ्गीकारात्। विषयेण तु ज्ञातताया विशेषणताविशेषः सम्बन्धः। स चातीतादावभावसम्बन्धवन्निराबाध इति च तत्रैव स्पष्टम्। घटत्वविशिष्टेत्यादि। अत्र स्वपदं न



विषयितानियतस्वविषयिताकप्रत्यक्षकम्, घटत्वविशिष्टाविषयकप्रत्यक्षाविषयत्वे सति प्रत्यक्षविषयत्वात्। यत् यद्विशिष्टाविषयकप्रत्यक्षाविषयत्वे सति प्रत्यक्षविषयः, तत् तद्विशिष्टविषयितानियतस्वविषयिताकप्रत्यक्षकम्, यथा पटज्ञानमिति विशेषरूपेणानुमाने तात्पर्यात्। ज्ञानानुमितिशाब्दयोर्विषयाविषयकयोरसम्भवाद्व्याप्तिभङ्गपरिहाराय प्रत्यक्षत्वेन प्रत्यक्षस्य हेतुकोटौ प्रवेशः। घटविषयेश्वरप्रत्यक्षादिविषयपटादौ व्यभिचारवारणाय नञ्द्वयघटितहेतूपन्यासः। अतीन्द्रिये व्यभिचारवारणाय हेतौ विशेष्यभागः। प्रामाण्यस्य सर्वत्रानुव्यवसायग्राह्यत्वरूपेष्टसिद्धये साध्यकोटौ सामानाधिकरण्यमुपेक्ष्य नियतत्वप्रवेशः। अथैवमपि व्यवसायीययावद्विषयनिरूप्यत्वासिद्ध्या प्रामाण्यघटकरजतत्वादिवैशिष्ट्यभानासिद्धिरिति चेन्न, व्यवसायरूपज्ञानलक्षणाप्रत्यासत्तेस्तुल्यत्वेन सामग्रीसम्पत्त्या तस्यापि भानावश्यम्भावात्। एतादृशशङ्कासमाधानसूचनायोक्तम्—**अन्यत्र विस्तर इति** ॥

**सु—अनभ्यासदशापन्नेति**। अभ्यासः घटवत्तादिज्ञानानन्तरं सफलप्रवृत्तेः पौनःपुन्यम्, तद्दशापन्नं तस्मिन् सति या दशा पूर्वजातज्ञाने प्रामाण्यव्याप्यसफलप्रवृत्तिजनकत्वज्ञानसाहित्यं तद्विशिष्टम्, तन्न भवतीत्यनभ्यासदशापन्नमित्यर्थः। नच प्रथमज्ञानादनिश्चितप्रामाण्यात् प्रवृत्तिरेव कथमिति शङ्क्यम्, प्रामाण्यावगमस्य प्रवृत्तावनुपयोगात्। तर्हि ज्ञाने प्रामाण्यावगमो निरर्थक इति चेन्न, तत्समानाकारभाविज्ञानात् निष्कम्पप्रवृत्तौ तदुपयोगात् ॥

**दि—**उपदर्शितसफलप्रवृत्तिजनकत्वं प्रामाण्यव्याप्यगुणजन्यत्वादेरुपलक्षकमिति दर्शयितुं फलितार्थमाह—**अनवधृतेति**। अवधृतप्रामाण्यस्य पूर्वं निश्चितप्रमात्वकस्य ज्ञानस्य सजातीयं समानधर्मविशेषवत् न भवतीत्यनवधृतप्रामाण्यसजातीयम्। अवधृतप्रामाण्यसजातीयत्वस्य प्रामाण्यव्याप्यत्वात् तज्ज्ञानस्य विशेषदर्शनत्वेन प्रामाण्यसंशयप्रतिबन्धकत्वमवसेयम्। अनभ्यासदशापन्नेत्यस्य प्रामाण्यव्याप्यवत्तानिश्चयाकालीनेत्यर्थ इति तर्कवागीशाः। **व्याप्यवति व्यापकेति**। तथाचैतद्व्याप्तिभङ्गापत्तिरेव

---

तद्व्यक्तिपरम्, किन्तु घटज्ञानत्वावच्छिन्नार्थकम्, तेन नाननुगमप्रयुक्तो व्यभिचारः। **विषयिताकेति**। विषयिताश्रयेत्यर्थः। **अनुमितिशाब्दयोरिति**। ज्ञानं गुण इत्याद्यनुमितिशाब्दयोरित्यर्थः। **ईश्वरेति**। अक्लेशत उभयविषयकत्वसम्पादनायेश्वरप्रत्यक्षानुधावनम्। आदिपदात् तादृशास्मदादिप्रत्यक्षसंग्रहः। **अतीन्द्रिय इति**। अनेन निर्विकल्पकस्यापि संग्रहात् ज्ञानत्वस्य विशेष्यभागत्वेपि न निस्तार इति सूचितम् ॥

**निष्कम्पेति**। सकम्पत्वनिष्कम्पत्वे विषयिताविशेषौ ॥

तदात्मकविशेषणस्य ज्ञानाभावादिति चेन्न, अनुभवबलात् तत्र विशेषणज्ञानस्य हेतुत्वा कल्पनात्, अन्यथा घट इत्यादिव्यवसायकाले ज्ञानत्वस्याप्यज्ञातत्वेनानुव्यवसाये तस्यापि प्रकारतया भानानुपपत्त्या जानामीत्याकारतापि न स्यात्। अथ प्रामाण्यस्य परतस्त्वे प्रामाण्य ग्राहकज्ञाने प्रामाण्यनिश्चयायानुमानान्तरम्, एवं तत्रापीत्यनवस्थेति चेन्न, सर्वत्र प्रामाण्य संशयोदये प्रमाणाभावात्, धर्मिज्ञानकोटिस्मरणादिसंशयसामग्र्या अनियतत्वात्, याव दप्रामाण्यशङ्कोदयं तन्निश्चयश्च परत आवश्यक एव । एतत्सूचनायोक्तम्—**अन्यत्र विस्तर इति** ॥

मु—**तद्वद्विशेष्यकत्वं विशेषणमिति**। न च तत्प्रकारकत्वमपि व्यर्थ मिति वाच्यम्, निर्विकल्पकातिव्याप्तिवारणाय तदावश्यकत्वात्, घटप्रमा पटप्रमेत्यादि विशेषव्यवहारौपयिकलक्षणकथनस्याभिप्रेतत्वाच्च । **भ्रमजन्या न स्यादिति**। तद्वि शेष्यकतत्प्रकारकप्रवृत्तिं प्रति तद्विशेष्यकतत्प्रकारकज्ञानस्य साक्षात्तादृशेच्छाद्वारा वा हेतुत्वादिति भावः ॥

दि—गुरुणा अन्यथाख्यातेरनङ्गीकारात् प्रवृत्तौ तज्जन्यत्वाभावापादनमसम्भवी त्यतः शेषपूरणेन वाक्यार्थं स्पष्टयति—**न्यायनय इत्यादिना**। ननु 'तव मते भ्रमस्याभावात्' इत्युक्तिरसङ्गता, अख्यातेर्गुरुणा भ्रमपदवाच्यत्वाङ्गीकारादित्यतः भ्रमस्य इत्यस्यार्थमाह—**अन्यथाख्यातेरिति**। **यत्र रङ्गेति**। मुक्तावल्यां 'पुरोवर्तिनि' इत्य नेन सूचितविसंवादिप्रवृत्तिसामग्र्यन्तर्गतत्वस्य रङ्गप्रत्यक्षस्य सत्त्वं बोधयितुं ज्ञाने रङ्ग गोचरमिति विशेषणम्। इदन्त्वादिना रङ्गविषयकं समूहालम्बनमित्यर्थः। एतदिति विशेष्यवाचकं वस्तुतो रङ्गविशिष्टं देशं परामृशति, पुरोवर्तिविशिष्टत्वेन तस्य विशेष्यत्वे समूहालम्बनरूपता ज्ञानस्य नावश्यकी। **रजतविशेषणमिति**। अत्र स्वतन्त्रोपस्थितत्वस्य भेदाग्रहनिष्ठकारणतावच्छेदककोटिप्रवेशो नाभिमतः, तथा सति

---

**यावदिति**। तथाच यत्र ज्ञाने न शङ्कोदयः, तत्र न प्रामाण्यनिश्चय आवश्यक इति नानवस्थेति भावः ॥

**तद्वद्विशेष्यकत्वमिति**। हस्तताळीग्रन्थपाठानुसारेणेदम्। ननु निर्विकल्पकातिव्याप्ति वारणाय सप्रकारकत्वं सविशेष्यकत्वं वास्तु, किं तत्प्रकारकत्वनिवेशनेनेत्यत आह—**घटप्रमेति**। **अभिप्रेतत्वादिति**। तथाच घटप्रमेति व्यवहारे घटनिष्ठप्रकारताकत्वमेव विषयो वाच्यः, अन्यथा अतिप्रसङ्गादिति तद्बोधनस्यात्रावश्यकतया तद्वद्विशेष्यकत्वस्यैव वैयर्थ्यमाशङ्कितमिति भावः ॥



तस्य रजतत्वस्य च विशेषणविशेष्यभावे विनिगमकाभावेन गुरुभूतकार्यकारणभावद्वया पत्तेः। परन्तु, स्वतन्त्ररजतोपस्थितिरपि विसंवादिप्रवृत्तिं प्रति पृथक् कारणम्, यथा पुरोवर्तिप्रत्यक्षमित्यवधेयम्। **न देयमिति ध्येयमिति**। वस्तुतस्त्वत्रोपस्थितौ स्वातन्त्र्यं पुरोवर्तिनिष्ठविशेष्यतानिरूपितप्रकारताशून्यत्वमेव। इदं रजतमिति भ्रमस्थले पुरोवर्तिनः प्रत्यक्षम्, रजतस्य स्मरणमिति गुरोस्सिद्धान्तात्तत्र रजतोपस्थितेर्दर्शितस्वातन्त्र्यमक्षतमिति तत्र विसंवादिप्रवृत्त्युपपत्तिः। सत्यरजतस्थले तु नैवम्, विशिष्टज्ञानस्यैवाङ्गीकारादिति न तत्र तादृशप्रवृत्त्यापत्तिः। इत्थञ्च स्वतन्त्रोपस्थितत्वविशेषणे दत्तेपि एतद्रजतवद्भूतल मिति ज्ञानदशायां न प्रवृत्त्यनुपपत्तिरिति बोध्यम्। नच भ्रमस्थले यदि पुरोवर्तिनः प्रत्यक्षं रजतस्य स्मरणमिति ज्ञानद्वयमित्युच्यते, तदा भ्रमानन्तरं रजतं पश्यामीत्यनु भवः कथमुपपद्यत इति वाच्यम्, प्रत्यक्षस्मरणयोः दोषाधीनाद्भेदाग्रहात्। ननु सत्य रजतस्थले पुरोवर्तिविशेषणतयैव रजतोपस्थित्या स्वतन्त्ररजतोपस्थितिरूपकारणाभावादेव विसंवादिप्रवृत्तिवारणे दोषाधीनेति व्यर्थमिति चेन्न, यत्र पुरोवर्तिनि रजते चक्षुस्सं योगकाले रजतस्य स्वतन्त्रोपस्थितिरपि जाता, तत्रेदं रजतमिति प्रमाकाले विसं वादिप्रवृत्त्यापत्तिवारणाय तदावश्यकत्वात्। इदमत्र तत्त्वम्—दोषाधीनरजतभेदाग्रहस्य विसंवादिप्रवृत्तौ हेतुत्वे तदभावादेव सत्यरजतस्थले विसंवादिप्रवृत्तिवारणात् उपस्थितौ स्वातन्त्र्यनिवेशने प्रयोजनाभाव एवेति 'न देयम्' इति दिनकरभट्टोक्तिर्युक्तैवेति। **तद्धेतोरिति न्यायादिति**। तद्धेतोरेव तदस्तु, मध्ये किं तेनेति सम्पूर्णो न्यायः। अत्र प्रथमतृतीयतच्छब्दावेकार्थौ, द्वितीयः तत्कार्यपरः। तद्धेतोरिति पञ्चम्यन्तम्। नियतपूर्ववर्तित्वस्योभयवादिसिद्धतया अनन्यथासिद्धत्वमात्रं तद्धेतौ कल्पनीयम्, न तु तस्यैव कार्यं प्रत्युभयमिति लाघवमूलकोऽयं न्याय इति बोध्यम् ॥

मु—**रजतभेदाग्रह एवेति**। पुरोवर्तिप्रत्यक्षरजतोपस्थितिसहकृतरजतभेदा ग्रह इत्यर्थः, तेन तयोरभावकाले प्रवृत्तेर्नापत्तिः। अवधारणेन विशिष्टज्ञानव्यवच्छेदः,

---

**भेदाग्रहादिति**। अस्य प्रतिबन्धकत्वादेव रजतं स्मरामीति नानुभव इति च बोध्यम्। नचैवमपि ह्रदपर्वतौ वह्नितदभाववन्ताविति भ्रमोत्तरं पर्वतं वह्निमत्तया अवैमीति ज्ञानापत्तिर्गुरुमते अनिवार्यैवेति वाच्यम्, तादृशज्ञानं प्रति तन्मते पर्वतविशेष्यकत्वविशिष्टप्रत्यक्षे वह्निप्रकारकत्वविशिष्ट स्मरणभेदाग्रहस्य हेतुतया तदभावादेवोक्तापत्तिवारणसम्भवात्। **एकार्थाविति**। स चार्थः प्रकृते इदं रजतमिति विशिष्टज्ञानम् ॥

**रजतभेदाग्रह एवेतीति**। मुद्रितपुस्तके 'सः' इति प्रक्षिप्तमिति बोध्यम्। **पुरो वर्तीति**। कारणतावच्छेदकसम्बन्धश्च तत्प्रत्यक्षस्य विशेष्यता, उपस्थितेस्तु समवाय इति बोध्यम्। **रजतोपस्थितीति**। रजतत्वप्रकारकोपस्थितीत्यर्थः। इदञ्च रजतस्याभेदेन प्रकारत्वमुपगम्य ॥

तथाच प्रवृत्तित्वावच्छिन्ननिरूपितकारणतावच्छेदककोटौ स्वातन्त्र्यं दोषाधीनत्वं चानि वेश्यैककार्यकारणभावकल्पनं सम्भवतीति भावः। विसंवादिप्रवृत्तित्वावच्छिन्नं प्रति दोषस्यापि कारणतावच्छेदकघटकता बोध्या। नचैवं सत्यरजतस्थले इदं रजत समानकालीनमित्यादिज्ञानादपि प्रवृत्त्यापत्तिः, दर्शितकारणानां तत्र सत्त्वादिति वाच्यम्, दोषाभावे सन्निकर्षादिसामग्र्या तत्र रजतत्वविशिष्टाभेदज्ञानस्यावश्यम्भावा दिष्टापत्तिसम्भवात् ॥

दि—**रजतभेदासंसर्गाग्रहाभाव इति**। रजताभेदग्रहाभावस्याभाव इत्यर्थः। अत्रात्मनिष्ठप्रत्यासत्त्या कार्यकारणभावे दोषमाशङ्क्य विषयनिष्ठप्रत्यासत्त्यैव स इति परिहरति—**यद्यपीत्यादिना**। **रजतभेदोपस्थितिविशिष्टस्येति**। वैशिष्ट्यं स्वसमान कालीनत्वसम्बन्धेन, न तु विशेष्यताघटितसामानाधिकरण्येन, तथा सति रजते नेदं रजतमिति ज्ञानकालेपि प्रवृत्त्यापत्तेः, अन्यथाख्यातिभिया रजते तेन सम्बन्धेन रजत भेदोपस्थितेरसम्भवेन विशेषणाभावप्रयुक्तविशिष्टप्रतिबन्धकाभावसत्त्वात्। अत एव 'नचैवम्' इत्युत्तरशङ्कोत्थितिश्च। **नच रङ्गे रजतेति**। अत्र रजतभ्रमजनकरजतभेदग्रह प्रतिबन्धकदोषयोरैक्यान्न शङ्काया एवावसरः, एवञ्च रजतभेदेत्यादिना लाघवप्रदर्शन मपि न साधु, पूर्वकल्पेपि उपस्थितिवैशिष्ट्यप्रवेशे प्रयोजनाभावात्, एवं रङ्गे 'इदम्' इत्यादिसमाधानमप्यसङ्गतम्, गुरुमते अन्यथाख्यातिरूपभ्रमाभावेप्यख्यातिपद बोध्यज्ञानद्वयाङ्गीकारेण तज्जनकदोषस्य स्वीकृतत्वात्, इत्याक्षेपत्रयं यत् कैश्चित् प्रदर्शितम्, तद्दिनकरभट्टाशयानभिज्ञानमूलकम्। तथाहि—रङ्गे रजतभ्रमे चाकचक्य मन्दान्धकारादयो दोषा बहवः, तेषां तत्तद्व्यक्तित्वेनोत्तेजकत्वे गौरवादनुगमकं रूप मास्थेयम्, तच्च लाघवादत्र रजतभ्रमजनकदोषत्वमेव युक्तमिति शङ्कोत्थितिः। रजत भेदानुपस्थितिकाले विशेषणज्ञानरूपकारणाभावादेव रजतभेदप्रकारकग्रहासम्भवेन तद्ग्रह प्रतिबन्धकदोषकल्पने मानाभावः। इत्थञ्च यत्र इदं रजतमिति रङ्गविषयको ग्रहः रजतभेदोपस्थितिराहित्यञ्च, तत्र रजतभेदग्रहप्रतिबन्धकदोषाभावविशिष्टरजतभेदा

---

रजतभेदासंसर्गाग्रहेति। अत्र 'संसर्गग्रह' इति मुद्रितपाठोऽसाधुरिति बोध्यम्। एवमुत्तरत्र 'प्रसङ्गाभावात् तत्र' इत्युत्तरमपि। **पूर्वकल्पेपि** रजतभेदग्रहप्रतिबन्धकदोषस्योत्तेजकत्व पक्षेपि। कैश्चित् प्रभाकरैः। **लाघवादिति**। रजतभेदग्रहप्रतिबन्धकदोषत्वापेक्षया रजतभ्रमजनक दोषत्वस्य लघुत्वात्तेन रूपेणैव दोषाणामुत्तेजकत्वं युक्तमिति भावः। **तद्ग्रहप्रतिबन्धकेति**। तत्रत्यभ्रमजनकदोषस्य रजतभेदग्रहप्रतिबन्धकल्पन इत्यर्थः, तेन भ्रमजनकभेदग्रहप्रतिबन्धकदोष



संसर्गग्रहाभावरूपप्रतिबन्धकसत्त्वात् रजतप्रवृत्तिनिर्वाहाय रजतभेदोपस्थितिवैशिष्ट्यनिवे शस्यावश्यकतया न पूर्वकल्पे तद्वैयर्थ्यम्। एवम् इदं रजतमित्यत्र रङ्गप्रत्यक्षं रजत स्मृतिश्च न दोषजन्ये, प्रमात्वात्। उक्तञ्च मणिकृता 'नापि दोषाजन्यत्वम्, परस्य ज्ञानमात्रे तथात्वात्' इति। किन्तु रजतभेदाग्रह एव दोषाधीन इति रजतभेदग्रह प्रतिबन्धकदोषत्वेनैव गुरुमते तन्निवेशसम्भव इति तृतीयदूषणमप्यसारमिति। 'नचान्यथा ख्यातिस्संभवति' इति वाक्यस्य प्रकृतोपयोगं सम्पादयितुं शेषं पूरयति—**सम्भ वतीत्यनन्तरमिति**। तथाच प्रवृत्तित्वावच्छिन्नं प्रति विशिष्टज्ञानं न कारणम्, किन्तु गुरुभूतोपि भेदाग्रह एवेति भावः। ननु चक्षुषो ज्ञानलक्षणारूपसन्निकर्षस्य रजते सत्त्वान्न दोष इत्यत आह—**ज्ञानलक्षणाया इति**। 'गौरवदुष्टम्' इति पाठः॥

सु—'रङ्गे रजतबुद्धेरनुपपत्तेः' इति पाठः। ननु मास्तु रजते सन्निकर्षः, प्रत्यक्षप्रकारतात्वस्त्विति चेन्न, प्रत्यक्षप्रकारताया इन्द्रियसन्निकर्षव्याप्यत्वस्योभय सम्मतत्वात् ॥

दि—**इति शेष इति**। लाघवाच्चेत्यपि पूरणीयम्, तेनान्वयव्यतिरेकयो र्भेदाग्रहेपि तुल्यत्वेपि न क्षतिः। **इष्टप्रवृत्तिविषयेति**। इष्टस्य रजतादेः प्रवृत्तिविषये प्रवृत्तिविशेष्यपुरोवर्तिनि यद्विशिष्टज्ञानम् इदन्त्वाद्यवच्छिन्नविशेष्यकरजतादिप्रकारक ज्ञानं तत्साध्येत्यर्थः। **पूर्वं गौरवस्येति**। रङ्गे रजतार्थिप्रवृत्तिजनकं प्रत्यक्षं ज्ञानात्मकरजतसन्निकर्षजन्यं ज्ञानेतररजतसन्निकर्षाजन्यत्वे सति रजतप्रत्यक्षत्वादित्यनु मानेन हि ज्ञानस्य सन्निकर्षतालाभः। एवञ्च ज्ञानस्य प्रत्यासत्तित्वरूपं यत् गौरवम्, तज्ज्ञानस्यानुमितिरूपस्य पक्षज्ञानाधीनत्वात् पक्षघटककारणताज्ञानस्य पूर्वमेव जातत्वान्न तत्प्रतिबन्धकत्वं भ्रमस्थले तदधीनविशिष्टज्ञानकल्पनाप्रतिबन्धकत्वञ्च सम्भवतीति भावः। **रजतभेदाग्रहत्वेनेति**। रजतभेदग्रहस्य बाधज्ञानरूपतया तदभावस्यानुमित्यादौ कारण त्वमावश्यकमिति भावः। **रजतत्वविशिष्टविषयकत्वस्यैवेति**। नचास्य निर्धर्मिताव च्छेदके रजतमित्याकारकज्ञाने सत्त्वात् तत्र च भेदग्रहस्याप्रतिबन्धकत्वाद्व्यभिचार

---

योरैक्येपि न क्षतिः॥

**इष्टस्येति**। अस्य विशिष्टज्ञानमित्यत्रान्वयः। **इत्यनुमानेनेति**। अत्र यत् यदितर यत्सन्निकर्षाजन्यत्वे सति यत्प्रत्यक्षत्ववत्, तत् तदात्मकतत्सन्निकर्षजन्यम्, यथा चक्षुस्संयोगजन्यं घट इति प्रत्यक्षमिति सामान्यमुखी व्याप्तिः। इदमुपलक्षणम्। रङ्गे रजतार्थिप्रवृत्तिजनकप्रत्यक्षं

इति वाच्यम्, रजतत्वविशिष्टविषयकेत्यस्य रजतत्वावच्छिन्नप्रकारतानिरूपितसावच्छिन्न विषयताकेत्यर्थकत्वाद्व्यभिचाराभावात् । नचैवं निर्धर्मितावच्छेदककज्ञानाधीननिर्धर्मिताव च्छेदककरजतप्रवृत्तेः कार्यतावच्छेदकानाक्रान्तत्वापत्तिरिति वाच्यम्, तादृशप्रवृत्तौ माना भावात्, अन्यथा नेदं रजतमिति ज्ञानकालेपि निर्धर्मितावच्छेदककज्ञानात् न्यायमते प्रवृत्त्यापत्तेः । वस्तुतस्तु, सावच्छिन्नत्वस्थाने निरवच्छिन्नत्वज्ञानवृत्तित्वोभयाभाववत्त्वमेव निवेश्यते, इत्थञ्च न निर्धर्मितावच्छेदककज्ञाने दर्शितव्यभिचारः, न वा प्रवृत्ति सामान्यस्य कार्यतावच्छेदकानाक्रान्तत्वम् । एतेन यजेतेत्यादिवाक्यात् यागत्वविशिष्टे इष्टसाधनत्वादिज्ञाने जाते यागत्वांशे निर्धर्मितावच्छेदककप्रवृत्तावपि न क्षतिरिति केचित् । परेतु, प्रवृत्तिसाधारणकार्यकारणभावस्यानुपदमेव निरसनीयतया आपातरमणी येयमवतारिका न सूक्ष्मेक्षिकामर्हतीति वदन्ति । **विशिष्टज्ञानहेतुत्वेनेति** । 'हेतु' इति प्रक्षिप्तम् । यत्र रजत इति । एतदुत्तरं 'रजतभेदग्रहो न वा' इति पाठः ॥

**मु—यत्र रङ्गरजतयोरिति** । एतदुत्तरम् 'इमे रजते इति ज्ञानम्' इति पाठः ॥

**दि—अन्यथा अतिप्रसङ्गादिति** । घटादिघटितसन्निकर्षात् त्र्यणुके पृथिवीत्वादिप्रत्यक्षापत्तिरत्रातिप्रसङ्गो बोध्यः । द्रव्यत्वव्याप्यजातयो रूपातिरिक्तगुणाश्च त्र्यणुके नानुभूयन्त इति सर्वमतराद्धान्तः । अतस्तत्प्रत्यक्षं प्रति प्रकृष्टमहत्त्वावच्छिन्न संयुक्तसमवाय एव हेतुर्वाच्यः, तस्यापि घटाद्यन्तर्भावेण सम्भवादुक्तापत्तिस्तदवस्थे ति सन्निकर्षे तत्तद्विशेष्यघटनमावश्यकमिति भावः । नचैवं लौहित्ये जपाघटित सन्निकर्षात् कथं न्यायनये लोहितः स्फटिक इति साक्षात्कार इति वाच्यम्, साक्षा त्कारत्वे लौकिकसन्निकर्षस्येव दोषविशेषस्यापि प्रयोजकत्वात् । अन्यथा वंशे स्मर्यमाणो

रजतसन्निकर्षजन्यं रजतप्रत्यक्षत्वात् घटप्रत्यक्षवदित्यनुमानेनापि इतरबाधज्ञानवशात् सन्निकर्षस्य ज्ञानात्मकत्वसिद्धिरिति । **रजतत्वावच्छिन्नप्रकारतेति** । प्रकारता च तादात्म्यसम्बन्धा वच्छिन्ना बोध्या ॥

तटस्थः शङ्कते—**नचैवं लौहित्येति** । **एवं** लौकिकसन्निकर्षे तत्तद्विशेष्यघटने । **न्याय नय इति** । प्राभाकरमते तत्र लौकिकप्रत्यक्षद्वयस्यैवाङ्गीकारेण नैतच्छङ्कावसरः । न्यायनये तु अलत्यलौहित्यविषयताया दर्शितलौकिकसन्निकर्षाप्रयोज्यत्वेन ज्ञानलक्षणाप्रयोज्यत्वस्यैव सम्भवाल्लौहि त्यांशे साक्षात्कारत्वं नोपपद्यत इति भावः । **साक्षात्कारत्व इति** । साक्षात्कारत्वञ्च साक्षा त्करोमीत्यनुव्यवसायसिद्धः प्रत्यक्षत्वव्याप्यो विषयिताविशेषः । **स्मर्यमाणेति** । अनेन तत्तद्वि शेष्याघटनेपि लौकिकसन्निकर्षासम्भवस्सूचितः ॥



रगभ्रमानन्तरम् उरगं पश्यामीति साक्षात्कारो न स्यात् । **कथं रजतेति** । तथाच इमे रजते इत्यत्र रजतांशे विशिष्टज्ञानं रङ्गांशे तु भेदाग्रह एव, इन्द्रियसन्निकर्षस्य दर्शितस्य तत्राभावादिति भावः ॥

**मु—अपि चेति** । अथ रङ्गे इदं रजतमिति ज्ञानकाले तत्र युगपत् प्रवृत्तिनिवृत्त्यापत्तिरेव कुतो न कृतेति चेन्न, रङ्गत्वप्रकारकोपस्थितेरपि निवृत्तिसामग्री घटकत्वात् तदभावादेव निवृत्त्यापत्त्यसम्भवात् ॥

**दि—रजतभेदोपस्थितिविशिष्टेति** । तथाच विशेषणाभावप्रयुक्तविशिष्टा भावो रङ्गे प्रवृत्तिहेतुर्वर्तत इति भावः । अनिष्टभेदोपस्थितिविशिष्टानिष्टभेदा संसर्गाग्रहस्याभावो विशेषणाभावप्रयुक्तो निवृत्तिहेतुरपि रङ्गे बोध्यः । अथैवमपि प्रवृत्तिं प्रतीच्छाया निवृत्तिं प्रति द्वेषस्य च कारणत्वात् रजतादिस्वतन्त्रोपस्थितिरागद्वेषाणां त्रयाणामेकक्षणेऽसम्भवात् कथं युगपत् प्रवृत्तिनिवृत्त्यापत्तिरिति चेन्न, ज्ञानेतरात्म विशेषगुणानां यौगपद्याङ्गीकारेण रजतरागरङ्गद्वेषयोरेकदोत्पादसम्भवात् । इमे रजतरङ्गे इति समूहालम्बनप्रमास्थले सामग्रीद्वयसंवलनाद्रागद्वेषयोर्युगपदुत्पादस्याङ्गी कार्यत्वात् । यद्वा, प्रवृत्तिनिवृत्त्योरेककालिकत्वं नात्राभिप्रेतम्, किन्तु रङ्गे रजतत्व प्रकारकप्रवृत्त्युत्पत्तिसमये रजतेपि तत्प्रकारप्रवृत्त्यापत्तिः, गुरुमते रागं प्रत्यपि भेदाग्रहस्यैव हेतुत्वात् तदधीनसमूहालम्बनरागात् समूहालम्बनप्रवृत्तौ बाधकाभावात् । एवं समूहालम्बन द्वेषात् युगपन्निवृत्त्यापत्तिरिति योग्यात्मविशेषगुणानां सर्वेषामपि यौगपद्याभावेपि नानिष्टा पत्तिरित्यवसेयम् । **त्वन्मत इति** । 'तन्मते' इति पाठः । 'त्वन्मते' इति मुक्तावल्यां प्रक्षि सम् । **रजतभेदाग्रहप्रयोजकदोषस्येति** । यत्र प्रतियोगिज्ञानादिकारणवैकल्याधीनो रजत भेदाग्रहः, तत्र इदं रङ्गमिति प्रमास्थले निवृत्तिनिर्वाहाय दोषपर्यन्तानुधावनम् । अथास्य दोषस्य दोषत्वात्मकाखण्डोपाधिना, तादृशप्रयोजकत्वविशिष्टेन तेन वा, तद्व्यक्तित्वेन वा प्रतिबन्धकत्वम् । नाद्यः पक्षः, यतो दूरत्वादिकिञ्चिद्दोषस्य सदा सम्भवेन रङ्गादौ निवृत्त्यादिः कदापि न स्यात् । न द्वितीयः, तादृशदोषत्वेन वा दोषप्रयोज्यतादृश भेदाग्रहत्वेन वा प्रतिबन्धकत्वमित्यत्र विनिगमनाविरहेण गुरुभूतप्रतिबध्यप्रतिबन्धकभाव द्वयापत्तेः । न तृतीयः, तद्दोषस्य वा तत्कालीनवायुसंयोगादीनां वा प्रतिबन्धकत्वमित्यत्र विनिगमकदौर्लभ्यादिति चेन्न, प्रत्यक्षसिद्धचाकचक्यादिरूपरजतसादृश्यस्यानुमेयवायुसंयो

गापेक्षया प्रथमोपस्थितिसम्भवात्तत्कालीनवायुसंयोगादीनामन्यथासिद्धत्वेन तृतीयकल्पे क्षत्यभावात्, रङ्गे रजतभेदाग्रहप्रयोजकदोषाणां द्वित्राणां चाकचक्यत्वाद्यनुगतधर्मवतां तद्वृत्तिसमुदायत्वेन प्रतिबन्धकत्वस्वीकारेण वा परिहारसम्भवात् । न्यायमते रजतभ्रमं प्रति दोषस्य येन रूपेण हेतुत्वम्, तेनैव रूपेण तस्य निवृत्तिप्रतिबन्धकत्वकल्पनेनोपपत्तिसम्भव इत्येव सारम् । **निराबाधेत्यर्थ इति** । अवश्यमङ्गीकार्येत्यर्थ इत्यर्थः । **आपतितमितीत्यर्थ इति** । अनिच्छतापि स्वीकार्यमितीत्यर्थ इत्यर्थः ॥

**सु—सेयमुभयत इति** । अनुमितिं प्रति भेदाग्रहविशिष्टज्ञानकारणत्वपक्षयोरेकतरावलम्बनेप्यन्यथाख्यातिरूपानिष्टं स्यादिति भावः ॥

**दि**—पक्षयोर्द्वयोरपि नापत्तिरिति क्रमेण शङ्कते—**ननु ह्रदे, यद्वा ननु इत्याभ्याम्** । **विशिष्टज्ञानस्यैव हेतुत्वमिति** । लाघवादिति शेषः । **लिङ्गासंसर्गः** हेत्वभावः, हेतुमद्भेदो वा । **लिङ्ग्यसंसर्गः** साध्याभावः, साध्यवद्भेदो वा । इदमुपलक्षणम् । रङ्गे इदं न रङ्गमित्यनाप्तोच्चरितवाक्यस्थले स्वतन्त्रोपस्थितरङ्गभेदासंसर्गाग्रह एवेति 'वक्तुरपि तादृशासंसर्गाग्रह एव वाक्यप्रयोगे तत्र हेतुरिति च बोध्यम् । 'इत्थञ्चान्यथाख्यातौ प्रत्यक्षमेव प्रमाणम्' इत्युक्तिरयुक्ता, प्रत्यक्षस्य प्रमाणतायां पूर्वोक्तस्याप्रयोजकत्वादिति शङ्कामपनुदति—**चकारोप्यर्थ इति** । इत्थमिति पूर्वदर्शितयुक्तीनामसाधकत्वं बुद्धिस्थं परामृश्यते । **इत्थं पूर्वयुक्तिवत्** । अप्यर्थश्चो भिन्नक्रमः । इत्थं प्रत्यक्षञ्चान्यथाख्यातौ प्रमाणमेवेति योजनेत्यपि वदन्ति ॥

**सु—इत्यनुभवादिति** । सत्यरजतस्थले इदं रजतमिति ज्ञाने रजतविशेष्यकत्वं रजतत्वप्रकारकत्वञ्चास्तीत्यत्र यथानुव्यवसायः इदं रजततया अवेदिषमित्याकारः प्रमाणम्, तथा भ्रमस्थलेपि व्यवसाये रजतत्वप्रकारकत्वे प्रमाणं भवतीति भावः ॥

---

अनुगतरूपेण केषाञ्चिद्दोषाणां प्रतिबन्धकत्वसम्भवादपि न विनिगमनाविरहावकाश इत्याह—**रङ्गे इति** । **समुदायत्वेनेति** । अत्र प्रतिबन्धकतावच्छेदकतावच्छेदकसम्बन्धः स्वरूपम्, न तु पर्याप्तिः । ननु चाकचक्यत्वाद्यनुगतधर्मवन्तोपि कदाचित् केषाञ्चिदेव दोषा इत्यनुगतरूपेण तेषां प्रतिबन्धकशरीरे प्रवेशोऽसम्भवीत्याशङ्क्याह—**न्यायमते इति** । तथा चोक्तदोषास्तुल्यतया न पर्यनुयोज्या इति भावः ॥

भ्रमात्मकशाब्दस्थलेप्यन्यथाख्यातिं दर्शयति—**इदमुपलक्षणमिति** । मतान्तरमुपन्यस्यति—**इत्थं पूर्वेति** ॥



**दि**—अन्यथाख्यातिमिया यथा रङ्गे इदं रजतमिति ज्ञानकाले स्वतन्त्रोपस्थितरजतासंसर्गाग्रह एव दोषवशादित्युक्तम्, तथा अनुव्यवसायकालेपि स्वतन्त्रोपस्थितरजतत्वप्रकारकत्वस्यासंसर्गाग्रह एवेत्याशयेन शङ्कते—**ननु तादृशेति** । इदन्त्ववधेयम्—रङ्गे इदं रजतमिति बुद्धिर्न विशिष्टज्ञानम्, किन्तु ज्ञानद्वयमित्युक्तम्, तथा अनुव्यवसायोऽपि ज्ञानद्वयविषयकं प्रत्यक्षम् । एकस्मिन् ज्ञाने इदंविशेष्यकत्वं परस्मिन् रजतत्वप्रकारकत्वञ्च वास्तविकं भासते, ज्ञानयोश्च दोषवशाद्भेदाग्रहः । इत्थञ्च ज्ञानयोरिदंविशेष्यकज्ञानमेवानुव्यवसायविषयः, न तु रजतोपस्थितिरित्यत्र विनिगमकं दुर्लभमिति रजतत्वप्रकारकत्वासंसर्गाग्रह एवेत्युक्तिरसङ्गतेति शङ्का यद्यपि जायेत, तथापि दोषवशात् रजतस्मृतेर्नानुव्यवसायविषयत्वमित्याशयेन तथाभिधानमिति । **विद्यमानेपीति** । नन्वाहार्यत्वस्य भ्रमत्वव्याप्यतया गुरुमते भ्रमस्य चानङ्गीकारेण कथमाहार्यप्रत्यक्षसम्भव इति चेन्न, तादृशव्याप्यत्वे मानाभावात् । अत एवेदं न रजतमिति यदा ज्ञानद्वयं रजते दोषाधीनो रजतभेदासंसर्गाग्रहश्च, तदनन्तरम् इदं रजतमिति ज्ञानं मे भूयादितीच्छायामसत्याम् इदं रजतमिति प्रत्यक्षप्रमा न जायते, सत्यान्तु जायते । इत्थञ्चाहार्यत्वं न भ्रमत्वव्याप्यम् । रजतभिन्नमिदं रजतमित्येवाहार्याकार इत्युक्तावपि गुरुमते अन्यथाख्यात्यनभ्युपगमादत्रापि प्रमात्मकं ज्ञानद्वयमेव, तत्रैव भ्रमत्वव्यवहार इति भ्रमत्वव्याप्यत्वेपि क्षत्यभावाच्च । **अनुमितित्वादीनामेव पृथगिति** । नच पूर्वोपदर्शितकार्यतावच्छेदककोटौ प्रत्यक्षातिरिक्तत्वनिवेशेनानुमितिशाब्दप्रवृत्त्यादिसाधारणैककार्यकारणभावनिर्वाह इति वाच्यम्, विशेषणविशेष्यभावे विनिगमनाविरहेण गुरुभूतानेककार्यकारणभावकल्पनापत्त्या गौरवात्, संस्कारस्मृत्योर्व्यभिचारात्, तत्रानुभवेन भेदाग्रहस्यान्यथासिद्धत्वाच्च, तदन्यत्वस्यापि निवेशे महागौरवात् । इदमुपलक्षणम्—प्रकारिताज्ञानत्वादिकं ज्ञानादावनुव्यवसायेनैव गृह्यते । तदंशे चानुव्यवसायस्य प्रमात्वमेव । इत्थञ्च रङ्गं रजततया अवेदिषमित्यनुव्यवसायबलादेवान्यथाख्यातिसिद्धिः । नच तत्र दोषाधीनो रजतत्वप्रकारकत्वासंसर्गाग्रह इति वच्यम्, विशेषदर्शिनामपि तथाऽनुभवात् । एवञ्च 'लिङ्गासंसर्गाग्रहाल्लिङ्ग्यसंसर्गाग्रहः' इति पूर्वं यदुक्तम्, तदपि न साधु, वह्निमनुमिनोमीति तत्स्थलीयानुव्यवसायानुपपत्तेरिति ।

---

**विशेषदर्शिनाम्** दोषशून्यानाम् । गुरुमते तु रजतत्वप्रकारकत्वासंसर्गाग्रहस्य, ज्ञानयोर्भेदाग्रहस्य वा दोषाधीनत्वाद्विशेषदर्शिनां तथानुभवोऽनुपपन्न इति भावः । एवञ्चेति ।

एवं तद्वत्ताज्ञानतदभाववत्तानिश्चययोः प्रतिबध्यप्रतिबन्धकभावोपि गुरुमते दुरुपपादः, तदवच्छेदकतद्वत्ताज्ञानत्वादेः भ्रमसाधारणस्य दुर्वचत्वात्। इदं न रजतमिति निश्चये सत्यपि रङ्गज्ञानस्वतन्त्ररजतोपस्थित्योः सम्भवात् ज्ञानद्वयात्मके इदं रजतमिति ज्ञाने तस्य प्रतिबन्धकत्वासम्भवाच्चेति। अधिकं स्वयमूह्यम्। **ननु प्रामाण्यमिति**। अत्र 'दर्श्यते' इत्यन्तेन 'प्रामाण्यं न स्वतो ग्राह्यम्' इति पूर्वमूलेन 'व्यभिचारस्याग्रहोऽथ' इति मूलस्य उपोद्धातसङ्गतिर्दर्शिता। 'स चायुक्तः' इत्यादिना च 'पूर्वं व्याप्तिरुक्ता' इत्यादि मुक्तावलीभागस्यावश्यकता दर्शितेति विवेको बोध्यः ॥

भा—'व्यभिचारस्याग्रहोपि' इति पाठः। दिनकरीयेपि तथा बोध्यम् ॥

**मु—कारणमिति ॥** 'कारणमित्यर्थः' इति पाठः। उत्तरत्र 'कारणमित्यर्थः' इत्यत्र 'इत्यर्थः' इति प्रक्षिप्तम्। **व्यभिचारग्रहस्येति**। संशयसाधारणव्यभिचारज्ञानत्वावच्छिन्नस्येत्यर्थः। **अन्वयव्यतिरेकाभ्यामिति**। व्याप्तिग्रहः सहचारग्रहहेतुकः सहचारग्रहान्वयव्यतिरेकानुविधाय्यन्वयव्यतिरेकशालित्वादित्यनुमानेन, तादृशान्वयव्यतिरेकग्रहसहकृतप्रत्यक्षेण वा तद्धेतुकत्वं गृह्यत इति भावः। दीधितिकृतस्तु, धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्वादिकमेव व्याप्तिः, न तु तादृशवह्निसामानाधिकरण्य

---

ज्ञानत्वाद्यंशे अनुव्यवसायस्य प्रमात्वनियमे चेत्यर्थः। **तदवच्छेदकेति**। प्रतिबध्यतावच्छेदकप्रतिबन्धकतावच्छेदकेत्यर्थः। ननु तद्विशेष्यकज्ञानविशिष्टतत्प्रकारकज्ञानत्वं प्रतिबध्यतावच्छेदकम्, तद्विशेष्यकनिश्चयविशिष्टतदभावप्रकारकनिश्चयत्वं प्रतिबन्धकतावच्छेदकम्, वैशिष्ट्यञ्चैकक्षणावच्छिन्नैकात्मवृत्तित्वसम्बन्धेनेत्यवच्छेदकयोर्भ्रमसाधारण्यसम्पादनेपि दोषं दर्शयति—इदञ्चेति। प्रतिबन्धकत्वासम्भवाच्चेति। नेदं रजतमिति ज्ञाने इदं रजतमिति निश्चयप्रतिबध्यत्वाभावस्योपलक्षणमिदम्। **अधिकमिति**। अथ तद्वत्ताज्ञानत्वेन तदभाववत्ताज्ञानत्वेन प्रतिबध्यप्रतिबन्धकभावो न स्वीक्रियते, ज्ञानयोरन्यतरस्य भ्रमत्वनियमात् भ्रमस्थले च विशिष्टज्ञानासम्भवात्, इदं न रजतमिति भ्रमोत्तरम् इदं रजतमिति प्रमाभावः रजतभेदोपस्थितिविशिष्टरजतभेदासंसर्गाग्रहस्य प्रतिबन्धकत्वाङ्गीकारात् सूपपादः, इदं रजतमिति प्रमोत्तरमन्याभावश्च प्रमास्थले दोषाभावनैयत्येन दोषरूपभ्रमकारणाभावादिति तत्रापि निर्वाह इति चेन्न, उभयत्र सामग्रीवैलक्षण्यकल्पनाया अनुचितत्वात्, प्रथमस्थले प्रतिबन्धकतावच्छेदकगौरवाच्चेति शङ्कासमाधाने ऊहनीये इति भावः ॥

**संशयसाधारणेति**। स च संशयः साध्याभावांशे निश्चयात्मकः, वृत्तित्वांशे संशयरूपो बोध्यः, तस्यैव प्रतिबन्धकत्वात्, अन्यथा पक्षे साध्यसन्देहदशायां व्याप्त्यग्रहापत्तेः। संशयस्य प्रतिबन्धकत्वकथनं प्राचीनमतानुसारेण। **इत्यनुमानेनेति**। व्याप्तिरत्र सामान्यमुखो बोध्या। मुक्तावल्याम् अन्वयव्यतिरेकाभ्यामित्यनेन सहचारग्रहस्य व्याप्तिज्ञानं प्रति पृथगेव कारणत्वमित्यवगम्यते, दीधितिकारणाम्मते न तथेति दर्शयति—**दीधितिकृतस्त्विति**।



मात्रम्, रासभादिसाधारण्यापत्तेः। तद्ग्रहे च विशेषणज्ञानविधया साध्यसामानाधिकरण्यग्रहो हेतुरित्याहुः। अधिकमन्यतोऽवगन्तव्यम्। यद्यपि केवलान्वयिसाध्यकस्थले साध्याभाववद्वृत्तित्वरूपव्यभिचाराप्रसिद्ध्या तद्ग्रहाप्रसिद्धिः, खण्डशः प्रसिद्ध्या भ्रमसम्भवेपि सर्वत्र तादृशभ्रमे मानाभावः, एवञ्च प्रतियोग्यप्रसिद्ध्या व्यभिचारग्रहाभावरूपव्याप्तिग्रहोपायदुर्भिक्षम्, तथापि तत्पुरुषीयसाधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वग्रहस्य विषयतया अभावः साध्यतावच्छेदकनिष्ठः तत्पुरुषीयव्याप्तिग्रहे हेतुरिति न दोषः। यद्वा, साध्यादिभेदेन व्याप्तिभेदाद्यत्रैकविधमनेकविधं वा व्यभिचारज्ञानं प्रसिद्धम्, तत्र यथायथं तदभावः पुरुषनिष्ठो हेतुः। यत्र तदप्रसिद्धिः, तत्र व्यभिचारग्रहाभावस्याहेतुत्वेपि न क्षतिः। **व्यभिचारास्मृताविति**। 'व्यभिचारास्फूर्तौ' इति ताळीग्रन्थपाठः। **क्वचिद्व्यभिचारेति**। चत्वरापणादौ वह्न्यभाववति धूमो वर्तते न वेति शङ्का तत्र गत्वा वह्निं दृष्टवतां निवर्तत इत्यनुभवसाक्षिकम्। एवञ्च तत्र भूयोदर्शनं शङ्काविधूनने उपयुज्यत इति भावः ॥

अथ व्याप्तिग्रहोपायविरोधिव्यभिचारशङ्कानिवर्तकत्वरूपतदुपयोगित्वेन तर्कस्य स्मृतत्वात्तर्कनिरूपणे प्रसङ्गसङ्गतिं दर्शयन्नाह—**यत्र तु भूय इति**। यत्र धूमादौ, चैत्रात्मविशेषे वा। **शङ्का** व्यभिचारशङ्का। **नापैतीति**। स्वाप्राप्यदेशवर्तिधूमादौ वह्निसामानाधिकरण्यप्रत्यक्षस्य शङ्कापनोदकस्यासम्भवादिति भावः। **विपक्षे** वह्न्यादिव्यभिचारित्वे। **बाधकः** ज्ञानाभावसम्पादकः। **तर्कः** अनिष्टारोपः।

---

**रासभादीति**। तथाच अभ्रान्तस्यापि रासभादिलिङ्गकवह्न्याद्यनुमितिप्रसङ्ग इति भावः। विस्तरस्तु व्याप्तिग्रहोपायगादाधर्यादितोऽवसेयः। **अधिकमिति**। मतभेदतत्खण्डनादिकमित्यर्थः। अन्यतः व्याप्तिग्रहोपायदीधित्यादितः। **खण्डशः** व्यभिचारघटकसाध्यादिपदार्थानाम्। **भ्रमसम्भवेपि** अभावान्तरे साध्यीयत्वभ्रमेण व्यभिचारभ्रमसम्भवेपि। **साध्यादिभेदेनेति**। तथाचैकत्र साधने एकस्य साध्यस्य व्यभिचारग्रहदशायामप्यपरस्मिन्नपरस्य व्याप्तिग्रहोत्पत्तेस्सर्वसाधारणैककार्यकारणभावासम्भवेन तत्साध्यकतत्साधनकव्याप्तिग्रहत्वतत्साधनधर्मिकतत्साध्याभाववद्वृत्तित्वग्रहाभावत्वादिरूपविशेषधर्मावच्छेदेनैव हेतुहेतुमद्भावो वक्तव्य इति भावः। **यथायथमिति**। यत्र यावद्विधव्यभिचारधीः प्रसिद्ध्यति, तत्र तावद्विधतदभावः समवायसम्बन्धावच्छिन्नप्रतियोगिताकः आत्मनिष्ठप्रत्यासत्त्या हेतुरिति भावः ॥

अथ व्याप्तिग्रहोपायनिरूपणानन्तरम्। **उपाध्यविरोधीति**। अत्र विरोधित्वम् असमानाधिकरणत्वम्, प्रतियोगित्वं वा। **वह्न्यादिव्यभिचारित्व इति**। तथाच विरुद्धः पक्षः कोटिर्विपक्ष इति विग्रह इति भावः ॥

एतत्पूर्वं 'विपक्षे बाधकः' इति पाठः दिनकरभट्टाननुमत इति भाति, तर्कोऽपेक्षित इत्येव प्रतीकं धृत्वा तर्कापेक्षायाः प्रयोजनस्य स्वयमभिधानात् ॥

**दि—तद्दर्शयतीति ।** 'तं दर्शयतीति' इति क्वचित् पाठः। **तम्** विपक्षबाधकतर्कम् । 'तत्' इति पाठे तच्छब्दस्य तर्कापेक्षणमित्यर्थः ॥

**मु—प्रतिसन्धानान्निवर्तत इति ।** निश्चयप्रयोज्यानुत्पत्तिमतीत्यर्थः । धूमे वह्निजन्यत्वनिश्चये कार्यधूमप्रतियोगिकाभावरूपापाद्यव्याप्यत्वस्य कारणवह्निप्रतियोगिकाभावरूपापादके ग्रहात्तर्कोत्थितिः, तेन च शङ्काप्रतिबन्ध इति भावः । वह्निजन्यो न स्यादिति तर्के तु धूमे वह्निजन्यत्वनिश्चयरूपकार्यकारणभावग्रहस्यापाद्यव्यतिरेकनिश्चयविधया कारणत्वमवसेयम् ॥

**दि—विषयपरिशोधकस्येति ।** विषयस्य वह्न्यादिरूपानुमितिविधेयस्य परिशोधकः तदभाववत्ताज्ञाननिवर्तकः तस्येत्यर्थः । **व्याप्तिग्रहानौपयिकत्वेति ।** साक्षादित्यादिः, तेन कथञ्चिदुपयोगेऽपि न क्षतिः ॥

**मु—यदि चेति ।** 'यदि च क्वचिद्वह्निं विनापि धूमो भविष्यति, अहेतुक एव वा भविष्यति' इति पाठः । चिन्तामणावप्येवमेव दृश्यते । **भविष्यतीति ।** उत्पत्स्यते इत्यर्थः । धूमो वह्निजन्य इति निश्चयप्रतिबन्धकं शङ्काद्वयमत्र प्रदर्शितम् । प्रथमा धूमो वह्निजन्यो न वेति । द्वितीया धूमः किञ्चिन्निरूपितजन्यत्ववान् तत्सामान्याभाववान् वेति । द्वितीयायां धूम इत्येतदन्येषां तृप्त्यादीनामुपलक्षकम् । अन्यथा अग्रे 'तृप्त्यर्थं भोजनस्य च' इत्युक्तिरसङ्गता स्यात् । **व्याघातादिति ।** ल्यब्लोपे पञ्चमी । व्याघातमुद्भाव्येत्यर्थः । स्वक्रियायाः, स्वोक्तेः, स्वसिद्धान्तस्य वा विरोधो व्याघातः । प्रकृते स्वक्रियाया विरोध इति ध्येयम् । 'सा व्याघातात्' इति क्वचित् पाठः । **तवैव न स्यादिति ।** तथाच शङ्काप्रवृत्त्योरेक-

कार्येति । कारणाभावे कार्याभावव्याप्यत्वनियमस्फोरणाय धूमवह्न्योः कार्यकारणत्वोत्कीर्तनम्, तेन चापादके आपाद्यव्याप्तावनुकूलतर्कः प्रदर्शितः ॥

कथञ्चिदिति । उपस्थितयावद्धूमाधिकरणान्तर्भावेण व्यभिचारशङ्कानिवर्तनद्वारा इत्यर्थः ॥

शङ्काद्वयमिति । अत्र प्रथमा इष्टापत्तिपर्यवसायिनी; द्वितीया आपाद्याप्रसिद्धिपर्यवसायिनीति, बोध्यम् ।



स्मिन्नेकदा अनवस्थानरूपविरोधात् प्रवर्तमानस्य तव न शङ्कासम्भवः, प्रवृत्तेः स्वातन्त्र्येण मणिमन्त्रादिन्यायेन तत्र प्रतिबन्धकत्वात् । उक्तञ्च मणिकृता—'तत्तदुपादानमेव तादृशशङ्काप्रतिबन्धकम् , शङ्कायाञ्च नियतोपादानम् , नियतोपादाने न शङ्का' इति । अत्रोपादानपदार्थः प्रवृत्तिः । उपादीयते अनेनेति व्युत्पत्त्या प्रवृत्तिकारणं वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानमिति दीधितिकृतः ॥

**दि—नन्वेवं** वह्निजन्यो न स्यादित्यत्र व्याघातेनेष्टापत्तिशङ्कापरिहारेऽपि आपत्तिहेतुभूतव्याप्त्यंशे संशयादनवस्थेत्याशयेन शङ्कते—**ननु तर्कं प्रतीति । तर्ककारणीभूतेति ।** अयमाशयः—अनुमितिं प्रति यथा हेतौ साध्यव्याप्तिज्ञानं कारणम्, तथा तर्करूपामापत्तिं प्रति आपादके आपाद्यव्याप्तिज्ञानम् । यथा चानुमितिं प्रति पक्षता हेतुः, तथा आपत्तौ आपाद्याभावनिश्चयः । इत्थञ्च वह्निजन्यो न स्यादित्यापत्तेः पूर्वं वह्निजन्यत्वाभावव्याप्यं वह्निव्यभिचारित्वमिति ज्ञानं वह्निजन्यो धूम इति ज्ञानञ्चावश्यकम् । वह्निव्यभिचारित्वे वह्निजन्यत्वाभावव्याप्तिश्च वह्निव्यभिचारित्वव्यापकवह्निजन्यत्वाभावसामानाधिकरण्यम् । इत्थञ्च वह्निव्यभिचारित्वव्यापकत्वेन गृह्यमाणो भवति वह्निजन्यत्वाभावः । तदभाववत्ताज्ञानञ्च भवति धूमो वह्निजन्य इति ज्ञानम् । तद्वत्ताबुद्धिं प्रति तदभावव्याप्यवत्ताज्ञानमिव तद्व्यापकाभाववत्ताज्ञानमपि प्रतिबन्धकम् । सा च प्रतिबन्धकता ज्ञानविशिष्टज्ञानत्वावच्छिन्नेति प्रकृते दर्शितज्ञानद्वयसत्त्वे धूमो वह्निव्यभिचारीति ज्ञानं नोदेतुमर्हति । व्याप्तेस्तदभाववदवृत्तित्वरूपत्वेऽपि द्रव्यावृत्ति गुणत्वम्, घटो द्रव्यम् इति ज्ञानद्वयसत्त्वे घटो गुणत्ववानिति ज्ञानस्यानुदयात् तद्धर्मवत्ताबुद्धिं प्रति तद्धर्मे यद्वदवृत्तित्वं गृह्यते, तद्विशिष्टबुद्धिरपि प्रतिबन्धिकेति स्वीकार्यम् । इत्थञ्च प्रकृते वह्निजन्यत्ववदवृत्तिवह्निव्यभिचारित्वं धूमो वह्निजन्य इति ज्ञानद्वयसत्त्वान्न धूमो वह्निव्यभिचारीति ज्ञानमुत्पत्तुमर्हतीति तत्राऽपाद्यव्याप्तिज्ञानेनैव शङ्कानिवृत्तिरिति । **अर्थात्शङ्काऽसम्पन्नमिति ।** अर्थः शङ्काकारणाभाव

तव नेति । तथाच केवलं वितण्डार्थमेव तदुद्भावनमिति निग्रहस्थानमिति भावः । उपादानपदार्थः प्रवृत्तिरिति । इदञ्च मिश्रानुसारेण व्याख्यानम् । दीधितिकृतस्तु प्रवृत्तितः शङ्कानिवृत्तौ तर्कावतारे सति कार्यकारणभावग्रहः, कार्यकारणभावग्रहे च सति प्रवृत्तिरित्यन्योन्याश्रयेण प्रवृत्तेः शङ्काप्रतिबन्धकत्वं न सम्भवति, अपि तु प्रवृत्त्यन्यथानुपपत्त्या कल्पनीयस्य वह्न्यन्वयव्यतिरेकानुविधायित्वज्ञानस्येत्युपादानपदं ज्ञानपरतया व्याकुर्वन्, तद्दर्शयति—उपादीयत इति ।

सम्पादनम्, तद्वशसम्पन्नं तत्प्रयोज्यमित्यर्थः। आहुरिति द्वयमस्वरसं सूचयति। तद्वी जन्तु, पूर्वोक्तरीत्या क्लृप्तेनैवेष्टसिद्धौ तदर्थं तर्कस्योत्तेजकत्वं प्रतिबन्धकत्वं वा न कल्पनीयम्, गौरवादिति। परन्तु पूर्वमते आपत्त्युत्तरम् आपादकज्ञाने नियमेनानिष्टसाधनत्वज्ञानं कल्पनीयम्। तन्नैयत्ये वैमत्येनैव प्रकारान्तरमन्यैराद्दतमित्यवसेयम्। अत्रोत्तेजकतावादिमते तर्कनिष्ठं शङ्कानिवर्तकत्वं शङ्कावृत्तिव्याप्तिग्रहप्रतिबन्धकता विघटकत्वमेवेति बोध्यम्। तर्कोत्तरमापादकवत्ताज्ञानं नानुभवसिद्धमिति तर्कस्य प्रतिबन्धकत्वमेव दीधितिकारैरङ्गीकृतम्। यद्ययं पीतः स्यात्, तर्हि शङ्खो न स्यादिति तर्कोदयेपि शङ्खे पीतत्वसाक्षात्कारोदयात् प्रतिबध्यतावच्छेदककोटौ दोषविशेषाजन्यत्वं देयमिति च वेदितव्यम्। **तर्कयामीत्यनुभवादिति।** अनाहार्ये उत्कटैककोटिकसंशयेपि तर्कयामीत्यनुभवान्नापत्तिरूपतर्के जातिविशेषसिद्धिरित्यत आह—**जिज्ञासेति।** प्रथमे पक्षे आपादकवत्ताज्ञानं मे भूयादितीच्छा जिज्ञासाविशेषः, तद्विषयज्ञाने द्वेषोत्पादनद्वारा तद्विघटकतया; द्वितीये जिज्ञासाविशेषो व्याप्तिनिर्णयेच्छानुकूलव्यभिचारसंशयः, तन्निष्ठनिश्चयप्रतिबन्धकत्वविघटकतया; तृतीये तादृशसंशयविघटकतया इत्यर्थः। निवर्तकतया निवर्तकतावच्छेदकतया। तर्कनिष्ठजिज्ञासाविशेषनिवर्तकता किञ्चिद्धर्मावच्छिन्ना निवर्तकतात्वादित्यनुमानेन धर्मस्य जातित्वे लाघवमिति लाघवज्ञानसहकृतेन सिद्ध इति भावः। जिज्ञासेत्यादिस्थाने '**जनकज्ञानविशेषनिवर्तकतया वा सिद्ध इति**' केरळीयग्रन्थपाठः। आपादकवत्ताज्ञानमापत्तेर्जनकम्, तया च निवर्तन इति तन्निवर्तकतावच्छेदकं तर्कत्वं जातिरूपं सिद्ध्यति। निवर्तकत्वञ्च स्वोत्तरं तदनुत्पत्तिप्रयोजकत्वम्, न तु तन्नाशकत्वम्, स्वजनकविशेषणज्ञाननाशकत्वस्य विशिष्टज्ञानसामान्ये सत्त्वेन तर्कत्वजात्यसिद्धेरिति तदाशयो बोध्यः। **विस्तरस्त्विति।** परामर्श इव आपत्तिजनकज्ञानेपि व्याप्त्यंशे अप्रामाण्यज्ञानानास्कन्दितत्वं निवेश्यम्। पक्षधर्मतांशे पुनः परामर्शे अप्रामाण्यज्ञानानास्कन्दितत्वम् आपादकवत्ताज्ञाने प्रामाण्यनिश्चयाभाव इति भेदो बोध्यः। एवम् इष्टापत्तिः, मूलशैथिल्यम्, तर्कोटिमालापर्यवसानमिति तर्कस्य त्रयो दोषा इत्यादिविस्तरस्त्वित्यर्थः ॥

---

**प्रथमे पक्ष इत्यादि। प्रथमे पक्षे जिज्ञासापदार्थः स्वरस एव। द्वितीयतृतीययोस्तु तदनुकूले संशयविशेषे जिज्ञासापदस्य लक्षणा। शक्यसम्बन्धप्रदर्शनाय अनुकूलेत्युक्तम्। भेदो बोध्य इति। इदमुपलक्षणम्। परामर्शे पक्षधर्मत्वांशे अनाहार्यत्वं देयम्, आपादकवत्ताज्ञाने तु तन्न देयमिति। इत्यादिविस्तर इति। आदिपदेनेदं विवक्षितम्—ननु स्वरूपसत**



मु—'इदानीमुपाधिं निरूपयति' इति पाठः। **अभिमताव्यापकत्वमिति।** 'त्व' इति प्रक्षिप्तम् ॥

**दि—सोपाधावभावादिति।** सोपाधिकत्वप्रकारकज्ञानविशेष्यहेतुकस्थलेऽभावादित्यर्थः। तज्ज्ञाने जाते हेतौ साध्यव्यभिचारानुमानसम्भवात् प्रकृतसाध्यानुमित्यनुत्पत्त्या सिद्धिविषयत्वादिरूपसाध्यत्वादिकं धूमादौ न सम्भवतीति भावः। **इत्यादौ चेति।** द्रव्यत्वादाविति शेषः। **एकप्रकारेणेति।** यदवच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकं यत् यदवच्छिन्नसमानाधिकरणाभावप्रतियोगितावच्छेदकम्, तद्वत्त्वं तदवच्छिन्नसाध्यकतदवच्छिन्नहेतुकस्थलीयोपाधिलक्षणमिति भावः। **एकसम्बन्धेन चेति।** उपदर्शितप्रतियोगिताद्वयमेकसम्बन्धावच्छिन्नं ग्राह्यमित्यर्थः। **द्वित्वादिनेति।** द्रव्यत्वघटोभयत्वादिनेत्यर्थः ॥

**मु—घटादावपीति।** 'कोकिलादावपि' इति केरळीयग्रन्थपाठः ॥

**दि—पक्षधर्मावच्छिन्नसाध्येति।** एतच्च 'वायुः प्रत्यक्षो द्रव्यत्वात्' इति मुक्तावलीपाठमनुसृत्य। अत एवाग्रे उपाध्यधिकरणमित्यस्य प्रयोजनकथनावसरे एतदेव स्थलं प्रदर्शितम्। प्रत्यक्षस्पर्शाश्रयत्वस्य साधनतायां साधनावच्छिन्नसाध्यव्यापकत्वस्योद्भूतरूपे सम्भवादव्याप्त्यभिधानानुपपत्तेः। **प्रत्युद्भूतरूपस्येत्यादि।** 'प्रत्युद्भूतरूपस्य व्यापकत्वे रूपस्य सुतरां व्यापकत्वम्' इति पाठः। **सुतरामिति।** स्वव्यापकव्यापकस्य स्वव्यापकत्वनियमादिति भावः। **तथापीति। साध्यव्यापकत्वे** बहिर्द्रव्यत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वे। **तदिति।** तथाच केवलरूपत्वावच्छिन्नस्यापि लक्ष्यत्वमिष्टमेवेति भावः ॥

---

एवानुकूलतर्कस्यापादकशङ्कानिवर्तकतया वादिनस्तद्बोधजनकस्तदुपन्यासः किमर्थं इति चेदुच्यते—यद्ययं निर्वह्निः स्यान्निर्धूमः स्यादित्याकारेण तर्कोपन्यासः क्रियते, तत्र निर्वह्निनिर्धूमपदसमभिव्याहृतभवनार्थकास्धातुभ्यां निर्वह्निनिर्धूमयोरसाधारणधर्मरूपो भावः प्रत्याय्यते। सम्भावनार्थकलिङ्समभिव्याहृतयदितदाभ्यां हेतुहेतुमद्भावापन्नतदारोपविषयताबोधः। आख्याताभ्याञ्च तदन्वितमाश्रयत्वरूपं कर्तृत्वं प्रथमान्तपदार्थे बोध्यते। तथाच निर्वह्नित्वारोपविषयताश्रयोऽयं तदारोपविषयताप्रयोज्यनिर्धूमत्वारोपविषयताश्रय इति बोधः। इत्थञ्च प्रयोजकारोपविषयताश्रयस्य व्याप्यत्वं प्रयोज्यारोपविषयताश्रयस्य व्यापकत्वञ्च निश्चितमिति निर्धूमत्वव्याप्यनिर्वह्नित्ववानयमिति ज्ञानं जायते, ततश्च निर्धूमस्स्यादिति तर्कोत्थितिरिति तदुपन्यासः सार्थक इति ॥

उपाधिसत्त्वेपि हेतौ तज्ज्ञानाभावे व्याप्तिज्ञानसम्भवेनानुमितिसम्भवादभिमतत्वविशेषणस्य सार्थक्योपपादनं न घटत इत्यतो व्याचष्टे—सोपाधिकत्वेति। विशिष्टैकार्थतासम्पादना

मु—तत्र चेति । एतदुत्तरम् 'उद्भूतरूपवत्त्वाभावात्' इति पाठः । **यद्धर्मावच्छिन्नसाध्येति ।** धर्मविशिष्टधर्मवत्त्वम् उपाधिलक्षणम्। वैशिष्ट्यञ्च स्व विशिष्टसाध्यव्यापकतावच्छेदकत्व,स्वविशिष्टसाधनव्यापकतानवच्छेदकत्वोभयसम्बन्धेन । साध्ये साधने च स्ववैशिष्ट्य सामानाधिकरण्यसम्बन्धेन। अत्र प्रथमेन धर्मपदेन साधनपक्षधर्मादिः, द्वितीयेन च उपाधितावच्छेदकं शाकपाकजत्वत्वादि ग्राह्यमिति ध्येयम् । उपाध्यधिकरणमित्यादिव्यभिचाराधिकरणमित्यन्तं परिचायकम्, अन्यतरत्व प्रतियोगिकोटौ महानसायोगोलकत्वादिनैव प्रवेशः । **एवं वहिर्द्रव्यत्वेति ।** अत्र 'एवम्' इति प्रक्षिप्तम् ॥

दि—**तद्वृत्तिद्रव्यत्वाव्यापकेति ।** एतत्स्थाने 'तद्वृत्तिद्रव्यत्वात्मक' इति साधुः । **तादृशधर्मान्तरस्येति ।** एतदुत्तरम् 'अस्फूर्तौ' इति च । **नच साध्यव्यापकत्वमिति ।** तादृशधर्मान्तरे उपाधिसम्बन्धितावच्छेदकधर्मवत्त्वरूपायाः साध्यनिष्ठव्याप्तेः स्वरूपसम्बन्धरूपमवच्छेदकत्वं विवक्षितमिति मत्वा आशङ्का । व्याप्ति निरूपकत्वरूपं व्यापकत्वं नात्र विवक्षितमिति स्पष्टयति—**तद्धर्माधिकरणीभूतेत्या दिना ।** अत्र भूतपदोपादानेन तद्धर्माधिकरणत्वस्योपलक्षणतया व्यापकत्वकोटौ प्रवेशः सूचितः, तेन तद्घटिताभावप्रतियोगित्वस्य गुरुतया अभावप्रतियोगितान वच्छेदकत्वेपि न क्षतिः । **व्यजनेति ।** 'व्यञ्जन इति' पाठः ॥

मु—यद्धर्मावच्छिन्नसाध्यव्यापकत्वमित्यादिरीत्या लक्षणकरणे धूमवान् वह्नेरित्यादौ यद्धर्मपदेन महानसायःपिण्डान्यतरत्वादिकमादाय व्यञ्जनवत्त्वादावतिव्याप्ति शङ्कां तस्य लक्ष्यत्वेन परिहरिष्यन् लक्ष्यस्वरूपपरिचायकरूपप्रदर्शकं मूलमवतारयति—**अत एवेति ।** 'सर्वे साध्यसमानाधिकरणास्त उपाधयः' इति साम्प्रदायिकः कारिकापाठः । 'हेतोः' इत्यादिभागस्य यत्सम्बन्धिहेतुनिष्ठा एकाश्रयनिरूपितस्वसाध्य

---

याह—**धर्मविशिष्टेति । पक्षधर्मादिरिति ।** आदिना साधनात्मकपक्षधर्मो बोध्यः । **गुरु तयेति ।** महानसायोगोलकान्यतरत्वादेस्तादृशधर्मत्वेन ग्रहणे तद्घटिततादृशप्रतियोगित्वाभावस्या खण्डतया अदोषत्वेपि अयोगोलकतद्भिन्नान्यतरत्वादेरपि तत्त्वेन ग्रहणसम्भवात्तादृशधर्मघटितप्रति योगित्वत्वापेक्षया गुरुत्वेनेत्यर्थः ॥

धूमवान् गुणत्वादित्यादौ हेतोरार्द्रेन्धनसंयोगरूपोपाधिसमानाधिकरणत्वाभावादाह—



व्यभिचारितेति बोधाकारः । यत्सम्बन्धित्वञ्च सामानाधिकरण्येन, एकज्ञानविषयत्वा दिना वा । एकाश्रयनिरूपितत्वोक्त्या स्वाभावाधिकरणं यत् साध्याभावाधिकरणं तद्वृत्तितालाभः । तथाच सध्याभाववद्वृत्त्वधिकरणनिष्ठाभावप्रतियोगित्वे सति साध्य सामानाधिकरण्यं सामानाधिकरण्यस्वाभाववद्वृत्त्वधिकरणनिष्ठाभावप्रतियोगित्वोभयसम्ब न्धेन साध्यविशिष्टत्वपर्यवसन्नं लक्ष्यपरिचायकं बोध्यम्। अत्रैकाश्रयं इत्यनुक्तौ वायुः प्रत्यक्षो द्रव्यत्वादित्यादौ पटाद्यन्तर्भावेण साध्यसमानाधिकरणस्य वाय्वादि द्रव्यान्तर्भावेण साध्यव्यभिचारी घटात्मादिद्रव्यान्तर्भावेण स्वव्यभिचारी च यो हेतुः, तत्समानाधिकरणस्य च घटान्यत्वात्मान्यत्वादेर्विपक्षाव्यावर्तकत्वेनानुपाधेः लक्ष्यताप्रसङ्गः । गगनाद्यन्तर्भावेण हेतोर्द्रव्यत्वस्य स्वसाध्यव्यभिचारित्वाद्वायुत्वादेर्लक्ष्यत्वापत्तिपरिहाराय साध्यसामानाधिकरण्यांशः । धूमवान् वह्नेरित्यादौ सत्तादेः वह्निमान् धूमादित्यादौ महानसत्वादेश्च लक्ष्यत्वापत्तिवारणाय क्रमेण स्वव्यभिचारित्वसाध्यव्यभिचारित्वयोः प्रवेशः । अत्रैवं घटत्वादेरप्यत्र लक्ष्यताप्रसक्तिः, तस्यसाध्यसमानाधिकरणत्वात् गगनाद्यन्त र्भावेण हेतोः स्वसाध्यव्यभिचारित्वाच्च । **नचेष्टापत्तिः,** साध्यव्यापकत्वाभावेन लक्षणासत्त्वा दव्याप्त्यापत्तेरिति चेन्न, यद्धर्मपदेन घटगगनान्यतरत्वादाने तदवच्छिन्नसाध्यव्यापकत्व साधनाव्यापकत्वयोः सत्त्वेनाव्याप्त्यभावात् । नन्वेवमपि वायुः प्रत्यक्षो द्रव्यत्वादित्यत्र आत्म घटान्यतरत्वेऽतिव्याप्तिः, यद्धर्मपदेन घटगगनान्यतरत्वस्य धरणे तदवच्छिन्नसाध्य व्यापकत्वसाधनाव्यापकत्वयोस्तत्र सत्त्वादिति चेन्न, तस्य घटे साध्यसामानाधिकरण्यम्, हेतोरेकाश्रये गगने स्वसाध्यव्यभिचारिता चास्तीति लक्ष्यताया इष्टत्वात् । अत्रेदमव गन्तव्यम्—धूमासमानाधिकरणाद्रेन्धनस्यापि यद्याद्रेन्धनत्वेन रूपेणोपाधित्वमिष्टम्, तदा साध्यसमानाधिकरणवृत्तित्वम् उपाधितावच्छेदकत्वेनाभिमतधर्मे देयमिति ॥

दि—**षष्ठीतत्पुरुषभ्रममिति ।** षष्ठीतत्पुरुषाश्रयणे धूमवान् वह्नेरित्यादौ सत्तादेर्लक्ष्यत्वापत्तिरिति भावः । **यदभावेनेत्यादि ।** साधनवद्विशेष्यकसाध्याभावोन्नाय काभावप्रतियोगित्वं, तादृशभेदप्रतियोगितावच्छेदकत्वं वा उपाधित्वमिति यावत् । धूमवान् वह्नेरित्यत्र अयःपिण्डे वह्निमति धूमाभावसाधकत्वमार्द्रेन्धनवत्त्वाभावस्यार्द्रेन्धनवद्भेदस्य वाऽस्तीत्यार्द्रेन्धनवत्त्वे लक्ष्यतासमन्वयः । एवं वायौ द्रव्ये उद्भूतरूपाभावेन, तद्ध

---

एकशनेति । विपक्षेति । यत् विशेषणं सत् हेतुं व्यभिचारनिरूपकाधिकरणाद्विपक्षाद्व्यावर्तयति, स एवोपाधिरित्यर्थः । यथा धूमवान् वह्नेरित्यादावार्द्रेन्धनसंयोगविशिष्टवह्नेरयोगोलकावृत्तित्वादार्द्रे न्धनसंयोगस्योपाधित्वम् । **एवम्** उक्तरूपस्य लक्ष्यपरिचायकत्वे । **देयमिति ।** तथाच

द्भेदेन वा बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वाभावस्य, तदुभयाभावस्य वा साधने विशेषण रूपबहिर्द्रव्यत्ववति विशेष्यभूतप्रत्यक्षत्वाभावे उभयघटकैकविशिष्टे अपराभावे वा पर्यवस्यतीति तत्रोद्भूतरूपे लक्ष्यतासमन्वयः। श्यामो मित्रातनयत्वात्, विनाशी जन्यत्वादित्यत्रापि शाकपाकजत्वभावत्वाभावाभ्यां क्रमेण मित्रातनयत्वविशिष्ट श्यामत्वजन्यत्वविशिष्टविनाशित्वयोरभावानुमानं दर्शितदिशा श्यामत्वविनाशित्वाभावयोः साधने पर्यवस्यतीति तत्रापि लक्ष्यतासङ्गतिः। यद्वा, यदभावादिना विशेषितेन अविशेषितेन वा साध्याभाव उन्नीयत इत्यर्थः। तथाच यत्रोपाधेः शुद्धसाध्य व्यापकत्वम्, तत्र शुद्धेन, यत्र किञ्चिद्धर्मविशिष्टसाध्यव्यापकत्वम्, तत्र तद्धर्मविशिष्टेन यदभावादिनेति यावत्। भवति च बहिर्द्रव्यत्वे सत्युद्भूतरूपाभाववत्त्वादि हेतुना प्रत्यक्षत्वाभावाद्यनुमानमिति समन्वयो द्वितीये इति बोध्यम्। अत्र साधनवती त्यस्यानुपादाने रूपवान् घटत्वादित्यादौ द्रव्यत्वेऽतिप्रसङ्गः, द्रव्यत्वाभावेन गुणादौ साध्या भावानुमानसम्भवात्। इदमत्रावधेयम्—उन्नायकत्वमत्रानुमितिस्वरूपयोग्यत्वम्, न तु फलोपधायकत्वम्, सर्वत्रोपाध्यभावस्य तत्त्वे मानाभावात्। स्वरूपयोग्यता चात्र नानुमितिजनकतावच्छेदकीभूतपरामर्शविषयत्वम्, सद्धेतावपि साधनवति भ्रमा त्मकानुमितिपरामर्शयोः सम्भवात्, किन्तु व्याप्तिपक्षधर्मते। तथाच यदभावो, यद्भेदो वा शुद्धो विशेषितो वा साध्याभावव्याप्यः साधनवद्वृत्तिश्च, स उपाधि रिति 'यदभावेन' इत्यादेरर्थः। वह्निमान् धूमादित्यादौ महानसत्वाद्यभावस्य जला द्यन्तर्भावेण साध्याभावसामानाधिकरण्यं पर्वतादिसाधनवद्वृत्तित्वञ्चास्तीति महानसत्वा देर्लक्ष्यताप्रसङ्ग इति साध्याभावव्याप्यत्वनिवेशः। तत्रैव वह्न्यभावव्याप्याभावप्रति

---

साध्याभाववद्धेत्वधिकरणनिष्ठाभावप्रतियोगितावच्छेदकसाध्यसमानाधिकरणवृत्तिधर्मवत्त्वं परिचायकं बोध्यम् ॥

अनुमानान्तरं विना साध्याभावसिद्ध्यर्थं कल्पान्तरमाह—यद्वेति। फलोपधायक त्वमिति। तच्चात्र फलविशिष्टज्ञानविषयत्वं बोध्यम्। मानाभावादिति। तथाच यत्र प्रतिबन्ध कादिवशेन न साध्याभावानुमितिः, तत्राव्याप्तिरित्यर्थः। यत्र दोषादिवशात् क्वचित् परामर्शो न जातः, तत्राव्याप्तेः स्फुटतया शिष्यबुद्धिवैशद्याय दोषान्तरमाह—सद्धेतावपीति। तथाच सद्धेतो रपि सोपाधिकत्वप्रसङ्ग इति भावः। शुद्ध इति। ध्वंसो विनाशी जन्यत्वादित्यादौ भावत्वाभावादेः शुद्धस्य प्रागभावादिसाधारणस्य विनाशित्वादिरूपसाध्यीयाभावव्याप्यत्वाभावात् भावत्वादा वव्याप्तिरित्यत आह—विशेषितो वेति। आलोकविशेषेति। वह्न्यालोकेत्यर्थः। आदिपदेन तेजस्त्वावच्छिन्नादिपरिग्रहः। ननु वह्निमान् धूमादित्यादौ महानसत्वादावतिव्याप्तिः, तदभावस्य



योगिन्यालोकविशेषादौ तत्प्रसङ्गवारणाय साधनवद्वृत्तित्वनिवेशः। अधिकं जाग दीश्यादितोऽवगन्तव्यम्। 'यदभावेन' इत्यादिकं लक्ष्यस्वरूपकथनमिति मणिदीधितौ स्पष्टम्। लाघवादिति। 'यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमुन्नीयते' इति मणिकारदर्शितप्रकारापेक्षया लाघवादित्यर्थः। तच्च साध्योपाध्यभावयोरधि करणद्वयस्य वृत्तित्वद्वयस्य चानिवेशप्रयुक्तं वेदितव्यम्। 'सर्वे साध्यसमानाधिकरणाः' इत्याद्युक्तात् नव्यमते व्याप्यत्वप्रवेशप्रयुक्तं गौरवमभिसन्धाय आहुरित्युक्तम्। अत एवेति। यद्वदन्यत्वेन वा इति पक्षान्तरानुसरणादेवेत्यर्थः। नच जलत्वतेजस्त्वो भयाभावस्य केवलान्वयितया कथं साध्याभावानुमापकत्वमिति वाच्यम्, घटो गगन वानित्यादौ तत्सम्भवात्, जातिवृत्तित्वादिविशिष्टस्य जलत्वतेजस्त्वोभयाभावस्य सत्ता भावव्याप्यत्वात् सत्तावान् मेयत्वादित्यादौ तत्सम्भवाच्च। उभयवदन्यत्वन्तु प्रति योग्यप्रसिद्ध्या न प्रसिद्धमिति भावः। रूपवान् द्रव्यत्वादित्यादौ जलत्वस्य तेज स्त्वस्य च प्रत्येकमुपाधित्वस्येष्टत्वादाह—तदुभयत्वेन रूपेणेति। तद्धर्मवति उपाधि व्यभिचारेण साध्यव्यभिचारानुमानम् इत्यत्र सप्तम्या नोद्देश्यत्वमनुमानान्वय्यर्थः, किन्तु व्यभिचारान्वयिनिरूपितत्वमिति स्फुटयन् पर्यवसितार्थमाह—तद्धर्माधिकरणी भूतमित्यादिना। ननु पक्षेतरत्वेऽतिव्याप्तिरिति। साध्यव्यापकत्वज्ञानाधीन व्यभिचारोन्नायकत्वापत्तिरित्यर्थः। अनेन पर्वतेतरत्वे वस्तुतस्साध्यव्यापकत्वस्य पर्वतो वह्निमान् धूमादित्यादावसम्भवादतिव्याप्तिकथनमसङ्गतमिति शङ्कानवकाशः॥

मू—बाधानुन्नीतपक्षेतरस्त्विति। बाधेन साध्याभाववत्त्वेन अनुन्नीतः अनिश्चितः यः पक्षः तदितरः तदितरत्वमित्यर्थ इति प्रभाकृतः। 'बाधोन्नीते चानुकूलतर्कोऽस्त्येवेति' इति चिन्तामण्यादिस्वारस्यभङ्गान्नेयं व्याख्या स्वीकार्या।

---

तद्भेदस्य वा जलत्वादिविशिष्टत्वादिना साध्याभावव्याप्यत्वात् शुद्धेन महानसत्वाभावत्वादिना साधनवत्पर्वतादिनिष्ठत्वाच्चेत्यत आह—अधिकं जागदीश्यादित इति। प्रकृतसाधनवान् यदभावनिष्ठायाः साध्याभावव्याप्यताया अवच्छेदकतापर्याप्त्यधिकरणधर्मविशिष्टवान्, स तत्रोपाधिः। एवञ्च महानसत्वाभावनिष्ठवह्न्यभावव्याप्यतावच्छेदकजलत्वविशिष्टस्य धूमवत्यसत्त्वान्नातिव्याप्तिरित्या दिकं बोध्यमित्यर्थः। व्यतिरेकिसाध्याभावकादिस्थलेऽप्यतिव्याप्तिमाह—जातीति। प्रत्येक मुपाधित्वस्येष्टत्वादिति। वायुजलान्यतरत्वादिरूपकिञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वे सति तद्धर्मावच्छिन्नसाधनाव्यापकत्वादिति भावः॥

तत्र बाधोन्नीतपदस्य पक्षेतरविशेषणत्वं स्पष्टम् । अतः बाधेन पक्षे साध्याभाववत्तया उन्नीतः साध्यव्यापकत्वेन निश्चितो यः, तद्भिन्नः पक्षेतर इत्यर्थो ज्ञेयः। अय मेव पक्षो दिनकरभट्टसम्मत इति 'बाधोन्नीतस्तु' इति पङ्क्तिव्याख्यानावसरे स्पष्टीभविष्यति। **व्यापकताग्राहकप्रमाणाभावादिति ।** व्यापकत्वनिश्चायकानुकूल तर्काभावादित्यर्थः। तर्काभावे व्यभिचारशङ्काया अनिवृत्तेरिति भावः ॥

**दि**—यदिच तर्कापेक्षां विनापि व्यापकत्वनिश्चयो मन्यते, तदापि पक्षेतर त्वस्य न दूषकत्वप्रसङ्ग इति दर्शयितुं मुक्तावल्यामुक्तस्य 'स्वव्याघातकत्वाच्च' इत्य स्यार्थं विशदयति—**उपाधिमात्रस्येति** ॥

**मु—साध्यव्यापकतेति ।** 'साध्यव्यापकत्वादिकम्' इति पाठः ॥

**दि—नच स्वव्याघातकत्वेनेति ।** धूमवान् वह्नेरित्यादौ हेतौ धूमव्यभि चारानुमापकत्वेनाभिमते आर्द्रेन्धनव्यभिचारित्वरूपहेतावपि वह्नीतरत्वस्योपाधित्वसन्देहेन तस्य धूमव्यभिचारानुमापकत्वरूपदूषकत्वासम्भवात्मकस्वव्याघातकत्वादनुपाधित्वमवश्यं स्वीकार्यमिति भावः। **यत्र साध्यव्यापकतेति ।** धूमार्द्रेन्धनयोः कार्यकारणभाव ग्रहाधीनो धूमव्यापकतानिश्चयो यदा आर्द्रेन्धने भवति, तदा वह्नीनरत्वरूपोपाधौ धूमव्यभिचारित्वात्मकसाध्यव्यापकतासन्देहेपि व्यापकव्यभिचारव्याप्यव्यभिचारयोर्व्याप्य व्यापकभावात्मकसामान्यनियमभङ्गापत्तिरूपतर्कसत्त्वात् प्रकृतहेतौ वह्नौ धूमव्यभिचारा नुमानं सम्भवत्येवेति भावः ॥

**मु—केचित्त्विति ।** एतदुत्तरं 'सत्प्रतिपक्षोद्भावनम्' इति क्वचित् पाठः । नन्वेतत्पक्षेपि पूर्वदर्शितमेव लक्षणं लक्ष्यञ्चेति भ्रमं व्यावर्तयितुमाह—**इत्थञ्चेति । कठिन संयोगवत्त्वादिति ।** 'कठिनस्पर्शवत्त्वात्' इति पाठः । क्वचित् 'कठिनत्वात्' इति पाठः । तत्र कठिनत्वादित्यस्य 'कठिनस्पर्शवत्त्वादित्यर्थः। आहुरित्यस्वरसोद्भावनम् । तद्बीजन्तु बाधोन्नीतपक्षेतरत्वमुपाधिर्नस्यात्, तदभावेन पक्षे साध्याभावसाधनासम्भवात्, तत्र हेतोः पक्षमात्रवृत्तित्वेनासाधारण्यादिति ॥

**भा**—अथ प्रमात्वस्यानुमेयत्वं सपरिकरं निरूप्य प्रसङ्गात्तदाश्रयकरणत्वं कुत्रेति व्यवस्थापयितुमाह—**शब्दोपमानयोरिति । नैव पृथक्प्रामाण्यमिति ।**

---

तदेति । अस्य सम्भवतीत्यत्रान्वयः ॥



क्लृप्तप्रमाणान्तर्भूतत्वमित्यर्थः। उभयवादिसिद्धस्वप्रयोज्यप्रमितिसामान्यकत्वमिति यावत् । एतेन यथाश्रुते काणादमते पृथक्प्रमाणाप्रसिद्ध्या निषेधोऽनुचित इति शङ्काया नाव काशः। **अनुमानगतार्थत्वादिति ।** अनुमानेन गतः सिद्धः अर्थः पदस्मारितार्था नामभिमतपरस्परसम्बन्धबोधरूपं गवयादिपदे गवयादिशक्तत्वज्ञानरूपञ्च प्रयोजनं ययोस्त त्वादित्यर्थः। अत्रायं प्रयोगः—शब्दोपमाने उभयवादिसिद्धस्वप्रयोज्यप्रमासामान्यके, स्वविषयकप्रत्यक्षान्यानुमित्यन्यप्रमितिकरणत्वाभाववती वा अनुमितिसामग्र्यधीनस्वप्रयोज्य प्रत्यक्षान्यप्रमितिसामान्यकत्वादिति । यद्वा, प्रत्यक्षान्यस्वप्रयोज्यप्रमितिकरणतात्वव्याप कानुमितिकरणतात्वकत्वादिति हेतुः । प्रत्यक्षान्यशब्दोपमानप्रयोज्यप्रमितिकरणता अनुमित्यन्यानिरूपिता व्याप्तिविषयकत्वावच्छिन्नकरणतात्वादिति वा प्रयोगः । प्रथमे प्रयोगे ज्ञायमानधूमादिकं दृष्टान्तः। द्वितीये तन्निष्ठकरणतेति विवेकः। अनुमान गतार्थत्वादित्यत्रानुमानपदं प्रथमहेतुपक्षे अनुमितिसामग्रीपरम् । द्वितीयहेतुपक्षे अनु मितिकरणतावत्परम् । तृतीयहेतुपक्षे व्याप्तिविषयकत्वावच्छिन्नपरं बोध्यम् । स्व विषयकेत्यादेरयमनुगमः—विषयिताविशिष्टत्वम् । वैशिष्ट्यं स्वविशिष्टानुमित्यन्यप्रमिति

---

ननु क्लृप्तप्रमाणान्तर्भूतत्वं यदि क्लृप्तप्रमाणतादात्म्यम् तदा सिद्धसाधनम्, न्यायमते शब्दो प्रमानयोर्लिङ्गविधया करणत्वस्येष्टत्वादित्यत आह—**उभयवादीति ।** उभयवादिसिद्धत्वञ्च प्रत्यक्षानु मित्यन्यतरत्वरूपम् । **पृथक्प्रमाणेति ।** प्रत्यक्षानुमानातिरिक्तप्रमाणेत्यर्थः । **शब्दोपमाने इति ।** अत्रावच्छेदकावच्छेदेनानुमितिर्बोध्या । **स्वविषयकेति ।** शब्दोपमानयोरनुमितिं प्रति लिङ्गविधया करणत्वाद्बाधवारणायानुमित्यन्यत्वनिवेशः । प्रत्यक्षं प्रति तयोः विषयविधया करणत्वात् तद्वारणाय प्रत्यक्षान्यत्वनिवेशः । प्रत्यक्षान्यानुमित्यन्यप्रमितेः काणादमते अप्रसिद्ध्या साध्याप्रसिद्धि वारणाय प्रत्यक्षे स्वविषयकत्वप्रवेशः । **अनुमितिसामग्र्यधीनेति ।** विषयविधया प्रत्यक्षकरण तामादाय हेत्वसिद्धिवारणाय प्रत्यक्षान्यत्वनिवेशः । **व्याप्तीति ।** प्रतियोगित्वादौ व्याप्तिविषयकत्वा वच्छिन्नत्वसत्त्वाद्व्यभिचारवारणाय करणतात्वनिवेशः । नन्वटितमूलानुसाराय द्वितीयसाध्यप्रदर्शनम् । लाघवमनुसन्धाय तृतीयसाध्यप्रदर्शनमिति बोध्यम् । **अनुमितिकरणतावत्परमिति ।** विग्रह वाक्ये अनुमानेनेति तृतीयाया आधेयतारूपं कर्तृत्वमर्थः । तस्य गतपदार्थकरणतानिरूपकघटक करणतायामन्वयः । अनुमानपदार्थतावच्छेदककरणताया धर्मिपारतन्त्र्येण तत्रैवान्वयः । अवच्छे दकावच्छेदेनान्वयविवक्षया च अनुमितिकरणतायाश्शब्दादिप्रयोज्यप्रमितिकरणतात्वव्यापकानुमिति करणतात्वविशिष्टतादात्म्यसम्बन्धेन, तादृशकरणतात्वसम्बन्धेनैव वा अन्वय इति द्वितीयहेतुलाभः । अवच्छेदकावच्छेदेनान्वयस्थले अन्वयितानवच्छेदकरूपस्यापि सम्बन्धघटकतया भानं तृतीयाग्रन्थे भट्टाचार्यैर्व्यवस्थापितम् । **व्याप्तिविषयकत्वावच्छिन्नपरमिति ।** अत्रापि पूर्ववत् गतपदार्थ घटककरणतायां धर्मिपारतन्त्र्येण विशेषणस्य व्याप्तिविषयकत्वस्यावच्छिन्नत्वसम्बन्धेनान्वयादुक्तहेतु

करणत्वाभाववत्त्वसम्बन्धेन । प्रमितौ स्ववैशिष्ट्यं स्वनिष्ठावच्छेदकताकप्रतियोगिताक भेदवत्त्वसम्बन्धेन । स्वनिष्ठावच्छेदकता स्वनिरूपकविषयकप्रत्यक्षत्वसम्बन्धावच्छिन्नेति । अनुमितिसामग्र्यधीनेत्यादिहेतोरपि प्रयोज्यतावत्त्वमनुगतं रूपम् । तद्वत्त्वञ्च स्वाश्रय प्रत्यक्षान्यप्रमितित्वव्यापकानुमितिसामग्र्यधीनत्ववत्त्वसम्बन्धेनेति । एवमन्यत्रापि । अधिकमूह्यम् ॥

**सु—लौकिकपदानीति ।** एतदुत्तरं 'वैदिकपदानि वा' इति पाठः । 'यजेतेत्यादि'इति प्रक्षिप्तम् , अन्यथा 'अत्र स्वर्गकाम' इत्यादिदिनकरीयपङ्क्तेर्वैयर्थ्यापत्तेः ॥

**दि—वैदिकेतीति ।** ननु वैदिकपदानां वैदिकपदत्वेन पक्षत्वे संसर्गस्य संसर्गत्वेन साध्यघटकत्वम्, उत यत्किञ्चिन्निरूपितत्वत्वादिना, आद्ये शब्दस्य नानुमानेन गतार्थत्वम् , शाब्दबोधे संसर्गस्य विशेषरूपेण भानात् , द्वितीये बाध इत्यत आह—**अत्र स्वर्गेति । अत्र ब्राह्मण इति ।** विभक्त्यर्थत्वेन पराभिमतो यः, स संसर्गतया भासते , विभक्तिः साधुत्वार्थेति मतमाश्रित्येदम् । अधिकरणत्वादे विभक्त्यर्थतामते ब्राह्मणस्याधिकरणत्वे कालिकादिसंसर्गमादायार्थान्तरं बोध्यम् । **अधिकरणत्वसंसर्गे तात्पर्यमिति ।** तात्पर्यञ्चात्र वक्तृगतमिति स्पष्टप्रायम् ॥

**सु—**गामित्यादौ गवादिविषयकत्वस्याप्यनुमितौ लाभाय पदार्थसंसर्गेति, अन्यथा गामानयेत्यादिप्रयोगानन्तरं गवादिविषयकप्रतीतेरनुभवसिद्धत्वात्तदर्थं शब्दस्य प्रामाण्यस्वीकारापत्तेः । पदार्थसम्बन्धित्वञ्च संसर्गे स्वनिष्ठविषयतानिरूपितसंसर्गताश्रयत्वमिति गोकर्मत्वादिभानोपपत्तिः ॥

---

लाभ इति भावः । **स्वनिरूपकविषयकेति ।** अत्र स्वाश्रयप्रत्यक्षत्वस्य लघोरवच्छेदकतावच्छेदकसम्बन्धत्वे गामिति पदनिरूपितविषयितायाः स्वपदेन ग्रहणे असमानाकारस्य गामिति पदं गुणः इत्यादिभिन्नपुरुषीयप्रत्यक्षस्य स्वाश्रयभिन्नत्वात् शब्दस्य तत्करणत्वेन तदभावरूपसाध्याभावात् बाधः । अतः स्वनिरूपकविषयकप्रत्यक्षत्वस्य तथात्वस्वीकारः । **अधीनत्ववत्त्वेति ।** तद्वत्त्वञ्च येन केनापि सम्बन्धेन । **एवमन्यत्रापीति ।** प्रत्यक्षान्येत्यादिहेतोरपि प्रयोज्यतावत्त्वमनुगतार्थः । तद्वत्त्वञ्च प्रत्यक्षान्यस्वाश्रयप्रमितिकरणतात्वव्यापकानुमितिकरणतात्ववत्त्वसम्बन्धेन । ननूक्तहेतूनां नैयायिकासिद्धत्वात्तत्त्वात्साधकत्वमिति चेन्न, तन्निवृत्त्यर्थमेव'तथाहि' इत्यादिमुक्तावलीग्रन्थप्रवृत्तेः । एतत्सूचयति—**अधिकमूह्यमिति ।** **बाधः** अंशतो बाधः ॥



**दि—विशेषणमिति ।** एतदुत्तरं 'तात्पर्यज्ञाने' इति प्रक्षिप्तम् । एवम् 'इतर' इति पदद्वयमपि । **प्रवेशादिति ।** 'प्रवेशे' इति सप्तम्यन्तपाठः साधुः । **घटत्वादिना स्मृतस्येति ।** यत्र द्रव्यत्वेन घटप्रत्यक्षम् , तत्र घटमिति वाक्ये द्रव्यमिति प्रमामादायार्थान्तरवारणाय स्मारितत्वनिवेशः । इत्थञ्च द्रव्यत्वविशिष्टस्य स्मारितत्वाभावान्नोक्तदोष इति भावः । स्मारितपदार्थेपि तात्पर्यविषयत्वं देयम् । अन्यथा अश्वतात्पर्यके सैन्धवमित्यादिवाक्ये लवणकर्मताप्रमामादायार्थान्तरं स्यात् । अत्रेदमवधेयम्—गामानयेत्यादिपदानि तात्पर्यविषयौ यौ गोपदाम्पदार्थौ तात्पर्यविषयतत्संसर्गप्रमापूर्वकाणि, तात्पर्यविषयौ यावम्पदनीधात्वर्थौ तात्पर्यविषयतत्संसर्गप्रमापूर्वकाणीत्येवंरीत्या समूहालम्बनात्मिका अनुमितिरिति । **पदतात्पर्यार्थकमिति ।** तादृशपदतात्पर्येणोच्चरितत्वमाकाङ्क्षावत्त्वमिति भावः । **तेन नाकाङ्क्षाया इति ।** प्राचीनमते आकाङ्क्षा न केवलं तत्पदे तत्पदवत्त्वरूपा, किन्तु समभिव्याहारपदबोध्यपदतात्पर्यघटितापीति आकाङ्क्षाग्रन्थे प्रदर्शितम् । एतद्धेतुघटकाकाङ्क्षा तु तादृशपदतात्पर्यकत्वमेव, न तु तत्पदनिष्ठतत्पदवत्त्वमपि तद्घटकम्, व्यभिचारावारकत्वरूपवैयर्थ्यादिति भावः । नचैवं घटः कर्मत्वमित्यादौ हेतुसत्त्वाद्व्यभिचार इति वाच्यम् , तत्र साध्यस्यापि सत्त्वाद्व्यभिचाराभावात् , प्रत्ययादिव्युत्पत्तिशून्यैः स्वाशयं बुबोधयिषुभिः प्रयुज्यमानात् घटः कर्मत्वमित्यादिपदसमुदायादुक्तपदतात्पर्ययोग्यतादिविशिष्टात् श्रोतुर्दर्शितसाध्यानुमितेर्दृष्टत्वात् । वक्ष्यते चैतदनुपदमेव मिश्रपक्षप्रकटनावसरे । नन्वेवं साकाङ्क्षवाक्यप्रयोगः किमर्थमिति चेन्न, संसर्गतात्पर्यग्राहकतया तदुपयोगात् । **व्यभिचारवारणायेति ।** नचात्र साध्यस्याप्रसिद्धत्वात् कथं व्यभिचार इति वाच्यम्, स्वनिष्ठसंसर्गताविशिष्टप्रमापूर्वकत्वसम्बन्धेन तात्पर्यविषयसंसर्गविशिष्टत्वस्य साध्यत्वमभिप्रेत्य तदुक्तेः । संसर्गतावैशिष्ट्यञ्च स्वनिरूपकत्वस्वनिरूपिततादृशपदार्थनिष्ठविषयतानिरूपकत्वोभयसम्बन्धेन । नन्वाकाङ्क्षादिमत्पदकदम्बत्वादित्यस्य तादृशपदघटितसमु

---

**तात्पर्यविषययावित्यादि ।** तात्पर्यविषयो गोपदवृत्तिज्ञानजन्योपस्थितिविषयः या गौः, तन्निष्ठप्रकारतानिरूपिता, तात्पर्यविषयः अम्पदवृत्तिज्ञानजन्योपस्थितिविषयः यत् कर्मत्वम् , तन्निष्ठविशेष्यतानिरूपिता च या तात्पर्यविषयाधेयत्वसंसर्गनिष्ठसंसर्गता, तच्छालिप्रमापूर्वकाणीत्यर्थः । एवमुत्तरत्रापि । **कथं व्यभिचार इति ।** नचात्र व्यभिचारपदं साध्याप्रसिद्धिपरमिति वाच्यम्, 'साध्याभावेन' इत्युक्तेरसाङ्गत्यापत्तेः । **तादृशेति ।** तात्पर्यविषयस्मारितेत्यर्थः ।

दायत्वादिति ह्यर्थः । तत्र व्यभिचारावारकत्वेन कदम्बत्वस्य हेतुकोटौ निवेशासम्भवात् कदम्बपदग्रहणमनर्थकमिति शङ्कामपाकरोति—**कदम्बपदञ्चेति** । अयमाशयः—घटकर्मत्वयोः संसर्गतात्पर्येण यत्र घटमिति प्रयुक्तम्, तत्र सामान्यत आकाङ्क्षादिमत्त्वस्यैव हेतुत्वे तद्वत्त्वं घटेनेत्यादेः पटमित्यादेश्च भवति, तत्र घटकर्मत्वयोः संसर्गप्रमापूर्वकत्वाभावाद्व्यभिचारः स्यात् । अतो ययोः पदयोरर्थौ साध्यघटकौ, तयोः परस्परस्यैवाकाङ्क्षादिमत्त्वं हेतुघटकमिति सूचयितुं कदम्बपदमिति । एवं यत्प्रतियोगिकत्वमाकाङ्क्षायाः, तत्प्रतियोगिकत्वमेव योग्यतादेर्विवक्षितमित्यपि सूचयितुं तत् । अन्यथा अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ राजपदस्य पुत्रपदेन सहाकाङ्क्षासत्तिमत्त्वात् पुरुषपदेन च योग्यतासत्त्वात् राजपुरुषयोस्तात्पर्यविषयसंसर्गप्रमापूर्वकत्वात्मकसाध्याभावाच्च व्यभिचारस्स्यात् । तथा विवक्षायाञ्च अयमेतीत्यादौ राजपदस्य पुरुषपदनिरूपितयोग्यतासत्त्वेपि तन्निरूपिताकाङ्क्षाया अभावान्न राज्ञः पुरुष इति भागस्य हेतुमत्त्वमिति न दर्शितव्यभिचार इति । हेतुकोटौ घटितत्वप्रवेशनन्तु गामानयेत्यादिवाक्यस्यैव पक्षत्वादंशतः स्वरूपासिद्धिवारणाय । अम्पदत्वादेः पक्षतावच्छेदकत्वे तु स्वप्रतियोगिकाकाङ्क्षादिमत्त्वसम्बन्धेन गोपदविशिष्टाम्पदत्वं हेतुः, एवं द्वितीयाविशिष्टनीधातुत्वादिकं बोध्यम् । व्याप्तिश्च सामान्यमुखी । पक्षधर्मताबलाच्चानुमितौ साध्यकोटौ गवादेः गोत्वादिविशेषरूपेण भानमित्यप्यवसेयम् ॥

**मु—एते पदार्था इति** । कर्मत्वम् आधेयतासंसर्गेण गोविशिष्टम् गोपदयोग्यतादिमत्पदोपस्थापितत्वादित्याद्यनुमानाकारः । अनुमितिश्च समूहालम्बनात्मिकेत्युक्तप्रायम् । अथैवमपि चैत्रो घटमानयतीत्यादौ घटकर्मकानयनानुकूलकृतिमांश्चैत्र इत्यादिविशिष्टबोधसम्पत्तये शब्दप्रामाण्यमावश्यकमिति चेन्न, घटव्याप्यहेतुमत् कर्मत्वं, कर्मत्वव्याप्यहेतुमत् आनयनम् इत्यादिसमूहालम्बनपरामर्शाद्विशेष्ये विशेषणमिति न्यायेनार्थसमाजग्रस्तायास्तादृशानुमितेस्सम्भवात् । अयमभिसन्धिः—विशेष्ये विशेषणस्य तत्र च विशेषणान्तरस्य व्याप्यवत्ताज्ञानात्समूहालम्बनरूपाद्बाधाभावसहकृतात् पूर्वं विशिष्टसाध्याप्रसिद्धावपि विशिष्टविशेषणकानुमितिर्जायते, तस्यापि तत्सामग्रीत्वादिति । अत्र वदन्ति—ज्ञानव्याप्यवानीश्वरः, ज्ञानञ्च जन्यत्वव्याप्यवदिति समूहालम्बनाद्बाधाभाववशेन ईश्वरे जन्यज्ञानसिद्ध्यापत्त्या दर्शितसामग्रीत्वकल्पनमनुचितमिति राजपुरप्रवेशन्यायमनुसृत्य बोध इति पक्षमवलम्ब्यैव शब्दस्य प्रमाणान्तरत्वखण्डनं वैशेषिकाणामिति । **तादृशपदार्थवदिति** । 'तादृशपदार्थान्तरवत्' इति पाठः ॥

**दि—यद्वेतीति** । एतदुत्तरं 'मिथः संसर्गवन्त इति' इति पाठः । **ननु दृष्टान्ते इति** । एतदुत्तरं 'साध्यप्रसिद्ध्यभावात्' इति च ॥

**मु—गवयत्वप्रवृत्तिनिमित्तकमिति** । गवयत्वशक्यतावच्छेदककमित्यर्थः । **वृत्त्यन्तरे** लक्षणायाम् । **वृद्धैः** अभ्रान्तैः ज्ञानवृद्धैः । **तत्र** तद्धर्मावच्छिन्ने । तथाच लक्षणाशक्तिभ्रमानधीनतद्धर्मावच्छिन्नतात्पर्यकप्रयोगविषयत्वादिति हेतुः पर्यवसितः । किञ्चिदतात्पर्यकहुंफडादिशब्दे, सतात्पर्यकेपि घटपदादौ व्यभिचारवारणाय तद्धर्मावच्छिन्नतात्पर्यकत्वनिवेशः । विशेषणान्तरप्रयोजनमूह्यम् । हेतुघटकप्रयोगे लक्षणानधीनत्वज्ञानं प्रायशो दुर्लभमिति मत्वा व्याप्तिग्रहलाघवमभिसन्धाय वा आह—**यद्वेति । साधुपदत्वादिति** । साधुत्वमत्र भ्रमानधीनोच्चारणकत्वम् । पुण्यजनकत्वमिति केचित् । कोशाद्यनुशासनसिद्धत्वमिति परे । एतद्विशेषणञ्चापभ्रंशे व्यभिचारवारणाय । पदत्वेन प्रवेशश्च प्रथमपक्षे षड्जादिस्वरे, द्वितीये यागादौ, तृतीये

---

**अम्पदत्वादेरिति** । आदिपदेन नीधातुत्वादिकं ग्राह्यम् । **व्याप्तिश्चेति** । स्वप्रतियोगिकाकाङ्क्षादिमत्त्वसम्बन्धेन यत्पदविशिष्टयत्पदत्वं यत्र, तत्र तत्पदतात्पर्यविषयतत्पदवृत्तिज्ञानजन्योपस्थितिविषयनिष्ठप्रकारतानिरूपिततत्पदतात्पर्यविषयतत्पदवृत्तिज्ञानजन्योपस्थितिविषयनिष्ठविशेष्यतानिरूपिततात्पर्यविषयसंसर्गनिष्ठसंसर्गताशालिप्रमापूर्वकत्वमिति व्याप्त्याकारो बोध्यः । **पक्षधर्मतेति** । गोपदत्वादिरूपविशेषधर्मवद्विशिष्टाम्पदत्वादिरूपविशेषधर्मात्मकस्य हेतोः पक्षे भानबलादित्यर्थः ॥

**इत्याद्यनुमानाकार इति** । आदिपदात् आनयनं निरूपकतासम्बन्धेन कर्मताविशिष्टम् अम्पदयोग्यतादिमन्नीधातूपस्थितत्वादित्यादयो ग्राह्याः । अर्थसमाजग्रस्तत्वमेव विशदयति—अयमभिसन्धिरिति ॥

**घटपदादाविति** । अत्र गवयत्वावच्छिन्नशक्तत्वाभावात् प्रकृतसाध्यहेत्वोर्व्यभिचारो बोध्यः । **ऊह्यमिति** । लक्षणया शक्तिभ्रमेण वा गवयत्वाद्यवच्छिन्नतात्पर्येण प्रयुक्ते घटादिपदे गवयत्वप्रवृत्तिनिमित्तकत्वाभावाद्व्यभिचारवारणाय लक्षणानधीनत्वं शक्तिभ्रमानधीनत्वञ्च प्रयोगविशेषणमित्यर्थः । **पुण्येति** । 'एकःशब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवति' इति वचनादिति भावः । अनधीतशास्त्रकोशानां पामराणामुक्तहेतुज्ञानं दुर्लभमित्यस्वरसः केचित् परे इत्याभ्यां सूचितः । **पदत्वेनेति** । पदत्वमत्र बोधजनकस्मृतिजनकत्वम् । **यागादाविति** ।

उपसर्गादौ च व्यभिचारवारणाय। **पक्षधर्मताबलादिति** । गवयपदे पक्षे गवयत्वान्यप्रवृत्तिनिमित्तकत्वबाधेन गवयत्वप्रवृत्तिनिमित्तकत्वेन साध्यं सिद्ध्यतीति भावः॥

**दि—इदमुपलक्षणमिति** । अथैवं बहुतरकारणकल्पनागौरवभियैव न सर्वत्रानुमितौ शाब्दत्वसम्भव इति न शब्दस्य पृथक्प्रामाण्यसिद्धिः, एवं बालस्य प्रथमं वृद्धव्यवहारेणैव शक्तिग्रहः, स चानुमित्यात्मक इति पूर्वमुक्तम्, तस्या अनुमितेः कथमपि न शाब्दत्वसम्भवः पदजन्यपदार्थस्मृत्यजन्यत्वादित्यभिप्रेत्याह— **मणिकृतस्त्विति** । **लिङ्गस्य निश्चितस्यैवेति** । नचैवमिदं रजतम्, गामानयेत्यादावनुमितेः पूर्वं योग्यतानिश्चयस्यावश्यकत्वे तस्य सिद्धिरूपतया कथमनुमितिरिति वाच्यम्, तत्र अत्र रजतत्वं, गौः कर्मेत्याद्यसमानाकारकस्य योग्यतानिश्चयस्यैव हेतुनिश्चयरूपत्वाङ्गीकारात्, तस्य चानुमित्यविरोधित्वात्, पूर्वोपदर्शितप्रमापूर्वकत्वानुमाने तु नोक्तदोषापत्तिः। तस्य प्रवर्तकत्वञ्च इदं रजतमित्यादिस्वोत्तरोत्पन्नज्ञानद्वारेत्यपि वक्तुं शक्यत्वाच्च। **पृथगेवेति** । एतदुत्तरं 'शब्दो मानमिति' इति पाठः। ननु योग्यतायास्तद्घटितहेतोर्वा सर्वत्र निश्चयासम्भवेपि तदनिश्चयदशायां क्लृप्तहेतुताकनिश्चयविषयतात्पर्यलिङ्गकपरामर्शादेवानुमितिसम्भवेन न शब्दस्य प्रमाणान्तरत्वसिद्धिः। नच तात्पर्यं तद्वत्तया बुबोधयिषितत्वम्, तथाच कर्मत्वादिकम् आधेयतादिना घटादिमत् तेन सम्बन्धेन घटादिमत्तया बुबोधयिषितत्वादित्याकारकानुमान एवान्तर्भावो वाच्यः, स च न सम्भवति, तेन सम्बन्धेन घटादिशून्यस्यापि तेन सम्बन्धेन घटादिमत्तया बुबोधयिषितत्वसम्भवेन व्यभिचारादिति

---

आदिपदेन हुंफडादिशब्दपरिग्रहः। तदुच्चारणस्यापि पुण्यजनकत्वमागमादौ स्पष्टम्। तेन शब्दत्वनिवेशनेनापि न निस्तार इति सूचितम्। **उपसर्गादाविति**। उपसर्गाणां वाचकत्वमतेपि व्यभिचारप्रदर्शनाय आदौ इति। आदिना निरर्थकप्रत्ययपरिग्रहः। **बहुतरकारणकल्पनेति** । पदज्ञानाकाङ्क्षाज्ञानादीनामनुमित्यव्यवहितपूर्ववृत्तित्वकल्पनेत्यर्थः। **न सर्वत्रेति** । यत्रोभयसामग्री, तत्र सम्भवेदिति भावः। **अनुमितौ** मया अनुमितित्वेनाङ्गीकृतायाम्। ननु योग्यताया लिङ्गविशेषणत्वे निश्चितस्यैव लिङ्गस्य निश्चायकत्वेन सिद्धिसत्त्वादनुमितेरनुत्पत्तिरेव दूषणतया कुतो नोक्तं मणिकारैरित्यभिप्रायेण शङ्कते—**नचैवमिति** । **तात्पर्यलिङ्गकेति** । तथाच तत्र हेत्वन्तरेणानुमितिरिति भावः। नच पूर्वोक्तहेतुघटकयोग्यतायाः संशये बुबोधयिषारूपहेतावपि भ्रमानधीनत्वसंशये चानुमित्यसम्भवात् शब्दप्रामाण्यावश्यकतेति वाच्यम्. उभयत्राप्येककाले संशय इत्यत्र प्रमाणाभावात्, कदाचित्सम्भवेपि संवादिप्रवृत्तिप्रयोजकबुबोधयिषादिना हेत्वन्तरे



वाच्यम्, व्यभिचाराप्रतिसन्धानदशायां भ्रमात्मकोक्तलिङ्गकपरामर्शात्, तत्प्रतिसन्धानदशायाञ्च भ्रमानधीनत्वादिविशेषणावच्छिन्नोक्तलिङ्गकभ्रमात्मकपरामर्शाद्वा अनुमितिसम्भवादित्यतः प्रकारान्तरेण समाधानं दर्शयति—**मिश्रास्त्विति** । यद्वा, ननु हेतुघटकयोग्यत्वं न तत्र तद्वत्त्वरूपम्, आचार्यादिमते अन्वयप्रयोजकरूपवत्त्वस्यैव तथात्वात्, तत्संशये च न शाब्दबोधस्तत्समानाकारानुमितिर्वा इति न कश्चिद्दोष इत्यत आह—**मिश्रास्त्विति** । **नचाकाङ्क्षाघटितेति** । आकाङ्क्षा चात्र प्रत्ययप्रकृत्युत्तरत्वादिरूपा बोध्या। **आकाङ्क्षाभ्रमेणेति** । नन्वनुमितेः भ्रमाधीनत्वे तस्या अपि भ्रमत्वापत्तिरिति शङ्कां वारयति—**विषयेति** । **स्वभावान्नेति** । अनुभवबलात् घटः कर्मत्वमित्यानुपूर्व्याः प्रमितिजनकतानवच्छेदकत्वान्न तदाश्रयस्य स्वरूपयोग्यतासम्भव इति भावः। न चात्र पदजन्योपस्थितौ सत्यां गोनिष्ठं कर्मत्वमित्यादिमानसमनुभवसिद्धमिति वाच्यम्, मानसं प्रत्युपस्थितेरेव हेतुत्वेनाननुगतानामुपस्थापकानामन्यथासिद्धत्वात्, पदद्वयसमभिव्याहारस्य तत्र सर्वथा अनुपयोगाच्च। ननु स्वरूपायोग्यत्वं नाम लिङ्गघटकसंसर्गतात्पर्यग्रहस्वरूपायोग्यत्वमेव। तच्च घटः कर्मत्वमित्यत्रास्ति, घटमित्यानुपूर्वीविशिष्टञ्च तत्तात्पर्यग्राहकमिति न दोष इत्यतः समाधानान्तरं दर्शयति—**परेत्विति** । अथ बाधबुद्ध्यप्रतिबध्यत्वान्निरवच्छिन्नविशेष्यताकशाब्दबोध एव न मानम्। नच पृथक्त्वं न घटावधिकमिति बुद्धिप्रतिबध्यत्वमक्षतमिति वाच्यम्, पृथक्त्वाश्रयनिष्ठविशेष्यताया बाधबुद्धिप्रतिबध्यतावच्छेदकत्वस्य तथाप्यसम्भवादिति चेन्न, शाब्दबोधीययावद्विशेष्यतानां बाधबुद्धिप्रतिबध्यतावच्छेदकत्वनियमे मानाभावात्, अन्यथा चैत्रो गच्छतीत्यादावपि चैत्रत्वनिष्ठप्रकारतानिरूपित

---

णानुमानसम्भवात्, बुबोधयिषायां भ्रमाधीनत्वसंशये नैयायिकमते शाब्दबोधसम्भवेपि तद्बोधे प्रामाण्यसंशयेन तत्र प्रवृत्तेरस्वीकारात्तादृशस्थले संसर्गानुमितेरनभ्युपगमेपि दोषाभावाच्च। ननु योग्यतायाः संशये हेत्वन्तरानुपस्थितावनुमित्यसम्भवेन प्रवृत्त्याद्युपपत्तये शाब्दस्याङ्गीकर्तव्यतया नानुमानेन गतार्थता शब्दस्येत्यतः कल्पान्तरमनुसरति—**यद्वेति** । **अन्वयप्रयोजकेति** । तादृशरूपञ्च सिञ्चतीत्यादौ द्रवत्वादिकम्। **आकाङ्क्षाभ्रमेणेतीति** । भ्रमश्चात्र घटपदाव्यवहितोत्तरमम्पदमित्याकारको बोध्यः। तुष्यतु दुर्जन इति न्यायेनाह—**पदद्वयेति** । सर्वथा पदानामन्यथासिद्धत्वेपि। ननु चैत्रो गच्छतीत्यादौ चैत्रत्वनिष्ठप्रकारतानिरूपितविशेष्यतायाः कृतिनिष्ठप्रकारतानिरूपितचैत्रत्वावच्छिन्नविशेष्यतायाश्चैक्यात् चैत्रो न गच्छतीति बाधबुद्धिप्रतिबध्यतावच्छेदकत्वमक्षतमित्युक्तनियमे बाधकाभावात् घटात्पृथगित्यादौ शाब्दबोधोपगमो

निरवच्छिन्नविशेष्यतासत्त्वात् शाब्दबोधानुपपत्तेः । वस्तुतस्तु, पदजन्यपदार्थोपस्थित्यादिसामग्र्यां सत्यां कार्येणावश्यंभाव्यमिति घटात् पृथगित्यादौ शाब्दापलापो न सम्भवतीति । इदमुपलक्षणम् । शब्दजन्यज्ञानानन्तरं शृणोमि, नत्वनुमिनोमीत्यनुव्यवसायात्, मयेदं नानुमितम्, किन्तु गुरोः श्रुतमित्यादिव्यवहाराच्च शाब्दबोधो नानुमितिः । तज्जनकश्च शब्दः पृथक्प्रमाणम् । एतेन द्वारमित्याद्युक्ते यथा नैयायिकमते पिधेहीत्यादिपदाध्याहारादेव शाब्दबोधः, तथा घटात् पृथगित्यादावपि पटइत्यादिकिञ्चिद्विशेष्यवाचकपदमध्याहृत्यैव बोधः स्वीक्रियते । यद्वा, कुत्राप्येकदेशान्वयानभ्युपगमात् पृथक्त्वाश्रय एव पञ्चम्यर्थान्वयस्य वक्तव्यतया शाब्दबोधस्य सधर्मितावच्छेदककत्वेन तत्समानाकारकानुमितिस्सम्भवतीति तत्राप्यनुमानेन गतार्थतेति परास्तम् । किञ्च वह्निव्याप्याभाववान् वह्निमानिति शब्दप्रयोगे अनुमित्यनात्मक एव शाब्दबोधः स्वीकार्यः, तत्र वह्निव्याप्याभाववान् वह्निव्याप्यवानिति परामर्शस्याहार्यत्वनियमेनानुमित्यसम्भवादिति शब्दस्य प्रमाणान्तरतेति । एतत्सूचनाय दिगित्युक्तम् । एवं सदृशपिण्डदर्शनादिना यत् गवयोगयपदवाच्य इत्यादिज्ञानं जातम्, तदनन्तरम् उपमिनोमि, न त्वनुमिनोमीत्यनुव्यवसायादिबलादुपमानमपि प्रमाणान्तरमित्यवसेयम् ॥

भा—अथ प्रसङ्गादर्थापत्तेः प्रमाणान्तरत्वं निरसितुं भूमिकामारचयति—**त्रैविध्यमिति** । एतेन पृथक्प्रामाण्यविचारमध्ये अनुमानविभागोऽसङ्गत इत्याक्षेपः परास्तः । **केवलान्वयिभेदत इति** । अत्र केवलान्वयिपदं केवलान्वय्यादिपरम्, अतो न त्रैविध्यविरोध इति दर्शयति—**मुक्तावल्यामनुमानं त्रिविधमिति** । 'त्रैविध्यमनुमानस्य' इत्यादिकारिकार्धपाठो न प्रमाकृदनुमत इति तद्व्याख्यातोऽवगम्यते ।

---

न सम्भवतीत्यत आह—**वस्तुतस्त्विति** । **न सम्भवतीति** । तथाच दर्शितनियमोऽप्रामाणिक इति भावः । **अध्याहृत्यैवेति** । तथाच तत्र विशेष्यवाचकपदान्तररूपकारणाभावाच्च सामग्रीति भावः । ननु द्वारमित्यादौ विवक्षितमहावाक्यार्थबोधे जननीये एव पदान्तराध्याहार आवश्यकः । विनापि तं द्वारीया कर्मतेति बोध इष्टः । तद्वदत्रापि घटावधिकपृथक्त्वाश्रयबोध एष्टव्यः । तस्य चानुमितित्वासम्भव इति तदर्थं शब्दः प्रमाणमित्याक्षेपं मनसि निधायाह—**यद्वेति** । **पञ्चम्यर्थान्वयस्येति** । स्वाश्रयाश्रयत्वसम्बन्धेनेति बोध्यम् । तदुक्तं हरिणा—'समुदायेन सम्बन्धो येषां गुरुकुलादिना । संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह' इति ॥

अथ शब्दोपमानयोः प्रमाणत्वव्यवस्थापनानन्तरम् । **प्रसङ्गादिति** । स्ववृत्तिप्रमाणान्तरत्वविरुद्धधर्मवत्त्वमत्र प्रसङ्गरूपा सङ्गतिः । एतेन भूमिकारचनरूपत्वकथनेन ।



**अन्वयव्यतिरेकतः इति** । अभेदार्थकतृतीयान्तात्तसिः । अन्वयव्यतिरेकपदे च व्याप्तिविशेषयोः परिभाषिते । भावप्रधानश्च निर्देशः । तथाचान्वयत्वव्यतिरेकत्वाभिन्नविधाद्वयं व्याप्तेरित्यर्थ इति केचित् । परेतु ज्ञानज्ञाप्यत्वार्थकपञ्चम्यास्तसिः, तसिल्वा । अन्वयः साध्यहेत्वोस्सहचारः, व्यतिरेकः साध्याभावहेत्वभावयोः सहचारः, तज्ज्ञानज्ञाप्यं द्वैविध्यमित्यर्थः । अत एव 'व्यतिरेकादिहोच्यते' इत्यग्रिमग्रन्थसङ्गतिरित्याहुः । प्रथमकल्पे 'व्यतिरेक इहोच्यते' इति पाठ इत्यवसेयम् ॥

दि—**अत्यन्ताभावाप्रतियोगीति** । यदि गगनाभावकपिसंयोगाभावादेः केवलान्वयित्वमभिमतम्, तदा निरवच्छिन्नवृत्तिमत्त्वमत्यन्ताभावे देयम् । **सिद्ध्यसिद्धिव्याघातादिति** । असन् विपक्षो यस्येति विग्रहे समासे च यदि विपक्षः प्रसिद्धः, तदा नासत्त्वम्, यद्यप्रसिद्धः, तदा भानमेवासम्भवीति व्याघात इत्यर्थः । नच सन् विपक्षो यस्येति प्रथमं विग्रहः, तथाच यद्धेतुकसाध्याभाववानस्ति, स इत्यर्थः, व्यतिरेकिसाध्यक इति यावत् । स न भवतीत्यसद्विपक्ष इत्यर्थोऽस्त्विति वाच्यम्, द्रव्यत्वादीनां व्यतिरेकिसाध्यकत्वसम्भवात् अभिधेयो द्रव्यत्वादित्यादौ केवलान्वयित्वानुपपत्तेः । अतः सत्पदस्यात्यन्ताभावप्रतियोगिनि लक्षणा, विपक्षपदस्य च साध्ये । इत्थञ्च असन् विपक्षो यस्येति विग्रहात् यदीयसाध्यम् अत्यन्ताभावाप्रतियोगीति लभ्यते । समासाच्च अत्यन्ताभावाप्रतियोगिसाध्यक इति चेत्यवसेयम् । यद्वा, असन्नित्यस्यात्यन्ताभाववानर्थः । विपक्षपदस्य च खण्डशः साध्यं वृत्तिमदत्यन्ताभावप्रतियोगित्वञ्चार्थः । व्युत्पत्तिवैचित्र्यात् प्रतियोगित्वमसत्पदार्थैकदेशेऽत्यन्ताभावे, तद्वांश्च साध्ये अन्वेति । एवञ्च समासात् वृत्तिमदत्यन्ताभावाप्रतियोगिसाध्यकत्वलाभः । **प्रमेयत्वादाविति** । इदञ्च 'यथा घटः प्रमेयोऽभिधेयत्वादित्यादौ । तत्र हि सर्वस्यैव प्रमेय

---

अन्वयव्यतिरेकपदयोः पारिभाषिकत्वं भावप्रधानत्वञ्चाकल्पयित्वा व्याचक्षाणानां मतमाह—**परेत्विति** । **साध्याभावेति** । अभाववाचिव्यतिरेकपदं तत्सहचारे लाक्षणिकमित्याशयः ॥

**अभिमतमिति** । तथाच 'अभावविरहात्मत्वं वस्तुनः प्रतियोगिता' इत्याचार्यपक्षे गगनस्य गगनाभावप्रतियोगितानिर्वाहाय गगनाभावाभावस्याङ्गीकार्यतया गगनाभावस्य तत्प्रतियोगित्वमेवेत्यनुपपत्तिस्स्यादिति भावः । प्रतियोगिता स्वरूपसम्बन्धविशेष इति पक्षे, पदार्थान्तरमिति पक्षे च नानुपपत्तिः, तन्मते गगनाभावाभावानङ्गीकारादिति बोध्यम् । स्पष्टञ्चेदं केवलव्यतिरेकिदीधितौ । विपक्षपदस्य अभावाघटितार्थकत्वमसहमान आह—**यद्वेति** ।

त्वाद्विपक्षासत्त्वम्' इति मुक्तावलीपाठ इति मत्वोक्तम्। चिन्तामणावपि प्रकरणेऽस्मिन् प्रमेयत्वस्यैव साध्यता दर्शितेत्यवसेयम्। **अननुगमादिति।** सर्ववस्तुवृत्तित्वाभावादित्यर्थः। आक्षेपश्चायं यथाश्रुताभिप्रायेण। अत्यन्ताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदककत्वं यदि केवलान्वयिसाध्यकत्वं प्रमेयत्वत्वादिकञ्चाखण्डधर्मः, तदा न दोषः। **प्रमात्वस्यैवेति।** प्रमात्वमत्र न तद्वति तत्प्रकारकत्वरूपम्, अननुगमतादवस्थ्यात्। किन्तु नित्यज्ञानावृत्तिविषयिताशून्यत्वाद्यात्मकं बोध्यम्। **प्रमेयत्वादेरिति।** प्रमाविषयत्वादिरूपस्येति शेषः। **व्यतिरेकित्वभ्रमेपीति।** 'व्यतिरेकित्वसम्भवेपि' इति पाठः ताळीपत्रग्रन्थेषु दृश्यते। स एव साधुः। **केवलान्वयित्वमेवेति।** प्रमात्वरूपस्य तस्येत्यादिः। **अगृहीतहेतुसहचारमिति।** नत्वसद्धेतुसहचारम्, तादृशस्य सद्धेतोरप्रसिद्धेः। अभिप्रायः प्रमेयत्वादित्यादावसत्यप्यन्वयसहचारग्रहे व्यतिरेकसहचारभ्रमाधीनानुमितिदर्शनादतिव्याप्तिरित्यतो व्यतिरेकित्वेन साध्यं विशेषितम्॥

**सु—जलादित्रयोदशभेदस्येति।** इदञ्च भावपदार्थमात्रनिरूपणपरभाष्यानुसारेणोक्तम्। तथाच 'इतरेभ्यः' इत्यत्र इतरपदं पृथिवीतरभावपरमिति न काप्यनुपपत्तिः। उक्तञ्च मणिकृता—'इतरभावान्योन्याभावस्य साध्यत्वात्' इति। व्याख्यान्तरं प्रभायां द्रष्टव्यम्॥

**दि—गृहीतान्वयव्यतिरेकीति।** गृहीतान्वयं यद्व्यतिरेकिसाध्यमिति विग्रहः। 'गृहीतान्वयव्यतिरेकसाध्यकम्' इति पाठः क्वचित् दृश्यते। असति व्यतिरेकसहचारग्रहे वह्न्यादिसाध्यकहेतावव्याप्तेस्स त्याज्यः॥

**भा—साध्याभावव्यापकत्वमिति।** व्याप्तेर्हेतुनिष्ठत्वसम्पादनायाह—मुक्तावल्यां व्यापकीभूताभावप्रतियोगित्वमिति। तुल्यवित्तिवेद्यतया तल्लाभोऽवसेयः॥

**सु—**नन्वेवं गन्धवत्त्वादिहेतुना पृथिव्यां कदाचित् पृथिवीतरत्वात्यन्ताभावः, कदाचित् पृथिवीतरभेदः सिद्ध्यतीत्यत्र नियामकदौर्लभ्यम्, एवं पृथिवी इतरेभ्यो भिद्यते

---

**शून्यत्वाद्यात्मकमिति।** आदिपदेन सम्बन्धविशिष्टान्यप्रकारताशून्यत्वं ग्राह्यम्। सम्बन्धवैशिष्ट्यञ्च स्वप्रतियोगिनिष्ठत्वस्वावच्छिन्नत्वस्वानुयोगिनिष्ठविशेष्यतानिरूपितत्वैतत्त्रितयसम्बन्धेन। **विशेषितमिति।** वह्निमान् धूमादित्यादौ साध्यस्य व्यतिरेकित्वात् हेतुसहचारग्रहदशायामतिव्याप्तिरित्यगृहीतहेतुसहचारमिति॥

**तुल्यवित्तिवेद्यतयेति।** शाब्दबोधे तदनङ्गीकारपक्षे मानस एव तल्लाभ इति बोध्यम्॥



इत्यादौ साध्यस्यानुमितेः पूर्वमप्रसिद्ध्या साध्याभावत्वेन तदभावोप्यप्रसिद्ध इति व्याप्तिग्रहासम्भवश्चेत्यत आह—**अत्रेदं बोध्यमिति। येन रूपेणेति।** इदं तन्त्रेण व्यापकतायां ग्रहे चान्वेति। एवञ्च यद्धर्मावच्छिन्नधर्मिकं यद्धर्मावच्छिन्नव्यापकताज्ञानमित्यर्थो लभ्यते। व्यापकतायां यद्धर्मावच्छिन्नत्वनिवेशेन वह्नौ द्रव्यत्वेन व्यापकताज्ञानात् वह्नित्वावच्छिन्नाभाववत्ताज्ञानसहितान्न धूमाभावसिद्धिप्रसङ्गः। ग्रहे यद्धर्मावच्छिन्नधर्मिकत्वनिवेशेन च निर्धर्मितावच्छेदककात् वह्नित्वान्यधर्मितावच्छेदककाद्वा वह्नित्वेन व्यापकताग्रहात्तथाविधान्नोक्तापत्तिः। **गृह्यत इत्यादि।** अत्र च तद्धर्मावच्छिन्नधर्मिकतद्धर्मावच्छिन्नव्यापकताज्ञानं तद्धर्मावच्छिन्नाभाववत्ताज्ञानञ्चानुमितिजनकम्, विशिष्टपरामर्शस्यैवानुमितिहेतुत्वमिति नैयायिकाभिमतनियमश्चान्वयिसाध्यक इत्याशयः। तादृशनियमस्य सार्वत्रिकत्वे व्यापकतावच्छेदकत्वविशिष्टतद्रूपावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानं हेतुरित्यवसेयम्। स्पष्टञ्चेदं केवलव्यतिरेकिदीधितौ॥

**दि—तादात्म्यसम्बन्धेनेतीति।** एतदुत्तरं 'तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावः' इति पाठः। तृतीयायाः सिद्ध्यतीत्यनेनान्वयभ्रमं व्यावर्तयितुमिदं विवरणम्। तथाच अवच्छिन्नप्रतियोगिताकत्वं तृतीयार्थः। तस्य चाभावेऽन्वय इति भावः। **इतरस्य व्यापकतेति।** 'इतरस्य व्याप्यता' इति साधुः पाठः। **प्रयोजनमूह्यमिति।** इतरत्वेनेतरस्य व्याप्यताग्रहे जलत्वाद्यवच्छिन्नभेदत्वादिना न साध्यसिद्धिः, एवं गन्धाभावत्वेन व्यापकताग्रहे घ्राणग्राह्यगुणत्वादिना न हेतुतेति तत्प्रयोजनमवसेयम्। एवं वह्नेर्महानसीयवह्नित्वेन धूमव्याप्यत्वे धूमस्य द्रव्यत्वेन वह्निव्यापकत्वे वा गृहीतेपि न धूमाभावाद्वह्न्यभावसिद्ध्यापत्तिरिति च बोध्यम्। ननु साध्यप्रसिद्धिमिति साध्याभावत्वेन व्याप्यताग्रहमभिसन्धाय पूर्वपक्षः। अत्र पूर्वपक्षादिप्रतिपादनञ्च शिष्यबुद्धिवैशद्याय। अतो न प्रका

---

वह्नौ द्रव्यत्वेन व्यापकताज्ञानादिति। धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकद्रव्यत्ववान् वह्निरिति ज्ञानादित्यर्थः। **निर्धर्मितावच्छेदककादित्यादि।** धूमव्यापकतावच्छेदकवह्नित्ववान् इति, धूमव्यापकतावच्छेदकवह्नित्ववद्द्रव्यमिति वा ज्ञानादित्यर्थः। **तथाविधात्** वह्नित्वावच्छिन्नाभाववत्ताज्ञानसहितात्। **व्यापकतावच्छेदकत्वविशिष्टे**त्यादि। तच्च ज्ञानं धूमव्यापकतावच्छेदकवह्नित्ववदभाववान् ह्रद इत्याकारकं बोध्यम्॥

नन्वितरत्वव्यापकीभूताभावप्रतियोगित्वं व्याप्तिः, तत्र च न साध्याभावत्वेन साध्याभावस्य घटकतेति कथमयमाक्षेप इत्यत आह—साध्याभावत्वेनेति॥

केचित् । तदर्थः प्रभातोऽवसेयः । नन्वाजन्मबधिरस्य शब्दाननुभवात् तत्र सङ्केतग्रहणासम्भवेन चेष्टया कथं तत्स्मृतिः, प्रवृत्तिनिवृत्ती च तस्य दृश्येते, अतश्चेष्टा प्रमाणान्तरमिति चेन्न, तत्र चेष्टया तत्कर्त्रभिप्रायानुमानेन तयोरुपपत्तेः कशाद्यभिघातादिव तुरगादेः । अधिकं न्यायचिन्तामण्यादितोऽवगन्तव्यम् ॥

भा—**सुखन्त्विति** । सन्निहितेऽपीष्टेऽर्थे विषयान्तरव्यासक्तस्य सुखानुत्पादादिष्टवस्तुज्ञानमपि सुखहेतुरिति ज्ञानकार्यत्वात्तदुत्तरं सुखनिरूपणम् । **जगतामिति** । जीवानामित्यर्थः । तेन घटादीनां परमेश्वरस्य च व्यावृत्तिः । अत एवाग्रे सचेतसामित्युक्तिर्युज्यते । **एककाम्यमिति** । 'एव काम्यम्' इति ताळीग्रन्थपाठः । एवकारः काम्यमित्युत्तरं योज्यः । न कदापि द्वेषविषय इति तदर्थः । यद्वा, एवकारो यावदर्थकः जगतामित्यस्य विशेषणम्, तथाचाशेषजीवकामनाविषय इत्यर्थः । यद्यपि तत्तत्सुखविशेषस्य निखिलजीवेच्छाविषयत्वमप्रामाणिकम्, तथापि तादृशेच्छाविषयतावच्छेदकजातिमत्त्वविवक्षणान्न दोषः । इत्थञ्च दुःखाभावस्य निखिलजीवेच्छाविषयत्वेऽपि जातिमत्त्वाभावान्नातिव्याप्तिः । यदि च शत्रुगतत्वेनाभिलाषविषयत्वस्य दुःखे सम्भवादतिव्याप्तिरित्युच्यते, तदा स्ववृत्तित्वप्रकारकत्वमभिलाषे देयम् । केचित्तु एतद्वारणाय अन्याभिलाषानधीनत्वम् अभिलाषे विशेषणं देयम्, इत्थञ्च स्वसुखकामनयैव शत्रुदुःखे अभिलाषोदयान्न दोष इति वदन्ति । तच्चिन्त्यम्, मूलस्थस्य जगतामित्यस्य वैयर्थ्यप्रसङ्गात् ॥

मु—काम्यमित्यत्र कामशब्दार्थो न देवविशेषः, यत्प्रत्ययस्याहार्थत्वञ्च प्रकृते न विवक्षितमिति दर्शयति—**अभिलाषविषय इति** । स्वरूपकथनमात्रमेतत्, सुखत्वमेव लक्षणमित्यपि वदन्ति ॥

---

जगच्छब्दस्य चराचरात्मकप्रपञ्चार्थकत्वे दोषमाह—**घटादीनामिति** । आत्ममात्रार्थकत्वे दोषमाह—**परमेश्वरस्येति** । नन्वेवं जगत्कामनाविषयत्वे सति द्वेषाविषयत्वं सुखस्य लक्षणम्, एवं सति सुखेऽपि शत्रोर्द्वेषविषयत्वादव्याप्तिः, जगच्छब्दस्य वैयर्थ्यापत्तिश्चेत्यत आह—**यद्वेति** । **न दोष इति** । नचेदानीं तादृशेच्छाया अप्रसिद्धिः, तत्तदिच्छायास्तत्तज्जीवमात्रसमवेतत्वादिति वाच्यम्, जीवत्वव्यापकजातिमत्त्वस्य विवक्षितत्वात् । व्यापकत्वञ्च स्वावच्छिन्नविषयककामनावत्त्वसम्बन्धेन ॥

वदन्तीत्यस्वरसोद्भावनम् । तद्बीजन्तु, लक्षणस्य लक्षणान्तरादूषकत्वेन निरुक्तरूपस्यापि लक्षणत्वसम्भवात्स्वरूपकथनमात्रपरत्वकल्पनमयुक्तम्, अन्यथा गन्धसमवायिकारणतावच्छेदक



दि—**जन्यसुखत्वमिति** । कार्यतावच्छेदकलाघवमभिसन्धायाह—**सुखत्वावान्तरेति** । नच कार्यतावच्छेदकतावच्छेदकसम्बन्धः कालिकसमवायोभयम्, इत्थञ्चेश्वरे नित्यसुखाङ्गीकारेऽपि न सुखत्वस्य कार्यतावच्छेदकत्वे कापि क्षतिरिति वाच्यम्, सम्बन्धांशे गौरवस्य तथाप्यपरिहारात् ॥

मु—**दुःखं निरूपयतीति** । सुखनिरूपितप्रसङ्गसङ्गत्या ज्ञानजन्यत्वेन दुःखादीनामपि निरूपणीयत्वादवसरसङ्गत्या चेति शेषः । **स्वाभाविकद्वेषविषय इति** । इतरद्वेषानधीनद्वेषविषय इत्यर्थः । 'निर्दुःखत्वे' इत्यादिमूलेन इच्छाविभागोऽपि सूचितः, अन्यथा कारणभेदाकाङ्क्षाधीनतत्प्रदर्शनस्यानुपपत्तेरित्याशयेनाह—**इच्छा द्विविधेति** । **ज्ञातं सदिति** । ज्ञातमेव सदिति सावधारणम्, तेनेतरेच्छादीनां कारणत्वं व्यवच्छिद्यते । ज्ञातं सदित्यादौ विशेषणीभूतज्ञानादेर्जन्यतासम्बन्धेन धात्वर्थान्वय औत्सर्गिकः । 'तज्ज्ञानादेव जायते' इति मूलेनेदमुभयं प्रकटितम् । 'इष्टोपायत्वधीर्यदि' इति वाक्येन मूलस्थेनान्वयव्यतिरेकप्रदर्शनपूर्वकं कारणत्वमेव सूचितमिति दर्शयति—**उपायेच्छां प्रतीति** ॥

भा—हेतुविशेषबोधनाय चिकीर्षापदार्थं प्रथममाह—**चिकीर्षेति** । सेत्यादिः । चिकीर्षा चिकीर्षापदबोध्या । एतेन कृताविच्छा चिकीर्षेति पाककृतिर्भवत्वित्यादिरूपा कृतिविशेष्यकेच्छैव चिकीर्षापदार्थ इति सौन्दलमतं प्रत्युक्तम् । वृष्टिर्भवत्वित्यादिवत् कृतिर्भवत्वितीच्छायामपि प्रवृत्तेरदर्शनात्, पाकं कृत्या साधयानीति पाकविशेष्यककृतिसाध्यत्वप्रकारकेच्छासत्त्व एव प्रवृत्तिदर्शनाच्च । अत एव घटं जानाति, चिकीर्षति, करोतीति ज्ञानचिकीर्षाकृतीनामेकविषयत्वानुभवश्चोपपद्यते ॥

---

जातिमत्त्वादीनां पृथिव्यादिलक्षणत्वानुपपत्तेरिति ॥

प्रसङ्गसङ्गत्येति । स्ववृत्तिप्रतिकूलत्वरूपधर्मवत्त्वात्मिका प्रसङ्गसङ्गतिर्बोध्या । यावत्यः सङ्गतयः सम्भवन्ति, तावत्योऽपि प्रदर्शनीया इति नियममनुरुध्याह—**ज्ञानजन्यत्वेनेति** । **धात्वर्थान्वय औत्सर्गिक इति** । भुञ्जानस्तृप्यतीत्यादौ तथा दर्शनादिति भावः ॥

प्रवृत्तिदर्शनाच्चेति । तथाचान्वयव्यतिरेकाभ्यां कृतिसाध्यविशेष्यकेच्छाया एव हेतुत्वं सिद्ध्यतीति भावः । **करोतीति** । तादृशानुव्यवसायेनेत्यर्थः । कर्तृविशेषविवक्षाभावात् प्रथमपुरुषः । **ज्ञानचिकीर्षाकृतीनामिति** । प्रवृत्त्या सह प्रवृत्तिकारणज्ञानचिकीर्षयोरभिन्नविशेष्यकत्वविषयीकरणमित्यर्थः ॥

मु—कृतिसाध्यं भवत्विति निर्धर्मितावच्छेदकेच्छां व्यावर्त्तयितुमिच्छां विशिनष्टि—**कृतिसाध्यविषयिणीति ।** सधर्मितावच्छेदककेत्यर्थः । अन्यथा विसंवादीच्छाया असंग्रहापत्तेः । एतेनोपायेच्छाविशेष एव चिकीर्षा, न तु विधान्तरमिति सूचितम् । 'कृत्या साधयानि' इति लोडन्तः पाठ इत्यस्मदाचार्याः । करोतिसाधयत्योस्समानार्थकत्वं लोके बहुत्र दृश्यते । अत्र साधयतिरिच्छायां लाक्षणिकः । लोट् च तात्पर्यग्राहकः । कृतिपदं कृतिसाध्यत्वलाक्षणिकम् । इदं रजतत्वेन जानामीत्यादाविव द्वितीयाया विशेष्यत्वं तृतीयायाः प्रकारत्वञ्चार्थ इति पाकविशेष्यककृतिसाध्यत्वप्रकारकेच्छानुभवरूपत्वमस्याक्षतम् । यद्वा, साध्यत्वप्रकारकेच्छा धात्वर्थः । तृतीयार्थः साध्यत्वान्वयि निरूपितत्वम्, कृतिपदञ्च मुख्यार्थकमिति ध्येयम् । 'तद्धेतुरिति' इति प्रतीकधारणं 'चिकीर्षा प्रति' इत्यस्य पूर्वं योज्यम् ॥

दि—**कृतिसाध्यपाकत्वावच्छिन्नेति ।** कृतिसाध्ये इष्टसाधनत्वमतिरिति तत्पुरुषाश्रयणान्न मूलविरोध इत्याशयः । **स्वरूपसती विशेषणमिति ।** भोजनं तृप्तिसाधनमित्यादिज्ञानकालेपि यदि तृप्त्यादिरूपफले नेच्छा, तदा भोजनादौ प्रवृत्त्यदर्शनात्तद्विशेषणावश्यकता बोध्या । तथाच यत्साधनताज्ञानं कारणम्, तदिच्छापि तत्सहकारिणी, तेन पुरुषान्तरस्येच्छां स्वस्य चान्यकालिकां तामादाय नातिप्रसङ्ग इति भावः । **द्वेषस्येति ।** 'द्वेषश्च' इति पाठः । **ताद्रूप्येणेति ।** दुःखत्वेनेत्यर्थः । द्वेषे बलवत्त्वं दुर्निरूपमिति शङ्कां परिहरति—**द्वेषे बलवत्त्वमिति । तादृशद्वेषसत्त्वेपीति ।** एतदनन्तरं 'नच तत्कालीन' इत्यादिपाठः । **कल्प्यत इति ।** नन्वेवं यस्येच्छापूर्वक्षणे न कुत्रापि द्वेष आसीत्, तत्र दर्शितप्रतिबन्धकाप्रसिद्ध्या तदभावरूपकारणाप्रसिद्धिरित्यत आह—**यत्पुरुषस्येति । इच्छानुत्पादप्रयोजकस्येति ।** कारणाभावस्येति शेषः । **द्वेषविशिष्टस्येति ।** वैशिष्ट्यं स्वाधिकरणकालावच्छिन्नस्वसमवायिवृत्तित्वसम्बन्धेन बोध्यम् । तद्धर्मपदे नरकत्वादिपरे । **तत्र** अगम्यागमनादीच्छायाम् । **उक्तापत्त्यभावादिति ।** ननु तादृशद्वेषविशिष्टतादृशज्ञानाभावस्य, तादृशज्ञानविशिष्टतादृशद्वेषाभावस्य वा हेतुत्वमित्यत्र विनिगमकाभावाद्गुरुतरकार्यकारणभावद्वयापत्तिरित्याशङ्क्याह—**तद्धर्मप्रकारकद्वेषानुत्तरेति ।** 'कारणम्' इत्यस्यानन्तरम्

पदद्वये लक्षणागौरवमनुचिन्त्याह—**यद्वेति ॥**

स्वरूपेति । स्वरूपसद्विशेषणत्वं कारणतावच्छेदककोटावप्रविष्टत्वे सति विशेषणत्वम् ।



'इति निष्कर्षो बोध्यः' इति पाठः । नचैतत्पक्षे कार्यतावच्छेदकस्य दलद्वयघटितत्वेन तत्र विशेषणविशेष्यभावे विनिगमनाविरहेण प्रत्येकं कार्यकारणभावद्वयमिति कार्यकारणभावचतुष्टयापत्त्या विपरीतं गौरवमिति वाच्यम्, द्वेषानुत्तरतदुत्तरेच्छयोः कारणवैलक्षण्याधीनवैजात्यद्वयाङ्गीकारात्तत्तज्जातिरेव तत्तत्कार्यतावच्छेदिकेति लघुभूतकार्यकारणभावद्वयेनैवोपपत्तेः । अत एवाग्रे 'प्रतिबन्धकद्वय' इत्युक्तिः सङ्गच्छते । उपदर्शितपाठानादरे कारणमित्यस्याव्यवहितपूर्ववर्तीत्यर्थः । तथा चैकत्र विशिष्टाभावो विशेषणाभावप्रयुक्तः इतरत्र विशेष्याभावप्रयुक्त इति भावः । अग्रे पूर्वोक्तप्रतिबन्धकद्वयेत्यत्र द्वयत्वं विनिगमनाविरहप्रयुक्तमिति व्याख्येयम् । इत्थमप्यनुपदम् 'अत्रापि तद्धर्म' इत्यादाव 'पि' शब्दस्वारस्यभङ्गः कथं परिहरणीय इति चिन्त्यम् । **यत्र चेति ।** सुखे उत्कटत्वं नामोत्कटेच्छाविषयत्वम्, दुःखे तु तदुत्कटद्वेषविषयत्वं बोध्यम् । **सत्प्रतिपक्षस्थल इवेति ।** एकत्रोत्कटसुखदुःखजनकत्वज्ञाने जाते द्वेषस्य तत्रानुभवसिद्धत्वात्, उत्कटेच्छाविषयजनकत्वज्ञानस्य मूलादौ द्वेषं प्रति प्रतिबन्धकत्वस्यानुक्त्या द्वेषसामग्र्या निराबाधत्वाच्चात्र सत्प्रतिपक्षदृष्टान्तकथनमयुक्तमिति प्रभाकृतः । तच्चिन्त्यम्, यतस्तादृशस्थले द्वेष्मीत्यनुभवो नास्ति, यत्रास्ति तत्र फलेच्छाया नौत्कट्यम् । मूलानुक्तिवचनमपि न समञ्जसम्, 'उत्कटरागादिना नरकसाधनताधीतिरोधानात्' इति ग्रन्थव्याख्यानावसरे फले उत्कटरागसत्त्वे कर्मविशेषे तत्साधनताज्ञानसत्त्वे च तज्जन्यदुःखे उत्कटद्वेषानुदयस्य स्वयं मूलानुमतत्वस्य दर्शितत्वात् । नच दुःखे उत्कटद्वेषं प्रत्येव प्रतिबन्धकत्वं तेन लभ्यते, न तु तज्जनककर्मणि द्वेषं प्रतीति वाच्यम्, यत्र तृप्तिमरणयोरुत्कटरागद्वेषौ प्रथमं जातौ, तदुत्तरमेवान्नविशेषे तदुभयजनकत्वं गृहीतम्, तत्र फलद्वेषस्य पूर्वं जातत्वात्

**लघुभूतकार्यकारणभावद्वयेनेति ।** नच प्रतिबन्धकतावच्छेदकतया वैजात्यकल्पनं पूर्वमतेपि सम्भवति, एवञ्चैकं वैजात्यमेकश्च कार्यकारणभाव इति वाच्यम्, विनिगमनाविरहेण द्वेषे ज्ञाने च वैजात्यपुरस्कारेण प्रतिबन्धकत्वापत्त्या कार्यकारणभावद्वयापातात् । नचेदानीमपि साम्यमिति वाच्यम्, कारणयोः सहकारित्वकल्पनाप्रयुक्तगौरवस्य, विनिगमनाविरहेण पवनसंयोगविशेषादौ जातिकल्पनायाश्चापत्तेः । **कथं परिहरणीय इति ।** समुच्चयाभावादिति भावः । फलनिष्ठौत्कट्यस्याप्रसिद्धेराह—**सुखे उत्कटत्वमिति ।** इच्छायां द्वेषे चोत्कटत्वं जातिविशेषः । **दर्शितत्वादिति ।** नचोत्कटरागस्यैव द्वेषं प्रति प्रतिबन्धकत्वं मूलानुमतत्वेन दर्शितम्, न तु तद्विषयसाधनत्वज्ञानस्येति वाच्यम्, सत्यप्युत्कटरागे कर्मविशेषस्य तद्विषयसाधनत्वाग्रहदशायां फलान्तरे द्वेषोत्पत्त्या स्वविषयसाधनत्वज्ञानसहकृतोत्कटेच्छाया एव प्रति

तत्प्रतिबन्धासम्भवाद्धोजनद्वेषानुदयस्यैव वक्तव्यत्वात् । इत्थञ्चानेकद्वेषतत्प्रागभावादिकल्पनाप्रयुक्तगौरवस्यापि नावकाशः । एतदाशयेनैव मूले चिन्तामणौ च नरके बलवद्द्वेषानुदयादित्येतावन्मात्रमनुक्त्वा 'नरकसाधनताधीतिरोधानात्' इत्युक्तम् । व्याख्या तञ्च तर्कवागीशैः—'तिरोधानात् सतोपि तस्याकिञ्चित्करत्वात्' इति । तथाचात्र सत्प्रतिपक्षसाम्योक्तिर्युक्तैवेति । **नच यत्रेति ।** अत्र द्वेषसामग्र्यास्सत्त्वात् द्वितीयक्षण एव द्वेषः कुतो नेति न शङ्क्यम्, द्विष्टसाधनताज्ञानपूर्वक्षणे यत्र भाविज्ञानमप्रमेत्यप्रामाण्यग्रहः, तत्र तृतीयक्षणे एव द्वेषसम्भवात् । द्वितीयक्षणे चेष्टसाधनताज्ञानमित्याशयः । अत्र यद्यपि प्रथमं द्विष्टसाधनताज्ञानम्, ततो द्वेषः, तत इष्टसाधनताज्ञानम्, तदुत्तरक्षणेपीच्छापत्तिस्सम्भवति, तथापि तत्रेष्टसाधनताज्ञानतृतीयक्षणे इच्छोत्पत्तेस्सर्वसम्मतत्वेन क्षणविलम्बस्य चानिर्णेयत्वेन तत्र दोषो न सूपपादः । यद्वा, द्वेषस्य उत्पत्तिसम्बन्धेन प्रतिबन्धकत्वकल्पनेनापि न निस्तार इति बोधयितुं तृतीयक्षणे द्वेषोत्पत्तिस्थलपर्यन्तानुधावनम् । अत एव 'क्षणविलम्बस्य' इत्यग्रिमग्रन्थोपि सङ्गच्छते, अन्यथा क्षणद्वयविलम्बस्यापरिहार्यत्वात् । **अजनकत्वज्ञानमितीति ।** बलवद्विष्टहेतुत्वमतेः प्रतिबन्धकत्वपक्षे यो यो दोषः 'ननु बलवद्द्वेषः' इत्यादिना अनुपदं दर्शितः, सोऽत्रापि सम इत्याशङ्कापनोदनायाह—**अत्रापीति ।** अथात्र बलवदनिष्टाजनकत्वं तादृशजनकत्वात्यन्ताभावतादृशजनकभेदरूपं द्विविधम्, तद्विषयकज्ञानयोरेकमुभयं वा हेतुः, नैकम्, विनिगमकाभावात्, नोभयम्, एकसत्त्वेपि फलोदयादिति चेन्न, बलवदनिष्टजनकत्वज्ञानविरोधिज्ञानत्वेनानुगतेन कारणत्वस्वीकारात् । नचैवं बलवदनिष्टाजनकत्वव्याप्यवत्ताज्ञानादिसत्त्वेपि चिकीर्षापत्तिः, तस्यापि दर्शितविरोधित्वादिति वाच्यम्, विरोधित्वस्यात्र प्रतिबध्यत्वप्रतिबन्धकत्वोभयरूपत्वात् । अस्य

---

बन्धकत्वावश्यकत्वात् । वक्तव्यत्वादिति । तथाच तादृशस्थलानुरोधेनोपायद्वेषं प्रत्युत्कटेच्छातद्विषयसाधनत्वज्ञानयोः प्रतिबन्धकत्वं कल्पनीयम्, अन्यथा तत्र बलवद्द्विष्टसाधनताज्ञानसत्त्वेन द्वेषोत्पत्तेर्वारयितुमशक्यत्वात् । ननु जायतां तत्र द्वेषः, किं प्रतिबन्धकत्वकल्पनाप्रयुक्तगौरवेणेत्यत आह—**इत्थञ्चेति ।** उपायद्वेषं प्रत्यपि प्रतिबन्धकत्वकल्पने चेत्यर्थः । नावकाश इति । तथाच प्रतिबन्धकत्वकल्पनापेक्षया महद्गौरवमिति भावः । उत्पत्तिसम्बन्धेनेति । द्वेषस्य प्रतिबन्धकतावादिमते उत्पत्तिसम्बन्धेन प्रतिबन्धकतायां द्वेषतृतीयक्षणे इच्छोत्पत्तेर्विरोधाभावात्स्वमते यत्रेच्छा नेष्टा, तत्रैवापादनीयत्वात्तादृशस्थलपर्यन्तानुधावनमिति भावः । यद्वेति कल्पान्तरानुसरणबीजं दर्शयति—**अत एवेति । विनिगमकाभावादिति ।** इतरसत्त्वेपि प्रवृत्तेरनुभवसिद्धत्वादिति भावः । **प्रतिबध्यत्वप्रतिबन्धकत्वेति ।** प्रतिबध्यत्वमात्रोपादाने



**रसस्सूचित इति ।** सूचित इत्यनन्तरम् 'स च बलवदनिष्टानुबन्धित्वज्ञानत्वस्य हेतुतावच्छेदकत्वे' इति पाठः । **निश्चयस्यैवेच्छाप्रतिबन्धकताया इति ।** तथाच संशयसाधारणाप्रामाण्यज्ञानमात्रस्योत्तेजकत्वेन तदभावस्यैव प्रतिबन्धकाभावनिष्ठकारणतावच्छेदकत्वघटकत्वमिति भावः । **संशयस्यापि चेति ।** तथाचाप्रामाण्यनिश्चयस्यैव कारणताविघटकतया अप्रामाण्यनिश्चयाभावस्यैव कारणतावच्छेदकघटकत्वमिति भावः । **विपरीतगौरवादिति ।** ननु सिद्धान्ते बलवदनिष्टजनकत्वव्याप्यवत्ताज्ञानतदवच्छेदकधर्मदर्शनयोरपि पृथक् प्रतिबन्धकत्वकल्पनागौरवमधिकमिति चेन्न, तयोश्चिकीर्षां प्रति प्रतिबन्धकत्वे मानाभावात्, तद्वत्ताबुद्धिद्वारैव तयोः प्रतिबन्धकत्वस्य सम्प्रदायसिद्धत्वात् । नचैवं कृत्यसाध्यतानिश्चयस्य प्रतिबन्धकत्वपक्षे कृतिसाध्यत्वाभावव्याप्यज्ञानादीनां चिकीर्षाप्रतिबन्धकत्वापत्तिप्रदर्शनं पूर्वकृतं कथं घटत इति वाच्यम्, तस्याभ्युच्चयवादमात्रत्वात् । अथ तर्हि कृतिसाध्यताज्ञानस्य चिकीर्षां प्रति कारणत्वमेव न सिद्ध्येदिति चेन्न, प्रकारतासम्बन्धेनेच्छां प्रति प्रकारतासम्बन्धेन ज्ञानस्य हेतुत्वं वृष्टिपाकादीच्छास्थले सर्वत्र क्लृप्तम्, तेनैव प्रकृतेप्युपपत्तेः कृत्यसाध्यताज्ञानस्य प्रतिबन्धकत्वकल्पनस्याप्रामाणिकत्वात् । उक्तञ्च मणिकारैः—'सा च कृतिसाध्यताज्ञानसाध्या इच्छायाः स्वप्रकारकधीसाध्यत्वनियमात्' इति । अनूद्यते च वाक्यमेतत् मुक्तावलीकारैरपि प्रवर्तकज्ञानविचारावसरे गुरुपक्षोपक्षेपे । **अप्रवर्तकत्वे** प्रवृत्ति प्रत्यजनकत्वे । **अप्रामाण्यापत्तिरिति ।** कृतिसाध्यत्वविशिष्टेष्टसाधनत्वरूपविध्यर्थाभावस्य कलञ्जभक्षणे बाधादिति भावः । **फलसाधनताज्ञानमिति ।** कृतिसाध्यताविषयकमित्यादिः । **उपायेच्छा** चिकीर्षा । **एवमन्यत्रापीति ।** यत्र प्रथमक्षणे द्वेषः, द्वितीयक्षणे इष्टसाधनताज्ञानम्, तृतीयक्षणे फलेच्छा, तत्र । एवं यत्र इष्टसाधनताज्ञानद्वेषफलेच्छानां क्रमेणोत्पत्तिः, तत्र चेत्यर्थः । **द्वित्रिक्षणान्तरितेष्वपीति ।** अर्थादिच्छायाः । यथा समवायिकारणादीनां केषाञ्चिदनुभवबलात् कार्यकालेपि सत्त्वमावश्यकम्, तथा कतिपयानां प्रतिबन्धकाभावादीनां कार्यपूर्वद्वित्रिक्षणादिवृत्तित्वमपीति भावः । यत्र द्वेषोत्पत्त्यनन्तरं फलसाधनताज्ञानकृतिसाध्यताज्ञानयोः समूहालम्बनरूपत्वम्, तत्र द्विक्षणान्तरितत्वम्, यत्र क्रमिकत्वम्, तत्र त्रिक्षणान्तरितत्वमिति विवेकः । **द्वेष इति ।** द्विष्टसाधनताज्ञानस्योपलक्ष

---

सिद्धिप्रतिबध्यमनुमित्यात्मकज्ञानम्, ज्ञानविशिष्टज्ञानत्वेन या प्रतिबन्धकता तन्निरूपितप्रतिबध्यताश्रयीभूतोदासीनज्ञानं वादाय दोषवारणाय प्रतिबन्धकत्वनिवेश इति बोध्यम् ।

णमेतत्। इच्छाया अनुत्पत्तिं द्रढयितुं प्रवृत्तेरप्यनुदयप्रदर्शनम्। दर्शितानुभवस्य सविवादतामनुचिन्त्य पक्षान्तरमवलम्ब्य समादधाति—**ज्ञानयोरिति।** यदा स्वर्गनरकयोस्सुखत्वदुःखत्वधीस्समूहालम्बनरूपा उत्पन्ना, ततः स्वर्गे इच्छाया नरके द्वेषस्य च युगपदुत्पत्तेरवारणीयत्वेन नात्मविशेषगुणसामान्यस्य यौगपद्यनिषेधः, किन्तु ज्ञानयोरेव। नच ज्ञानयोरप्यस्तु यौगपद्यमिति वाच्यम्, मनसोऽणुत्वेनेन्द्रियद्वयसंयोगस्य युगपदसम्भवात्। त्वक्संयोगस्य ज्ञानसामान्यकारणताया निर्युक्तिकत्वात्। एवं समाने विषये प्रत्यक्षसामग्र्याः प्राबल्यमित्यादिरीत्या अनुभवबलात् कल्पितप्रतिबन्धकसम्भवान्न प्रत्यक्षानुमित्यादीनामपि यौगपद्यसम्भवः। यत्र तु घटचाक्षुषपटचाक्षुषादीनां सजातीयानां सामग्रीसंवलनम्, तत्र फलयोरभेद एव कल्प्यते लाघवादित्यभिप्रायात् ॥

सु—**दुःखोपायविषयकमिति।** अनेन द्वेषो द्विविधः, दुःखे ताद्रूप्येण ज्ञानात्, तदुपाये च बलवद्द्विष्टसाधनताज्ञानादिति सूचितम्। 'बलवद्विष्ट' इत्यादि वाक्यं प्रक्षिप्तम्, प्राचीनपुस्तकेष्वदर्शनात्, केनाप्यव्याख्यातत्वाच्च ॥

दि—**प्रवृत्तित्वञ्चेति।** अथैवमीश्वरकृतौ प्रवृत्तित्वालाभः, नचेष्टापत्तिः, यत्नत्रैविध्यकथनासाङ्गत्यापत्तेरिति चेन्न, जन्ययत्नस्यैवात्र विभागात्। बुद्धीच्छयोरपि गुणपरिच्छेदे तादृश्योरेव विभागदर्शनात्। नित्यज्ञाने प्रमात्वसम्भवेपि प्रमाया गुणजन्यत्वाभिधानानुरोधेन जन्यप्रमाया एव प्रक्रान्तत्वस्यावश्याभ्युपेयत्वात्। **निवृत्तित्वञ्चेति।** नचेष्टार्थे प्रवृत्तिरूपे, अनिष्टार्थे च निवृत्तिरूपे समूहालम्बनयत्ने प्रवृत्तित्वनिवृत्तित्वयोस्साङ्कर्यमिति वाच्यम्, रागद्वेषयोरयौगपद्येनैकयत्ने उभयरूपत्वासम्भवात्। यौगपद्यपक्षे तत्र यत्नद्वयस्यैव युगपदुत्पत्त्यङ्गीकारात्। युगपदुत्पन्नपरस्परविलक्षणनानाङ्गुलिचेष्टास्थले क्लृप्ता हि नानाप्रवृत्तीनां युगपदुत्पत्तिः। **साहजिकेति।** प्रवृत्तिसाध्याधिकश्वासादिव्यावृत्तये इदम्। सहज एव साहजिकः। स्वार्थे ठक्। अदृष्टविशेषजन्योदरादिचेष्टाविशेषानुमितप्राणक्रियाजनकतावच्छेदकतया सिद्धजातिविशेष एवात्र प्रवृत्तित्वादिवद्विभाजकधर्मो बोध्यः ॥

---

अनुमित्यादीति। इदञ्चोपलक्षणम्[१] मानससामग्र्यास्सर्वतो दुर्बलत्वान्न मानसचाक्षुषाद्योर्यौगपद्यमिति बोध्यम्। द्विविध इति। द्वैविध्यञ्च फलविषयकोपायविषयकभेदादिति बोध्यम् ॥

अदृष्टविशेषेति। शरीरारम्भकादृष्टेत्यर्थः ॥



मु—**चिकीर्षाभावान्न प्रवृत्तिरिति।** नचैवं चन्द्राहरणादावप्यप्रवृत्तिश्चिकीर्षाभावादेवेति कृतिसाध्यताज्ञानादेरपि प्रवृत्तिजनकत्वं न स्यादिति वाच्यम्, इष्टापत्तेः। यद्वा, परामर्शादिद्वारा व्याप्तिज्ञानादेरिवास्यापि चिकीर्षाद्वारा तत्सम्भवात्। नच बलवदनिष्टजनकत्वज्ञानाभावस्यापि तथा हेतुत्वमस्त्विति वाच्यम्, सिद्धकारणकलापसत्त्वे यत्र न कार्यम्, तत्रैव प्रतिबन्धककल्पनात् प्रवृत्तिं प्रति बलवदनिष्टजनकत्वज्ञानस्य प्रतिबन्धकत्वकल्पने प्रमाणाभावात्, चिकीर्षासत्त्वे कार्योत्पत्तेस्सर्वसम्मतत्वात्। **वदन्तीति।** बलवदनिष्टाननुबन्धित्वज्ञानस्य चिकीर्षां प्रति कारणत्वं येऽभ्युपगच्छन्ति, त इति शेषः। **कार्यताज्ञानमिति।** कृतिसाध्यत्वप्रकारकज्ञानमित्यर्थः। इदञ्च साधारणम्, तेन च ज्ञानान्तरस्य प्रवर्तकत्वव्यवच्छेदः। स्पष्टीभविष्यति चेदमनुपदमेव। **ज्ञानस्येति।** षष्ठ्यर्थनिरूपितत्वमपेक्षितपदार्थैकदेशे अपेक्षितत्वे सहकारित्वात्मके अन्वेति। **चिकीर्षातिरिक्तमिति।** उपादानप्रत्यक्षातिरिक्तम्, आत्मविशेषगुणसामान्यसामग्रीभिन्नमिति च शेषः, तेनात्मादेरपेक्षितत्वेपि न दोषः। **धीसाध्यत्वनियमादिति।** अत्र नियमघटकः इच्छात्वनिष्ठव्याप्यतावच्छेदकसम्बन्धः समवायकालिकोभयम्, तेन नेश्वरेच्छामादाय व्यभिचारः। इच्छाज्ञानयोः कार्यकारणतावच्छेदकसम्बन्धः समवायः प्रकारतावेत्यन्यदेतत्। ननु चिकीर्षायां प्रवृत्तौ च इष्टसाधनताज्ञानमेव हेतुरस्तु, न कृतिसाध्यताज्ञानमित्याक्षेपमपनुदति—**नत्विति। द्वयोरिति।** कृतिसाध्यताज्ञानेष्टसाधनताज्ञानयोरित्यर्थः। **त्वन्मतेपीति।** यथा कृतिसाध्यताज्ञानमात्रस्य कारणत्वे मन्मते इति दृष्टान्तद्योतकः 'अपि' शब्दः ॥

दि—**तथाहि पाक इति।** पाकत्वसामानाधिकरण्येनात्रानुमितिः, तेन न बाधः स्वरूपासिद्धिश्च। **मदिष्टसाधन इति।** मद्भोजनोपयोगिनीत्यर्थः। **श्रम इति।** श्रमत्वं दुःखत्वव्याप्यो जातिविशेषः। **नान्तरीयकश्रमे इति।** अनान्तरीयके बलवदनिष्टाननुबन्धित्वाभावादेव न प्रवृत्त्यापत्तिसम्भव इति नान्तरीयकेति श्रमविशेषणम्। **प्रवृत्त्यापत्तेरिति।** नच नान्तरीयकश्रमे इष्टसाधनत्वघटितलिङ्गज्ञानाधीनमत्कृतिसाध्यताज्ञानदशायां प्रवृत्तिरिष्टैवेति वाच्यम्, श्रमत्वदुःखत्वादिरूपेण

---

सिद्धान्तविरोधादाह[१]—यद्वेति। प्रवर्तकत्वव्यवच्छेदः चिकीर्षाद्वारा प्रवर्तकत्वव्यवच्छेदः, तेन न वक्ष्यमाणविरोधः ॥

श्रमदुःखादिकं नेच्छाप्रवृत्तिविषयत्वस्वरूपयोग्यमिति सिद्धान्तात् । --अथ श्रमः कृतिजन्यपाकादिक्रियाजन्यः, कृतिश्च तत्रान्यथासिद्धेति चेन्न; निगलनिश्चलदेहस्य भ्रान्त्यो चलनादौ प्रवृत्तस्य श्रमानुभवात् क्रियामद्वारीकृत्यैव कृतेः श्रमजनकत्वात्। स्पष्टञ्चेदं चिन्तामणौ । **स्वेच्छाधीनेति** । स्वपदं कृतिसाध्यपाकयागादिपरम् । नच पाकत्वादिना श्रमेपीच्छासम्भवात् श्रमेच्छाधीनकृतिसाध्यताज्ञानात्तत्र प्रवृत्त्यापत्तिस्तदवस्थेति वाच्यम्, स्वेच्छेत्यनेन स्वप्रकारकेच्छेति विवक्षणात्। स्वपदं पाकत्वादिपरम् । तथाच पाकत्वप्रकारकप्रवृत्तिं प्रति पाकत्वप्रकारकेच्छाधीनकृतिसाध्यताज्ञानं कारणमित्यादिरीत्या कार्यकारणभावात् श्रमत्वेन श्रमे प्रवृत्त्यापत्तेरसम्भवात् । पाकत्वेन विसंवादिनी प्रवृत्तिस्त्विष्टैवेति ध्येयम् । **अन्येच्छेति** । अन्योद्देश्यकेच्छेत्यर्थः । **तथापि नीलधूमादिवदिति** । व्यतिरेकदृष्टान्तोऽयम्। नीलधूमादित्यादौ यो दोषः, सोऽत्र हेत्वन्तरत्वान्नेत्यर्थः । नच, तथापि साधनत्वादित्येव विशेष्यदलमस्त्विति वाच्यम्, अधिकरणनिष्ठाभावाप्रतियोगित्वरूपसाधनत्वस्य पाकादौ साध्याधिकरणेऽप्रसिद्धे व्याप्तिग्रहासम्भवात् मदिष्टेत्यंशस्य साधनत्वघटकाधिकरणत्वविशेषणत्वावश्यकत्वात् । **द्विजातित्वे सतीति** । आलस्यादिशून्यत्वे सतीत्यस्योपलक्षणमेतत्, अन्यथा आलस्यादिनाऽकृतसन्ध्यावन्दने द्विजातौ व्यभिचारापत्तेः । **अनुमानसम्भवेपीति** । पाकयागादिपक्षकानुमानसम्भवेपीत्यर्थः । **पक्षे तद्वत्तेति** । पाकादौ प्रकृतपक्षे इच्छारूपलिङ्गवत्ताज्ञानासम्पादकत्वादित्यर्थः । लिङ्गज्ञाने निरूपितत्वसम्बन्धेन इच्छाया विषयत्व एवावगाहनादिति भावः । परम्परायास्सम्बन्धत्वानङ्गीकारेपि नात्र क्षतिरिति दर्शयति—**वस्तुत इति** । स्वविशेषणवत्तेत्यत्र मतुपस्सम्बन्धयर्थकत्वमभिप्रेत्याह—**तत्सम्बन्धज्ञानमिति** । लाघवमभिसन्धायाह—**तज्ज्ञानमेव वेति** । सत्तावत्त्वं साधर्म्यमित्यादौ यथा सत्तैव साधर्म्यमभिमतम्, न तु तत्सम्बन्धः, तथाऽत्रापीति ज्ञेयम् । **श्रमादिभिन्नत्वे सतीति** । एतद्दलाघटितं श्रमादिव्यभिचारवारकलघुविशेषणघटितं हेत्वन्तरं दर्शयति—**यद्वेति** ॥

**सु—काम्ये हीति** । काम्यत्वं नित्यत्वेनाज्ञायमानत्वम्, न तु फलजनकत्वम्, अन्यथा नित्यत्वभ्रमदशायामिष्टसाधनताज्ञानं विनापि शौचादिज्ञानजन्य

---

श्रमे कृतिसाध्यत्वाभावादेव सम्भवति प्रवृत्तिवारणे स्वेच्छाधीनत्वविशेषणं व्यर्थमित्याशयेन शङ्कते—अथेति ॥



कार्यताज्ञानात् प्रवृत्त्यनुपपत्तिः । एवं नित्यत्वमपि सफलत्वेनाज्ञायमानत्वं बोध्यम्। नित्यत्वेनाज्ञायमानत्वमित्यत्र नित्यत्वं प्रत्यवायजनकीभूताभावप्रतियोगित्वम् । एतदुत्तरं 'यागपाकादौ' इति पाठः । **ततश्च कामनानन्तरञ्च** ॥

**दि—यागपाकादीति** । 'यागपाकादिफलगोचर' इति साधुः पाठः । यागपाकादेर्यत् फलं स्वर्गभोजनादि, तद्गोचरेत्यर्थः । **विशेषवत्त्वमपीति** । 'विशेषणवत्त्वमपि' इति पाठः । **सन्ध्यावन्दन इति** । शौचादिज्ञानाभावेपीत्यादिः । तेन तत्सत्त्वे इष्टापत्तावपि न दोषः । **कृतेरपीति** । अन्यत्र कामनाया इवेति दृष्टान्तद्योतको'पि'शब्दः । अत्र तु निष्फलत्वान्न कामनायाः स्वविशेषणत्वसम्भव इति भावः। **स्वविशेषणपदेनेति** । एतदुत्तरं 'विशिष्य तत्कालीन' इत्यादिपाठः । **नियमादिघटितजन्यत्वेति** । इदमापातरमणीयम् । वस्तुतस्तु, स्वविशेषणवत्ताप्रतिसन्धानजन्येत्यत्र जन्यत्वम् एककालावच्छिन्नैकात्मवृत्तित्वसम्बन्धेन तादृशप्रतिसन्धानविशिष्टत्वमेव अन्यथा इष्टसाधनतासन्देहेपि लिङ्गान्तरात् कार्यताज्ञाने प्रवृत्त्यनुपपत्तेः । नचेष्टसाधनत्वमपि तत्र लिङ्गघटकमिति वाच्यम्, सन्दिग्धस्यानुमापकत्वासम्भवात् । कृतिसाध्येष्टसाधनत्वादिस्मृतिजन्याया बालकस्य स्तन्यपाने प्रवृत्तेरनुपपत्तेश्च । तथाचात्र प्रवृत्तिजनकतावच्छेदककोटौ गुरुभूतसम्बन्धाप्रवेशकृतं, ज्ञानत्वस्य द्वेधाऽप्रवेशकृतञ्च लाघवमनुसन्धेयम् । **अनुगतस्येति** । एतदुत्तरं 'बलवत्त्वस्य दुर्वचत्वात्' इति पाठः । **इष्टोत्पत्तिनान्तरीयकमिति** । इष्टोत्पत्तिनियतपूर्वोत्पत्तिकमित्यर्थः । अतिरिक्तमित्यधिकेत्यस्य विवरणम् । **सुखमात्रजनक इति** । इष्टपायसभोजनादिरूप इत्यर्थः । **अप्रसिद्धमिति** । ननु खण्डशः प्रसिद्ध्या श्रमात्मकज्ञानात् प्रवृत्तिरुपपन्नैवेति चेन्न, विशेषदर्शिनामपि प्रवृत्तिदर्शनात् । **नियमाप्रसिद्ध्यभावादिति** । 'नियमेनाप्रसिद्ध्यभावात्' इति पाठः । तादृशं कर्मास्ति, कष्टं कर्मेति तूत्सर्ग इत्यभ्युपगम्य समाधानान्तरं दर्शयति—**मिश्रास्त्विति** । नचैवमपि चैत्यवन्दनादौ स्वजन्येष्टाप्रसिद्ध्या प्रवृत्त्यभावप्रसङ्ग इति वाच्यम्, इष्टसाधनताश्रमवतामेव तत्र प्रवृत्तिदर्शनादिष्टे स्वजन्यत्वभ्रमेण तदुपपत्तेः । **दाराधीति** । 'दाराभि' इति पाठः । **न प्रवर्तेतेति** । नान्तरीयकश्रमे बलवद्द्वेषवतामलसानां यागादौ प्रवृत्त्यापत्तेरुपलक्षणमेतत् ।

---

इष्टसाधनतानिश्चय एव प्रवृत्तिरिति यदि ब्रूयात्तत्राह—कृतीति ।

**जातिविशेष इति** । नचोत्कटानुत्कटदुःखद्वयविषयकसमूहालम्बनद्वेषे बलवत्त्वस्यांशिक तथा कथं जातित्वमिति वाच्यम्, तत्र युगपत् क्रमेण वा द्वेषद्वयस्यैव स्वीकारात्, बलवत्त्व स्यान्यादृशस्यदुर्वचत्वात् । **अनाद्येति** । अत्र 'अनाद्यक्षणवृत्तित्वविशिष्टस्य' इति पाठः ॥

**ख़ु—नचैकमिति** । वस्तुभेदे पुरुषभेदे कालभेदे वा सिद्धमसिद्ध ञ्चेति ज्ञायत एवेत्यत उक्तम्—**एकमेकेनैकदेति** । **अविरोधादेकदेति** । एतदुत्तरं 'ज्ञानान्वयि' इति प्रक्षिप्तम् ॥

**दि—नचैकमेकेनैकदेतीति** । ननु मास्तु सिद्धत्वासिद्धत्वयोरेकदा ज्ञानम्, तथापि ज्ञाने एकस्मिन् कृतिसाध्यत्वेष्टसाधनत्वयोर्भिन्नकालिकयोर्भाने किं बाधकमित्याशङ्कां निरसितुमाह—**अव्याप्यवृत्तीति** । **सिद्धश्च पाक इति** । नन्विष्ट साधनत्वज्ञानस्य नियमेन सिद्धत्वविषयकत्वे वृष्टयादाविच्छा न स्यात्, सिद्धत्वज्ञान स्येच्छाविरोधित्वादिति चेन्न, स्वातन्त्र्येण वृष्टिर्भवत्वितीच्छाया गुरुभिरस्वीकारात्, वृष्टिसाध्यं सुखं भवत्वित्याकारकेच्छाया एवाङ्गीकारात् । स्पष्टञ्चेदं मणौ । **अननु गमादिति** । तथाच विशिष्यैव निवेशनीयतया तद्विषयकज्ञानानामपि अनुगतरूपेण हेतुत्वं न सम्भवतीति भावः । **तथा ज्ञानस्येति** । एककालीनत्वावगाहिनः कृतिसाध्यत्वविशिष्टे इष्टसाधनत्वप्रकारकस्य ज्ञानस्येत्यर्थः । **निर्विशेषितयोः** । एक कालीनत्वाविशेषितयोः । **सामान्यतः** पाकत्वादिसामान्यधर्मावच्छिन्ने । कृतिसाध्यत्व त्वादिसामान्यरूपेणेति वा तदर्थः । **सम्भवतीत्याहुरिति** । 'सम्भवतीत्याह' इति पाठः । **इदञ्च ज्ञानान्वयीति** । एकदेत्यस्य सन्निहितेन साध्यत्वसाधनत्वयोरित्य नेनान्वये पूर्वदर्शितरीत्या बाधसम्भवादिति भावः । एकदा तयोर्ज्ञानञ्च प्राभाकरै रप्यवश्यमङ्गीकार्यम्, अन्यथा प्रकृतसाध्यसाधनयोस्सहचारग्रहासम्भवादनुमितेरनुपपत्ते रिति ध्येयम् । अथैवं 'वाजपेयेन यजेत' इत्यत्र वाजमन्नम्, पेयं पानयोग्यम्, तृतीयार्थो जन्यत्वमिति वाजपेयजन्यत्वेनोपस्थितयागे इष्टसाधनत्वरूपविध्यर्थान्वये बाधात् वाजपेयशब्दस्य तन्नामके लक्षणा, अभेदस्तृतीयार्थ इति सिद्धान्तोऽसङ्गतः स्यादिति चेन्न, तत्र तादृशजन्यत्वविशिष्टे इष्टसाधनत्वबोधे प्रकारीभूतेष्टसाधनत्वे धर्मि तावच्छेदकसमानकालीनत्वमपि भासेत, तच्च बाधितमिति लक्षणाया अवश्य

---

आंशिकतया अव्याप्यवृत्तित्वेन । नच क्रमभावित्वनये पौर्वापर्ये विनिगमकाभाव इति वाच्यम्, अदृष्टविशेषस्यैव द्वेषं प्रति नियामकतया वक्ष्यमाणतया तत्परिपाकस्यैव तन्नियामकतायाः अभ्य भ्युपेयत्वात् ॥



मादरणीयत्वात् । सम्भवति विशिष्टवैशिष्ट्यबोधे वेदे तत्परित्यागानौचित्यस्य सकलवैदिक सम्प्रदायसिद्धत्वात् । विशिष्टवैशिष्ट्यबोधे च निरुक्तसमानकालीनत्वभानाभावे गन्धप्राग भाववान् घटो गन्धवानित्यस्य प्रमात्वापत्तेः । अधिकमन्यतोऽवगन्तव्यम् । **अशक्य त्वादितीति** । ननु वर्तमानयत्किञ्चित्पाकदर्शने पाकत्वसामान्यलक्षणया सर्वपाक प्रत्यक्षसम्भवादनागतपाकेपि कृतिसाध्यताज्ञाने न किमपि बाधकमित्यत आह—**सामान्यलक्षणेति** । एतदुत्तरं 'प्रत्यासत्त्यनङ्गीकारेण' इति पाठः । ननु मास्त्वनागत पाकस्येदानीं प्रत्यक्षम्, तथापि तत्र कृतिसाध्यत्वानुमितिः सम्भवेदेव, अनुमितावतीन्द्रिय विषयकत्वस्यापि स्वीकारादित्यत आह—**पक्षज्ञानाभावेनेति** । अत्रैवं प्राचीनप्राभाकराः प्रत्यवतिष्ठन्ते, यथा पर्वतीयवह्नेः पूर्वमज्ञातत्वेपि वह्नित्वेन पर्वते वह्न्यनुमितिः, तथा पाक त्वेन रूपेणानागतपाकेपि कृतिसाध्यत्वानुमितिः सम्भवत्येव, अनुमितौ पक्षसाध्ययोरप्रसि द्धावविशेषात् । यद्वा, अयं कालः पाकप्रागभाववान् सृष्टिकालत्वात् इति, अयं पाकः पाक पूर्ववर्ती पाकत्वादिति वानुमानेन भाविपाकस्य ज्ञानसम्भवः । हेतोस्सलिङ्गत्वं महाप्रलया नभ्युपगमेन सुघटमिति ॥

**ख़ु—यद्विशिष्टमिति** । 'यद्दृष्टम्' इत्यत्रत्यताळीग्रन्थपाठः । एवं कामो द्रेकादिना इत्यत्र 'कामोद्रेदादिना' इति च । **प्रतिसन्धायेति** । तथाचान्यकृत पाके कृतिसाध्यताज्ञानम्, पाके कृतिसाध्यताप्रयोजकानि यानि विशेषणानि, स्व स्मिन् तद्वत्ताप्रतिसन्धानञ्च प्रवर्तकमित्याशयः । ओदनकामस्येत्यादिषष्ठयन्तत्रयेण तानि विशेषणानि दर्शितानि । **तत्साधनताज्ञानवत इति** । बलवदनिष्टाननुबन्धित्वज्ञानवस्त्व स्योपलक्षणमेतत् । स्वेनैव लिप्यादिकल्पनमतिविरलमिति स्थलान्तरे व्यभिचारमाह—**यौवन इति** । इदमुपलक्षणम् । पाकादौ स्वकृत्यसाध्यताज्ञानेपि चैत्रादिकृतिसाध्यता ज्ञानात् प्रवृत्त्यापत्तिः । एवं पाके परकृतिसाध्यताप्रयोजकानि यानि दृष्टानि, स्वस्मिन्

---

आदरणीयत्वादिति । नचैवं 'सोमेन यजेत' इत्यत्राप्युक्तयुक्त्या कर्मनामधेयता स्यादिति वाच्यम्, तत्र द्रव्याकाङ्क्षानिवर्तकप्रमाणाभावेन सोमजन्यत्वबोधस्यैवाङ्गीकरणीयतया औत्सर्गिकस्य विशिष्टवैशिष्ट्यबोधस्य त्यागात् । अत्र तु प्रकृतिवद्विकृतिरिति न्यायेन सोमीयद्रव्या न्वयेनैव द्रव्याकाङ्क्षानिवृत्तेः । एतदनुचिन्त्यैवाधिकमन्यत इति वक्ष्यते । पक्षप्रसिद्धिमपि सम्पा दयति—यद्वेति ॥

अनिष्टापत्तिमपि दर्शयति—इदमुपलक्षणमिति ॥

तद्वत्त्वमेव स्वकृतिसाध्यतायां प्रयोजकं वक्तुमुचितम्, न तु तद्वत्ताप्रतिसन्धानम्, गौरवादिति । **दोषेति** । 'रोष' इति बहुत्र पाठः ॥

**दि—नन्विष्टसाधनताज्ञानस्येति** । इष्टसाधनत्वादिज्ञानस्येत्यर्थः । **भावियौवराज्ये** भावियौवराज्यादौ । **प्रवृत्त्यापत्तिरिति** । रोषदूषितचित्तस्य विषभक्षणे प्रवृत्त्यनुपपत्तेरुपलक्षणमिदम् । **नरकसाधनत्वज्ञानादितीति** । नरके बलवद्द्वेषाभावकाले तत्साधनताज्ञानं न प्रवृत्तिप्रतिबन्धकमित्यत आशयं स्पष्टयति—**नरकरूपेति** ॥

**मु—उत्कटरागादिनेति** । आदिना संहारेच्छापरिग्रह इति प्रभाकृतः ॥

**दि—बलवद्द्वेषानुदयादिति** । रागनिष्ठोत्कटत्वजातेरुत्कटद्वेषप्रतिबन्धकतावच्छेदकत्वादिति भावः । वस्तुतस्तु, अगम्यागमनादिजन्ये सुखे उत्कटेच्छा, नरके च तादृशो बलवद्द्वेषो भिन्नयोः पुरुषयोरेकदा, एकस्यैव कालभेदेन च सम्भवत इति तयोरदृष्टविशेष एव नियामको वाच्यः । उभयविधस्याप्यदृष्टस्य फलोन्मुखत्वे उभयमेकस्यैव भवति । परन्तु तत्र नरकसाधनताधीसत्त्वे प्रतिबन्धकसद्भावान्न प्रवृत्तिः चिकीर्षा वा पुरुषस्य जायते । यत्र तु प्रवृत्तिर्दृश्यते, तत्र नरके बलवद्द्वेषजनकादृष्टाभावप्रयुक्त एव तादृशद्वेषाभावः । इत्थञ्च न कस्यापि फलविषयकबलवद्द्वेषप्रतिबन्धकत्वकल्पनावश्यकतेत्यनुसन्धातव्यम् ॥

**मु**—कृतिसाध्यताज्ञानस्य चिकीर्षादिहेतुत्वे वृष्ट्यादौ तदनुपपत्तिरिति तटस्थशङ्कामिष्टापत्त्या परिहरति—**वृष्ट्यादौ त्विति** । तत्रेच्छायामुपपत्तिं दर्शयति—**किन्त्विति** । वृष्टिसाध्यं सुखं भवत्वित्येवेच्छाकारः, न तु वृष्टिर्भवत्वितीति वचनञ्चानुभवविरोधादश्रद्धेयमिति भावः । **न प्रवृत्तिरिति** । न प्रवृत्त्यापत्तिरित्यर्थः । नचात्मनिष्ठप्रत्यासत्त्या कार्यकारणभावे प्राणसञ्चारविषयकप्रवृत्तेरप्रसिद्धचैवापत्त्यसम्भवात् कारणकोटौ कृतेः प्रवृत्तित्वेन निवेशो नावश्यक इति वाच्यम्, लाघवेन विषयनिष्ठप्रत्यासत्त्यैव कार्यकारणभावेनापत्तेः सम्भवात् । एतदभिप्रेत्यैव यद्यपीत्याशङ्का दिनकर

---

**सम्भवत इति** । अनेकाधिकरणविशेषस्य कालविशेषस्य वा नियामकत्वकल्पनया न निर्वाह इति दर्शितम् ॥

**आत्मनिष्ठप्रत्यासत्त्येति** । समवायेन तद्विषयकप्रवृत्तिं प्रति समवायेन तद्विषयक



भट्टेन कृता । एतेन उपायेच्छासामान्यं प्रतीष्टसाधनताज्ञानस्य हेतुत्वाच्चिकीर्षाया अप्युपायेच्छात्वात्तां प्रत्यपीष्टसाधनताज्ञानस्य हेतुत्वमनिवार्यमिति तस्यां तस्याहेतुत्वं वदन् प्राभाकरः कटाक्षितः । एतेन कृतिसाध्यताज्ञानमेव चिकीर्षाद्वारा प्रवर्तकम्, तज्ज्ञानविशेष्ये च इच्छा स्वरूपसती सहकारिणी, इत्थञ्च न चैत्यवन्दनादौ प्रवृत्त्यापत्तिरिति नवीनप्राभाकरमतमपि प्रतिक्षिप्तम् ॥

**दि—प्रवृत्तित्वेन कृतेरिति** । नन्वेवं मणिकृतां कृतौ स्वेच्छाधीनत्वविशेषणदानमनुपपन्नं स्यात्, गौरवेण तथा हेतुत्वासम्भवादिति शङ्कामपनुदति—**स्वेच्छेति** । नन्वस्तु प्रवृत्तिसाध्यताज्ञानं प्रवृत्तिहेतुः, तद्व्यापारचिकीर्षायां कृतित्वेन कृतेः प्रवेशोऽस्तु, दोषाभावादिति शङ्कामपनुदति—**इत्थञ्चेति** । **तेनेति** । एतदुत्तरं 'प्रवृत्तित्वेन निवेशेन' इति ताळीग्रन्थपाठः । एवम् अतीन्द्रियतया इत्यनन्तरं 'तदुपादान' इत्यादि च । **प्राणवहेति** । 'उपादानस्य चाध्यक्षम्' इत्यत्रोपादानपदस्याधिष्ठानमित्येवार्थ इति वक्ष्यति । **घटादाविति** । घटनिष्ठभ्रमविशेष्यतायाः वस्तुतः प्राणसञ्चारावृत्तित्वात्तादृशविशेष्यतासम्बन्धेन कृतिसाध्यताज्ञानरूपकारणसत्त्वादिति भावः । **एतेनेति** । प्राणसञ्चारवृत्तिविशेष्यताया एव कारणतावच्छेदकसम्बन्धत्वाङ्गीकारेणेत्यर्थः । अत्रानायत्या इष्टापत्तिरेव, यथा चैत्यवन्दनादाविष्टसाधनताभ्रमात् प्रवृत्त्यापत्ताविप्यपि वदन्ति । 'प्राणपञ्चकसञ्चारे' इति ताळीग्रन्थपाठः । **मणिकृन्मतमपास्तमिति** । 'मणिकृन्मतेपि स्वेच्छाधीनत्वं कृतिविशेषणं प्रवृत्तिरूपकृतिलाभायैव' इति पूर्वोक्तेन विसंवदतीदमिति चिन्त्यम् । वस्तुतस्तु पूर्वोक्तमभ्युच्चयवादमात्रम् । मणौ विधिवादे 'अस्ति हि कृतिविशेषो मानसप्रत्यक्षसिद्धः' इत्यादिना प्रवृत्तित्वेन कृतिनिवेशमभिधाय पुनः श्रमे दोषवारणाय स्वेच्छाधीनत्वं कृतिविशेषणं दत्तम् । तत्तु न समञ्जसमिति बोधयतीति ज्ञेयम् । **नच सुख इति** । ननु चिकीर्षां प्रति, तद्द्वारा प्रवृत्तिं प्रति चेष्टसाधनताज्ञानस्य हेतुत्वात्तदभावादेव

---

कृतिसाध्यताज्ञानं कारणमित्यर्थः । **एतेन** चिकीर्षाया उपायेच्छात्वकथनेन । **कृतिसाध्यताज्ञानमेवेति** । एवकारेण इष्टसाधनताज्ञानस्य स्वविशेषणवत्ताप्रतिसन्धानजन्यकार्यताज्ञानस्य च हेतुत्वव्यवच्छेदः । **प्रतिक्षिप्तमिति** । चिकीर्षाया उपायेच्छात्वे तां प्रतीष्टसाधनताज्ञानस्य हेतुत्वं नवीनप्राभाकराणामप्यवर्जनीयम् । इत्थमेव चैत्यवन्दनादौ प्रवृत्त्यापत्तिवारणादिच्छायाः स्वरूपसत्या हेतुत्वकल्पनमन्याय्यमिति भावः ॥

मतान्तरमाह—**अत्रेति** । चिकीर्षात्वावच्छेदेन इष्टसाधनताज्ञानजन्यत्वमभ्युपगच्छतां

न सुखे प्रवृत्त्यापत्तिरिति चेन्न, यत्र चिकीर्षाया उपायेच्छात्वम्, तत्रैवेष्टसाधनताज्ञानस्य चिकीर्षां प्रति हेतुत्वम्। तथाच चिकीर्षायां कृतिसाध्यत्वज्ञानजन्यायां तत्तद्विशेष्यकेच्छारूपत्वमेवेष्टसाधनताज्ञानेन सम्पाद्यते। तत्तु सुखत्वप्रकारकसुखज्ञानेनापीति सुखे चिकीर्षाप्रवृत्त्योरापादयितुं शक्यत्वात्। सुखसाक्षात्कारस्यापीष्टत्वेन सुखे तत्साधनताज्ञानात् चिकीर्षाप्रवृत्त्योरापत्तिरिति परे। **साध्यताख्येति**। उद्देश्यताख्यविषयतासम्बन्धेन प्रवृत्तेः तत्रेष्टत्वादेवमुक्तम्। **फलत्वज्ञानस्येति**। फलत्वं सुखत्वं सुखदुःखाभावान्यतरत्वं वेत्यन्यदेतत्। पाकत्वादिना ज्ञाते त्विष्टापत्तिरेवेति भावः। नन्वेवं सुखेपि साध्यतासम्बन्धेन प्रवृत्तेरिष्टत्वात्सुखत्वे साध्यताख्यविषयतावच्छेदकतासम्बन्धेन प्रवृत्तिरेवापादनीया, तत्परिहाराय च प्रतिबन्धकत्वकल्पनं परमार्थतो नावश्यकम्, सहकार्यभावेनोपपत्तेरिति दर्शयति—**वस्तुतस्त्विति। तत्र तत्र व्यवस्थापितत्वादिति**। घटो घटः, दण्डवान् दण्डवान्, घटो न घट इत्याद्यनुमितिशाब्दयोर्वारणाय नानाकार्यकारणभावकल्पनापेक्षया दर्शितैककार्यकारणभाव एव कल्पनीय इति भावः। स्पष्टं चेदं व्युत्पत्तिवादे अभेदघट्टे। **एवञ्चेति**। सुखत्वान्यवृत्तिविषयतासम्बन्धेनेत्यत्र तृतीयाया अवच्छिन्नजन्यतानिरूपितत्वमर्थः, तस्य च 'तदवच्छिन्नजनकेत्यत्र जनकतायामन्वयः। 'साध्यताख्यविषयतावच्छेदकतासम्बन्धेन' इति साधुः पाठः। तृतीयार्थावच्छिन्नत्वस्य पूर्वत्र जन्यतायामन्वयः। **न तत्रेति**। एतदुत्तरं 'साध्यताख्यविषयतावच्छेदकतया' इति पाठः। वस्तुतस्त्वित्यादिकल्पे मिश्रानुमतिं दर्शयति—**एतदेवेति। मिश्रैरभिहितमिति**। 'कृतौ चानुभवसिद्धचिकीर्षाधीनत्वं विशेषः, तेन प्राणपञ्चकसञ्चारे जीवनयोनिकृतिसाध्ये न प्रवृत्तिः' इति मणिव्याख्यानावसरे कृतौ चिकीर्षाधीनत्वविशेषणवैयर्थ्यप्रतिपादनावसर इति शेषः। प्रवृत्त्ययोग्यत्वादित्यस्य प्राणसञ्चारव्यावृत्तविषयताया एव कारणतावच्छेदकप्रत्यासत्तित्वेन प्राणसञ्चारे कारणासत्त्वादित्यर्थकरणं न सम्भवति, घटादौ जीवनयोनिकृतिसाध्यताज्ञानात् प्रवृत्त्यापत्तेः पूर्वमेव दर्शितत्वात्। अतस्तद्धर्मान्येत्यादिकार्यकारणभावमभिसन्धायैव मिश्रैः प्रवृत्त्ययोग्यत्वमुक्तमिति भावः। ननु भावियौवराज्ये बालस्य प्रवृत्तिवारणाय कृतिसाध्यताघटककृतौ तत्कालीनत्वं देयमित्युक्तम्, एवमपि तत्कालीनपरकृतिसाध्यताज्ञानात् बालस्य प्रवृत्तिः स्यादिति चेन्न, कृतौ तत्पुरुषीयत्वस्यापि निवेशात्। निवेशक्रमश्च स्वसामानाधि

मतेनाह—**सुखसाक्षात्कारेति**। साक्षाद्धेतुतैव सङ्गतिः, सा च न जनकज्ञानविषये विध्यर्थे



करण्यस्वसाध्यत्वप्रकारकत्वोभयसम्बन्धेन तत्कालीनकृतिविशिष्टज्ञानं कारणमिति रीत्या। एतादृशपूर्वपक्षसमाधानद्योतनाय दिगित्युक्तम् ॥

भु—प्रवृत्तिनिरूपितहेतुत्वसङ्गत्या विध्यर्थं निरूपयति—**इत्थञ्चेति**। प्रसङ्गोऽत्र सङ्गतिरिति परे। **प्रवर्तकत्वानुरोधादिति**। विधेरित्यस्यात्रापि सम्बन्धः। **विधिः** लिङादिः। **अनुरोधात्** अन्यथानुपपत्तेः। विधिः इष्टसाधनत्वादिबोधकः प्रवृत्तिप्रयोजकपदत्वादिति न्यायमतेऽनुमानाकारो बोध्यः॥

दि—**अत्र चेति**। एतदुत्तरं 'निष्फले प्रवृत्त्यभावात्' इत्यादि पाठः। **शक्यकृतीति**। अननुगमेनेदानीन्तनत्वमन्तर्भाव्य शक्त्यसम्भवादिति भावः। **आनुमानिकमिति**। यागः स्वर्गसाधनं स्वर्गकामकर्तृकत्वात्, यत् यत्कामकर्तृकम्, तत् तत्साधनम् यथा भोजनमिति न्यायाकारः। तत्कामकर्तृकत्वञ्च तत्कामनाजन्यभ्रमाजन्यकृतिविषयत्वम्, तेन न स्वर्गकामकृतभोजनादौ व्यभिचारः। अनुमितिकारणानैयत्यमभिसन्धायाह—**मानसं वेति**। स्वर्गकामपदात् स्वर्गे समानसंवित्संवेद्यत्वेन इष्टत्वलाभात् स्वर्गात्मकेष्टसाधनत्वं यागे शाब्दानन्तरं मनसा ज्ञायत इति भावः। इदञ्च लिङादीनां शक्त्यैक्यसम्पादनाय फलानामिष्टत्वेन शक्यतावच्छेदकघटकत्वमिति प्राचीनमतानुसारेण। सर्वनामस्थलवत् इष्टतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नजनकत्वे शक्तिरेकैवेति नवीनमते स्वर्गत्वादिरूपेणैव लिङा स्वर्गादिसाधनत्वभानं शाब्दमेवेति तदर्थं नानुमानाद्यपेक्षेति वेदितव्यम्। स्पष्टञ्चेदं लिङाद्यर्थविचारे व्युत्पत्तिवादे। **अनुमानादिति**। यागादिः इदानीन्तनमत्कृतिसाध्यः इदानीमुपकरणादिसमवहितत्वादित्यनुमानाकारः। अनुमानादिति मानसस्योपलक्षणम्। अत्र स्वमातकल्पितत्वशङ्कामपाकरोति—**अत एवोक्त**

सम्भवतीति मन्वानान् प्रत्याह—**प्रसङ्गोऽत्रेति**। **प्रवृत्तीति**। प्रवृत्तिप्रयोजकत्वञ्च प्रवृत्तिजनकज्ञानविषयार्थस्मारकत्वम्, तच्चानुभवस्य शक्तेश्चास्तीति पदत्वनिवेशः। व्याप्तिश्च व्यतिरेकतो बोध्या॥

**इष्टतावच्छेदकत्वोपलक्षितेति**। समभिव्याहृतपदोपस्थाप्यकामनाविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नेत्यर्थः। अत ओदनकामः पचेतेत्यादितः शक्तिभ्रमशून्यस्य न स्वर्गसाधनत्वप्रतीत्यापत्तिः। उपकरणादीत्यादिना तत्तत्कर्मकरणसामर्थ्यादिपरिग्रहः। **अनुमानाकार इति**। अत्र यो यत्पुरुषीययत्कालवृत्तित्वोपकरणादिकः, स तत्पुरुषीयतत्कालीनकृतिसाध्यः यथा भोजनादिरिति सामान्यमुखी व्याप्तिः। प्रयाजादिकं कर्मविशेषः, इतिकर्तव्यता अङ्गम्।

मिति । विधिजन्यज्ञानं शाब्दबोधः । तज्जन्यज्ञानमिदानीन्तनत्वविषयकमिष्टसाधनताज्ञानमनुमित्यात्मकं मानसं वा । अनुमितौ शाब्दस्य जनकत्वं विशेषणज्ञानविधया, मानसे तु ज्ञानलक्षणाविधयापि । **शब्दसमवेत इति ।** समवायमङ्गीकृत्यैवमुक्तम् । भाट्टमते गुणगुणिनोरिव धर्मधर्मिणोस्तादात्म्यमेव सम्बन्ध इति ज्ञेयम् । **विधिस्थल इति ।** वैदिकविधिस्थल इत्यर्थः । तेन यत्राचार्यादिना त्वमिदं कुर्या इत्याद्युक्तम्, तत्र आप्ताभिप्राय एव विध्यर्थः । तस्य च धात्वर्थेऽन्वय इति तत्राभिधाबोधाभावेपि न क्षतिः । **लिङ्त्वांशेनोच्यत इति ।** लिङ्त्वावच्छिन्नशक्ततानिरूपितशक्त्यनुयोगिनीत्यर्थः । लिङ्त्वं लोट्त्वादेरुपलक्षकम् । **तदुक्तमिति ॥** भावनाद्वैविध्यं तच्छक्तशक्यतावच्छेदकवैलक्षण्यञ्चोक्तमित्यर्थः । 'अभिधाभावनामाहुः' इत्यादिपाठः । **अन्याम्** अर्थभावनाभिन्नाम् । **आत्मा वेति ।** वाकारश्चार्थे । अर्थात्मभावनेत्यत्रात्मशब्दः गोचरे आश्रिते च लाक्षणिक इति दर्शयति—**अर्थात्मकत्वश्चेति । अर्थभावना भाव्येति ।** प्रवृत्त्यर्थमेव लिङादिप्रयोगादिति भावः । **भाव्या** फलम् । **अर्थभावनायाश्चेति ।** फलं स्वर्गादीत्यनन्तरं करणं यागः, प्रयाजादिकमितिकर्तव्यतेति पूरणीयम् । नच यागस्यार्थभावनात्मककृतिजन्यत्वमेवेति कथं तस्य तत्र करणत्वमिति शङ्क्यम्, भावनाधीनस्वर्गादिकरणत्वात्तथा व्यपदेशात् । **तदुक्तमिति ।** शब्दभावनाया अंशत्रयमुक्तमित्यर्थः । **स्तुतिरुत्तेजयतीति ।** फले उत्कटरागं जनयित्वा श्रमादौ बलवद्द्वेषं निरस्य चिकीर्षया योजयतीत्यर्थः । **वदन्तीति ।** अर्थभावनामुख्यविशेष्यक एव सर्वत्र शाब्दबोधः । तत्रैव पदान्तराणामर्थास्तात्पर्यविषयतत्तत्सम्बन्धेनान्वियन्ति । अर्थवादवाक्येन लक्षितप्राशस्त्यादेरपि तत्रैवान्वय इत्यादिकं भाट्टरहस्यादिग्रन्थतोऽवगन्तव्यम् । **अन्यत्रेति ।** परप्रेरणाधीनायाम् । **अतिरिक्तेति ।** इष्टसाधनत्वादतिरिक्तेत्यर्थः । आचार्यप्रेरणायाश्शब्दप्रयोगद्वारा इष्टसाधनत्वादिज्ञानसम्पादकतया 'आचार्यप्रेरणया' इत्यादिव्यवहारोपपत्तिरिति बोध्यम् । **अत एवेति ।** क्लृप्तेनैव निर्वाहादित्यर्थः । नन्विष्टसाधनताज्ञानत्वेन प्रवृत्तित्वेन न सामान्यतः कार्यकारणभावः, किन्तु तत्तद्धर्मप्रकारकप्रवृत्तिं प्रति तत्तद्धर्मावच्छिन्नविशेष्यकेष्टसाधनत्वादिज्ञानत्वेन, अन्यथा पाके इष्टसाधनत्वज्ञानेन यागे प्रवृत्त्यापत्तेः ।

---

**सर्वत्रेति ।** विधिस्थले सर्वत्रेत्यर्थः । **प्राशस्त्यादेरिति ।** आदिना अप्राशस्त्यपरिग्रहः । **इत्यादिकमिति ।** आदिना शाब्दभावनायास्तत्करणादीनां च तत्रैवान्वय इत्यस्य संग्रहः ॥



इत्थञ्च यागत्वादिप्रकारकप्रवृत्तौ यागत्वावच्छिन्नविशेष्यकज्ञानत्वेनैव हेतुत्वं युक्तम्, गुरुभूतसाधनत्वाघटनेन लाघवादित्यत आह—**शब्दशक्तीति । मानाभावाच्चेति ।** इदमत्राकूतम्—निषेधाप्रतिपादको वेदः प्रवर्तकज्ञानविषयवाचकपदघटितः प्रवृत्तिप्रयोजकबोधजनकशब्दत्वादित्यनुमानमेव भाट्टानामभिधास्वीकारे प्रमाणं वक्तव्यम् । तत्र च यागः इष्टसाधनमिति वेदाजन्यज्ञानवतोऽपि प्रवृत्तिदर्शनात् प्रवर्तकज्ञानविषयत्वेन क्लृप्तेष्टसाधनत्वादिवाचकत्वेनोपपत्तौ न पदार्थान्तरसिद्धिरिति । नन्वभिधायां मानाभावोक्तिरसङ्गता, त्वयापि तस्याः स्वीकृतत्वादिति शङ्कां परिहर्तुमभिधां विशिनष्टि—**शब्दशक्तिभिन्नायामिति ।** साधुपदानामर्थबोधौपयिकशक्तिरेव मया अभिधेत्युच्यते, सा च सर्वतान्त्रिकसिद्धा, तद्भिन्नायां लिङाद्यर्थरूपायामभिधायां मानाभाव एवेति भावः । उक्तार्थे मीमांसकशिरोमणेः सम्मतिं दर्शयति—**अत एवेति ।** अथेष्टोत्पत्तेः प्रवृत्तिहेतुत्वस्य केनाप्यनङ्गीकारात् 'इष्टानुत्पत्तेः प्रवृत्तिः कथम्' इत्याक्षेपो न समञ्जस इत्यतो भावमाविष्करोति—**ननु नित्य इत्यादिना ॥**

**सु—प्रत्यवायाभावो वेति ।** मतान्तरानुसारेणायं विकल्पः । स्पष्टी भविष्यति चेदमुपरिष्टात् ॥

**दि—एकवाक्यताबलेनेति ।** तदुत्थाप्याकाङ्क्षानिवर्तकत्वं तदेकवाक्यत्वम् । 'सन्ध्यामुपासीत' इति विधिवाक्योत्थापितफलाकाङ्क्षानिवर्तकत्वाद्दर्शितश्रुतिस्मृत्योरेकवाक्यत्वम्, तद्बलेन तदन्यथानुपपत्त्या । अनेनार्थवादनैरपेक्ष्येण प्रथमप्रवृत्तात् 'अहरहः' इत्यादिविधितः शौचादिविशिष्टजीविमात्रकर्तव्यत्वप्रतीतेस्तद्विरोधेन नार्थवादिकफलकत्वसम्भव इत्याक्षेपो निरस्तः, एकवाक्यत्वेन नैरपेक्ष्याभावात् । नच स्तुतिपरतयैवार्थवादानामेकवाक्यत्वोपपत्तिरिति वाच्यम्, सम्भवति स्वार्थपरत्वे तत्परित्यागानौचित्यात् । **तत्कालजीविफलकामस्येति ।** तत्कालजीवित्वं फलकामना च मिलित्वाधिकार इत्यर्थः । **अकरणापत्तेरितीति ।** अत्रेष्टापत्तिसम्भवादभिप्रायं स्पष्टयति—**अकरण इति ।** आपादकं दर्शयति—**कामनारूपेति । अर्थवादतयेति ।** स्वार्थे तात्पर्यासम्भवेनेत्यर्थः । **कल्प्यत इति ।** वेदत्वेन

---

**मतान्तरानुसारेणेति ।** न तु पूर्वकल्पे अस्वरसेनेत्यर्थः ॥

**वेदत्वेनेति ।** प्रमाणान्तराप्रमितप्रयोजनवदर्थज्ञानोद्देशेन कृत्स्नस्यापि वेदस्याध्ययनं विनियुज्यत इति सार्थकत्वावश्यम्भावादिति भावः ॥

सार्थकत्वावश्यम्भावादिति भावः । तथाच मुक्तावल्याम् अर्थवादमात्रमित्यस्य अर्थवादतया कल्प्यमानतात्पर्यकस्तुतिमात्रमित्यर्थोऽवसेयः ॥

**सु—त्रिकालस्तवपाठादाविवेति ।** शुद्धकाम्ये त्रिकालस्तवपाठादावननुभूयमानापि फलकामना यथा त्वयावश्यं प्रवृत्त्यर्थं कल्प्यते, तथा मया सन्ध्योपासनादिस्थलेपि कल्प्यत इत्यर्थः ॥

**दि—**ननु त्रिकालस्तवपाठदृष्टान्तो विषमः, अकरणे प्रत्यवायाभावात् कामनाया एव तत्र प्रवृत्तिप्रयोजकत्वात्, सन्ध्योपासनादेस्तु नित्यस्याकरणे प्रत्यवायमनुचिन्त्य कदाचित् कामनाशून्या अपि प्रवर्तन्त इति नात्र कामनानैयत्यमिति यदि ब्रूयात्तदापि कामनारूपाधिकारशून्यस्य सन्ध्योपासनाद्यकरणे प्रत्यवायोत्पत्तेरुपपत्तिं दर्शयति—**इदमुपलक्षणमिति । अकुर्वन्निति ।** 'अकुर्वन् विहितं कर्म नरो भवति किल्बिषी' इति याज्ञवल्क्यस्मृत्येत्यर्थः । **कामनासंवलितस्य** कामनाविशिष्टस्य । **अधिकारत्वम्** फलसम्बन्धप्रयोजकत्वम् । अधिकारयोस्संवलनं प्रत्येकमधिकारत्ववतोः केषुचित् पुरुषेषु मेलनम् । ब्रह्मलोकावाप्तिरूपफलं प्रति उभयोः सहकारित्वम्, एकतराभावे ब्रह्मलोकावाप्त्यजननादिति बोध्यम् । नन्वेवं प्रत्येकमधिकारत्वे शौचादिविरहेपि कामनावतोऽकरणे प्रत्यवायापत्तिरित्यत आह—**कामनाया अधिकारत्वेऽपीति । न कल्प्यत इति ।** कामनायास्स्वविषयब्रह्मलोकप्राप्त्यादिकं प्रति प्रयोजकत्वेऽपि शुचित्वादिरूपाधिकारान्तरशून्यस्याकरणे प्रत्यवायजनकत्वं न सिद्ध्यति, तद्बोधकवचनाभावादित्यर्थः । नच 'अकुर्वन् विहितं कर्म' इत्यादिकमेव तद्बोधकमिति वाच्यम्, 'शुचिः कर्म कुर्वीत' इति श्रुत्या शुचिस्सन्नकुर्वन्नित्यर्थकताया दर्शितस्मृतेः स्वीकारात् । नच 'शुचिर्वाप्यशुचिर्वापि काले सन्ध्यां समाचरेत्' इति वचनात् शुचित्वस्य कथमधिकारत्वमिति वाच्यम्, दर्शितश्रुतिविरोधेन स्मृतिवचनस्यास्य कालस्तुतिमात्रपरत्वेन शौचस्याधिकारत्वे बाधकाभावात् । संवलिताधिकारपक्षेऽप्युपपत्तिं दर्शयति—**शुचीति । प्रत्यवायजनकत्वं कल्प्यत इति ।** वचनानुरोधित्वात् कल्पनाया इति भावः । वचनञ्च 'निद्रया कुलहैर्नृत्यैरनाश्वासैश्च साम्प्रतम् । त्यक्तवैदिककर्माणो घोरं नरकमाप्नुयुः ॥' इति । 'कल्प्यते' इत्यनन्तरं 'तेन

---

**अनाश्वासैश्चेति ।** आश्वासः कर्मणि विश्वासः । **साम्प्रतम्** विहितकाले ।



संवलिताधिकारत्वेपि क्षतिविरहश्च' इति पाठः साधीयान् । संवलिताधिकारपक्षे विनिगमनाविरहेण गुरुभूतप्रयोज्यप्रयोजकभावद्वयापातात् संवलनपक्ष एव ज्यायानिति बोध्यम् । अधिकं गदाधरभट्टकृतविधिवादादितोऽवगन्तव्यम् । 'एतेन' इत्यनन्तरं 'तत्र नियमेन' इत्यादिपाठः । **काम्यत्वं कल्पनीयमिति ।** तत्कल्पनाधीनस्य कामनासद्भावस्य, अधिकारैकदेशवतोप्यकरणे प्रत्यवायस्य च कल्पनाया उपलक्षणमेतत् ॥

**सु—वेदबोधितेति ।** कार्यतायामेतद्विशेषणेन कार्यताज्ञाने अप्रामाण्यशङ्काविरहः सूचितः । कार्यताज्ञानञ्चात्र शौचादिस्वविशेषणवत्ताप्रतिसन्धानजन्यमित्यादिकं पूर्वोक्तमनुसन्धातव्यम् ॥

**दि—**ननु रासभाभावेपि घटवदिष्टसाधनताज्ञानाभावेपि प्रवृत्तिः कुतो नेत्याक्षेपं भाववर्णनेन परिहरति—**अन्वयेति ।** ननु नित्येतरस्थलीयप्रवृत्तिं प्रत्येवेष्टसाधनताज्ञानं प्रयोजकमिति तु न सम्यक्, गौरवपराहतत्वादित्यत्रोदयनाचार्यान् प्रमाणयन्नाह—**अत एवेति । गुरु** गौरवग्रस्तम् । **गुरोः** आप्तस्योपदेष्टुः । तथा च गुरुमतमिति व्यवहारो न षष्ठीतत्पुरुषमाश्रित्य, किन्तु कर्मधारयमिति भावः । ननु पण्डापूर्वस्य फलत्वोक्तिरसङ्गता, सुखदुःखाभावान्यतरत्वाभावादिति शङ्कां निराकरोति—**स्वतः प्रयोजनमिति ।** सुखादिवत् अन्येच्छानधीनमस्यापि फलत्वमव्याहतमित्यभिमानः । **इति प्राभाकरमतमिति ।** तेषामयमाशयः—यथा यजेतेत्यादौ काम्ये लिङा कार्यत्वेनापूर्वमेव बोध्यते, तथा सन्ध्यामुपासीतेत्यादावपि नित्ये लिङापूर्वमेव बोध्यते । परन्तु तस्य निष्फलत्वात् पण्डापूर्वमिति तद्व्यवह्रियत इति ॥

**सु—**अथ सुखादिवत् पण्डापूर्वेपि कामना स्वीक्रियते, नवा, उभयथापि न पण्डापूर्वे प्रमाणमिति दर्शयति—**तदपि नेत्यादिना ॥**

**दि—रात्रिसत्रन्यायादितीति ।** एतदुत्तरं 'तथा हि' इत्यादि पाठः । **वाक्योत्पन्नकर्मणामिति ।** स्वरूपमात्रप्रतिपादकवाक्येन विहितकर्मणामित्यर्थः । उत्पत्तिविध्यादिभेदेन विधेश्चातुर्विध्यम्, तत्स्वरूपञ्च प्रभातोऽवगन्तव्यम् ।

---

**साधीयानिति ।** मुद्रितपाठे नञोऽनन्वयित्वात्, 'प्रत्यवायजनकत्वमेव' इति प्रथमान्ततया पूर्वपाठेन पञ्चम्यन्तस्यासाङ्गत्याच्चेति भावः ॥

**सिद्धान्तितमिति ।** अत्र विधिवाक्ये फलाश्रवणादर्थवादेन 'प्रतिष्ठाकामा एताभिरुपेयुः' इति विधिवाक्यं कल्पयित्वा तत एव फलबोधनं सिद्धान्तितमिति भावः ॥

**मु—अनुत्पत्तिं प्रत्यवायस्येति ।** नित्यकर्मफलमिति शेषः । **अन्ये मन्यन्त इति ।** अयमेषामाशयः—नित्ये यत्रार्थवादिकं ब्रह्मलोकावाप्त्यादिफलं न श्रूयते, तत्र प्रवृत्त्युपपत्तये प्रत्यवायप्रागभाव एव फलतया वक्तव्यः, "अकुर्वन् विहितम्" इत्यादिना अकरणे प्रत्यवायस्य बोधितत्वात् । एवञ्च सर्वत्र नित्येषु प्रत्यवायाभावफलकत्वेनैवोपपत्तौ तद्विशेषेषु ब्रह्मलोकावाप्त्यादीनां फलत्वकल्पनं नावश्यकम् । तद्बोधकार्थवादानाञ्च स्तुतिमात्रपरत्वमिति । सिद्धान्तं दर्शयति—**एवमिति । एवम्** प्रवृत्त्युपपत्तये फलकल्पनाया आवश्यकत्वे । 'संशितव्रताः' इति पाठः साधुः । **प्रीत्यात्मकमिति ।** एतत्स्थाने 'वचनेन ब्रह्मलोकादिकम्' इति ताळीग्रन्थपाठः । स स्वारसिकः, प्रथमं ब्रह्मलोकस्यैव फलतया अर्थवादे श्रुतत्वात् । आदिना प्रीतेर्ग्रहणम् । 'दद्यात्' इत्याद्यर्थवादप्रदर्शनञ्च तदंशे विचारान्तरोत्थापनेन शिष्यबुद्धिवैशद्याय । विचारश्च 'नच पितृप्रीतिः' इत्यादिना करिष्यते । नन्वेवमपि यत्रार्थवादिकं फलं न श्रूयते, तत्र प्रत्यवायाभाव एव फलं कल्पनीयमिति चेन्न, तत्र विश्वजिन्न्यायात् स्वर्गस्यैव फलतया सिद्धेः । वक्ष्यति चानुपदमेव 'यावन्नित्यनैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गजनकत्वात्' इति । उक्तञ्च मीमांसकाचार्यैः—'विधिस्सामान्यरूपेण सर्वेषां हि प्रवर्तकः । स्वर्गश्चाभ्यर्थितस्सर्वैरिति तादर्थ्यनिश्चयः' इति । नचात्र विनिगमनाविरहः शङ्क्यः, प्रागभावस्याजन्यत्वेन साक्षात् फलत्वासम्भवात् । अधिकमग्रे स्पष्टीभविष्यति । **उत्सर्ग इति ।** बाधसहितः सामान्यन्याय उत्सर्गः ॥

**दि—**ननु 'यदपि पण्डापूर्वं फलमिति, तदपि न' इत्यनेन पण्डापूर्वस्य निरस्तत्वात् 'पण्डापूर्वार्थं प्रवृत्तिश्च न सम्भवति' इतीदानीमुक्तिः कथं घटत इत्याक्षेपं मनसिकृत्याक्षेप्तुराशयं स्फुटयति—**पण्डापूर्वस्वीकारेपीति ।** नित्ये तत्र तत्र भिन्नभिन्नरूपफलकल्पनापेक्षया लाघवादेकरूपापूर्वस्य फलत्वकल्पनं ज्याय इत्यभिसन्धाय तत्स्वीकारेपीति भावः । **त्वन्मतेपीति ।** प्राचीननैयायिकमतेपीत्यर्थः । प्राचीनमतमेतदिति तर्कवागीशाः । नवीनमतमिति प्रभाकृतः । ब्रह्मलोकादीनां फलत्वमिति सिद्धान्ते तु नेयमापत्तिरिति सुबोधम् ॥

---

**संशितव्रता इति ।** अप्रतिहतनियमा इत्यर्थः ॥



**मु—**ननु क्षेमसाधारणकारणत्वज्ञानस्य प्रवृत्तिहेतुत्वमप्रामाणिकम्, अतः पण्डापूर्वमेव फलं वाच्यमिति प्राभाकराक्षेपं निरसितुं स्थलविशेषे तस्यावश्यकतां दर्शयति—**एवमेवेति ।** नच 'प्रायश्चित्तादिनाश्योऽसौ' इति वक्ष्यमाणरीत्या पापनाश एव तस्य फलमिति वाच्यम्, पापनाशस्य स्वतः पुरुषार्थत्वाभावात् दुःखप्रागभावपालकत्वरूपक्षेमसाधारणेष्टसाधनत्वज्ञानेनैव पापध्वंसस्यापि प्रवृत्त्युद्देश्यत्वस्यावश्यं वाच्यत्वात्, प्रायश्चित्तविशेषे कर्मविपाकनाम्नि पापध्वंसस्यासम्भवाच्च । तत्रादृष्टस्य प्रारब्धत्वेन भोगस्यैव नाशकत्वस्वीकारात् । नच भोगावश्यम्भावे कर्मविपाकवैयर्थ्यमिति चेन्न, तज्जन्मनि तेन दुःखानुत्पादस्य स्वीकारात् । एवञ्च यावन्मुमुक्षोदयं प्रतिजन्म कर्मविपाककरणेन दुःखानुत्पादं सम्पाद्य जातायां तस्यामुत्कटायां दुःखे बलवद्द्वेषानुदयेन प्रायश्चित्तमकृत्वा प्रारब्धं तदनुभूय पुमान् मुक्तो भवतीति ज्ञेयम् । इदमत्र तत्त्वम्—नित्यकर्मणां ब्रह्मलोकावाप्त्यादि फलमिति वदतां मतेपि प्रायश्चित्ते प्रवृत्तिः यद्यपि क्षेमसाधारणकारणताज्ञानेनेत्यवश्यमभ्युपेयम्, तथापि यत्र गत्यन्तरं विद्यते, तत्र मुख्यसाधनताज्ञानस्यैव हेतुताया युक्तत्वादार्थवादिकादिफलकल्पनमेव ज्याय इति तदाशय इति ॥

**दि—प्रवृत्तिरित्यर्थ इति ।** 'कथं प्रवृत्तिरित्यर्थः' इति पाठः । **प्रतियोगिविकल्पग्रासेनेति ।** प्रतियोगिनः सत्त्वासत्त्वरूपविरुद्धकल्पाधीनस्वसत्त्वासत्त्वकत्वेनेत्यर्थः । यदि प्रतियोगी नास्ति, तदा तत्प्रागभावोपि नास्ति, मानाभावात् । यद्यस्ति, तदा प्रकृते प्रतियोगिनो दुःखरूपत्वात् द्वेषावश्यम्भावेन तज्जनके प्रागभावे द्विष्टसाधनताज्ञानोदयादिच्छानुत्पत्त्या न फलत्वसम्भव इति भावः । **बाधकाभावादिति ।** कथं विध्यर्थान्वय इत्याक्षेपोऽसङ्गत इति शेषः । 'विध्यर्थे कथं नञर्थान्वयः' इत्यत्र सप्तम्या विशेष्यत्वार्थकत्वभ्रमं वारयति—**विध्यर्थनञर्थयोरिति ।** तथाच विषयत्वमेवात्र तदर्थ इति भावः । सा च विषयता प्रकारतारूपैवेति बोधयति—**विध्यर्थेष्टसाधनत्वेति ।** नन्विष्टसाधनत्वाभाव इति बोधेपि बाधकाभावात्

---

**प्रायश्चित्तेति ।** 'प्रायः पापं विजानीयात् चित्तं तस्य विशोधनम्' इति स्मृत्या पापनाशककर्मणि योगरूढः प्रायश्चित्तशब्दः । क्षेमसाधारणकारणताज्ञानस्य प्रवृत्तिं प्रति हेतुताया अङ्गीकर्तव्यत्वे नित्यकर्मणां प्रत्यवायानुत्पत्तिं परिहृत्यार्थवादिकब्रह्मलोकावाप्त्यादेः फलत्वाङ्गीकारोऽनुचित इत्याक्षेपं परिहरतिइ—दमत्र तत्त्वमिति ॥

'कथमन्वयः' इत्यनुपपन्नमिति शङ्कां विवक्षितार्थप्रदर्शनेन परिहरति—**नञर्थस्याभावस्येत्यादिना।** चैत्रो न पचतीत्यादौ प्रत्ययार्थस्य कृत्यादेर्नञर्थाभाव इवात्रापि लिङर्थेष्टसाधनत्वस्य तत्र भानमित्याशयः। यद्यपि घटो नास्तीत्यादौ यथा घटाभावे अस्तित्वाश्रयत्वबोधः, तथेहापि कलञ्जभक्षणाभावे इष्टसाधनत्वबोध एवेति नानुपपत्तिः, तथापि कृतिसाध्यत्वस्याभावे बाधादनुपपत्तितादवस्थ्यम्॥

**मु—न विध्यर्थ इति।** न विधिजन्यशाब्दबोधविषय इत्यर्थः॥

**दि—**ननु बलवदनिष्टाननुबन्धित्वमात्रं विध्यर्थ इत्युक्तिरसङ्गता, विशिष्टशक्तिस्थले विशेषणानामपि सर्वेषां शाब्दे भाननियमात्, अन्यथा पशु,समवायादिपदाद्विना लक्षणां केवलमृग,सम्बन्धादिबोधापत्तेः, अतो भावमाह—**विधेरिति। क्वचित् कस्यचिदिति।** तत्तद्भाने तात्पर्यमेव नियामकमिति वक्ष्यति—**अभिप्रायवानिति।** अत्रास्वरसोऽनुपदमेव स्पष्टीभविष्यति॥

• **मु—विशेषणाभावे विश्राम्यतीति।** विशेषणाभावमनुमापयतीत्यर्थः। दिनकरीये 'पर्यवस्यति' इत्यस्याप्ययमेवार्थः। विशिष्टाभावो विशेषणाभावविशेष्याभावाभ्यान्नातिरिच्यत इति मते यतो विशेष्यवन्निष्ठविशिष्टाभावरूपः, अतो विशेषणाभावे विश्राम्यति विशेषणाभावतादात्म्यापन्नो भवतीत्यर्थोऽवसेयः॥

**दि—कर्मनामधेयमिति।** एतत्पूर्वं 'श्येनेति' इति पाठः। वैरिमारणमित्यत्र 'वैरिमरणम्' इति च। अर्थपदस्य शक्ये रूढत्वात्तत्र च बाधाभावात् 'कथम्'

---

**इष्टसाधनत्वस्येति।** नच प्रत्ययानामित्यादिव्युत्पत्तिविरोधः, 'नामूढस्येतरोत्पत्तेः' इत्याद्यनुरोधेन तत्सङ्कोचस्यावश्यकत्वात्। **घटाभावे अस्तित्वाश्रयत्वबोध इति।** नचात्रापि घटे अस्तित्वाश्रयत्वाभावबोध एवेति वाच्यम्, तात्पर्यविशेषसत्त्वे घटाभावविशेष्यकबोधस्याप्यानुभाविकत्वात्, बोधविशेषे च तात्पर्यस्यैव नियामकत्वात्। प्रवर्तकत्वानुरोधेन विधेरिष्टसाधनत्वादावेव शक्तेरभ्युपगतत्वान्न विध्यर्थ इत्यसङ्गतमतो व्याचष्टे—**न विधिजन्येति॥**

**केवलेति।** लोम,नित्यत्वाद्यविशेषितेत्यर्थः। **मृगेति।** लाङ्गूलवदित्यर्थः। एकत्र शक्यतावच्छेदकतावच्छेदकाविषयकबोधः, अपरत्र शक्यतावच्छेदकैकदेशपरित्यागेन बोधश्चापादित इति विशेषः। **अनुमापयतीत्यर्थ इति।** कलञ्जभक्षणादिः बलवदनिष्टानुबन्धी इष्टसाधनत्वे सति बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वाभावादित्यनुमानाकारः॥

तत्र च बलवदनिष्टाननुबन्धित्वस्य शक्यत्वे च।



इत्याक्षेपोऽनुचित इत्यतोऽत्रार्थपदस्य विवक्षितमर्थं प्रकटयति—**विधिजन्येति।** **हिंसेति।** वेदविधिबोधितहिंसेत्यर्थः। 'अभिचारमहीनम्' इत्यादि मनुवचनम्। अहीनमिति अहर्गणसाध्यसुत्याके कर्मणि रूढम्। 'नच मरणानुकूल' इत्याद्याक्षेपस्य प्रकृतोपयोगं दर्शयति—**साक्षान्मरणेति॥**

**मु—हिंसकत्वापत्तिरिति।** खड्गाभिघातेन कूपपातेन च कस्यचिन्मृतिसम्भवे इत्याशयः। **आत्मवधत्वेति।** 'आत्महन्तृत्वे' इति च पाठो दृश्यते। स ऋजुः। **मरणोद्देश्यकत्वस्यापीति।** खड्गकारस्य धनं, कूपकर्तुः पुण्यं, भुञ्जानस्य च तृप्तिरुद्देश्यमिति न तद्व्यापारस्य मरणोद्देश्यकत्वमिति भावः। **वाचनिकमिति।** वचनान्तरबोधितमित्यर्थः। तथाच तन्निषेधविषयहिंसात्वे मरणोद्देश्यकत्वनिवेशेऽपि न क्षतिरिति भावः। **साक्षान्मरणजनकस्येति।** मरणाव्यवहितपूर्वक्षणवृत्तित्वादिविशिष्टस्येत्यर्थः। **खड्गाघातेनेति।** 'खड्गाभिघातेन' इति दिनकरभट्टसम्मतः पाठः। अत एव 'तस्य' इत्यस्य 'खड्गाभिघातादेः' इति व्याख्यानम्। एवमुत्तरत्रापि बोध्यम्। दिनकरीयेऽप्युपरि खड्गाघातेनेत्यादौ अभिसमभिव्याहारेण पठनीयम्। तस्य चेति चकारोऽवधारणे॥

**दि—निषेधविधेरितीति।** इतिः प्रक्षिप्तः। **सर्वोपीति।** 'सर्वोऽपि व्यापारः' इति पाठः। **हिंसात्वानुपपत्तिरिति।** खड्गाभिघातस्येत्यादिः। **व्यापारेण व्यवधानासम्भवादिति।** व्यापारेण व्यवधानस्य कारणताविघटकत्वासम्भवादित्यर्थः, कारणत्वस्य कार्यनियताव्यवहितपूर्ववर्तिस्वस्वव्यापारान्यतरत्वरूपत्वात्, अन्यथा यागादेरपि स्वर्गकारणत्वस्य बाधापत्तेरिति भावः। 'व्यापारेण व्यापारिणोऽन्यथा सिद्ध्यसम्भवात्' इति ताळीग्रन्थपाठः। स त्वृजुरेव। **प्रत्यभिचारेणेति।** तस्य श्येनजन्यापूर्वनाशकत्वं वा, तज्जन्यापूर्वस्य खड्गाभिघाते प्रतिबन्धकत्वं वा, परामर्शनिष्ठानुमितिकारणतायामप्रामाण्यज्ञानाभावस्येव श्येननिष्ठकारणतायां प्रत्यभिचारजन्यापूर्वाभावस्यावच्छेदकत्वं वेत्यन्यदेतत्। **तत्र प्रायश्चित्तं न स्यादिति।** अत्रेष्टापत्तिमाशङ्क्याह—**एवमपीति। अप्रयोजकत्वज्ञानस्यैवेति।** अन्यथा भवन्मतेऽपि श्येने

---

सुत्या सोमाभिषवः॥

**तस्य श्येनजन्यापूर्वनाशकत्वं वेति।** अयं पक्षः श्रेयान्, पक्षान्तरयोर्यावत्कीर्तनतत्त्वज्ञानोदयमपूर्वनाशकाभावादधिकक्षणसम्बन्धस्य कल्पनीयत्वात्। **अपूर्वाभावस्येति।**

आस्ति...ना प्रवृत्त्यापत्तिरिति भावः । नच काशीमरणार्थं शिवपूजादौ कथं प्रवृत्तिः, बलवदनिष्टाननुबन्धित्वज्ञानाभावादिति वाच्यम्, तत्र काशीमरणे बलवद्द्वेषाभावात्। तज्ज्ञानसम्भवात् । नन्वेतावता विधिशक्तिविचारे किमायातमित्यत आह— **तथाचेति । अयुक्तेति ।** वक्तुमयुक्तेत्यर्थः । एवञ्च समानकर्तृकत्वेन 'उपपाद्य' इति ल्यबुपपत्तिः । ननु शत्रुवधे यदा उत्कटकामना, तदा श्येनप्रयोज्यपापे बलवद्द्वेषानुदयान्न बलवद्द्विष्टासाधनत्वान्वये बाध इत्यतो विशिष्टे एक शक्तिकल्पनापेक्षया शक्तित्रयकल्पनं गौरवपराहतमित्याक्षेपमपनुदति—**किञ्च विशेष णेति ।** ननु सकर्मकगम्यादिधातोरेवकारादीनाञ्च यथा खण्डशक्तिरेकैवाश्रीयते, तथा लिङ इष्टसाधनत्वादावपि । इच्छाविशेषात्मकशक्तिघटकबोधांशे इष्टसाधनत्वादि विषयितात्रयस्यैकत्र द्वयमिति रीत्यैव गोचरीकरणाङ्गीकारान्न विनिगमनाभावप्रयुक्त गौरवावकाशः, विशिष्टैकार्थबोधश्च तत्रेवात्रापि तात्पर्याधीन इति चेन्न, बलवदनिष्टा ननुबन्धित्वविशिष्टेष्टसाधनत्वविशिष्टकृतिसाध्यत्वाभावो 'न कलञ्जं भक्षयेत्' इत्यादिनिषे धस्थले बोध्यमानः कदाचिदिष्टसाधनत्वाभावादावपि विश्राम्येदिति विवक्षितार्थासिद्धेः । नच इष्टसाधनत्वादिरूपविशेष्यवति विशिष्टाभावो बलवदनिष्टाननुबन्धित्वाभाव एव पर्यवस्यतीति वाच्यम्, कलञ्जभक्षणादाविष्टसाधनत्वादिज्ञानं विनापि बलवदनिष्टा जनकत्वाभावज्ञानस्यानुभवात् तस्य च शक्तित्रयकल्पनां विना अनुपपत्तेः । निषेध स्थले च अनादितात्पर्यवशात् बलवदनिष्टाननुबन्धित्वमेव लिङादिना बोध्यत इति नानुपपत्तिः । शक्तित्रयकल्पनमाक्षिपति—**प्रत्येकशक्तिपक्ष इति । इष्टापत्तेरिति ।** सुखविशेषाभिलाषिणं प्रति लोके तद्व्यवहारस्य कदाचिद्दर्शनादिति भावः । नन्वेवमेतादृशं वाक्यमप्रमाणमित्यपि कदाचिद्व्यवहारो दृश्यते, तस्य का गति रित्यत आह—**तत्राप्रामाण्येति । यजेतेत्यादीनामप्रामाण्यापत्तेरिति ।** ननु

---

कालिकसम्बन्धावच्छिन्नप्रतियोगिताकापूर्वाभावस्येत्यर्थः । **आस्तिकानामिति ।** नरके बलव द्द्वेषवतामित्यर्थः । **एवकारादीनामिति ।** एवकारस्य विशिष्टे शक्तिर्न केनाप्यङ्गीकृतेति विशेषः । **एकत्र द्वयमिति ।** एकत्र द्वयमिति रीत्या भाने विशेष्यताया ऐक्याच्छक्त्यैक्यमिति बोध्यम् । नच शक्त्यैक्यै इष्टसाधनत्वे शक्तमिति शक्तिप्रमया तन्मात्रविषयकबोधः अशक्य वारणः, तद्विषयकबोधं प्रति तद्विषयकबोधत्वावच्छिन्ने सङ्केतविषयताप्रकारकज्ञानस्य हेतुत्वादिति वाच्यम्, तद्विषयकबोधं प्रति तद्विषयकबोधत्वपर्याप्तविषयतावच्छेदकताकत्वप्रकारकसङ्केतीयविषयताव गाहिज्ञानस्यैव हेतुत्वेन लिङादिपदजन्यप्रत्येकधर्मावच्छिन्नविषयताकबोधत्वे सङ्केतीयबोधनिष्ठविषयता वच्छेदकतापर्याप्तिविरहात्तदंशे तत्पर्याप्त्यवगाहिज्ञानस्य भ्रमत्वात्। **विवक्षितार्थासिद्धेरिति ।**



श्येनेनेत्यत्रेव बलवदनिष्टाननुबन्धित्वस्य नैव बोधः, तथाच नाप्रामाण्यापत्तिरित्यत आह—**न कलञ्जमित्यादीति ।** 'यजेतेत्यादीनामपि' इत्यनन्तरं 'यदा कदाचिद्यस्य कस्यचिद्बलवद्द्वेषविषयतया इत्यस्यानुषङ्गः । प्रामाण्यापत्तिं परिहरति—**अश्वमेधादा विति ।** प्रामाणिकं गौरवं न दोषायेत्युक्तावप्याह—**कालविशेषेति ।** ननु कारणता वाददर्शितदिशा प्रमेयत्वसामान्यलक्षणया कालपुरुषविशेषगततद्व्यक्तित्वानां ज्ञानं सम्भवति । एवञ्च प्रमेयवत्कालीनप्रमेयवत्पुरुषीयबलवद्द्वेषाजनकत्व एव लिङादीनां शक्तिः । तथा चार्थस्मृतिदशायां तत्तद्व्यक्तित्वांशे उद्बोधकविरहान्न प्रमेयत्वस्मरणम् । तथाच न विविधशक्तिकल्पनागौरवमपि । इत्थञ्च तत्कालीनतत्पुरुषीयबलवद्द्वेषविषयाजन कत्वमेवार्थः सम्भवतीत्यतो दोषान्तरमाह—**नाश्वमेधेनेति ।** यद्वा, लिङः स्वविशिष्टक्षण द्व्यावृत्तिधर्मवद्वृत्तिस्वविशिष्टपुरुषद्व्यावृत्तिधर्मवद्वृत्तिबलवद्द्वेषविषयाजनकत्वे शक्तिः । धर्मयोः स्ववैशिष्ट्यं स्वबोध्यकृतिविशिष्टत्वसम्बन्धेन । कृतिवैशिष्ट्यं सामा नाधिकरण्येन । सामानाधिकरण्यघटकाधिकरणता प्रथमे कालिकसम्बन्धावच्छिन्ना । द्वीतीये समवायसम्बन्धावच्छिन्ना । स्वविशिष्टत्वादिकमुपलक्षणमिति न तस्य शाब्दे भानम् । धर्मौ च क्षणपुरुषगततद्व्यक्तित्वे । इत्थञ्च शक्तेरैक्यम् । तत्कालीनतत्पुरु षीयबलवद्द्वेषविषयाजनकत्वस्य शाब्दे भानञ्च सुष्ठु घटते। नचैवं पचेत, नाश्वमेधेन यजेत इत्यस्य प्रामाण्यापत्तिः, पचेतेति लिङ्पदमादाय पाककर्तृ चैत्रीयबलवद्द्वेषविषयाजनकत्वेपि शक्तिसत्त्वात् तस्याश्वमेधजन्यश्रमे बलवद्द्वेषदशायां तादृशबलवद्द्वेषविषयजनकत्वस्याश्वमेधे सम्भवादिति वाच्यम्, यल्लिङ्पदशक्तिज्ञान जन्योपस्थित्या तद्धात्वर्थविषयकशाब्दे जननीये तल्लिङ्समभिव्याहृततद्धातुत्वरूपा काङ्क्षाज्ञानस्य सहकारित्वाङ्गीकारेण उक्तापत्त्यसम्भवात् । अभ्युपगम्यते हि घटोऽस्ति, कलशमानयेत्यादौ कलशपदशक्तिमजानतोपि घटकर्मताबोधवारणाय घटपदशक्ति ज्ञानजन्योपस्थितेः घटपदोत्तराम्पदत्वरूपाकाङ्क्षाज्ञानमेव सहकारीति । तथाच तत्कालीनतत्पुषीयबलवद्द्वेषविषयाजनकत्वमेवार्थः सम्भवतीत्यतो दोषान्तरमाह— **नाश्वमेधेनेति ।** यद्यपीष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वस्य विध्यर्थत्वेनैवात्र

---

बलवदनिष्टाननुबन्धित्वाभावासिद्धेरित्यर्थः । तात्पर्यस्य सर्वत्र विशिष्टाभावबोधो भवत्वित्याकारकतया अविशेषादिति भावः । तर्कालङ्कारोक्तरीतिमवलम्ब्यावतारयति—**नन्विति ।** नियमेन क्वचि दुद्बोधकविरहकल्पनं नोचितमित्याशयेन प्रकारान्तरमवलम्बते—**यद्वेति ।** नरकसाधनताधी

दर्शितसकलदोषवारणं सम्भवति, तथाप्यगम्यागमनादावुत्कटरागवतां प्रवृत्त्युपपत्तये तज्ज्ञानस्य प्रवर्तकत्वं नेत्यभ्युपगन्तव्यम्, प्रवर्तकज्ञानविषयस्यैव च विध्यर्थत्वमिति दोषापरिहार एवेति। सिद्धान्तमाह—**किन्त्विति। पापाजनकत्वमिति।** नरकाजनकत्वमिति परे। **तदवच्छिन्नप्रतियोगिताकाभावकूट इति।** प्रतियोगितात्र साधनतासम्बन्धावच्छिन्ना ग्राह्या। साधनताया वृत्त्यनियामिकायाः प्रतियोगितानवच्छेदकत्वे तदवच्छिन्नसाधनत्वाभावकूटे शक्तिरिति बोध्यम्। लाघवमभिसन्धायाह—**रोगादीति।** नचात्र विनिगमकं दुर्लभमिति शङ्क्यम्, वेदस्येश्वरोच्चरितत्वात् शक्तेश्चेश्वरेच्छारूपत्वाद्वेदपदबोध्येषु शक्तौ प्रथमोपस्थितिरूपलाघवस्य विनिगमकत्वात्। **अध्येषणादीति।** अध्येषणा अधिका प्रार्थना, सत्कारपूर्वकगुर्वादिप्रेरणं वा। आदिना निमन्त्रणादिपरिग्रहः। **अनुमेयमितीति।** प्रथमपुरुषलिङादिरिच्छावाचकः लिङादित्वात् मध्यमादिपुरुषलिङादिवदित्यनुमानाकारः। **इच्छात्वेन विधिशक्ताविति।** इच्छायामाप्तसमवेतत्वादिकं प्रमाणान्तरेणावगत्य इष्टसाधनत्वमनुमेयम्, अन्यथा व्यभिचारादिति बोध्यम्। **इति बोध इति।** यद्यपि प्रथमान्तमुख्यविशेष्यक एव बोधो नैयायिकैरङ्गीक्रियते, तथापि अनुभवबलाद्व्युत्पत्तिवैचित्र्यमत्राङ्गीक्रियत इति भावः। अन्वयक्रमश्चेत्थम्—स्वर्गकामपदार्थः आख्यातार्थकृतौ, सा च साध्यतासम्बन्धावच्छिन्नप्रकारताकत्वसम्बन्धेन लिङर्थेच्छायाम्, सा च विषयतासम्बन्धेन प्रकृतिभूतधातोरर्थे यागे इति। आप्तेच्छाविषययागानुकूलकृतिमान् स्वर्गकाम इति नवीननैयायिकाभिमतो बोध इत्यवसेयम्। **मत्कृतिसाध्यतयेति।** मत्कृतिसाध्यत्वप्रकारकाप्तसमवेतेच्छाविषयत्वादित्यर्थः। सुखादौ व्यभिचारवारणाय प्रकारकान्तम्। तर्कवागीशास्तु लिङ्घटकाप्तेच्छा आप्तत्वप्रकारकेच्छा, आप्तत्वञ्च भ्रमानधीनकृतिनिरूपितसाध्यत्वाख्यविषयत्वम्। हेतुघटकेच्छायामपि संवादित्वं देयम्। तेन तादृशकृतिविषयत्वप्रकारकायथार्थेच्छामादाय चैत्यवन्दनादौ न व्यभिचार इति व्याचक्रुः। मुक्तावल्यां तदभावादित्यस्याप्तेष्टत्वाभावादित्यर्थः स्वरसतो भाति, तस्य च न साक्षात् प्रवृत्त्यभावप्रयोजकत्वमित्यतो विवक्षितार्थं स्फुटयति—**आप्तेष्टत्वाभावेनेत्यादिना। तद्धेतुकेष्टसाधनत्व**

---

विरोधानादित्युक्तवतां मुक्तावलीकाराणां सिद्धान्तमाह—**नरकेति।** **भ्रमानधीनेति।** चैत्यवन्दनविषभक्षणादौ व्यभिचारवारणायेदं कृतिविशेषणम्। पाकादिनान्तरीयकजलताडनादौ व्यभिचारवारणाय जन्यत्वलक्षणं साध्यत्वं विहाय साध्यत्वाख्यविषयतानुधावनम्। तदभावादित्यस्य



**ज्ञानेति।** आप्तेष्टत्वहेतुकबलवदनिष्टाननुबन्धीष्टसाधनत्वज्ञानेत्यर्थः। परन्तु लोकावगततृप्तिसाधनत्वज्ञानेन न कलञ्जमिति निषेधं जानतोऽपि प्रवृत्तिर्नैतावता वारिता भवेत्। अतः आप्तेष्टत्वाभावानुमितबलवदनिष्टजनकत्वज्ञानादित्यर्थो वर्णनीयः। कलञ्जभक्षणं बलवदनिष्टानुबन्धि इष्टसाधनत्वेप्याप्तेनानिष्यमाणत्वात् मधुविषसम्पृक्तान्नभोजनवदित्यनुमानाकारः। **सामर्थ्याभावादिति।** निराकाङ्क्षत्वादित्यर्थः। नमः पदादौ यथा वक्तृभिन्ननमस्कारादेर्बोधने सामर्थ्याभावः, तथेति भावः। **वेदवक्तुरीश्वरे इति।** 'वेदवक्तरीश्वरे' इति साधुः पाठः। **सकर्तृकत्वबोधकस्मृतेरित्यर्थ इति।** एवञ्चापौरुषेयत्वानुमापकदर्शितहेतुरेवासिद्ध इति भावः। **तन्मूलकश्रुतीति।** 'तन्मूलकस्मरण' इति साधुपाठः॥

**मु—इत्यादीति।** आदिपदेन 'तेभ्यस्तेऽपानेभ्यः त्रयो वेदा अजायन्त' इत्यादिश्रुतिपरिग्रहः। **भगवानिति।** तत्त्वज्ञानदातृत्वाद्यैश्वर्यवानित्यर्थः। **शिवादीति।** 'शिवाद्या' इति ताळीग्रन्थपाठः। **भ्रमादिसम्भवादिति।** आदिना वस्तुतत्त्वाज्ञानपरिग्रहः॥

दि—नित्यसर्वज्ञत्वेनेत्यत्र नित्यत्वं न धर्मिविशेषणं प्रकृतानुपयोगात्, किन्तु क्रियाविशेषणमिति स्फुटयति—**नित्यसर्वविषयकज्ञानवत्त्वेनेत्यर्थ इति।** ज्ञानविशेषणाभ्यामीश्वरे भ्रमरूपज्ञानमज्ञानञ्च क्रमाद्वारितम्। **प्रयोजकमस्त्विति।** प्रयोजकतावच्छेदकलाघवादिति शेषः॥

**मु—तत्सन्दर्भस्य वेदस्येति।** 'तत्सन्दर्भस्य' इत्येव दिनकरभट्टाभिमतः पाठः। यथास्थितपाठे तु आनुपूर्वीविशेषविशिष्टवर्णसमुदायात्मकस्येत्यर्थोऽवसेयः। अयमेव पाठः स्वारसिकः, वेदानित्यत्वसाधनस्य प्रकृतत्वाद्वेदस्य च शब्दात्मकत्वस्य सर्वतान्त्रिकाभिमतत्वात्। 'संक्षेपः' इति पाठः क्वचिन्न दृश्यते॥

---

दिनकरीयव्याख्यायामनुपपत्तिं प्रदर्शयति—**परन्तिति।** गगनादौ पश्चादिकृतवृथाचेष्टायाञ्च व्यभिचारवारणाय इष्टसाधनत्वेपीति। **निराकाङ्क्षत्वादिति।** धातुलिङोः समभिव्याहारस्य उच्चारयितुरिच्छाबोधं प्रति हेतुत्वादिति भावः। तेभ्यः अग्निवाय्वादित्येभ्यः॥

**अर्थोऽवसेय इति।** कृदभिहितो भावो द्रव्यवत् प्रकाशत इति न्यायादिति भावः॥

**दि—तन्निष्ठानुपूर्वीविशेषस्येति ।** एकवर्णनिष्ठापरवर्णोत्तरत्वादिरूपस्येत्यर्थः । तस्यानित्यत्वसाधनाय विपक्षे बाधकतर्कं दर्शयति—**आनुपूर्व्या नित्यत्व इति । जातित्वापत्तेरिति ।** अत्वकत्वादिना साङ्कर्याच्च नेष्टापत्तिसम्भव इति भावः । 'आचार्यास्तु' इत्यनेन सूचितमस्वरसं प्रकटयति—**अत्र चानेच्छेति । केवलान्वयिन इति ।** नचेश्वरेच्छायाः केवलान्वयित्वेपि कृतिसाध्यत्वप्रकारता निरूपिततद्विषयताया न तथात्वमिति तद्वत्त्वं कलञ्जभक्षणे न सम्भवतीति वाच्यम्, कलञ्जभक्षणस्य वस्तुतः कृतिसाध्यत्वात्तत्प्रकारकेश्वरेच्छाविषयत्वस्यापि तत्र सत्त्वाद्व्यभिचारापरिहारात् । इदमत्र चिन्त्यम् । ईश्वरेच्छायास्सर्वविषयकत्वेपि यथा गङ्गापदस्य गङ्गायामेव शक्तिः, न तु तीर इति पूर्वं दर्शितम्, तथा बलवदनिष्टानुबन्धिनि निरर्थके च कृतिनिरूपितं साध्यत्वम्, साध्यञ्च कलञ्जभक्षणादीत्यादिरीत्यैवेश्वरेच्छास्वीकारान्न हेतोर्व्यभिचारितेति । उक्तञ्च मणिकारैः । 'न कलञ्जं भक्षयेदित्यत्र कलञ्जभक्षणं तृप्तिकामनया भक्षणप्रवृत्तस्य कृतिसाध्यत्वेनाप्तेच्छाविषयो, नेति तस्येश्वरेच्छाविषयत्वेपि विशिष्टनिषेध उपपद्यते' इति । अतोऽत्रेदमस्वरसबीजं प्रतिभाति । सामान्यत इच्छाविषयत्वाभावस्य कलञ्जभक्षणे अन्वयासम्भवात् भ्रमभिन्ना या भ्रमानधीनकृतिसाध्यत्वप्रकारिकेच्छा, तस्यामेव लिङादेश्शक्तिर्वक्तव्या, इत्थञ्च विपरीतमेव गौरवमिति । अत्र नव्याः, इच्छात्वेनेच्छैव विधिशक्या, त्वं पाकं कुर्याः, अहं पाकं कुर्यामित्यादौ लिङादिना क्रियायां तद्बोधस्यानुभाविकत्वात् । इष्टसाधनत्वादौ तु निरूढलक्षणा । न कलञ्जमित्यादौ लक्षणया बलवदनिष्टानुबन्धित्वमेव भासते । न पाकं कुर्यामित्यादिलौकिकस्थले सामान्यत इच्छाविषयत्वाभावभाने बाधेपि लक्षणया वक्तृिच्छाया एव भानान्नानुपपत्तिरिति । मुक्तावल्यां सङ्क्षेप इत्यनेन सूचितमर्थं प्रकटयति—**नन्विष्टेति । स्वर्गत्वावच्छिन्नसाधनत्वस्येति ।** इष्टत्वेनेष्टसाधनत्वज्ञानं न प्रवर्तकम्, किन्तु यद्धर्मप्रकारिका इच्छा, तद्धर्मावच्छिन्नसाधनत्वज्ञानमिति प्रकृते स्वर्गत्वावच्छिन्नसाधनत्वस्यैव भानं स्वीकार्यम्, तच्च बाधितमित्यर्थः । बाधमेव दर्शयति—**गङ्गेति ।** ननु स्वर्गनिष्ठवैजात्यमेव यागकार्यतावच्छेदकम्, तथाच न व्यभिचार इत्याशङ्क्य

---

**विपरीतमेव गौरवमिति ।** उभयत्र भ्रमत्वस्य विषयघटितगुरुशरीरस्य घटनादिति भावः ।



तथापि नोपपत्तिरिति दर्शयति—**स्वर्गनिष्ठेति । इत्येक इति ।** कारणत्वसाधर्म्ये कारणत्वस्य स्वरूपसम्बन्धरूपताया निरस्तत्वान्मतमेतन्न विचारसहमित्यभिप्रेत्य मतान्तरमाह—**अन्यथासिद्धीति ।** नियतोत्तरवर्तितावच्छेदकधर्मत्वेन च वैजात्यमेव शाब्दबोधे भासत इति न वाक्यस्याप्रामाण्यम् । ननु यागे यागसाध्यस्वर्गकत्वज्ञानापेक्षया लाघवात्स्वर्गे यागसाध्यत्वज्ञानस्यैव प्रवृत्तिहेतुता स्यात्, अस्तु तथेति चेत्तर्हि यागसाध्यस्वर्ग एव विध्यर्थो भवेत्, नत्विष्टसाधनत्वमित्याद्यभिसन्धायाह—**वस्तुतस्त्विति ।** अत्र स्वर्गधर्मस्य वैजात्यस्य स्वरूपत एव कार्यतावच्छेदकत्वेपि स्वर्गधर्मत्वस्य व्यापकताशरीरे उपलक्षणतयैव प्रवेशान्न स्वर्गधर्मावच्छिन्नकार्यताया अप्रसिद्धिः । अधिकं व्युत्पत्तिवादे लिङर्थविचारे द्रष्टव्यम् । **न बाधितमिति ।** एतदुत्तरं 'स्वर्गनिष्ठवैजात्यरूपस्वर्गधर्मावच्छिन्नम्' इत्यादिपाठः । नन्वेवं स्वर्गसाधनत्वस्य यागे बाधाभावेपि लिङा तद्भानं न सम्भवति, तत्र शक्त्यभावादित्याक्षिपति—**ननु विधेरिति । स्वर्गसाधनत्वादाविति ।** आदिपदात्तृप्तिसाधनत्वादिपरिग्रहः । **स्वर्गपदोपस्थितेति ।** स्वर्गकामसमासघटकस्वर्गपदोपस्थितेत्यर्थः । **अन्वयासम्भवादिति ।** समासासाधुत्वभिया तत्र निराकाङ्क्षत्वस्वीकारस्यावश्यकत्वादिति भावः । **स्वर्गत्वादीनीति ।** स्वर्गनिष्ठधर्मादीनीत्यर्थः । **अन्यत्र विस्तर इति ।** इदमनेनासूचितम् । ननु तद्धर्मावच्छिन्नोद्देश्यकप्रवृत्तिं तादृशेच्छां प्रति च तद्धर्मावच्छिन्नसाधनताज्ञानस्य हेतुत्वात् प्रकृते च स्वर्गत्वावच्छिन्नसाधनताज्ञानाभावात् कथं विधिज्ञानात् स्वर्गत्वप्रकारकेच्छाप्रवृत्ती उपपद्येते इति चेन्न, वह्निकामस्य वह्नित्वव्याप्यवैजात्यावच्छिन्ननिरूपितसाधनतावति तृणफूत्कारादौ प्रवृत्तिदर्शनात् तद्धर्मप्रकारेण भासमानफलसाधनताज्ञानस्यैव तत्र हेतुत्वोपगमात् । कार्यतावच्छेदकत्वं तद्धर्मस्य तद्धर्मव्याप्यधर्मस्य वा यथासम्भवं बोध्यमिति । **शब्दसाक्षात्कारसाध्यकेति ।** साक्षात्कारोपादानमात्मा, स च प्रत्यक्ष इति भावः । नचैवमपि शरीरादिकारणाभावान्मुक्तिरूपध्वंससाक्षात्कारस्याप्यसम्भवान्मुक्तिसाध्यकप्रवृत्त्यनुपपत्तिरिति वाच्यम्, इष्टत्वात्, परमपुरुषार्थतया मुक्तावुद्देश्यतात्वविषयताया एवाङ्गीकारात् । **अधिष्ठानमात्रमिति ।** अधिष्ठानत्वञ्चागत्याऽननुगतमेवेति बोध्यम् ।

---

**इत्याद्यभिसन्धायेति ।** यागसाध्यस्वर्ग एव विध्यर्थो भवेदित्यत्रेष्टापत्तिमाशङ्क्यादिपदमुपात्तम् । तेन धात्वर्थे लिङर्थान्वयानुपपत्तिर्बोध्यते । **लिङर्थविचार इति ।** इदमत्र बोध्यम्—इष्टसाधनत्व

**प्राणसञ्चारादेश्चेति।** अधिकश्वासरूपप्राणसञ्चारादेरित्यर्थः। तस्यैव प्रवृत्तिसाध्यत्वात्। प्राणवहननाडीप्रत्यक्षञ्च स्पार्शनात्मकं बोध्यम् ॥

भा—ननु सुखे साध्यतया प्रवृत्तिरिव दुःखान्निवृत्तिरप्यप्रसिद्धेति द्वेषस्य निवृत्तिहेतुता न स्वीकार्येत्यत आह—**द्वेषादिति।** तथाच दुःखसाधनान्निवृत्तिरेवाभिमतेति नानुपपत्तिरिति भावः ॥

मु—मूलस्थस्य 'सर्वदा भवेत्' इत्यस्य व्याख्या यावज्जीवमनुवर्ततं इति। प्रबोधकाले मनस इन्द्रियान्तरप्राप्तिहेतुरप्ययमेव यत्न इति भाष्ये स्पष्टम्। यदपि भाष्ये जीवनपूर्वकः इच्छाद्वेषपूर्वकश्चेति यत्नद्वैविध्यमेवोक्तम्, तत्तु चेष्टात्वावच्छिन्ननिमित्तत्वरूपानुगतधर्मं पुरस्कृत्य। द्वितीयस्य कारणवैलक्षण्याधीनं द्वैविध्यमपि तत्र दर्शितप्रायमिति नात्र भाष्यविरोधशङ्कावकाशः ॥

दि—साध्यहेत्वोर्वस्तुतस्सहचारादेरनुमितावनुपयोगादाह—**प्रत्यक्षयत्नसाध्यतया दृष्ट इति।** अत्र यत्ने प्रत्यक्षत्वविशेषणं व्याप्तिग्रहस्य सौलभ्यं प्रकाशयति, न तु तस्यापि साध्यकोटौ घटनमभिप्रेतम्, बाधप्रसङ्गात्। ईश्वरयत्नमादाय सिद्धसाधनवारणायाह—**भोक्तृयत्नेति। अदृष्टविशेषप्रयोज्येति।** तदा तदा विपच्यमानधर्माधर्मविशेषाधीनेत्यर्थः। अत्र 'सदेहस्यात्मनो विपच्यमानकर्माशयसहितस्य मनसा सह संयोगः सम्बन्धो जीवनम्' इति कन्दलीकारवचनमनुसन्धेयम्। सहितस्येत्यन्तेनात्मनो विशेषणेन हेतुगर्भेणात्ममनस्संयोगेऽदृष्टविशेषप्रयोज्यत्वलाभः। एतादृशजीवनपूर्वकत्वं प्राचीना यत्नविशेषे स्वीकुर्वन्ति। प्राणक्रियायामेव तत्त्वं सुवचमिति यत्नविशेषे मानाभाव इति नवीनानामभिसन्धिः। वस्तुतस्तद्धेतोरिति न्याये नादृष्टविशेष एव प्राणक्रियाया हेतुः, सैव च जीवनमित्याशयवानाह—**तत्प्रयोजक**

बलवदनिष्टाननुबन्धित्वयोरुक्तरूपेण लिङ्राख्यत्वेपि कृतिसाध्यत्वे न शक्तिः, तदनङ्गीकारेपि कृतेराख्यातसामान्यार्थकतया पचेत्यादौ कृतेः पाकानुकूलत्वभानावश्यकतया अर्थात् पाकादावपि कृतिसाध्यताभानसम्भवादित्यादिकमनुसन्धायोक्तम् 'अधिकम्' इति ॥

इन्द्रियान्तरप्राप्तिहेतुरिति। तादृशहेतुतया सिद्ध इत्यर्थः। सिद्धिप्रकारश्च—प्रबोधकालीनज्ञानहेतुरिन्द्रियमनःसंयोगः प्रयत्नपूर्वकमनःक्रियाजन्यः इन्द्रियमनस्संयोगत्वात्, जागरकालीनेन्द्रियमनस्संयोगवदिति। स्पष्टमिदं कन्दल्याम् ॥

विपच्यमानेति। फलोन्मुखेत्यर्थः। **कर्माशयेति।** कर्माशयः अदृष्टम् ॥



**दिति।** ननु सिद्ध एव यत्नविशेषो दर्शितानुमानादिति शङ्कामपाकरोति—**उक्तानुमानस्येति।** ननु व्यभिचारसंशयस्य दोषाधीनत्वाद्दोषाभाववतो दर्शितानुमानेन तत्सिद्धिर्निराबाधेत्याक्षेपं सिद्धान्तव्याघातोद्भावनेन निरस्यति—**अन्यथैकत्रेति** ॥

भा—गुरुत्वे प्रमाणं दर्शयन्नाह—**तदेवेति** ॥

मु—**अनित्येतीति।** 'अनित्य इति' इति प्रतीकपाठः। **आद्यपतन इत्यर्थ इति।** यद्यपि गुरुत्वस्याश्रयनाशमात्रनाश्यतया द्वितीयादिपतनेप्यसमवायिकारणत्वं सुघटम्, तथापि तत्र प्रत्यक्षसिद्धवेगस्यासमवायिकारणत्वेनोपपत्त्या नातीन्द्रियगुरुत्वकल्पनमिति शङ्काव्युदासायाऽऽद्यग्रहणं चरितार्थम्। द्वितीयादिकं प्रति तु तस्यान्यथासिद्धत्वमित्याशयः। परन्तु वेगाधीनकर्मणामूर्ध्वतिर्यगादिदेशसंयोगं प्रत्यपि हेतुतया वृन्तच्युतफलादीनामधोदेशसंयोग एव जायत इति नियमो गुरुत्वप्रयोज्य इति द्वितीयादिपतनस्यापि गुरुत्वजन्यत्वमभ्युपगन्तव्यम्। उक्तञ्च भाष्ये, 'तत्राद्यं गुरुत्वात्, द्वितीयादीनि तु गुरुत्वसंस्काराभ्याम्, इति। करादिधृतवस्तुनः, प्रसारितकरादेः, ज्यानिर्मुक्तशरादेश्च पतनाभावः क्रमेण पतनप्रतिबन्धकसंयोग,प्रयत्न,वेगप्रयुक्तोऽवसेयः ॥

दि—**संयोगासमवधानकालीनेति।** संयोगपदमत्र क्रियाजनकसंयोगविशेषपरम्, तेनाकाशसंयोगमादाय न पक्षाप्रसिद्धिः। द्वितीयादिपतने वेगस्यासमवायिकारणत्वमते संयोगपदं वेगस्याप्युपलक्षकम्, तेन न वेगमादाय सिद्धसाधनम् ॥

मु—**चेतीति।** 'चेत्यर्थः' इति पाठः। **तद्दर्शयतीति।** 'तं दर्शयति' इति साधुः पाठः। **द्रवत्वमितीति।** एतच्च प्रक्षिप्तम् ॥

दि—**स्नेहसहितमितीति।** स्नेहसाहित्यस्य कारणतावच्छेदकत्वभ्रमं वारयति—**तच्चेत्यादिना। विनिगमनाविरहेणेति।** इदञ्च करकादौ द्रवत्वमस्ति, तत्प्रत्यक्षमेवादृष्टविशेषः प्रतिबध्नातीति मतमनुसृत्य। तत्र द्रवत्वं नोत्पद्यत इति भाष्यानुसारे तु करकादिनिष्ठस्नेहेन संग्रहादर्शनाद्द्रवत्वस्यापि सहकारिताऽवश्यं वाच्येति न विनिगमनाविरहावकाशः। तर्ह्यस्मिन् पक्षे स्नेहस्य द्रवत्वेनान्यथा

सिद्धिरेवेति चेन्न, कारणत्वेन प्रामाणिकव्यवहाराभावस्यैवान्यथासिद्धित्वेन स्नेहे तद्व्यवहारसत्त्वादन्यथासिद्ध्यभावात् । अत्रेदमवधेयम्—स्नेहसांसिद्धिकद्रवत्वयोरन्य तरस्य कारणतायां विनिगमकाभावेपि तयोः स्वाश्रयसंयोगसम्बन्धेनैव संयोगविशे षात्मकसंग्रहे निमित्तत्वं वक्तव्यम्, तदपेक्षया लाघवात् संयोगेन जलस्यैव हेतुत्वं युक्तम् । करकात्वेन प्रतिबन्धकत्वमङ्गीकृत्य करकया संग्रहापत्तिवारणन्तूभयोस्समान मिति ॥

सु—तेनेति । एतदुत्तरं 'द्रुतसुवर्णादिना न संग्रहः' इति पाठः ॥

**स्नेहं निरूपयतीति** । एतदुत्तरं 'स्नेह इति' इति प्रतीकपाठो भ्रष्टः । **असा विति** । अत्र 'सः' इति ताळीग्रन्थपाठः । **अपकृष्टस्नेहोपीति** । अत्र 'अपकृष्ट स्नेहं हि जलं वह्निं नाशयतीति भावः' इति क्वचित् पाठः । नाशयतीति । तथाच वह्निनाशकतावच्छेदकं न जलत्वम्, किन्तु अपकृष्टस्नेहवत्त्वमिति भावः । प्रकर्षापकर्षौ च स्नेहगतौ जातिविशेषौ । जले वैजात्यमङ्गीकृत्य तेन रूपेण जलस्य हेतुत्वम्, लाघवादिति केचित् । तन्न, तादृशवैजात्यस्य प्रत्यक्षत्वापत्तेः ॥

भा—**स्थितिस्थापकभावने इति** । सर्वत्र स्थितिस्थापक इत्यत्र 'स्थितस्थापक' इति पाठः । संस्कारभेदाविति वचनविपरिणामेनानुषङ्गः । संस्कारभेदः संस्कारत्वव्याप्यधर्मावच्छिन्नः । यत्तु तादृशधर्म इत्येवार्थः, वेगादिपदं भावप्रधानमिति मतम्, तन्न चारु, वेगादिप्रतिपादकोत्तरग्रन्थस्वारस्य भङ्गात् । **मूर्तमात्र इति** । मात्रशब्दोऽत्र न कात्स्न्यार्थकः, वेगानधिकरणशिलोच्चयादेः प्रसिद्धत्वात्, किन्त्ववधारणार्थकः । तथाचामूर्तावृत्तिः यत्किञ्चिन्मूर्तवृत्तिरित्यर्थः रूपाद्यतिव्याप्तिवारणाय अमूर्तवृत्त्यवृत्तिमनोवृत्तिवृत्तिजातिमानित्यर्थो विवक्षितः । एता दृशजातित्वेन वा, वेगत्वत्वेन वा लक्षणत्वं वेगत्वस्येत्यन्यदेतत् ॥

---

उभयोः समानमिति । करकायां द्रवत्वानङ्गीकर्तृमते तु करकया संग्रहवारणाय परम्परासम्बन्धेन द्रवत्वस्यैव हेतुत्वमुचितम्, लाघवादिति बोध्यम् ॥

प्रभाकरमतं दूषयितुमुपन्यस्यति—यत्त्विति । अमूर्तवृत्त्यवृत्तीति । इदञ्च संख्या त्वमादायातिव्याप्तिवारणाय । रूपत्वादिकमादायातिव्याप्तिवारणाय मनोवृत्तिवृत्तीति । क्रिया त्वमादायातिव्याप्तिवारणाय गुणत्वमपि निवेश्यम् । वेगत्वत्वेनेति । वेगत्वत्वं वेगत्वनिष्ठ द्वतयक्तित्वम् । अन्यदिति । प्रकृतमात्रोद्भावनीयादन्यदित्यर्थः । पृथिव्यादिलक्षणेष्वप्युक्तशङ्कायाः



सु—**मूर्तमात्र इतीति** । 'कर्मज इति' इति पाठः । **नोदनजनितेनेति** । नोदनमत्र प्रयत्नवदात्मसंयोगरूपं बोध्यम् । **कर्मणा** चेष्टारूपकर्मविशेषेण । इत्थञ्च मन्दसञ्चारेण वेगानुदयेपि न क्षतिः । व्याख्येयं 'शरीरादौ' इति पाठमनुसृत्य । 'शरादौ' इति ग्रन्थपाठे भाष्यानुसारिणि तु आकृष्टमुक्तज्यया यः शरसंयोगः, स एव नोदनपदार्थोऽत्रावसेयः ॥

दि—**कर्मनाशकस्योत्तरसंयोगस्येति** । प्राप्यत्वेनाभिमतदेशसंयोगस्ये त्यर्थः । इदञ्चान्तरालिकपवनसंयोगादीनां न शरकर्मादिनाशकत्वमित्यभिप्रायेण । स्वजन्यसंयोगसामान्यस्य कर्मनाशकत्वपक्षे दर्शितसंयोगा एव कर्मनाशकाः । कर्मा न्तरोत्पादकस्तु वेग इति बोध्यम् । पक्षयोरेतयोर्द्वितीय एव भाष्यकाराभिमतः । 'बहूनि कर्माणि क्रमशः । कस्मात्, संयोगबहुत्वात्' इति कण्ठोक्तेः । **पूर्ववेग नाश इति** । इदमपि 'एकस्तु संस्कारोऽन्तराले कर्मणोपेक्षाकारणाभावात्' इति भाष्याननुसारि । भाष्यवाक्यस्यायमर्थः—कर्म सर्वमपि वेगं न जनयतीत्यनुभवसिद्धम् । अतः कर्मणः सहकारीणि प्रयत्नसंयोगविशेषादीनि स्वीकरणीयानि । अन्तराले इष्वादौ तदभावान्न तत्र कर्मणा वेगो जायेतेति प्रथमशरकर्मनिमित्तकः संस्कार एव यावत् पतनमनुवर्तत इति । परन्त्विषुवेगस्याऽपतनमेकत्वे तत्रानुभूयमानतारतम्यस्य नोपपत्तिरिति वेगनानात्वं दिनकरभट्टेनाभ्युपगतमित्यवसेयम् । **नाशकान्तराभावा दिति** । ननु मास्त्वन्तराले कर्मनाशः, कर्मोत्पत्तिश्चेति चेन्न, उत्कृष्टापकृष्टनाना वेगोत्पादानुपपत्तेः । **उत्तरसंयोगेनैवेति** । येन पवनादिसंयोगेन पूर्वकर्मनाशः, तेनैवोत्तरकर्मोत्पत्तिस्सम्भवतीत्यर्थः । **तत्पूर्वमिति** । स्वजनितेन वेगेन पूर्वकर्मणस्तृतीय क्षणे नाशस्य तदनन्तरक्षणे कर्मोत्पत्तेश्च स्वीकार इत्यर्थः । **अलं वेगेनेति** । अलं वेगस्य कर्मनाशकत्वतज्जनकत्वाभ्यामित्यर्थः । यद्वा, कर्मातिरिक्तवेगपदार्थ एव प्रमाणा भाव इत्यर्थः । प्रथमपक्षे कर्मजनकतयेत्यादेः कर्मजनकत्वप्रकारकवेगविशेष्यकप्रत्यक्ष मेव वेगस्य कर्मजनकत्वे प्रमाणमित्यर्थः । सिद्धे च जनकत्वे कर्मवति कर्मान्तरानु त्पत्त्या पूर्वकर्मनाशोऽभ्युपेयः । स च वेगेन, संयोगेन वेत्यन्यदेतदित्याशयः । आहु

---

सम्भवादिति भावः ॥

इति कण्ठोक्तेरिति । संयोगबहुत्वाद्बहूनि कर्माणीत्युक्त्या संयोगस्य कर्मनाशकत्वं न वेगस्येति लभ्यत इति भावः ॥

**प्राणसञ्चारादेश्चेति ।** अधिकश्वासरूपप्राणसञ्चारादेरित्यर्थः । तस्यैव प्रवृत्तिसाध्यत्वात् । प्राणवहननाडीप्रत्यक्षञ्च स्पार्शनात्मकं बोध्यम् ॥

भा—ननु सुखे साध्यतया प्रवृत्तिरिव दुःखान्निवृत्तिरप्यप्रसिद्धेति द्वेषस्य निवृत्तिहेतुता न स्वीकार्येत्यत आह—**द्वेषादिति ।** तथाच दुःखसाधनान्निवृत्तिरेवाभिमतेति नानुपपत्तिरिति भावः ॥

सु—मूलस्थस्य 'सर्वदा भवेत्' इत्यस्य व्याख्या यावज्जीवमनुवर्तत इति । प्रबोधकाले मनस इन्द्रियान्तरप्राप्तिहेतुरप्ययमेव यत्न इति भाष्ये स्पष्टम् । यदपि भाष्ये जीवनपूर्वकः इच्छाद्वेषपूर्वकश्चेति यत्नद्वैविध्यमेवोक्तम्, तत्तु चेष्टात्वावच्छिन्ननिमित्तत्वरूपानुगतधर्मं पुरस्कृत्य । द्वितीयस्य कारणवैलक्षण्याधीनं द्वैविध्यमपि तत्र दर्शितप्रायमिति नात्र भाष्यविरोधशङ्कावकाशः ॥

दि—साध्यहेत्वोर्वस्तुतस्सहचारादेरनुमितावनुपयोगादाह— **प्रत्यक्षयत्नसाध्यतया दृष्ट इति ।** अत्र यत्ने प्रत्यक्षत्वविशेषणं व्याप्तिग्रहस्य सौलभ्यं प्रकाशयति, न तु तस्यापि साध्यकोटौ घटनमभिप्रेतम्, बाधप्रसङ्गात् । ईश्वरयत्नमादाय सिद्धसाधनवारणायाह—**भोक्तृयत्नेति । अदृष्टविशेषप्रयोज्येति ।** तदा तदा विपच्यमानधर्माधर्मविशेषाधीनेत्यर्थः । अत्र 'सदेहस्यात्मनो विपच्यमानकर्माशयसहितस्य मनसा सह संयोगः सम्बन्धो जीवनम्' इति कन्दलीकारवचनमनुसन्धेयम् । सहितस्येत्यन्तेनात्मनो विशेषणेन हेतुगर्भेणात्ममनस्संयोगेऽदृष्टविशेषप्रयोज्यत्वलाभः । एतादृशजीवनपूर्वकत्वं प्राचीना यत्नविशेषे स्वीकुर्वन्ति । प्राणक्रियायामेव तत्त्वं सुवचमिति यत्नविशेषे मानाभाव इति नवीनानामभिसन्धिः । वस्तुतस्तद्धेतोरिति न्याये नादृष्टविशेष एव प्राणक्रियाया हेतुः, सैव च जीवनमित्याशयवानाह—**तत्प्रयोजका**

---

बलवदनिष्टाननुबन्धित्वयोरुक्तरूपेण लिङ्शक्यत्वेपि कृतिसाध्यत्वे न शक्तिः, तदनङ्गीकारेपि कृतेराख्यातसामान्यार्थकतया पचेतेत्यादौ कृतेः पाकानुकूलत्वभानावश्यकतया अर्थात् पाकादावपि कृतिसाध्यताभानसम्भवादित्यादिकमनुसन्धायोक्तम् 'अधिकम्' इति ॥

इन्द्रियान्तरप्राप्तिहेतुरिति । तादृशहेतुतया सिद्ध इत्यर्थः । सिद्धिप्रकारश्च—प्रबोधकालीनज्ञानहेतुरिन्द्रियमनःसंयोगः प्रयत्नपूर्वकमनःक्रियाजन्यः इन्द्रियमनस्संयोगत्वात्, जागरकालीनेन्द्रियमनस्संयोगवदिति । स्पष्टमिदं कन्दल्याम् ॥

विपच्यमानेति । फलोन्मुखेत्यर्थः । **कर्माशयेति ।** कर्माशयः अदृष्टम् ॥



**दिति ।** ननु सिद्ध एव यत्नविशेषो दर्शितानुमानादिति शङ्कामपाकरोति—**उक्तानुमानस्येति ।** ननु व्यभिचारसंशयस्य दोषाधीनत्वाद्दोषाभाववतो दर्शितानुमानेन तत्सिद्धिर्निराबाधेत्याक्षेपं सिद्धान्तव्याघातोद्भावनेन निरस्यति—**अन्यथेत्यत्रेति** ॥

भा—गुरुत्वे प्रमाणं दर्शयन्नाह—**तदेवेति** ॥

सु—**अनित्येतीति ।** 'अनित्य इति' इति प्रतीकपाठः । **आद्यपतन इत्यर्थ इति ।** यद्यपि गुरुत्वस्याश्रयनाशमात्रनाश्यतया द्वितीयादिपतनेप्यसमवायिकारणत्वं सुघटम्, तथापि तत्र प्रत्यक्षसिद्धवेगस्यासमवायिकारणत्वेनोपपत्त्या नातीन्द्रियगुरुत्वकल्पनमिति शङ्काव्युदासायाऽऽद्यग्रहणं चरितार्थम् । द्वितीयादिकं प्रति तु तस्यान्यथासिद्धत्वमित्याशयः । परन्तु वेगाधीनकर्मणामूर्ध्वतिर्यगादिदेशसंयोगं प्रत्यपि हेतुतया वृन्तच्युतफलादीनामधोदेशसंयोग एव जायत इति नियमो गुरुत्वप्रयोज्य इति द्वितीयादिपतनस्यापि गुरुत्वजन्यत्वमभ्युपगन्तव्यम् । उक्तञ्च भाष्ये, 'तत्राद्यं गुरुत्वात्, द्वितीयादीनि तु गुरुत्वसंस्काराभ्याम्, इति । करादिधृतवस्तुनः, प्रसारितकरादेः, ज्यानिर्मुक्तशरादेश्च पतनाभावः क्रमेण पतनप्रतिबन्धकसंयोग,प्रयत्न,वेगप्रयुक्तोऽवसेयः ॥

दि—**संयोगासमवधानकालीनेति ।** संयोगपदमत्र क्रियाजनकसंयोगविशेषपरम्, तेनाकाशसंयोगमादाय न पक्षाप्रसिद्धिः । द्वितीयादिपतने वेगस्यासमवायिकारणत्वमते संयोगपदं वेगस्याप्युपलक्षकम्, तेन न वेगमादाय सिद्धसाधनम् ॥

सु—**चेतीति ।** 'चेत्यर्थः' इति पाठः । **तद्दर्शयतीति ।** 'तं दर्शयति' इति साधुः पाठः । **द्रवत्वमितीति ।** एतच्च प्रक्षिप्तम् ॥

दि—**स्नेहसहितमितीति ।** स्नेहसाहित्यस्य कारणतावच्छेदकत्वभ्रमं वारयति—**तच्चेत्यादिना । विनिगमनाविरहेणेति ।** इदञ्च करकादौ द्रवत्वमस्ति, तत्प्रत्यक्षमेवादृष्टविशेषः प्रतिबध्नातीति मतमनुसृत्य । तत्र द्रवत्वं नोत्पद्यत इति भाष्यानुसारे तु करकादिनिष्ठस्नेहेन संग्रहादर्शनाद्द्रवत्वस्यापि सहकारिताऽवश्यं वाच्येति न विनिगमनाविरहावकाशः । तर्ह्यस्मिन् पक्षे स्नेहस्य द्रवत्वेनान्यथा

सिद्धिरेवेति चेन्न, कारणत्वेन प्रामाणिकव्यवहाराभावस्यैवान्यथासिद्धित्वेन स्नेहे तद्व्यवहारसत्त्वादन्यथासिद्ध्यभावात् । अत्रेदमवधेयम्—स्नेहसांसिद्धिकद्रवत्वयोरन्य तरस्य कारणतायां विनिगमकाभावेपि तयोः स्वाश्रयसंयोगसम्बन्धेनैव संयोगविशे षात्मकसंग्रहे निमित्तत्वं वक्तव्यम्, तदपेक्षया लाघवात् संयोगेन जलस्यैव हेतुत्वं युक्तम्। करकात्वेन प्रतिबन्धकत्वमङ्गीकृत्य करकया संग्रहापत्तिवारणन्तूभयोस्समान मिति ॥

मु—तेनेति । एतदुत्तरं 'द्रुतसुवर्णादिना न संग्रहः' इति पाठः ॥

स्नेहं निरूपयतीति । एतदुत्तरं 'स्नेह इति' इति प्रतीकपाठो भ्रष्टः । असा विति । अत्र 'सः' इति ताळीग्रन्थपाठः । अपकृष्टस्नेहोपीति । अत्र 'अपकृष्ट स्नेहं हि जलं वह्निं नाशयतीति भावः' इति क्वचित् पाठः । नाशयतीति । तथाच वह्निनाशकतावच्छेदकं न जलत्वम्, किन्तु अपकृष्टस्नेहवत्त्वमिति भावः । प्रकर्षापकर्षौ च स्नेहगतौ जातिविशेषौ । जले वैजात्यमङ्गीकृत्य तेन रूपेण जलस्य हेतुत्वम्, लाघवादिति केचित् । तन्न, तादृशवैजात्यस्य प्रत्यक्षत्वापत्तेः ॥

भा—स्थितिस्थापकभावने इति । सर्वत्र स्थितिस्थापक इत्यत्र 'स्थितस्थापक' इति पाठः । संस्कारभेदाविति वचनविपरिणामेनानुषङ्गः । संस्कारभेदः संस्कारत्वव्याप्यधर्मावच्छिन्नः । यत्तु तादृशधर्म इत्येवार्थः, वेगादिपदं भावप्रधानमिति मतम्, तन्न चारु, वेगादिप्रतिपादकोत्तरग्रन्थस्वारस्य भङ्गात्। मूर्तमात्र इति । मात्रशब्दोऽत्र न कार्त्स्न्यार्थकः, वेगानधिकरणशिलोच्चयादेः प्रसिद्धत्वात्, किन्त्ववधारणार्थकः । तथाचामूर्तावृत्तिः यत्किञ्चिन्मूर्तवृत्तिरित्यर्थः रूपाद्यतिव्याप्तिवारणाय अमूर्तवृत्त्यवृत्तिमनोवृत्तिवृत्तिजातिमानित्यर्थो विवक्षितः । एता दृशजातित्वेन वा, वेगत्वत्वेन वा लक्षणत्वं वेगत्वस्येत्यन्यदेतत् ॥

---

उभयोः समानमिति । करकायां द्रवत्वानङ्गीकर्तृमते तु करकया संग्रहवारणाय परम्परासम्बन्धेन द्रवत्वस्यैव हेतुत्वमुचितम्, लाघवादिति बोध्यम् ॥

प्रभाकृन्मतं दूषयितुमुपन्यस्यति—यश्विति । अमूर्तवृत्त्यवृत्तीति । इदञ्च संख्या त्वमादायातिव्याप्तिवारणाय । रूपत्वादिकमादायातिव्याप्तिवारणाय मनोवृत्तिवृत्तीति । क्रिया त्वमादायातिव्याप्तिवारणाय गुणत्वमपि निवेश्यम् । वेगत्वत्वेनेति । वेगत्वत्वं वेगत्वनिष्ठ द्वतयक्तित्वम् । अन्यदिति । प्रकृतमात्रोद्भावनीयादन्यदित्यर्थः । पृथिव्यादिलक्षणेष्वप्युक्तशङ्कायाः



मु—मूर्तमात्र इतीति । 'कर्मज इति' इति पाठः । नोदनजनितेनेति । नोदनमत्र प्रयत्नवदात्मसंयोगरूपं बोध्यम् । कर्मणा चेष्टारूपकर्मविशेषेण । इत्थञ्च मन्दसञ्चारेण वेगानुदयेपि न क्षतिः । व्याख्येयं 'शरीरादौ' इति पाठमनुसृत्य । 'शरादौ' इति ग्रन्थपाठे भाष्यानुसारिणि तु आकृष्टमुक्तज्यया यः शरसंयोगः, स एव नोदनपदार्थोऽत्रावसेयः ॥

दि—कर्मनाशकस्योत्तरसंयोगस्येति । प्राप्यत्वेनाभिमतदेशसंयोगस्ये त्यर्थः । इदञ्चान्तरालिकपवनसंयोगादीनां न शरकर्मादिनाशकत्वमित्यभिप्रायेण । स्वजन्यसंयोगसामान्यस्य कर्मनाशकत्वपक्षे दर्शितसंयोगा एव कर्मनाशकाः । कर्मा न्तरोत्पादकस्तु वेग इति बोध्यम्। पक्षयोरेतयोर्द्वितीय एव भाष्यकाराभिमतः। 'बहूनि कर्माणि क्रमशः । कस्मात्, संयोगबहुत्वात्' इति कण्ठोक्तेः । पूर्ववेग नाश इति । इदमपि 'एकस्तु संस्कारोऽन्तराले कर्मणोपेक्षाकारणाभावात्' इति भाष्याननुसारि। भाष्यवाक्यस्यायमर्थः—कर्म सर्वमपि वेगं न जनयतीत्यनुभवसिद्धम्। अतः कर्मणः सहकारीणि प्रयत्नसंयोगविशेषादीनि स्वीकरणीयानि। अन्तराले इष्वादौ तदभावान्न तत्र कर्मणा वेगो जायेतेति प्रथमशरकर्मनिमित्तकः संस्कार एव यावत् पतनमनुवर्तत इति । परन्त्विषुवेगस्याऽपतनमेकत्वे तत्रानुभूयमानतारतम्यस्य नोपपत्तिरिति वेगनानात्वं दिनकरभट्टेनाभ्युपगतमित्यवसेयम् । नाशकान्तराभावा दिति । ननु मास्त्वन्तराले कर्मनाशः, कर्मोत्पत्तिश्चेति चेन्न, उत्कृष्टापकृष्टनाना वेगोत्पादानुपपत्तेः । उत्तरसंयोगेनैवेति । येन पवनादिसंयोगेन पूर्वकर्मनाशः, तेनैवोत्तरकर्मोत्पत्तिस्सम्भवतीत्यर्थः । तत्पूर्वमिति । स्वजनितेन वेगेन पूर्वकर्मणस्तृतीय क्षणे नाशस्य तदनन्तरक्षणे कर्मोत्पत्तेश्च स्वीकार इत्यर्थः । अलं वेगेनेति । अलं वेगस्य कर्मनाशकत्वतज्जनकत्वाभ्यामित्यर्थः । यद्वा, कर्मातिरिक्तवेगपदार्थ एव प्रमाणा भाव इत्यर्थः । प्रथमपक्षे कर्मजनकतयेत्यादेः कर्मजनकत्वप्रकारकवेगविशेष्यकप्रत्यक्ष मेव वेगस्य कर्मजनकत्वे प्रमाणमित्यर्थः । सिद्धे च जनकत्वे कर्मवति कर्मान्तरानु त्पत्त्या पूर्वकर्मनाशोऽभ्युपेयः । स च वेगेन, संयोगेन वेत्यन्यदेतदित्याशयः । आहु

---

सम्भवादिति भावः ॥

इति कण्ठोक्तेरिति । संयोगबहुत्वाद्बहूनि कर्माणीत्युक्त्या संयोगस्य कर्मनाशकत्वं न वेगस्येति लभ्यत इति भावः ॥

रित्यस्वरसोद्भावनम्। आन्तरालिकपवनादिसंयोगानां न कर्मोत्पादकत्वम्, तत्रत्य मूर्तान्तरेष्वपि कर्मोत्पादापत्तेः। तच्चानुभवविरुद्धमितीषौ कर्मान्तरान्यथानुपपत्त्यापि वेगसिद्धिरसम्भवतीति ॥

**सु**—'अतीन्द्रिय इति' इति प्रक्षिप्तम्। **स्थितस्थापकसाध्यत्वादिति।** स्थितस्थापकः सिद्ध्यतीति शेषः। **तदप्रमाणमिति।** अवनामितादेः ऋजुभाव सम्पादको हि स्थितस्थापकः। जलादाववनामनादेरदृष्टत्वान्न तत्र तत्कल्पने बीजमिति भावः ॥

**दि**—क्रियां प्रत्याकृष्टत्यक्तशाखागतां स्थितस्थापको न हेतुः, वेगेनान्यथा सिद्धत्वादित्याक्षेपं परिहरति—**वेगस्य त्विति।** इत्थञ्च यथापूर्वसंयोगजनक क्रियैवात्र पक्ष इति सासमवायिकारणकत्वानुमितौ वेगेन न सिद्धसाधनमिति स्थित स्थापकसिद्धिर्निष्प्रत्यूहेति भावः। **स्थितस्थापकश्चेति।** चकारोत्तरं 'क्रियाविशेष जन्यः' इति च केषुचिद्ग्रन्थेषु दृश्यते। क्रियाविशेषः पूर्वदेशविभागजनिका आकर्षण पदवाच्या क्रिया। **स्वजन्यक्रियानाश्य इति।** जनितायां क्रियायां सिद्धप्रयोजन तया स्वफलेन नश्यतीति भावः। **मूले उक्तप्रायमिति।** अनुक्तसमुच्चायकेन अपिशब्देन विवक्षितमित्यर्थः। इदमत्रावधेयम्—स्थितस्थापकं प्रक्रम्य 'नित्यत्वा नित्यत्वनिष्पत्तयोऽस्यापि गुरुत्ववत्' इति वदद्भिः प्रशस्तपादाचार्यैः परमाणुगतस्य स्थितस्थापकस्य नित्यत्वम्, जन्यस्य तस्य कारणगुणपूर्वकत्वमाश्रयनाशमात्रनाश्यत्वञ्च प्रतिपादितम्। तद्वचनमनादृतवतां नव्यानां मतमेव दिनकरभट्टेन दर्शितम्। मूल मुक्तावलीपङ्क्तयस्तु भाष्यानुसारेणापि सुघटाः। स्पन्देपीत्यत्रापिशब्दश्चावयविस्थित स्थापकस्य समुच्चायक इति ॥

**सु**—**असौ संस्कार इति।** एतच्च 'स्मरण इति' इति प्रतीक धारणात् परं पठनीयम्। 'स्मरण' इत्यादिमूलस्य प्रमाणप्रदर्शनपरत्वं स्पष्टयितुं यत

---

**सिद्ध्यतीति।** सिद्धिप्रकारश्च, आकृष्टशाखादीनां 'पूर्वगमनं सासमवायिकारणकं कर्मत्वादिति ॥



इत्यादिपूरणेनार्थमाह—**यतः स्मरणमिति।** अनुभव इत्यादिः इति प्रभा स्पष्टम्। यच्छब्दो बुद्धिस्थवाची। तस्य णिजन्तजनिधात्वर्थे उत्पत्तिप्रयोजकत्वेऽभे नान्वयः। विभक्त्यर्थो बाऽभेदः। **अतः** स्मरणप्रत्यभिज्ञोत्पत्तिप्रयोजकत्वात् **कल्प्यत इति।** अनुभवः सव्यापारकः स्मरणादिप्राक्काले वर्तमानध्वंसप्रतियोगित्वे राति स्मरणादिजनकत्वेन व्यवहारविषयत्वादित्यनुमानाकारः। अत्र सामान्यमुखव्याप्तौ कपालसंयोगादौ घटादिजनके व्यभिचारवारणाय सत्यन्तम्। अत्र हेतूच्छित्तिरूप तर्कं दर्शयति—**विनेति।** अनुभवे पूर्वत्वविशेषणं सामर्थ्याभावे हेतुगर्भम् ॥

**दि**—**संसर्गाभावत्वावच्छिन्नकारणतेति।** इदञ्च प्राचीनमतानुसारेण। नव्यमते त्वत्यन्ताभावत्वावच्छिन्ना सा। अत्यन्ताभावत्वञ्च संसर्गाभावत्वाघटितमनु योगिताविशेषरूपं बोध्यम्। **वक्तुमशक्यत्वादिति।** ननु नियतोद्बोधकस्थलेपि वस्तु विशेषदर्शनत्वादिना न कारणत्वसम्भवः, यदा यदा तद्वस्तुदर्शनम्, तदा तदा तत्सम्बद्धवस्त्वन्तरस्मरणमित्यनुभवाभावादन्वयव्यभिचारात्, अतस्तत्रापि तद्व्यक्तित्वेनैव हेतुत्वं फलबलात् कल्प्यम्, इत्थञ्च नोक्तदोष इत्यत आह—**वस्तुतस्त्विति।** यद्वा, नियतोद्बोधकस्थले गत्यन्तराभावात्संस्कारव्यक्तिकल्पनेपि न सर्वत्र संस्कारस्य व्यापारत्वसिद्धिरित्यत आह—**वस्तुतस्त्विति। अपूर्वसाधकयुक्त्येति।** उपेक्षात्वस्यानु गतस्याभावात् यत्र दशोपेक्षाज्ञानानि, तेभ्यः स्मरणवारणाय तत्तदुपेक्षाज्ञानभेदकूट वत्त्वं स्मरणकारणतावच्छेदककोटौ निवेशनीयम्, तत्र च विशेषणविशेष्यभावे विनि गमनाविरहेण महागौरवम्। संस्कारस्वीकारे चोपेक्षाज्ञानानां तत्पूर्वक्षणे मेलनासम्भवेन

---

सम्भवति सार्थकत्वे निरर्थकत्वकल्पनमनुचितमित्यत आह—**विभक्त्यर्थो वेति।** **उत्पत्तिप्रयोजकत्वादिति।** स्मरणप्रत्यभिज्ञानोत्पत्तिप्रयोजकत्वं स्मरणप्रत्यभिज्ञाहेतुत्वरूपम्। प्रभोक्तं पूर्वत्वविशेषणवैयर्थ्यं परिहरति—**अनुभवेति** ॥

**अनुयोगिताविशेषरूपमिति।** तथाच ध्वंसप्रागभावव्यावृत्तायास्तस्याः कारणताव च्छेदकतया न तत्प्रतियोगिनः प्रतिबन्धकत्वापत्तिः, न वा लाघवानवकाश इति भावः। ननु यत्र स्थलविशेषे यदा यदा तद्वस्तुदर्शनम्, तदा तदा तत्सम्बद्धवस्त्वन्तरस्मरणं जातम्, तत्र वस्तुविशेषदर्शनत्वेनैव हेतुतया उक्तदोष इत्यत आह—**यद्वेति। अनुगतस्याभावादिति।** चाक्षुषत्वादिना साङ्कर्येण आंशिकत्वेन च जातित्वासम्भवादिति भावः। **मेलनासम्भवेनेति।** ज्ञानस्य क्षणिकत्वादिति भावः। नन्वस्तु संस्कारकारणतावच्छेदककोटावेकैकस्यैव भेदस्य

तत्तदुपेक्षाभिन्नज्ञानानामेव कारणत्वं सुवचमिति युक्तिरवसेया। अधिकमदृष्टग्रन्थे द्रष्टव्यम् ॥

**मु—संस्कारजन्यत्वेन स्मृतित्वापत्तिरिति।** नच संस्कारजन्यत्वं संस्कारध्वंसे कालविधया घटादौ चास्तीति स्मृतित्वे संस्कारजन्यत्वव्यापकत्वाभावात् कथमियमापत्तिरिति वाच्यम्, भावनात्वावच्छिन्नजनकतानिरूपितजन्यत्वस्य विवक्षितत्वात्। तस्य च स्मृतित्वव्याप्यत्वे बाधकाभावादित्याशयः। **अप्रयोजकत्वादिति।** तर्हि ज्ञानेषु केषाञ्चित् स्मृतित्वम्, केषाञ्चित् प्रत्यभिज्ञानत्वमित्यत्र किं तन्त्रमिति चेत्, सामग्रीभेद एव। तथाहि प्रत्यभिज्ञात्वे इन्द्रियसहकृतसंस्कारजन्यत्वम्, स्मृतित्वे तदसहकृततज्जन्यत्वं नियामकम्, यथा वेगसहकृतक्रियाजन्यत्वमभिघातत्वे, तदसहकृतक्रियाजन्यत्वं नोदनत्वे। **कल्प्यत इति।** तथाच संस्कारजन्यत्वमेव स्मृतित्वे तन्त्रमिति लाघवं बोध्यम् ॥

**दि—इति समानमिति।** नच स्मृतिं प्रति उद्बोधकत्वेन, संस्कारत्वेन च कार्यकारणभावस्तत्रापि क्लृप्त इति न समानत्वमिति वाच्यम्, तत्तदुद्बोधकस्य तत्तत्स्मृतिं प्रति प्रत्येकमेव हेतुतया अधिकस्मृतिव्यक्तिकल्पनेऽधिककार्यकारणभावकल्पनाया अप्यावश्यकत्वात्। एतत्सूचनायैव स्मृतावित्यनुक्त्वा अन्तराकल्पनीयस्मृतिव्यक्तावित्युक्तम्। प्रत्यभिज्ञाया लौकिकप्रत्यक्षरूपायाः पूर्वं स्मरणं न सम्भवति, लौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धिकायाः सत्त्वादित्यादि यदत्र प्रभाकारैर्दूषणमुद्भावितम्, तदपेशलम्, चक्षुस्संयोगादिरूपनिर्विकल्पकसामग्रीकाले स्मरणोत्पत्तौ बाधकाभावात्। सामग्र्यभावरूपकारणस्य कार्यसहभावेन कारणत्वानङ्गीकारात्। अन्यथा अनुमित्याद्युपधायकस्मरणात्मकपरामर्शादेरसम्भवापातात्। इदन्तु चिन्त्यम्। सोऽयमित्यादिप्रत्यभिज्ञायां तत्तायाः प्रकारतया भानात् तत्पूर्वं तत्तारूपविशेषणज्ञानस्यावश्यकतया तत्तास्मृतेरपरिहार्यत्वात् स्मृतिजन्यत्वं प्रत्यभिज्ञाया नियतम्। नच यत्र स देवदत्त इदानीमत्रायास्यतीत्यादिवाक्यजन्यशाब्दबोधोत्तरं सोऽयमिति प्रत्यक्षम्, तत्र

---

निवेशः, स्मरणकारणतावच्छेदककोटौ तु भेदकूटनिवेश आवश्यकः, तत्पूर्वं तत्तदुपेक्षाज्ञानभेदविशिष्टानां मेलनसम्भवादित्याशङ्क्याह—**अधिकमिति** ॥

**बाधकाभावादिति।** ननु प्रतिबन्धकाभावरूपकारणस्य कार्यसहभावावश्यकतया कथं दर्शितसामग्रीरूपप्रतिबन्धकसत्त्वे स्मृतिरूपकार्योत्पाद इत्याशङ्कायामाह—**सामग्र्यभावेति** ॥



तत्तास्मृतिकल्पनन्नावश्यकमिति वाच्यम्, तत्र तत्तासंस्कारस्योद्बोधकसहितस्य हेतुत्वकल्पनाया अप्यनावश्यकत्वात् तत्र प्रत्यभिज्ञात्वानङ्गीकारस्यैव युक्तत्वादिति ॥

**भा—**'यागादिगङ्गास्नानादिव्यापारः' इति पाठः ॥

**दि—शरीरेन्द्रियादेरिति।** आदिना कुसुमचन्दनादिविषयपरिग्रहः। **देवतोद्देश्यकेति।** 'अग्नये इदं न मम' इत्यादिरिच्छाकारो बोध्यः। **देवतास्वत्ववद्विशेष्यकत्वमिति।** त्यज्यमानद्रव्ये देवतायाः स्वत्वं जायत इति मतेनेदम्। न जायत इति मते त्वाह—**शब्दमयी देवतेति। विषयत्वमुद्देश्यत्वमिति।** इदञ्च द्रव्यविशेष्यकेच्छात्वघटकद्रव्यविशेषणम्, न तु पूर्ववदिच्छाविशेषणमित्यवसेयम्। **मूल्यग्रहणं विनेति।** विक्रेतरि दातृत्वव्यवहारपरिहारायेदम्। **पित्रपेक्षया यागत्वेनेति।** एकस्मिन् स्वत्वद्वयानङ्गीकारात्तत्र त्यक्तद्रव्ये पितृस्वत्वस्य स्वीकर्तुमशक्यत्वात्। **इदम्** जातिविशेषत्ववचनम् ॥

**मु—एकत्राजनकत्वमिति।** विघ्नध्वंसादेः समाप्त्यादिकारणत्वे ध्वंसप्रतियोगिनः तत्र प्रतिबन्धकत्वस्यैव दृष्टत्वादित्याशयः। **मानाभावादिति।** यत्र ध्वंसस्य संसर्गाभावत्वेन हेतुत्वम्, तत्रैव प्रतियोगिनः प्रतिबन्धकत्वनियमादत्र च ध्वंसत्वेनैव हेतुत्वादिति भावः। **फलानन्त्यमिति।** फलं स्वर्गः तदानन्त्यं तदानन्त्यापत्तिरित्यर्थः। आनन्त्यञ्च स्वर्गप्रागभावसमानाधिकरणस्वर्गसामान्यकत्वम्। एवमन्यत्रापि। **कालविशेषस्येति।** यागादिजन्यापूर्वोत्पत्त्यव्यवहितोत्तरं स्वर्गापत्तिवारणाय कालविशेषस्य सहकारिता सर्वैरभ्युपगन्तव्येति न स्वपक्षे गौरवावकाश इति भावः ॥

**दि—वस्तुतस्त्विति।** अथ 'कर्मनाशाजलस्पर्शादिना नाश्यस्त्वसौ मतः' इति कारिकयैव यागव्यापारो न ध्वंसः, किन्त्वपूर्वापरपर्यायो धर्म एवेति स्पष्टमभिधास्यते, तत् किमर्थं प्रकारान्तरेणापूर्वस्य यागव्यापारत्वसाधनक्लेश इति चेन्न, तस्याः कारिकाया अपूर्वसाधकत्वे अप्रामाण्यशङ्कोदयात्। तथाहि, तन्मूलभूतं हि 'कर्मनाशाजलस्पर्शात्' इत्यादिस्मृतिवचनम्, तत्र च 'धर्मः क्षरति' इत्यस्य यागादि

---

**इत्यादिस्मृतिवचनमिति।** 'कर्मनाशाजलस्पर्शात् करतोयाविलङ्घनात्। गण्डकीबाहुतरणात् धर्मः क्षरति कीर्तनात् ॥' इति सम्पूर्णं स्मृतिवचनम् ॥

क्रिया कर्मनाशाजलस्पर्शादिसत्त्वे फलन्न जनयतीत्येवार्थः, न तु तादृशक्रियाजन्य पदार्थः नश्यतीति । नचैवं क्षरतेर्लाक्षणिकत्वापत्तिरिति वाच्यम्, यागादिक्रियायां प्रसिद्धरूढिमतो धर्मपदस्यालौकिकेऽर्थे तवापि लक्षणाया आवश्यकत्वात्। चलनविशेषार्थकक्षरतेः नाशेपि लाक्षणिकत्वस्यैव सम्भवाच्च । कर्मनाशाजलस्पर्शादिविशिष्टान्य यागत्वेन स्वर्गहेतुत्वाच्च तद्विशिष्टयागादीनां स्वर्गाजनकत्वोपपत्तिः। वैशिष्ट्यञ्च स्वानुकूलकृतिविशिष्टकृतिजन्यत्वसम्बन्धेन । कृतौ तादृशकृतिवैशिष्ट्यञ्च स्वपूर्वकालावच्छिन्न स्वसमानाधिकरणत्वसम्बन्धेनेति दर्शितस्मृतिवचनोपपत्तौ धर्मस्य कारिकया नाश्यत्वोक्तिरसङ्गतेति । इत्थञ्च प्रकारान्तरेणापूर्वसिद्ध्युपक्रमस्सफल एवेति । **एकत्र** अपूर्वकारणतावच्छेदककोटौ । ननु तत्र प्रथमकीर्तनविषयभिन्नयागत्वं द्वितीयादिकीर्तनविषययागेषु, द्वितीयकीर्तनादिविषयभिन्नयागत्वं प्रथमतृतीयादिकीर्तनविषययागेष्विति रीत्या दशानामपि कीर्तितयागानां कारणतावच्छेदकविशिष्टत्वमेवेत्यपूर्वोत्पत्तिरनिवारितैवेत्याक्षेपं परिहरति—**यादृशेति । तदानीमभावादिति ।** यावन्तः कीर्तितयागाः, प्रत्येकं तद्भिन्नयागत्वेनापूर्वं प्रति नानाकारणताः स्वीक्रियन्ते। दण्डचक्रादिन्यायेन सर्वकारणताश्रयसमवधानञ्च कार्यजननेऽपेक्षितम्। इत्थञ्च दशकीर्तित यागस्थले येनापूर्वमापाद्यते, तत्कीर्तितभिन्नयागस्याप्यव्यवहितपूर्वमभावादपूर्वोत्पत्त्यापत्तिविरहात्। अकीर्तितयागस्थले तु स एव तत्तत्कारणतावच्छेदकभेदविशिष्ट इत्यपूर्वोत्पत्तिरिति भावः । नन्वस्त्वपूर्वकारणतानामवच्छेदककोटावेकैकस्यैव भेदस्य निवेशः, स्वर्गकारणतावच्छेदककोटौ तु भेदकूटनिवेश आवश्यकः, तत्पूर्वमेकैकभेद विशिष्टानां दशानामपि मेलनसम्भवादित्याक्षिपति—**नचेति । कीर्तितभेदानामनिवेशादिति ।** यागत्वेन स्वर्गत्वेन कार्यकारणभावेपि क्षत्यभावादिति भावः । प्रकृतं ध्वंसस्याव्यापारत्वमुपसंहरति—**कीर्तितयागादिति** ॥

**सु—अपेक्ष्येति ।** एतदुत्तरम् 'एकमेवापूर्वं कल्प्यते' इति पाठः । नन्वस्तु ध्वंसस्य व्यापारत्वाङ्गीकारापेक्षया लाघवादपूर्वसिद्धिः, कस्यापि व्यापारत्वं नाङ्गीक्रियत इत्यभिप्रायेण शङ्कते—**ननु ध्वंसोपीति** ॥

**दि—न त्वसमवायिकारणस्येति ।** यद्यपि कपालसंयोगादीनामपि कार्यकालवृत्तित्वघटितमेव कारणत्वम्, अन्यथा द्रव्योत्पत्तिक्षणे कपालान्तरक्रियाजन्य



विभागाद्यत्रासमवायिकारणनाशः, तत्र द्वितीयक्षण एव द्रव्यनाशापत्तेः, तथापि पाकज रूपादिकं प्रति तेजस्संयोगरूपासमवायिकारणस्य तथैव कारणत्वमित्यत्र मानाभाव इत्याशयः। **उत्पन्नत्वादिति ।** उत्पन्नत्वान्न प्रतिबन्धः, विनष्टत्वान्न नाश इति योजनीयम्। **एवमग्रेपीति ।** अधर्मस्य प्रायश्चित्तादिनाश्यत्वेपीत्यर्थः ॥

**सु—इति भाव इति ।** एतदनन्तरम् 'एतेन' इत्यादिः 'लक्ष्यते' इत्यन्तो ग्रन्थः प्रक्षिप्तः, अव्याख्यातत्वात्, प्राचीनताळीग्रन्थेष्वदर्शनाच्च। अस्तीति पक्षमवलम्ब्य तु व्याख्यायते। **एतेन** यागादिव्यापारत्वेनापूर्वसिद्ध्या यागादेः स्वर्गफलकत्वसम्भवेन । प्रीतिरेवेत्येवकारेण स्वर्गादेस्तत्फलत्वव्यवच्छेदः । विनिगमनाविरहेणापि देवताप्रीतेर्न फलत्वमिति दर्शयति—**गङ्गास्नानादाविति । असम्भवाच्चेति ।** जलरूपिण्या गङ्गाया अचेतनत्वादित्याशयः। अधिष्ठात्र्याश्चेतनत्वमभ्युपगम्याह—**देवताया इति। अनुद्देश्यत्वादिति ।** प्रवृत्त्युद्देश्यस्यैव फलत्वादिति भावः। भवन्मते स्वर्गादेरिव प्रीतेरुद्देश्यत्वं सम्भवतीत्याक्षेपमनुचिन्त्याह—**सुखरूपत्वेनेति । तदसम्भवादिति ।** फलत्वस्य जन्यत्वघटितत्वादिति भावः। तर्हि प्रतिमाराधनादीनां विष्णुप्रीतिफलकत्वोक्तिः कथं सङ्गच्छत इति चेदाह—**तेन विष्णिवति । पराभिमतेति ।** ये भगवतोपि मायापरिणामरूपामन्यादृशीं वा जन्यप्रीतिमभ्युपगच्छन्ति, तदभिमतेत्यर्थः। तेषामपि यागादेः स्वर्ग एव परमं फलमित्यङ्गीकर्तव्यम्, देवताप्रीतेरपुरुषार्थतया स्वर्गसाधनताज्ञानेनैव तत्रेच्छासम्भवादिति बोध्यम् ॥

**दि—**'धर्मः क्षरति' इति स्मृतेः कारिकासमानार्थकत्वं व्यवस्थापयितुं शङ्कते—**धर्मः क्षरतीति । स्वध्वंससम्बन्धेनेति ।** नच स्पर्शादिध्वंसः शरीरे, स्वर्गश्चात्मनीति वैयधिकरण्यमिति वाच्यम्, अवच्छेदकताया एव स्वर्गनिष्ठप्रतिबध्यतावच्छेदकसम्बन्धत्वात्, तादृशस्पर्शाद्यनुकूलकृतेरेव प्रतिबन्धकत्वमित्यात्मान्तर्भावेण सामानाधि

---

**चेतनत्वमभ्युपगम्येति ।** अत एव 'चतुर्भुजां लिणेलाञ्च सर्वावयवशोभिताम् । रत्नकुम्भसिताम्भोजवराभयकरां शुभाम् ॥' इत्यादिनारदीयादिवचनसङ्गतिरिति भावः। अद्वैतमतानुसारेणाह—**मायापरिणामरूपेति ।** माध्वादिमताभिप्रायेणाह—**अन्यादृशीं वेति।** मनोवृत्तिरूपामित्यर्थः ॥

**आत्मान्तर्भावेणेति ।** एवञ्च दिव्यशरीरावच्छेदेनैव स्वर्गानुभूतेः पूर्वकल्पे वैयधिकरण्यमपरिहृतमेवेत्याक्षेपोपि निरस्तः ॥

करण्यसम्भवाच्च । **कल्पयितुमशक्यत्वादिति ।** ननु तदश्वमेधजन्यस्वर्गत्वेन तदश्वमेध कीर्तनत्वेन प्रतिबध्यप्रतिबन्धकभावासम्भवेपि 'वस्तुतस्तु' इति ग्रन्थव्याख्यावसरे दर्शित रीत्या स्वर्गोत्पादवारणान्नापूर्वसिद्धिरिति चेन्न, तत्रैव दत्तोत्तरत्वात् । तदनुरोधेनापूर्वसिद्धौ च 'धर्मेण पापमपनुदति', 'ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन', नाभुक्तं क्षीयते कर्म' इत्याद्यनेकप्रमाणैरदृष्टनाशस्यैव प्रतिपादनात् तद्गतिसाम्यादत्रापि क्षरतेर्नाश लाक्षणिकत्वस्यैव युक्तत्वात् । पूर्वन्तु वचनानामन्यथा व्याख्यानेऽपि यागव्यापारतया अपूर्वसिद्धिप्रकारः शिष्यबुद्धिवैशद्याय प्रकाशित इति सर्वमनाकुलम् । अथ प्रकृत स्यापूर्वस्य विभागादिकं दर्शयति—**तच्चापूर्वमिति ।** उभयत्वेन न हेतुत्वम्, किन्तु दण्डचक्रादिवत् सहकारित्वमेवेत्युक्तावप्यपूर्वमेकमेव सिद्ध्यतीत्याह—**दर्शपूर्णमासाभ्या मिति । विधीति । विधिप्रवृत्तिसमये** विधिवाक्यजन्यज्ञानाव्यवहितोत्तरकाले । **कल्पनादिति ।** दर्शपूर्णमासौ सव्यापारकौ पूर्वनष्टत्वे सति स्वर्गजनकत्वादित्यनु मानेन व्यापारस्यैकत्वे लाघवमिति लाघवज्ञानसहकृतेनैकापूर्वस्यैव सिद्धेरिति भावः । लाघवाभावमाशङ्क्य निषेधति — **नचैवमिति ।** दर्शपूर्णमाससाध्यापूर्वनिष्पत्तये षडपूर्वान्तराणि कल्पनीयानि, यागानां पूर्वं नष्टत्वादिति परमापूर्वपक्षे गौरवमेवेत्यर्थः । **फलमुखत्वादिति ।** परमापूर्वकल्पनोत्तरं तदुपपादकतयैव षडपूर्वान्तरकल्पनादित्यर्थः । तथाचेदं गौरवज्ञानं न पूर्वां परमापूर्वसिद्धिं प्रतिरुन्ध्यादिति भावः । षष्ठयागाव्यव हितोत्तरजायमानं षष्ठमपूर्वमेव परमापूर्वमस्त्वित्याक्षिपति—**नच पञ्चभिरिति । दक्षिणा सहकारेणैवेति ।** अन्यथा दक्षिणाशून्याभ्यामपि दर्शपूर्णमासाभ्यां स्वर्गोत्पादा पत्तेः । दक्षिणायाः सहकारितां प्रदर्शयितुं तां विशिनष्टि—**उत्तराङ्गेति ।** गत्य न्तरसत्त्वान्न वैजात्यकल्पनं युक्तिसहमिति मन्वानानां मतमाह—**दर्शत्वेनेति ।** अपूर्व संख्यां पक्षान्तरे दर्शयित्वा सप्तापूर्वीपक्षं व्यवस्थापयति—**अत्र त्रयात्मकेत्या दिना ।** पूर्वं लिङर्थविचारे श्राद्धविषये दर्शितरीतिमपूर्वेऽतिदिश्य दर्शयति—**इदञ्चेति । कर्तृनिष्ठमिति ।** यावन्नित्यनैमित्तिकानुष्ठानस्य स्वर्गफलकत्वादिति भावः । **भोक्तृनिष्ठमिति ।** पुत्रश्रेयःपितृप्रीत्यादेरर्थवादश्रुतस्यैव फलत्वादिति भावः । उद्दे श्यत्वस्य कारणतावच्छेदकसम्बन्धत्वान्न वैयधिकरण्यमिति पूर्वमेवावेदितम् ॥

---

अन्यथेति । नाशार्थकतयेत्यर्थः ॥



दि—**स्वर्गदेहारम्भकेष्विति ।** यागसम्बन्धिद्रव्यारम्भकेष्वित्यस्य समा नाधिकरणविशेषणमेतत् । तथाच यागसम्बन्धिद्रव्यारम्भकैरेवाणुभिः स्वर्गदेहारम्भ इति भावः । यागस्येच्छारूपत्वसिद्धान्तमनुसृत्याह—**यागकर्तरीति ।** द्वितीयपक्षं प्रति क्षिपति—**तन्नेति ।** इच्छाकारणम् इच्छासमानाकारकं ज्ञानं याग इत्येके । इच्छेति परे । तज्जन्या कृतिरित्यन्ये । पक्षत्रयेपि नोपपत्तिरिति दर्शयितुं ज्ञानेच्छादि रूपस्य यागस्येत्युक्तिः । ननु ज्ञानादेः स्थूलरूपस्यैवानुभवः, तस्य च स्वोत्तर वर्तिना गुणेन नष्टत्वान्नानुभवापत्तिरित्यत आह—**अन्यथेति ।** यागस्य क्रियात्व पक्षेपि स्थूलस्य तस्य स्वजन्यसंयोगनाश्यत्वान्न सदानुभवापत्तिरिति च वेदितव्यम् । **सर्वदाऽवस्थानप्रसङ्गादिति ।** ननु नेयमापत्तिः, यत्र क्रियादीनामाशुविनाशिनीनां कालान्तरभाविफलजनकत्वं वचनेनावगम्यते, तत्रैव सूक्ष्मरूपेणावस्थानकल्पनम्, न तु सर्वत्र, प्रमाणाभावात्, तच्च सूक्ष्मरूपं फलनाश्यमतो न सर्वदाऽवस्थानप्रसङ्गश्चेति चेत्, न किञ्चिदेतत् । किमिदं सूक्ष्मरूपं नाम । स्थूलाद्भिन्नमभिन्नं वा । भेदे तदेवा दृष्टादिपदवाच्यम् । अभेदे पूर्ववत् प्रत्यक्षापत्तिः । भेदश्चाभेदश्चैकत्रेति विप्रतिषिद्धम् । एतदनुसन्धायोक्तम्—**अलं विस्तरेणेति ॥**

मु—**अधर्मेतीति ।** 'अधर्म इति' इति पाठः ॥

दि—**गङ्गादीति ।** आदिनाऽमङ्गलवस्तुपरिग्रहः । दर्शनादिनेत्यत्रादि पदेन तत्सम्पर्कः, यागब्रह्महत्यादिनिखिलानुकूलनित्यकृतिश्च गृह्यते । **मिथ्याज्ञानेति ।** शरीरादावहम्बुद्धिरित्यर्थः । **वासना** संस्कारः । **मानाभाव इति ।** गङ्गादि चाक्षुषत्वेनैव धर्मादिहेतुत्वादीश्वरे चाक्षुषाभावात्, सम्पर्कस्यापि शरीरावच्छिन्नस्यैव धर्मादिहेतुत्वात्, अन्यथा गङ्गादितो दूरस्थितानामप्यस्माकं धर्माद्यापत्तेः, नित्यकृते रपि यागाद्यसाधारणकारणत्वाभावाच्च न धर्माद्यापत्तिरीश्वरस्येति भावः । यद्वा, 'जीववृत्ती

---

**यागसम्बन्धिद्रव्येति ।** हविराज्यादीत्यर्थः ॥

नन्वीश्वरस्य गङ्गादिसंयोगे सत्यपि तदनुकूलकृतिरूपसहकार्यभावादेव नादृष्टापत्ति रिति शङ्कां वारयितुमाह—**यागेति ।** नन्वीश्वरे धर्माद्यनुत्पत्तिरेव वासनाया हेतुत्वे मान मतो मानाभावोक्तिरसङ्गतेत्याशङ्कायां भावमाह—**गङ्गादिचाक्षुषेति ।** संसार्यदृष्टवशादीश्वरस्य शरीरमिच्छतां मते भगवतो दर्शनादिसम्भवादाह—**यद्वेति ॥**

त्विमौ इत्यनेन जीवत्वेनैव धर्मादिसमवायिकारणत्वस्य प्रदर्शितत्वात्तदभावादेवेश्वरे न धर्माद्यापत्तिरिति भावः। सिद्धे च वासनाया जनकत्वे लाघवादात्मत्वेनैव समवायि कारणत्वमित्यवसेयम् ॥

**मु—भोगस्येति।** भोगार्थकभुजधातोरित्यर्थः ॥

**भा**—प्रत्यक्षसिद्धं शब्दत्वमेव लक्षणं सुग्रहमित्यभिसन्धाय शब्दं विभजते—**शब्द इति।** वस्तुतस्तु कारिकेयं प्रक्षिप्तेति भाति। यतः 'अत्रेदं बोध्यम्' इत्यादिना दिनकरभट्टेन प्रभाकृता चाग्रे शब्दविभागादिप्रदर्शनं पुनरुक्ततादोषग्रस्तं स्यात् ॥

**मु**—नभोवृत्तिरित्यत्र नभश्शब्दार्थो मासविशेषः, वृत्तित्वञ्च कालिकेनेति भ्रमवारणायाह—**आकाशसमवेत इति। आद्यशब्देन बहिरिति।** 'आद्यशब्दस्य बहिः' इति साधुः पाठः। **अस्मिन्निति।** एतदुत्तरं 'कल्पे गौरवादुक्तम्' इति पाठः ॥

**दि**—उत्पन्नः क इत्यादिप्रतीतिस्तत्तद्वर्णव्यञ्जकवायुसंयोगविषयिणीत्युत्पादप्रतीतिप्रत्यभिज्ञयोरुभयोरपि प्रमात्वं वर्णनित्यत्वपक्षेप्यबाधमिति मीमांसकाक्षेपमपनुदति—**अत्र मीमांसका इति। विरुद्धधर्माध्यासः** असमानाधिकरणधर्मप्रकारकप्रत्ययः। नच बाधक इति योजना। नैवाभेदबाधक इत्यर्थः। तत्त्वाभावे हेतुं दर्शयति—**प्रत्यभिज्ञानेति।** वायुधर्मत्वे श्रोत्राग्राह्यतापत्तिं परिहरति—**श्रोत्रेणेति। ग्रहणसम्भवादिति।** तत्तत्पदार्थानां तत्तदिन्द्रियग्रहणयोग्यतायामदृष्टविशेषस्यैव नियामकत्वादित्याशयः। तारत्वादीनां शब्दधर्मत्वेपि न दोष इति दर्शयति—**य एव तार इति।** तथाचैकापेक्षमन्दत्वतारत्वयोरेव विरोध इति भावः। शब्दब्रह्मणो वस्तुत एकत्वाद्वर्णैक्यमिष्टमित्यत आह—**वस्तुतस्त्विति।** ननु वर्णत्वेन कण्ठताल्वाद्यन्यतमाभिघातत्वेन, अभिघातत्वव्याप्यजातिविशेषेण वा कार्यकारणभावस्य नैयायिकैरपि स्वीकारात् लौकिकविषयितया वर्णत्वं तज्जन्यतावच्छेदकमिति मीमांसकानां सुवचम्, इत्थञ्च कोलाहलप्रत्यक्षस्य वर्णत्वविषयकत्वान्न तत्प्रत्यक्षानुपपत्तिरित्यत आह—**अन्यथा**



**तुल्ययुक्त्येति। ध्वन्यात्मकेति।** इदं शब्दविशेषणम्। **उपान्त्यशब्देनेति।** एवञ्चेदन्त्यशब्दस्य क्षणिकत्वमापद्येत, तन्मास्त्वित्याशयेनाह—**उपान्त्यशब्दनाशेन वेति।** पूर्वकल्पे योग्यविभुविशेषगुणनाशकतावच्छेदककोटावुत्पन्नत्वान्तांशस्य न निवेशः, द्वितीये गुणत्वस्य न निवेशः। नव्यमते तु स्वोत्तरवर्तित्वविशिष्टं स्वमन्यद्वा नाशकम्। आद्यकल्पद्वये द्वित्वादिप्रत्यक्षस्य विशेषसामग्रीत्वान्नापेक्षाबुद्धेस्त्रिक्षणावस्थायित्वहानिः। तृतीये तु तस्या द्विक्षणावस्थायित्वमेवेष्टमिति संख्याग्रन्थे प्रत्यपादीति विवेकोऽत्रावसेय इति। **व्यक्त्यभेद एव विषयोऽस्त्विति।** यदौषधं मया कृतम्, तदेवेदमिति प्रत्यभिज्ञाया आकार इत्याशयः। **विरुद्धधर्माध्यासाहितभेदप्रत्ययस्य।** तद्भेदव्याप्यतदवृत्तिधर्मवत्तापरामर्शजन्यायास्तद्भेदानुमितेः ॥

**भानुमिति।** प्रणम्य परिभाव्य इति ल्यबन्तद्वयं नीत इत्यत्रान्वेति। यद्वा, प्रणमनपरिभावने पितृकृते प्रपूर्वकदिशधात्वर्थे उपदेशेऽन्वितः। मुक्तावलीकिरण इति ग्रन्थनाम। हारप्रभेत्यपि ध्वन्यते। सद्युक्तिभिः समीचीनाभिरुपपत्तिभिः, सम्यग्योजनैरिति च। दिनकरेण तन्नामकेन, सूर्येणेति च। करेण लिपिविन्यासक्रियाचतुरेण हस्तेन, रश्मिना च। प्रकाशपदवीं परेषां ग्रहणयोग्यताम्। इदमुभयत्र समानम्। प्रकाशपदवीं नीतस्सन्निति योजना। यथा हारमयूखस्सूरेण स्वकरसम्पर्केण प्रकाश्यमानः सहृदयानां मुदमुत्पादयति, तथाऽयं ग्रन्थः दिनकरभट्टेन तत्र तत्रोपपत्तीः प्रदर्श्य करेण विलिख्य प्रकाशितस्सन् सुधियां मुदं सम्पादयत्विति श्लेषोत्थापितोपमाध्वनिः। तेन च स्वग्रन्थस्य निर्दुष्टत्वं सहृदयहृदयावर्जकत्वञ्च वस्तु व्यज्यते। **सुधियां मुदेऽस्त्विति।** तथैव स्वायासः सफलो भवेदिति भावः। **मुक्तावली प्रकाश इति।** इदं स्वग्रन्थस्यापरनाम। तं भगवत्यर्पयति—**तेनेति।** नीलकण्ठः श्रीपरमेश्वरः, तदभेदेनाध्यवसितः स्वपिता च। सती दक्षसुता, तन्नाम्नी स्वमाता च। जगत्पित्रोः स्मरणरूपं परममङ्गलमप्यत्र कृतमिति मङ्गलान्तत्वमपि प्रथादिनिदानं सम्पादितमिति ॥

---

दूरान्वयक्लेशं परिहरिष्यन्नाह—**यद्वेति। सम्यग्योजनैरिति।** किरणविशेषणतया उपलक्षणे तृतीयेति भावः ॥

**प्रथादिनिदानमिति।** प्रथा प्रचुरप्रचारः। 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते' इत्यादिभाष्यवचनमत्र प्रमाणं बोध्यम् ॥

यस्याम्बैव गुरुर्बभूव विदुषी विद्याग्रहे ह्यादिमे
कुञ्जाख्यौ च विनिन्यतुस्तदनु यं काव्यादिके वत्सलौ।
प्रादाद्दुर्गमतर्कमार्गचरणे श्रीरामवर्मा नृपो
यस्मै दाक्ष्यमपारधीस्स शठकोपाचार्यवर्योपि च ॥

परीक्षिदपराख्येन तेनेयं रामवर्मणा।
कृता मोदाय कृतिनामर्प्यते कृष्णपादयोः ॥

इति महामहिमश्रीरामवर्मपरीक्षिद्धोश्रीमहाराजविरचितायां
सुबोधिन्यां
गुणपरिच्छेदः ॥

---

स्वोक्तावप्रामाण्यशङ्कां परिहर्तुं स्वस्य सद्गुरुमुखाद्यथावद्विदितशास्त्रार्थतां प्रदर्शयन्, गुरूणां स्वस्य ग्रन्थस्य च कीर्त्यनुवृत्तये नाम निबध्नन् स्वग्रन्थं भगवत्यर्पयति—यस्येत्यादि। अम्बा तन्नाम्नी मङ्कुराज्ञीति प्रसिद्धा जनन्येव। एवकारेणानन्यसौलभ्यं सूचयन्नात्मनो धन्यतां व्यञ्जयति। कुञ्जाख्याविति। 'कोच्चुकुञ्ञा'भिधः पाणिवादः, 'कुञ्ञा'ख्यः पारशवश्चेत्यर्थः। अत्र क्रमोपि विवक्षितः। प्रादादिति। अनेन दीयमानधनस्येव विद्याया आदाने निष्प्रयासता, स्वकीयस्यैव दानसम्भवेन गुरोर्यद्दाक्ष्यम्, तदेवात्मनीति तदन्यूनवैदुष्यञ्च ध्वन्यते। चरणे सञ्चारे। नृपः राजर्षिरिति प्रसिद्धो गोश्रीमहाराजः। प्रकरणग्रन्थं तन्निकटे, वादग्रन्थानाचार्यनिकटे चाधीतवानिति ज्ञायते। अत्राम्बागुरुस्मरणरूपं मङ्गलमध्यन्ते समाचरितमिति बोध्यम् ॥

# शुद्धपत्रम्।

| पुटम् | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २ | २२ | एतदनन्तरम् | एतत्स्थाने |
| ३ | १४ | तदापत्तेरिति | तदापत्तिरिति |
| ,, | १७ | हन्धातो | हन्धातु |
| ६ | २५ | संख्यायाञ्च | संख्यायां |
| ७ | २ | लम्भितं | लम्भितं |
| ,, | २१ | दिति। सामान्य | दिति सामान्य |
| ८ | २ | वच्छेदक | वच्छेदकतावच्छेदक |
| ,, | ३ | स्वोत्पत्थ | स्वोत्पत्त्य |
| ,, | २४ | विघ्नध्वंसं | दि—विघ्नध्वंसं |
| १२ | २ | पक्षतावच्छेदकत्वाद्धेतुत्वाच्च | पक्षतावच्छेदकत्वात् |
| १४ | २६ | त्याशङ्क्य | त्याशङ्क्य. |
| १८ | १ | कालीत | कालीन |
| २० | २०–२१ | वच्छिन्नं प्रत्येव | वच्छिन्नस्यैव |
| ,, | २३ | षाथत्वा | षार्थत्वा |
| २१ | ७ | दित्यके | दित्येके |
| २९ | १० | दिगाशा इति | दिगाशा मनः इति |
| ४१ | २२ | श्रयीभाव | श्रयिभाव |
| ४४ | २५ | व्यभिजारेण | व्यभिचारेण |
| ४५ | ८ | विभागात् | विभागकथनात् |
| ५३ | १४ | भावानङ्गी | भावाङ्गी |
| ५६ | १२ | यघटन | यत्वघटन |
| ६४ | ८ | धर्मद्वारा | धर्मिद्वारा |
| ,, | १३ | वृत्ती | वर्ती |
| ,, | १९ | खभिन्न | स्वभिन्न |
| ७२ | २३ | नाशकं | जनकं |
| ,, | २५ | नाश्यता | जन्यता |
| ,, | ,, | तद्गुण | तत्तद्गुण |
| ,, | २६ | तद्गुण | तत्तद्गुण |

| पृष्ठम् | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ७२ | २६ | तद्व्यक्ति | तत्तद्व्यक्ति |
| ७३ | २४ | कतृ | कर्तृ |
| ७४ | २४ | दश | देश |
| ७५ | ५ | चतुर्दश | चतुर्दशत्व |
| ७६ | १५ | निगन्ध | निर्गन्ध |
| ७७ | २२ | कालसम्बन्धित्व | वृत्तित्व |
| ८१ | १ | कारणत्वमात्र | कारणमात्र |
| ८३ | १ | दर्शनम्। तस्या | दर्शनम्—तस्या |
| ८४ | ६ | निघण्डौ | निघण्टौ |
| ,, | २२ | जलत्वस्येति | जलत्वस्य पृथिवीत्वादिनेति |
| ८५ | १४ | द्रव्यपदं | द्वितीयद्रव्यपदं |
| ८७ | १८ | नचेति | नच प्रथमेति |
| ९० | ३ | प्रयोजक | प्रयोजकत्व |
| ९६ | १७ | योगात् | योगः |
| ९८ | ४ | द्वयमिति | द्वयमिति तु |
| ,, | १५ | घटादिषु तं प्रति सम | घटादिषु सम |
| १०० | २ | जातिमत्त्वं | जातित्वं |
| ,, | २१ | गुणस्य | गुणत्वस्य |
| १०१ | १७ | प्रयोजकशङ्का | प्रयोजकत्वशङ्का |
| १०३ | १२ | सम्बधे | सम्बन्धे |
| १०४ | २० | करणवृत्ति | करणक्षणावृत्ति |
| १०८ | १५ | क्रियासहकारीति | क्रियाजनकमिति |
| ११० | ८ | घजन्यत्व | घन्यत्व |
| ११३ | | योगाचारमतम् | आत्मनिरूपणम् |
| ११५ | २० | विज्ञानस्य चे | विज्ञानस्येति चे |
| ११७ | ३ | वेदान्तिनां राद्धान्तात् | मम राद्धान्तात् |
| ,, | ९ | सिद्धि | सिद्धे |
| ,, | १७ | त्वदभिन्नः | त्वद्भिन्नम् |
| ११८ | १२ | जीवे च मुक्ति | जीवे मुक्ति |
| ११९ | ३ | सूक्ष्मभूतानि | सूक्ष्मभूतानि च |
| १२० | १८ | दर्पणस्य इत्यारभ्य पाठः इत्यन्तं प्रक्षिप्तम् | |



| पृष्ठम् | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १२० | २३ | घटादेरुपपन्नम् | घटादेरवभासस्योपपन्नम् |
| १२१ | १२ | त्वांशे | त्वांशः |
| १२२ | १७ | कूटस्य निर्विकल्पोत्तरमात्म | कूटस्यात्म |
| १२६ | ३ | निबेश | निवेश |
| ,, | १३ | निबेशे | निवेशे |
| १२७ | ११ | लिङ्गविषयक | लिङ्गाविषयक |
| १२८ | १ | वतर | वतार |
| १३४ | २७ | करणमित्यपि | कारणेत्यपि |
| ,, | ,, | कारणेप्वा | कारणेष्वा |
| १३५ | ६ | त्वादिति | त्वमिति |
| १३८ | १७ | भास्वय | भावस्य |
| १४३ | १५ | कथमि | कथमि |
| १५१ | २५ | च्छिन्नति | च्छिन्नेति |
| १५५ | २ | षष्ठयर्थ | षष्ठयर्थः |
| ,, | ८ | न्वयसम्भवात् | न्वयासम्भवात् |
| १५८ | १२ | संयोगाभावः | संयोगः |
| १६५ | १९ | यो यत्रति | यो यत्रेति |
| १६६ | ५ | बन्धकताकता | बन्धकता |
| १८२ | ६ | गगरी | गर्गरी |
| १८७ | २३ | ध्यया | घ्ध्या |
| ,, | २७ | विषयिता | विषयता |
| १८९ | १५ | मतेन | मतेन, |
| २०६ | १४ | दिति | दितीति |
| २०८ | १ | घटम | घटप |
| ,, | ९ | प्रकृत्यैक | प्रकृत्येक |
| २११ | ७ | पकारादि | घकारादि |
| २२० | २ | विर्णीताः | निर्णीताः |
| २३२ | २६ | स्वाश्रय | स्वाश्रय |
| २३५ | १९ | पृथक्त्वे | पृथक्त्वे |
| २३६ | २ | मुण्णे | मुण्णे |
| ,, | २७ | त्यनुगम | त्यननुगम |

| पृष्ठम् | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २३९ | २५ | वायूष्म | वायूष्ण |
| २४० | १६ | ञ्यणुकः | ञ्यणुकं |
| ,, | १७ | नीरसः | नीरसम् |
| ,, | २४ | पात्त | पत्ति |
| २४३ | २६ | त्योत्पत्ति | स्योत्पत्ति |
| २४४ | १४ | विभाग | विभागं |
| २४६ | ६ | इत्यभिप्रायेण... | दि—इत्यभिप्रायेण... |
| २५३ | २१ | बैशिष्ठ्यं | वैशिष्ट्यं |
| २५८ | ५ | केचित्त | केचितु |
| २५९ | २२ | द्धित्व | द्वित्व |
| २६० | १२ | धत्पादे | धुत्पादे |
| ,, | २० | धत्पाद | धुत्पाद |
| ,, | २३ | त्कर्षापकर्ष | त्कृष्टापकृष्ट |
| २६५ | ७ | इति। पठनीयम् | इति पठनीयम् |
| २६६ | ३ | द्वयुदासः, | द्वयुदासः। |
| २६७ | १ | क्लप्त | क्लृप्त |
| २७७ | १४ | शत | शतु |
| २८२ | १२ | दिलक्षणस्यैक | देरेक |
| २८३ | १४ | क्षम्, सम्ब | क्षं सम्ब |
| ,, | १५ | मात्, तस्य | मात् तस्य |
| ३०६ | १ | स्वष्टम् | स्पष्टम् |
| ३०७ | १३ | रयननु | रयमनु |
| ३१२ | ८ | प्यादा | त्यादा |
| ,, | २५ | तात्पय | तात्पर्य |
| ३२० | २३ | वैयथ्या | वैयर्थ्या |
| ३२१ | २१ | ववात्मिका | वस्त्वात्मिका |
| ,, | २६ | वृत्या | वृत्त्या |
| ३२७ | २५ | प्रवतक | प्रवर्तक |
| ३३३ | १४ | सञ्चारवृत्ति | सञ्चारावृत्ति |
| ३४४ | २५ | शक्त्यैक्यै | शक्त्यैक्ये |
| ३५२ | २७ | द्वतद्यक्तित्वम् | तद्वयक्तित्वम् |
| ३६१ | १३ | भेदेश्चाभेद | भेदश्चाभेद |